साधुः । सामविशेषस्य आदिसाम्नः सामवेदस्य आदौ हि षडोङ्कारा गीयन्ते । अतिप्रिये मनोज्ञे वाच्यलिङ्गः । तत्र यथा--दिव्यत्वव्यभिचारमेति न सखे न्युङ्खेयमस्याकृतिः ॥ २२ ॥ पुङ्खः० पुनाति पूयते वा पुङ्खः । "पूमुहोः पुन् मूर्ती च" (उ० ८६) इति खः । मङ्गलाचारे शराङ्गे च पुंक्लीबः । मङ्गलाचारे यथा-वधूवरं पुङ्खितमङ्गनाभिः । शराङ्गे यथा-तद्दन्ताङ्कितवालिकश्वरुधिरक्लिन्नाग्रपुङ्खं शरम् । प्रेङ्खा० । प्रेङ्खण प्रेङ्खा "कट" (५।३।१०६) इति अः । चतुर्षु अर्थेषु यथा-एषा प्रीणयति विशेषविदुषां प्रेङ्खा न केषां मनः ॥ २३ ॥ मुखमुपाये० । मह्यते मुखम् "महेरुश्चास्य वा" इति खे साधु । पुंक्लीबः । उपाये यथा--त्रसत्तुषाराद्रिसुतससंभ्रमस्वयंग्रहाश्लेषमुखेन निष्क्रयम् । प्रारम्भे यथा-विलेमे कः प्राणान् रणमुखमुखे यं मृगयसि । श्रेष्ठे यथा-स्याच्छैशवे मातृमुखस्तारुण्ये तरुणीमुखः । वृद्धभावे सुतमुखो मूर्खो नात्ममुखः क्वचित् । निःसरणे यथा-रथ्यामुखे प्रेङ्खति जीवितेशे । आस्ये यथा-नीरागा मृगलाञ्छने मुखमपि स्व नेक्षते दर्पणे । रेखा० रिख्यते रेखा "भिदादित्वात्" साधुः । अल्पके यथा-रेखामात्रमपि क्षुण्णदात्मनो वर्त्मनः परम् । छद्मनि यथा-स्थितः पुनर्यो भवभूतिरेखया स वर्तते संप्रति राजशेखरः । आभोगे यथा- आसीत्तस्या वदनकमले काऽपि लावण्यरेखा ।

मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः ।
रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपि ॥ २४ ॥

लेखो लेख्ये दैवते च लेखा राज्यां लिपावपि ।
वीङ्खा तु शूकशिम्बायां गतिभेदे च नर्तने ॥ २५ ॥

उल्लेखे यथा-चित्रेऽपि तादृशी रेखा यादृशी कर्पूराकृतिः ॥२४॥ लेखो लेख्ये दैवते च । लिख्यते लेखः । लेख्ये यथा-नखपदलिपयोऽपि दर्पितार्थाः प्रणिदधिरे दयितैरनङ्गलेखाः । दैवते यथा-सलेख-वर्गस्य विमुद्रमाननम् ॥ लेखा राज्यां लिपावपि । लिख्यते लेखा "भिदादित्वात्" अङ् राजी रेखा पङ्क्तिश्च । तत्र रेखायां यथा-अभिनवमदलेखाश्यामगण्डस्थलानाम् । पंक्तौ यथा-नवनगवनलेखाश्याममध्याभिराभिः ॥ लिपौ यथा-दिवस-गणनलेखाभूषिता भित्तिरेषा । चन्द्रांशाभोगयोरपि यथा-लेखया विमलविद्रुमभासा संततं तिमिरमिन्दुरुदासे । वधूमुखं पाटलगण्डलेखम् । वीङ्खा तु शूकशिम्बायां गतिभेदे च नर्तने । विविधम् इङ्खति अनया वीङ्खनं वा वीङ्खा । शूकशिम्बा कपि-कच्छुः । गतिभेदे नर्तने च यथा-यात्रानेहसि यस्य दिग्विजयिनः काम्बोजवाहावलीं वीङ्खोल्लेखविकासिनि क्षितिरजःपुञ्जे वियच्चुम्बति ॥२५॥ शङ्खः । कम्बौ निधिभेदे स्यान्नख्यामलिकास्थनि । शाम्यति शङ्खः "शमिमनिभ्यां खः" (उ० ८४) नखी गन्धद्रव्यभेदः अलिकास्थि ललाटप्रांतास्थि । निधिभेदे नख्यां च पुंसि । अन्यत्र पुंक्लीबः । कम्बौ यथा-शङ्खस्वनानन्तरपुष्पवृष्टिः निधिभेदे यथा-द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा । अलिकास्थनि यथा - शङ्खान्तरद्योति विलोचनं तत् । वलयदिनांशनागभेदे

शङ्खः कम्बौ निधिभेदे स्यान्नख्यामलिकास्थनि ।
शाखा द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके ॥ २६ ॥
शिखाग्रमात्रे चूडायां केकिचूडाप्रधानयोः ।
ज्वालायां लाङ्गलिकायां शिफाशाखाघृणिष्वपि ॥ २७ ॥

ष्वपि । वलये यथा-शङ्खैर्भूषित-बाहुवल्लियुगले । ;दिनांशे यथा-शङ्खमात्रशेषेऽह्नि । नागभेदे यथा-शङ्खकुलम् । शाखा द्रुमांशे वेदांशे भुजे पक्षान्तेरऽन्तिके । शाखति शाखा "श्यति वा श्यतेरिश्च वा" इति खः । द्रुमांशे यथा-शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः । वेदांशे यथा-सहस्रशाखाः श्रुतयः प्रथन्ते । भुजे यथा—शाखाशिखालम्बितबालवल्लिः शाखीव रेजे प्रथमो जिनेशः । पक्षान्तरे संततिविशेषे यथा-अलंकरोत्येष मदीय-शाखाम् । अन्तिके यथा-सुखाय शाखानगरं न कस्य । हस्तांशद्वारां-शपादांशेष्वपि । क्रमेण यथा-पञ्चशाखेन पाणिना अवति युवति-रेखा द्वारशाखावलग्ना । मुकुटमणिरश्मिरञ्जितशाखाग्रं चरणयो-र्युगलम् ॥ २६ ॥ शिखाग्रमात्रे चूडायां केकिचूडाप्रधानयोः । ज्वालायां लाङ्गलिकायां शिफा शाखाघृणिष्वपि । श्यति शिखा "श्यतेरिश्च वा" इति खः । अग्रमात्रे यथा-आरूढः ससुपर्वपर्वत-शिखाम् । चूडायां यथा-आज्ञाशक्रशिखामणिप्रणयिनी । केकि-चूडायां यथा - शिखिनां बर्हभारेषु केशान् । प्रधाने यथा--सा शिखाऽखिलयोषिताम् । ज्वालायां यथा-तप्ते महाविरहवह्नि-शिखावलीभिः । लाङ्गलिका अग्निशाखा नामौषधिः । शिफा कन्दः । तत्र यथा-शिखोद्भवानां कदलीलतानाम् । शाखायां यथा-विटपिनां वातावधूताः शिखाः । घृणौ रश्मौ यथा-खेदं सखे रि तमयू र·

सखा सहाये मित्रे च सुखं त्रिदिवशर्मणोः ।
सुखा प्रचेतसःपुर्यामगः स्यान्नगवत्तरौ ॥ २८ ॥
शैले सरीसृपे भानावङ्कमन्तिकगात्रयोः ।
उपसर्जनभूते स्यादभ्युपायप्रतीकयोः ॥ २९ ॥

शिखाः कषन्ति ॥ २७ ॥ सखा सहाये मित्रे च । सनति सनोति वा सखा "सनेर्डखिः" (उ० ६२५) वाच्यलिङ्गः । सहाये यथा-तस्या एव प्रतिकृतिसखो यत्क्रतूना जहार । मित्रे यथा-सरोहंसोत्तंसप्रचलदलनीलोत्पलसखे । सुखं त्रिदिवशर्मणोः । सुखयति शोभनानि खान्यत्र वा सुखम् । द्वयोर्यथा-ऋते धर्मात् कुतः सुखम् । सुखा प्रचेतसः पुर्याम् । प्रचेता वरुणः ॥ अथ गान्ताः ॥ अगः स्यान्नगवत्तरौ । शैले सरीसृपे भानौ । न गच्छति अगः अगतिवान् । न गच्छति नगः "नाम्नो गमः" इति डे नखादित्वात् साधुः । तरुशैलयोर्यथा-अगशिखरनिषण्णाः पत्रिणस्ते निपेतुः। नवनगवनलेखाश्याममध्याभिराभिः। अङ्कमन्तिकगात्रयोः। उपसर्जनभूते स्यादभ्युपायप्रतीकयोः । अङ्कति अङ्कम् अगति वा "गम्यमि" इति गः । अन्तिके सामीप्ये क्लीबे । तद्वति वाच्यलिङ्गः । अन्यत्र क्लीबः । अन्तिके यथा-गङ्गाङ्गेषु नगोत्तरङ्गसुभगच्छायाः क्रमं छिन्दते । गात्रे शरीरे यथा-अङ्गव्ययप्रार्थितकायसिद्धिः । उपसर्जनभूते अप्रधाने यथा-अङ्गिनोऽननुसंधानमङ्गस्याप्यतिविस्तृतिः । अभ्युपाये यथा—सर्वाङ्गमाराधितशंकरस्य । प्रतीके अवयवे यथा-अङ्गानि त्वमनङ्ग तापविधुराण्येह्येहि निर्वापय ॥ २९ ॥ अङ्गा नीवृद्विशेषे स्युः । नीवृद्विशेषे देशविशेषे पुंसि बहुवचनान्तः यथा-अङ्गेषु विलसन् भूमेर्भर्ताऽभूद्गीमपार्थिवः ।

अङ्गा नीवृद्विशेषे स्युरिङ्गः स्यादिङ्गितेऽद्भुते ।
ज्ञानजङ्गमयोश्चापि खगोऽर्कग्रहपक्षिषु ॥ ३० ॥
शरे देवेऽपि खड्गोऽसौ खड्गि शृंगे च गण्डके ।
टङ्गः खनित्रे जङ्घास्योस्त्यागो वर्जनदानयोः[1] ॥ ३१ ॥

इङ्गः स्यादिङ्गितेऽद्भुते । ज्ञानजङ्गमयोश्चापि । इङ्ग्यते इङ्गति वा इङ्गः । अद्भुते जङ्गमे च वाच्यलिङ्गः । ज्ञानेङ्गितयोर्यथा-इङ्गो न ज्ञायते मुनेः । अद्भुतजङ्गमयोर्यथा-तीर्थमिङ्गं गुरोरङ्गम् । जगत्यपि यथा-इङ्गमङ्गसफलीकृतं त्वया । खगोऽर्कग्रहपक्षिषु । शरे देवेऽपि । खं गच्छति खगः "नाम्नो गम" (५।१।१३१) इति डः । अर्कग्रहदेवेषु यथा-खगमयूखविभूषितमम्बरम् । पक्षिशरयोर्यथा-खगपीतासृजो योधाः ॥ ३० ॥ खड्गोऽसौ खड्गि शृङ्गे च गण्डके । खडति भिनत्ति अनेनेति खड्गः "गम्यमि" इति गः । असौ खड्गि शृङ्गे च यथा-द्वारं खड्गिभिरावृतं बहिरपि प्रक्लिन्नगांण्डैर्गजैः गण्डके यथा-प्रायो विषाणपरिमोषलघूत्तमाङ्गान् खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः । टङ्गः खनित्रे जङ्घास्योः । तङ्गति अनेन टङ्गः "पृषोदरादित्वात्" तस्य टत्वम् । पुंक्लीबः । खनित्रे यथा-टङ्गैर्भङ्क्त्वा भूमिभागं नयन्ति । जङ्घास्योरिति जङ्घायां खड्गे च । त्यागो वर्जनदानयोः । त्यजनं त्यागः । द्वयोर्यथा—यस्त्यागं तनुतेतरां मुखशतैरित्याश्रियातायाः श्रियः । प्राप्यत्यागकृताषि

[1]मुद्रित मूले अधिकम्—गर्गो मुनिविशेषे स्यवृषे किञ्चुलुकेपि च ।
टङ्कः खनित्रे जङ्घास्योस्त्यागो वर्जनदानयोः ॥
तुङ्गः पुंनागनगयोर्बुधे स्यादुन्नतेऽन्यवत् ।
तुङ्गी प्रोक्ता हरिद्रायां बर्बरायामपीष्यते ॥

दुर्गं[1] पुनर्दुर्गमे स्याद् दुर्गा तु नीलिकोमयोः ।
नागो मतंगजे सर्पे पुंनागे नागकेसरे ॥ ३२ ॥
क्रूराचारे [2]नागदन्ते मुस्तके वारिदेऽपि च[3] ।
देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः ॥ ३३ ॥

माननमपि त्वय्येव यस्याः स्थितिः ॥ ३१ ॥ दुर्गं पुनर्दुर्गमे स्यात् । दुःखेन गम्यते अस्मिन्निति दुर्गम् "सुगदुर्गमाधारे (५।१।१३२) इति साधुः । वाच्यलिङ्ग ।यथा-पुराणि दुर्गाणि निशातमायुधम्। दुर्गा तु नीलिकोमयो । नीलिका शैवालम्। उमा गौरी । तत्र यथा-जयति जगदीशवन्दितसकलामलनिष्कला दुर्गा । वैजयन्ती तु 'दुर्गो राष्ट्रे वने दुर्गं दुर्गमे नरके पुरे इत्याह। नागो मतंग-जे सर्पे पुंनागे नागकेसरे। क्रुराचारे नगे दन्ते मुस्तके वारिदेऽपि च। देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः। न अगो नागः । "नखादित्वात्" (३।२।१२८) साधुः । दशस्वर्थेषु । मतंगजे सर्पे च यथा-पकान् विशालशिरसो हरिचन्दनेषु नागान् बबन्धुरपरान्मनुजा निरासुः ॥ ३२ ॥ नागदन्तो निर्यूहः । उत्तर-पदस्थितः श्रेष्ठे यथा-गोनागैर्नगवत्तुङ्गैः ॥ ३३ ॥ नागं रङ्गे सीसपत्रे स्त्रीबन्धे करणान्तरे। रङ्ग त्रपु । सीसपत्रं सीसकम् । तयोर्यथा—नागेन नागरागेण नागबीजेन सुन्दरि कुरु स्वर्णमयीं पृथ्वीं सशैलवनकाननाम् । स्त्रीबन्धः स्त्रीणां करणविशेषः । तत्र यथा-विनिर्मातुं त्वया नागं नागन्तव्यं देहे मम । करणान्तरं बवबालवादिभेदः । तत्र यथा-शकुनि चतुष्पदे नागे किंस्तुघ्ने

[1]प्र० दुर्गो कोटे दुर्गमे० [2]प्र० नगे दन्ते. [3]प्र० सरसिरुहेऽपि च.

नागं रङ्गे सीसपत्रे स्त्रीबन्धे करणान्तरे ।
पिङ्गी शम्यां पिङ्गा हिंगुनाल्यां[1] गोरोचनोमयोः ॥३४॥
पिंगं बालके पिशंगे पूगः क्रमुकसंघयोः ।
फल्गुः काकोदुम्बरिकावृक्षे[2] निरर्थकेऽपि च ॥३५॥

कौलवे चोर्ध्वगतिः । पिंगी शम्यां पिंगा हिंगुनाल्यां गोरोचनोमयोः । पायते पिंगी "स्फुलिकलि" (उ० १०२) इति इंगक् । शम्यां "गौरादित्वात्" (२।४।१९) ङी । आपि पिंगा शमीवृक्षः । हिंगुनाली ओषधिः । गोरोचना मन्त्रोपकरणद्रव्यम् उमा अतसी ॥ ३४ ॥ पिंगं बालके पिशंगे । पिशंगे वाच्यलिंगः । तत्र यथा–उन्निद्रपुष्पचणचम्पक पिंगभासः । पूगः क्रमुकसंघयोः । पुनाति पूयते वा पूगः "पूमुदभ्यां कित्" (उ० ९३) इति गः । पुंसि । पूगः क्रमुकवृन्दयोः इति अजयः । पुंनपुंसकयोः पूगम् इति व्याडिः । क्रमुके यथा–ताम्बूलवल्ली परिणद्धपूगासु । संघे यथा–केसरी निष्ठुरक्षिप्तमृगपूगो मृगाधिपः । फल्गुः काकोदुम्बरिका वृक्षे निरर्थकेऽपि च । फलति फल्गुः । 'फलिवली' (उ० ७५८)ति गुः । काकोदुमरिकायां स्त्रियां पुंसि मङ्खः । निरर्थके वाच्यलिंगः । तत्र यथा–स्फीतं फल्गु च वल्गु च श्रुतिगिरां को वेत्ति लीलायितम् । ॥ ३५ ॥ भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु । रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु । भज्यते सेव्यतेऽनेन भगः "गोचरसंचर" इति घः । चतुर्दशस्वर्थेषु । अर्के पुंसि

[1] प्र० हिङ्गुनाडयोर्गोरोचनमयोः । [2] प्र० काकोदुम्बरिका भवेत् ॥

**भगोऽर्कज्ञानमाहात्म्य-यशोवैराग्यमुक्तिषु ।**
**रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥ ३६ ॥**
**भंगस्तरंगे भेदे च रुग्विशेषे पराजये ।**
**कौटिल्ये भयविच्छित्योर्भंगा शणे भंगिः पुनः ॥३७॥**

यथा-भगगभस्तिनिरस्ततमस्ततिः । शेषेषु पुंक्लोबः । ज्ञानादिषु द्वादशसु यथा-भगवान् परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे । योनौ यथा-भगिनीभगभाग्यभवो विभवः ॥ ३६ ॥ भंगस्तरंगे भेदे च रुग्विशेषे पराजये । कौटिल्ये भयविच्छित्योः । भेज्यते अनेन भजनं वा भंगः । तरंगे यथा उत्तुंगैर्गाङ्गभंगै-र्झगिति विदधते पुण्यमंगं नताङ्गयः । भेदे यथा-दन्तभंगो हि नागानां श्लाघ्यो गिरि-विदारणे । रुग्विशेषे यथा-भंगेन भज्यमानेऽगे कुर्युरभ्यंगभंगिनः । पराजये यथा-व्यूढावुभौ ताविवतरेतरस्माद् भंगं जयं चापतुर-व्यवस्थम् । कौटिल्ये यथा-ग्रीवाभंगाभिरामं मुहुरनुपतति स्यन्दने दत्त बद्ध) दृष्टिः । भये यथा संसारभंगेन विमुक्तसंगः। विच्छित्तौ यथा-पौलोमीकुचपत्रभंगरचनान्यातुर्यमध्यापितः । भंगा शणे । शणं धान्यविशेषः तत्र यथा-भांगी वैश्यस्य मेखला ॥ ३७ ॥ भंगिः पुनः । भक्तिवीच्योः । भज्यते इति भंगिः "मण्यादित्वात्" इप्रत्यये "न्यङ्क्वादि" (४।१।११२) इति गत्वम् । स्त्रियां भक्तौ विच्छित्तौ यथा भंगिभिरंगिकृतमानतांग्याः । वीच्यां यथा-भंगि-भकया विरचिततनुः स्तम्भितान्तर्जलौघः । भागो रूपार्द्धके भाग्यैकदेशयोः । भज्यते भागः । रूपार्द्धके यथा-भागोऽप्य-भाग्येन न जातु लभ्यते । भाग्ये यथा-पूर्वान् महाभागतयाऽति शेषे । एकदेशे यथा अधःकथंचिद्धृत भूमिभागम् । भृगं त्वक्पत्रम् ।

भक्तिवीच्योर्भंगो रूपाद्धके भाग्यैकदेशयोः ।
भृंगं त्वक्पत्रं भृंगास्तु षिड्गधूम्याटमार्कवाः ॥३८॥
षट्पदोऽथ भृगुः सानौ जमदग्निप्रपातयोः ।
शुक्रे रुद्रे च भोगस्तु राज्ये वेश्याभृतौ सुखे ॥३९॥

विभर्ति भृंगम् "भृवृभ्याम् नौंतश्चेति" गः। त्वक्पत्रं त्वचाख्यं गन्धद्रव्यम्। भृंगास्तु षिड्गधूम्याटमार्कवाः। षट्पदः पिंगो विटः। तत्र यथा पण्यांगना भृंगवता भ्रमन्ति। धूम्याटः पक्षिभेदः। तत्र यथा-निबद्धराजिभिर्भृंगैः कृते कोलाहलेम्बुनि। मार्कवो भृंगराजः॥ ३८॥ षट्पदे स्त्रीपुंसः। तत्र यथा-अन्यासु तावदुपमर्दसहासु भृंगः। अथ भृगुः सानौ जमदग्निप्रपातयोः। शुक्रे रुद्रे च। भ्रज्जति भृगुः "स्पशिभ्रस्जेः स लुक् च" (उ०७३१) इति कित् उः। "न्यङ्क्वद्र" इति गत्वम्। पुंसि। सानुः प्रस्थम्। प्रपातस्तीर्थम्। तयोर्यथा-कृत्वा पुंवत् पातमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णा निर्झरौघाः। जमदग्नौ यथा-अयमेव महाभागो भार्गवपत्यं यदस्य हि। शुक्रे यथा-सौम्येन सौम्यं भृगुरेवती च। रुद्रे यथा-भृगुशिष्यः शिष्यते सकथम्। भोगस्तु राज्ये वेश्याभृतौ सुखे। धनेऽहि-फणकाययोः पालनाभ्यवहारयोः। भुज्यते भोगः अष्टस्वर्थेषु॥ ३९॥ अहिकायफणयोर्यथा-भोगिभोगासनासीनाम्। शेषेषु षट्सु यथा-दिशति विपुलभोगान् शौरिरभ्यंगयोगान्। मार्गो मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि। मृगस्य अयं मार्गः "तस्येदम्" (६।३।१६०) इति अण्। मार्गी पौर्णमासी अस्येति वा "साऽस्य पौर्णमासी" (६।२।९८) इति अण्। मृगो मृगशिरः ततः स्वार्थे

धनेऽहिकायफणयोः पालनाऽभ्यवहारयोः ।
मार्गो मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि ॥४०॥
मृगः कुरंगे याञ्चायां मृगयायां गजान्तरे ।
पशौ नक्षत्रभेदे च मृगी तु वनितान्तरे ॥४१॥
युगं हस्तचतुष्के स्याद्रथाद्यंगे कृतादिके ।
वृद्धिनामौषधे युग्मे योगो विश्रब्धघातिनि ॥४२॥

अण् वा मार्गणे वा "युवर्ण" (५।३।२८) इति अल्। मृज्यते वा घञ्। पञ्चस्वर्थेषु। मृगमदे यथा—शिलातले मार्गसुगन्धिनि स्थितम्। मासे यथा-मार्गे बहुलपञ्चम्याम्। सौम्यर्क्षे मृगशिरसि यथा-मार्गे विधेयं वपनं शिशूना। अन्वेषणे पथि च यथा-मार्गस्य मार्गं कुरुते मृगाक्षी ॥४०॥ मृगः कुरंगे याञ्चायां मृगयायां गजान्तरे। पशौ नक्षत्रभेदे च। मृग्यते मृगः। कुरंगे यथा-अंकाधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः। गजान्तरे यथा-घनजालनिभैर्दुरासदाः परतो नागकदम्बकैस्तव। नगरेषु भवन्तु वीथयः परिकीर्णा वनजैर्मृगादिभिः। पशौ यथा-इतरेतरानभिभवेन मृगास्तमुपास्ते गुरुमिवान्तसदः। नक्षत्रभेदे यथा-श्रवणधनिष्ठमृगाश्विनिहस्ताः। मृगी तु वनितान्तरे। मृगीव मृगी यथा-स षडगुलयोनौ तु नायिकायां भवेन्मृगी ॥४१॥ युगं हस्तचतुष्के स्याद् रथाद्यंगे कृतादिके। वृद्धिनामौषधे युग्मे। युज्यतेऽनेन युगम् "वर्षादय क्लीबे (५।३।२९) इत्यनेन साधुः। हस्तचतुष्के यथ-[विचरेद्युगमात्र]कू रथादीनाम् आदिशब्दात् हलशकटादीनामंगं गवादियोजनकाष्ठम्। तत्र यथा-युवा युगव्यायत-

अलब्धलाभे संगत्यां कार्मणध्यानयुक्तिषु ।
वपुःस्थैर्यप्रयोगे च संनाहे भेषजे धने ॥ ४३ ॥

विष्कम्भादावुपाये च रङ्गः स्यान्नृत्तयुद्धयोः।
रागे रङ्गं तु त्रपुणि रागः स्याल्लोहितादिषु ॥ ४४ ॥

बाहुरंसलः । कृतादिके यथा-युगान्तरेऽपि चेन्नाथ भवन्त्युच्छृंखलाः खलाः । युग्मे यथा-स्तनयुगं पत्रावृतं मा कृथाः । सर्वत्र क्लीबे। वैजयन्ती तु युगोऽस्त्री स्यन्दनाद्यङ्गे क्लीबं युग्मे कृतादिके । योगो विश्रब्धघातिनि ॥ ४२ ॥ अलब्धलाभे संगत्यां कार्मणध्यानयुक्तिषु । वपुःस्थैर्यप्रयोगे च संनाहे भेषजे धने विष्कम्भादावुपाये च । युज्यतेऽनेन योजनं वा योगः । द्वादशस्वर्थेषु। विश्रब्धघातिनि यथा योगं स्वप्नेऽपि नेच्छन्ति । अलब्धलाभे यथा-युवाभ्यामभिनिवृत्तयोगक्षेमस्य वज्रिणः । संगत्यां संश्लेषे यथा-हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव । कार्मणे यथा-योगं जानासि किं तन्वि येनायं किंकरो जनः । ध्याने धने च यथा-अनेन योगेन समिद्धतेजाः । युक्तिर्योजनं तत्र यथा-यदि भवति दैवयोगात् चित्राषष्ठी च मङ्गलदिनं च । वपुःस्थैर्यप्रयोगो रसायनं । तत्र यथा-योगेन जग्मुः पलितानि यस्य । संनाहे कवचे यथा-विरचितदृढयोगं योधमायोधनादौ । भेषजे यथा-योगेन रोगान् स भिषग् निहन्ति ॥ ४३ ॥ विष्कम्भादौ यथा-तिथिर्वारश्च नक्षत्रं योगः करणमेव च । उपाये सामदानादौ यथा-गृह्णन्ति दुर्गाणि नृपा हि योगैः । रङ्गः स्यान्नृत्त (नृत्य) युद्धयोः । रागे । रंजन्त्यस्मिन् रङ्गः "व्यञ्जनाद् घञ्" नृत्तभुवि

गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे ।
लङ्गः संगे च षिड्गे च लिङ्गं मेहनचिह्नयोः ॥ ४५ ॥
शिवमूर्तावनुमाने सांख्योक्तविकृतावपि ।
वङ्गः कार्पासे वृन्ताके वङ्गा जनपदान्तरे ॥ ४६ ॥

यथा–अनङ्गरङ्गप्रतिमं तदङ्गम् । युद्धभुवि यथा–समजनि रणरङ्गे यस्य वक्षोऽभिघातैर्दलितरदनदण्डः स्वः करेणुः करेणुः । रागे लौहित्यादौ यथा–पञ्चरङ्गः कुरङ्गोऽयम् । रङ्गं तु त्रपुणि । यथा–रङ्गस्यात्र पलान्यष्टौ । रागः स्याल्लोहितादिषु ॥ ४४ ॥ गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे । रज्यतेऽनेन रञ्जनं वा रागः । "घञ् भावकरणे" (४।२।५२) इति नलोपः । लोहितादिषु यथा–निशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः । गान्धारादौ यथा–'मालवकैशिकीमुख्यग्रामरागपवित्रित'। क्लेशा अविद्यादयः । यदाह–'अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः'। आदिशब्दात् विषयाभिलाषादि । तत्र यथा न केवलं रागमुक्तं वीतराग मनस्तव । अनुरागे यथा–प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः । मत्सरे यथा–मलिनात्मनाऽतिरागः प्रकटीकृत एव कोकिलखलेन । जलदानामभ्युन्नतिसमये वाचंयमी भवता । सङ्गपानकयोरपि यथा–रागः प्रतिष्ठां हृदये करोति । तर्षः प्रकर्षं गत एष रागात् । लङ्गः संगे च षिड्गे च । लङ्गनं लङ्गति वा लङ्गः । द्वयोर्यथा–लङ्गेन लङ्गं कुरुते न लिङ्गी । लिङ्गं मेहनचिह्नयोः । शिवमूर्तावनुमाने सांख्योक्तविकृतावपि । लिङ्ग्यते चिह्नयतेऽनेन लिङ्गयति चित्रीकरोति वा लिङ्गम् । लीनं गमयति वा पृषोदरादित्वात् "लातेर्वा रुल्मिकलिपल्याङ्गय" (उ० १०२) इति इङ्गक् । मेहने यथा–

वङ्गं त्रपुणि सीसे च वल्गुश्छागमनोज्ञयोः ।
व्यङ्गो भेके हीनाङ्गे च वेगो रयप्रवाहयोः ॥४७॥
रेतः किंपाकयोश्चापि शाङ्गं विष्णुधनुर्द्धनुः ।
शुङ्ग्याम्राते वटे प्लक्षे शृङ्गं चिह्नविषाणयोः ॥ ४८ ॥

विदध्याल्लिङ्गहर्षणम् । चिह्ने यथा-लिङ्गैर्मुदः संवृतविक्रियास्ते ॥ ४५ ॥ शिवमूर्तौ यथा-पाताले यानि लिङ्गानि । अनुमाने यथा-लिङ्गं धूमो हुतभुजः कार्यं धर्मानुवृत्तितः । सांख्योक्तायाः प्रकृतेः कार्यभूता विकृतिः । तत्र यथा-लिङ्गा ल्लिङ्गमिवानुरूपचरितं पुत्रं स लेभे मुनिः । वङ्गः कार्पासे वृन्ताके वङ्गा जनपदान्तरे । वङ्गति वङ्गः । जनपदान्तरे पुंभूम्नि यथा-वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ॥ ४६ ॥ वङ्गं त्रपुणि सीसे च । द्वयोर्यथा-वङ्गपत्ररचनाविचित्रिते । वल्गुश्छागमनोज्ञयोः । वलते वल्गुः । "फलिवलि" इति गुः । मनोज्ञे वाच्यलिङ्गः । तत्र यथा-जरमुर्जलानि जलमडुकवाद्यवल्गुवलगद्घनस्तनतटस्खलितानि मन्दम् । व्यङ्गो भेके हिनाङ्गे च । विचित्रं विगतं वा अङ्गमस्य व्यङ्गः । हीनाङ्गो वाच्यलिङ्गः । तत्र यथा-सितरुचिवपुषाऽसौ लक्ष्यते संप्रति द्यौर्विगलितकिरणेन व्यङ्गितैकक्षणे च । वेगो रयप्रवाहयोः । रेतः किंपाकयोश्चापि । विज्यतेऽनेन वेगः । अजत्यनेन वा वेगः "गम्यमि" इति गः । रये यथा पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते । प्रवाहे यथा-बाष्पो वाहीकनारीणां वेगवाही कपोलयोः ॥ ४७ ॥ रेतसि यथा-न तीव्रवेगोऽभिमतोऽङ्गनानाम् । मलोत्सर्गे प्रभावे शृङ्गारभावेऽपि । शाङ्गं विष्णुधनुर्धनुः । शृणोति

क्रीडाम्बुयन्त्रे शिखरे प्रभुत्वोत्कर्षसानुषु ।
शृंगः कूर्चशीर्षे शृंगी स्वर्णमीनविशेषयोः ॥ ४८ ॥
विषायामृषभौषध्यां सर्गस्त्यागस्वभावयोः ।
उत्साहे निश्चयेऽध्याये मोहानुमतिसृष्टिषु ॥ ५० ॥

शाङ्गम् "शृङ्गशाङ्गादयः" ( उ० ९६ ) इति साधुः । शृंगस्येदं वा । विष्णुधनुषि यथा–विधेयमस्याभवदन्तिकस्थं शाङ्गं धनुर्मित्रमिव द्रढीयः । धनुर्मात्रे यथा–शाङ्गकूजितविज्ञेयप्रतियोधो रजस्यभूत् । शृंग्याम्राते वटे प्लक्षे । शाम्यति शृंगी "कमितमि" इति डिदुंगः । गौरादित्वात् ङीः । त्रयोऽपि वृक्षाः । शृंगं चिह्नविषाणयोः । क्रीडाम्बुयन्त्रे शिखरे प्रभुत्वोत्कर्षसानुषु । शृणोति शीर्यते वा शृंगम् । "शृंगशाङ्गादयः" इति साधुः । सप्तस्वपि पुंक्लीब : चिह्ने यथा–शृंगारशृंगं यदपांगभंगाः । विषाणे यथा–शृंगेण संस्पर्शनिमिलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥ ४८ ॥ क्रीडाम्बुयन्त्रे यथा — शृंगाणि द्रुतकनकोज्वलानि गन्धाः । कौसुम्भं पृथुकुचकुम्भसंगि वास : । शिखरे यथा–अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिः । प्रभुत्वोत्कर्षयोर्यथा–शृंगारूढविभूतयः । सानौ यथा कनकशिखरि शृंगे योऽभिषिक्तोऽतितुंगे । शृंगः कूर्चशीर्षे । कूर्चशीर्षः जीवकाख्यः शाकविशेषः । शृंगी स्वर्णमीनविशेषयोः । विषायामृषभौषध्यां । "गौरादित्वात्" । ङीः । स्वर्णविशेषोऽलंकारमकरिका । मीनविशेषो मुद्गरप्रिया ॥ ४९ ॥ विषा गुल्मभेदः । सर्गस्त्यागस्वभावयोः । उत्साहे निश्चयेऽध्याये मोहानुमतिसृष्टिषु । सृज्यते सर्गः । त्यागे निर्मोक्षे यथा–

अर्घः पूजाविधौ मूल्येऽघं दुःखे व्यसनैनसोः ।
उद्घो हस्तपुटे वह्नौ श्लाघायां देहजानिले ॥ ५१ ॥
ओघः प्रवाहः संघातो द्रुतनृत्तं परंपरा ।
उपदेशश्च मेघस्तु मुस्तके जलदेऽपि च ॥ ५२ ॥

---

सुवृष्टिसर्गादिव सस्यसंपदः । स्वभावे यथा सर्ग एव भवतामविक्रयः । उत्साहे यथा-संनह्यन्ते योधसर्गं निरीक्ष्य । निश्चये यथा-गृहाण शस्त्रं यदि सर्ग एष ते । अधीयतेऽध्यायो महाकाव्यादिर्विश्रान्तिस्थानम् । यथा सर्गबन्धो महाकाव्यम् । मोहे यथा-संसारसर्गेण विमूढचेताः । अनुमतौ यथा-ग्राह्यः सर्गः सर्वकाले गुरूणाम् । सृष्टौ यथा अस्याः सर्गविधौ प्रजापतिरभूश्चन्द्रोनुकान्तिप्रदः ॥ ५० ॥ अथ घान्ताः ॥ अर्घः पूजाविधौ मूल्ये । अर्हणम् अर्घः "मघादित्वात्" घत्वम्, इयर्त्तीति वा "स्थार्तिजनिभ्यो घः" इति घः । अर्घः प्रकृत्यन्तरं वा । पूजाविधौ यथा-दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम् । मूल्ये यथा-सर्वस्यैव हि रत्नस्य व्रणेऽघः परिहीयते । पूजोपकारिद्रव्येऽपि यथा-तमर्घ्यमर्घादिकयादिपूरुषः सपर्यया साधु सपर्यपूपुजत् । अघं दुःखे व्यसनैनसोः । अमति अघम् "मघार्घ (घाघदीर्घादय)" इति साधु । दुःखे यथा हन्त्यघं विपद्गह्वरम् । व्यसने यथा-त्यजति कष्टमसावचिरादसून् विरहवेदनयेत्यघशङ्किभिः । एनसि यथा-हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः । उद्घो हस्तपुटे वह्नौ श्लाघायां देहजानिले । उद्धन्यते उद्घः निघोद्घेति प्रशंसायां बाहुलकादन्यत्रापि साधुः । हस्तपुटः अञ्जलिः । श्लाघायां यथा-संघे प्रोद्घैर्गुणौघैरलघुभिरनघे

मोघो दीने निष्फले च मोघा स्यात् पाटलातरौ ।
लघुः स्पृक्कालघ्वसारं ह्रस्वं चार्वगुरुद्रुतम् ॥५३॥
श्लाघोपास्तीच्छयोः स्तोत्रेऽर्चापूजाप्रतिमाऽपि च ।
कचाः शुष्कव्रणे केशे बन्धे पुत्रे च गीष्पतेः ॥५४॥

कृत्यवन्तो भवन्ति ॥ ५१ ॥ ओघः प्रवाहः संघातो द्रुतनृत्तं परंपरा उपदेशश्च । वहति उह्यते वा ओघः "न्यङ्क्वा" (४।१।११२) इति साधुः । प्रवाहे यथा-अम्भसामोघसंरोधः प्रतीपगमनादिव । संघाते यथा-अघौघविध्वंसविधौ पटीयसीः । द्रुतनृत्ते यथा-द्रुतं विलम्बितं मध्यमोघस्तत्त्वं घनं क्रमात् । परंपरायां यथा-शरौघमोघेन किरत्यमोघम् । उपदेशे यथा-ओघः प्रदत्तो मुनिनाऽद्य तेन । सुसाधूपकरणेऽपि । मेघस्तु मुस्तके जलदेऽपि च । मिह्यते मेहति वा मेघः "न्यङ्क्वा" इति साधुः । मुस्तकं मुस्ता । जलदे यथा-मेघैरन्तरितः प्रिये तव मुखच्छायानुरूपः शशी ॥५२॥ मोघो दीने निष्फले च । मुह्यति मुह्यत्यनेन वा मोघः "न्यङ्क्वा" इति साधुः वाच्यलिङ्गः । दीने यथा-वक्त्रं च मोघीकृतम् । निष्फले यथा-याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा । मोघा स्यात् पाटलातरौ "शिंशपादित्वात् स्त्रीत्वम् । लघुः स्पृक्का । लङ्घते लघुः "लङ्घिबंह्योर्नलोपश्च" इति उः नलोपश्च । स्पृक्का गन्धद्रव्यविशेषः । तत्र स्त्रियाम् । लघ्वसारं ह्रस्वं चार्वगुरुद्रुतम् । कृष्णागुरौ द्रुते च क्लीबः । अन्यत्र वाच्यलिङ्गः मङ्खस्तु स्त्री स्पृक्काऽल्पेष्टाश्च सारे लघुस्त्वित्वगुरौ तु न इत्याह । असारे यथा-रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय । ह्रस्वे

कचा करेण्वां काचोऽक्षिरोगे शिक्ये मणौ मृदि ।
काञ्ची गुञ्जामेखलयोः पुर्यां कूर्चो विकत्थने ॥५५॥
श्मश्रुणि दम्भे भ्रूमध्ये क्रौञ्चो द्वीपे खगे गिरौ ।
चर्चा स्याच्चर्ममुण्डायां चिन्तास्थासकयोरपि ॥५६॥

यथा–बकोटबूमस्त्वां लघुनि सरसि क्वापि शफरैस्तत्र श्लाघ्या-वृत्तिः । चरौ यथा–दर्शनेन लघुना तथा तयोः प्रीतिमापुरुभयो-स्तपस्विनः । हृते यथा–व्रज लघुगतिर्भूय पयोत्तरेण ॥ ५३ ॥ श्लाघोपास्तीच्छयोः स्तोत्रे । श्लाघतेऽनया श्लाघनं वा श्लाघा । उपास्तीच्छयोर्यथा–कर्तव्या सद्गुणश्लाघा । स्तोत्रे यथा हेलोल्लङ्घितवाहिनीपतिरिति–श्लाघाचलत्कन्धरः ॥ अथ चान्ताः ॥ अर्चा पूजा प्रतिमाऽपि च । अर्चनम् अर्च्यतेऽसौ इति वा अर्चा । पूजायां यथा–आदायार्चामथ गणचमूसंहतः । प्रतिमायां यथा–आभ्यां लिङ्गेऽर्पितः शंभुरर्चायां भवता पुनः । कचः शुष्कव्रणे केशे बन्धे पुत्रे च गीष्पतेः । कच्यते अनेन कचनं वा कचः । बाहुलकात् पुंनाम्नि घः । केशे यथा–कुर्चेकचाकर्षणं । बन्धे यथा–कृतकवचककैस्तैः संयुगे सांयुगीनैः । गीष्पतेः पुत्रे यथा– आदरेण कचमाचकाङ्क्ष सः । क्लीबेऽपि । तत्र क्लीबे ॥ ५४ ॥ कचा करेण्वां करेणुर्हस्तिनी । काचोऽक्षिरोगे शिक्ये मणौ मृदि । कच्यते काचः । घञ् । अक्षि-रोगे यथा–काचोऽप्यान्ध्यमुपेक्षयेत् । शिक्ये रज्जुयन्त्रे यथा–आदाय काचमथ पान्थजनः प्रतस्थे । मणौ यथा–हृद्योऽ-यमनयोर्योगः काचकाञ्चनयोरिव । मृद्भेदे धातुविशेषे यथा–काचः काचो मणिर्मणिः । काञ्ची गुञ्जामेखलयोः पुर्याम् । कच्यते दीप्यते काञ्चिः । "कमिवमि" इति णित् इः । नित्करणादनु-

चंचुः पंचाङ्गुले त्रोट्यां, नीचः पामरखर्वयोः ।
मोचा शाल्मलिकदल्योर्मोचः शिग्रौ रुचिद्युतौ ॥५७॥
स्पृहाऽभिष्वङ्गशोभासु वचः शुके वचौषधौ ।
शारिकायां वीच्याल्यूर्म्योरवकाशे सुखाल्पयोः ॥५८॥

पान्त्यस्यापि वृद्धिः । ङ्यां काञ्ची । मेखलायां यथा-काञ्चीगुणस्थानमनिन्दितायाः । पुर्यां यथा-पुष्पेषु जाती नगरेषु काञ्ची । कूर्चो विकत्थने । श्मश्रुणि दम्भे भ्रूमध्ये । कीर्यते कूर्चः 'कूर्च चूर्च' (उ० ११३) इति साधुः । पुंक्लीबः । ॥ ५५ ॥ श्मश्रुणि यथा-कूर्चे कचाकर्षणमाचरन्तं तं वारयामास न भूमिपालः । दम्भे यथा-न कूर्चचर्चाऽपि बुधैर्विधेया । भ्रूमध्ये यथा - अकूर्चमेतास्तिलकानि चक्रुः । राजव्यजनकुविन्देभाण्डकेशभञ्जनभाजनचित्रकरोपकरणेष्वपि । राजव्यजने यथा-कूर्चद्वयी क्षितिपते पुरतः स्फुरन्ती । कुविन्दभाण्डे यथा मातङ्गोज्झितभण्डवारिकणिकापानं च कूर्चाहतिः । कर्पासेन परार्थसाधनतया किं किं न चाङ्गीकृतम् । केशभञ्जनभाजने यथा-कूर्चेन केशान् विरलीचकार । चित्रकरोपकरणे यथा-श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैः । क्रौञ्चो द्वीपे खगे गिरौ । कुञ्चति क्रुङ् । क्रुङ् एव क्रौञ्चः । प्रज्ञाद्यण् द्वीपे यथा-द्वीपस्य यस्य दयितं द्युतिमन्तमेतं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण । खगे यथा यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् । गिरौ यथा-तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान् । चर्चा स्याच्चर्ममुण्डायां चिन्तास्थासकयोरपि । चर्च्यते चर्चा " भीषि भूषि " (५।३।१०९) इति अङ् । चर्ममुण्डायां यथा-चर्चामितं सुरुचिरं विचार्य ।

चिन्तायां यथा–पूर्वं राजगृहे न केन जगृहे सत्तर्कचर्चाग्रहः। स्थासके यथा–अलिकं चन्दनचर्चयाञ्चितम् ॥ ५६ ॥ चञ्चुः पञ्चाङ्गुले त्रोट्याम्। चञ्चति चञ्चुः "भृमृतृत्सरि" (उ० ७१६) इति उः। पञ्चाङ्गुल एरन्डस्तत्र पुंसि। त्रोट्यां स्त्रियाम्। तत्र यथा–येनास्मिन्न पतन्ति चञ्चुपुटके द्वित्राः पयोबिन्दवः। नीचः पामरखर्वयोः। न्यञ्चति नीचः "न्युङ्भ्यामञ्चेः" (उ० १००३) इति क्रप्रत्यये साधुः। वाच्यलिङ्गः। पामरे यथा–तृणमिव गणयति जगदपि नीचो यत् किंचिदपि पदं प्राप्य। खर्वे यथा–त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः। मोचा शाल्मलिकदल्योः। मुञ्चति मोचा "लिहाद्यच्" (५।१।५०) कदल्यां यथा– मुमोच मोचादलतालवृन्तम्। मोचः शिग्रौ। शिग्रुः शोभाञ्जनः। रुचिर्द्युतौ। स्पृहाऽभिष्वङ्गशोभासु। रोचते रोचनं वा रुचिः "नाम्युपान्त्य" इति कित् इः स्त्रियाम्। द्युतौ यथा–शुक्तिपुटेषु निपतिताः शशिरुचयो यान्ति मौक्तिकमणित्वम् ॥ ५७ ॥ स्पृहायां यथा–अरुचिर्भवति समृद्धौ काम्यन्ते काममन्यदा विषयाः। अभिष्वंगे संगे यथा–शमो हि संसाररुचिं छिनत्ति। शोभायां यथा–स्वाङ्गानि धूमरुचिमागुरवीं दधानैर्धूपायतीव पटलैर्नवनीरदानाम्। वचः शुके। वक्ति वचः शुकः कीरः। वचौषधौ शारिकायां। वक्ति अनया वचा "भिदादित्वात्" अङ्प्रत्ययः। यथा–अश्वगन्धा वचा कुष्ठं द्वे हरिद्रे च सैन्धवम्। शारिका पक्षिणी। वीच्याल्यूर्म्योरवकाशे सुखाल्पयोः। "वयतेर्वैगोडित्" इति डिति ईचौ वीचिः। ङ्यां वीची। आलिः पंक्तिस्तत्र यथा–नाराचवीचीममुचिर्मुमोच। ऊर्मौ यथा–उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् ॥ ५८ ॥ शचीन्द्राणीशतावर्योः। शचि व्यक्तायां वाचि

शचीन्द्राणी शतावर्योः शुचिः शुद्धे सितेऽनले ।
ग्रीष्माषाढानुपहतेषूपधाशुद्धमन्त्रिणि ॥ ५९ ॥
शृङ्गारे सूच्यभिनये व्यधने करणे स्त्रियाः ।
अच्छो भल्लके स्फटिकेऽमलेच्छाभिमुखेऽव्ययम् ॥ ६० ॥

अचिगौरादित्वात् "शचिपदिपठि" इति इप्रत्यये "इतोऽक्त्यर्थात्" इति वा ङीः । इन्द्राण्यां यथा–हरौ चरति चारकाश्रमतपस्विन् तां तां शचीं भुजिष्यदयितेति यः परिरिंसुमप्यस्तवान् । शतावरी औषधिः । शुचिः शुद्धे सितेऽनले । ग्रीष्माषाढानुपहतेषू-पधाशुद्धमन्त्रिणि । शृङ्गारे । शोचति निर्मलीभवति शुचिः "नाम्यु-पान्त्य" (५।१।५४) इति कित् इः । शुद्धे सितेऽनुपहते च वाच्यलिङ्गः । शेषेषु पुंसि । शुद्धे यथा–न शृङ्गारि शुचिः शुचि । सिते यथा–शुचिस्मितां वाचमवोचदच्युतः । अनले यथा–शुचि-ज्वालाजालाविलजलधिकल्लोलवलयैः । ग्रीष्मे यथा – शुची समभ्यर्चितसकृधानै प्रगेव सायं च वहन्ति मार्गाः । आषाढे यथा–स्पृशन् सशङ्कः समये शुचावपि । अनुपहते यथा–सर्वत्र शुचयो धीराः । धर्मार्थकाममुखेन सचिवपरीक्षा उपधा तया शुद्धो मन्त्री । तत्र यथा–कुलीनाः शुचयो धीराः (प्र० शूराः) ॥ ५९ ॥ शृङ्गारे यथा–शृङ्गारः शुचिरुज्ज्वलः । मेध्येपि । यथा–ब्रह्मचारी सदा शुचिः । सूच्यभिनये व्यधने करणे स्त्रियाः । सूचयति सूचिः "स्वरेभ्य इः" (१।३।३०) ङ्यां सूची । सीव्यतेऽनया वा "सिवेर्डित्" (उ० १२१) इति ऊचट । अभिनये यथा–नाट्यसूचीव्यधने यथा–पिहिते कारागारे तमसि च सूची मुखाग्रनिर्भेज्या । करणे यथा–सूची दत्वापविद्धं च दक्षिणं करणं

कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च ।
कच्छास्तु देशे कच्छा स्यात् परिधानापराञ्चले ॥६१॥
चीर्यां वाराह्यां च गुच्छो गुच्छे हारकलापयोः ।
पिच्छः पुच्छे पिच्छं वाजे पिच्छा शाल्मलिवेष्टके॥६२॥

न्यसेत् । व्यूहेऽपि॥ अथ छान्ताः ॥ अच्छो भल्लुके स्फटिकेऽमलेऽच्छाभिमुखेऽव्ययम् । अस्ति अच्छः "तुदि मदि" (उ० १२४) इति छक् । अमले वाच्यलिङ्गः । तत्र यथा-विमान्तमच्छस्फटिकाक्षमालया । अच्छा इत्याभिमुखे अव्ययम् ॥ ६० ॥ कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च । कच्छास्तु देशे । कचते कच्छः "तुदिमदि" इति छक् । केन छाद्यते इति वा पृषोदरादित्वात् । द्रुभेदे नौकाङ्गे च पुंसि । अनूपे तटे च पुंक्लीवः देशे पुंभूम्नि । द्रुभेदानूपप्रायतटेषु यथा-गोलानदीकच्छकुडङ्गवासिनः । देशे यथा-कच्छानामधिपं च कच्छपमिव व्याकृष्य चिच्छेद यः । कच्छा स्यात् परिधानापराञ्चले । चीर्यां वाराह्यां च । परिधानापराञ्चले यथा-प्रलम्बकच्छाः किल दाक्षिणात्याः ॥ ६१ ॥ चीरी पक्षिभेदः । वाराही वराहक्रान्ता ओषधिः । गुच्छो गुच्छे हारकलापयोः । गूयते गुच्छः "तुदिमदि" इति छक् । गुच्छः स्तवकः तत्र यथा-तापिच्छगुच्छच्छविः । द्वात्रिंशल्लता हारो गुच्छः । कलापे यथा-ननर्त विस्तारितपिच्छगुच्छः । पिच्छः पुच्छे । पीयते पिच्छः "पीपूङो ह्रस्वश्च" (उ० १२५) इति छक् । यथा-स छिन्नवान् पिच्छमनिच्छतोऽपि । पिच्छं वाजे । वाजः पक्षः तत्र यथा-अवाप बाल्योचित-नीलकण्ठ-पिच्छावचूलाकलनामिवोरः ।

पङ्क्तिः पूगच्छटाकोशमण्डेष्वश्वपदामये ।
मोचायां पिच्छिले म्लेच्छो जातिभेदेऽपभाषणे ॥६३॥
अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे ॥
अब्जो धन्वन्तरौ चन्द्रे, शङ्खेऽब्जं पद्मसंख्ययोः ॥६४॥

---

पिच्छा शाल्मलिवेष्टके। पङ्क्तिः पूगच्छटाकोशमंडेष्वश्वपदामये। मोचायां पिच्छिले। शाल्मलिवेष्टकः शाल्मलिगोंदः ॥ ६२ ॥ पङ्क्तिः श्रेणिः। पूगच्छटाः पूग(क्रमुक)समूहः। कोशोऽण्डकादिः। मण्डो दध्यादितरोऽवश्रावणं च। अश्वपदामयः वाजिचरणरोगः। मोचा कदली। पिच्छिलं विजविलम्। म्लेच्छो जातिभेदेऽपभाषणे। म्लेच्छति म्लेच्छनं वा म्लेच्छः जातिभेदे यथा-संसजन्ति क्षणमपि न म्लेच्छैरिव तस्करैः ॥ ६३ ॥ ॥ अथ जान्ताः ॥ अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे। अजति न जायते वा अजः। छागे यथा श्रुतिरजमजस्य मूत्रं शमयतु नतु होमकपिलायाः। हरे यथा-जयत्यजः पर्वतराजकन्यकाविलासहासच्छविरञ्जिताननः। विष्णौ यथा-अमानवं जातमजं कुले मनोः। रघुजे यथा-परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव। वेधसि यथा-यदमोघमपामन्तरुप्तं बीजमज त्वया। स्मरे यथा-अजः प्रजाः प्राजति पुष्पबाणैः। अब्जो धन्वन्तरौ चन्द्रे शङ्खे। अब्धौ जातोऽब्जः। शङ्खे पुंक्लीबः। धन्वन्तरौ यथा-अब्जोपदिष्टैरगदैः स्थिरायुः। चन्द्रे यथा-अब्जोदये न्युब्जितमब्जराज्या। शङ्खे यथा-अब्जः कुब्जमुखापूर्णः। अब्जं पद्मसंख्ययोः। पद्मे यथा-उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती। संख्यायां यथा-प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च। ॥ ६४ ॥ आजिः क्षणे समक्ष्मायां युधि। अजति

आजिः क्षणे समक्ष्मायां युध्यूर्जः कार्तिके बले ।
कञ्जो वेधसि केशे च कञ्जं पीयूषपद्मयोः ॥६५॥
कुञ्जो हनौ दन्तिदन्ते निकुञ्जे च कुजो द्रुमे ।
आरे नरकदैत्ये च कुब्जो न्युब्जद्रुभेदयोः ॥६६॥

आजिः "पादाच्चात्यजिभ्याम् (उ० ६२०) इति णित् इः । "पदः पादस्याज्याति" (३।१।९५) इति निर्देशात् वीभावाभावः । स्त्रियाम् । क्षणः कालविशेषः । समक्ष्मा अनिम्नोन्नतो भूमि भागः । तत्र यथा—उपवनाजिषु भोगभुजाममी । युधि रणे यथा—आजावजय्यो जगदेकवीरः । द्वैवेपि । ऊर्जः कार्तिके बले । ऊर्जयति ऊर्जनं वा ऊर्जः । बले स्त्रीपुंसः । कार्तिके यथा—कृतमदं निगदन्त इवाकुलीकृतजगत्त्रयमूर्जमतंगजम् बले यथा—व्रतिषु तरणिवंश्याः कश्चिदूर्जं भजन्ते । कञ्जो वेधसि केशे च । कमित्यव्ययम् । जलवाचि शिरोवाचि च । जले शिरसि वा जातः कंजः । कंजं पीयूषपद्मयोः । द्वयोर्यथा—कंजस्य नालेन पपौ स काजम् ॥ ६५ ॥ कुञ्जो हनौ दन्तिदन्ते निकुञ्जे च । कुयते कुञ्जः "कुवः कुत्र् कुतौ च" (उ० १२९) इति जः । पुंक्लीबः । हनौ दन्तिदन्ते च यथा—प्रवृद्धं कुञ्जं हनुर्दन्तो वाऽस्त्यस्य कुञ्जरः । निकुञ्जे यथा—कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः । कुजो द्रुमे । आरे नरकदैत्ये च । कोः पृथिव्याः जातः कुजः । द्रुमे यथा कुञ्जेषु खञ्जन्ति च खञ्जरीटाः । आरे मङ्गले यथा—त्रासं रविर्द्वितीयः कुंजोऽङ्गदाहं शनिर्गृहविनाशम् । नरकदैत्ये यथा—कुजभुजयुगं व्यर्थमकरोत् । कुब्जो न्युब्जद्रुभेदयोः । कौतिकुब्जः "कुवो कुब्कुतौ च" इति जः । कुब्जे वक्रानताङ्गे यथा—

खजा दर्वीमथोः खर्जूः खर्जूरी कीटकण्डुषु ।
गञ्जो* भाण्डागारे रीढाखन्योर्गञ्जा सुरागृहे ॥ ६७ ॥
गुञ्जा तु कृष्णलायां स्यात् पटहे मधुरध्वनौ ।
द्विजो विप्रक्षत्रियवैश्ये दन्ते विहंगमे ॥ ६८ ॥

सरलास्तत्र छिद्यन्ते कुब्जास्तिष्ठन्ति पादपाः । द्रुमेदे यथा-वन्दामहे वलयमेव यदाश्रयेण शंखोटकुब्जकुटजा अपि चन्दनानि ॥ ६६ ॥ खजा दर्वीमथोः खजति खजा दर्वी दारुहस्तः । मथा मन्थानकः । खर्जूः खर्जूरी कीटकण्डुषु । खर्जति व्यथते खर्जूः "कृषिचमि" (उ० ८३९) इति ऊः । स्त्रियाम् खर्जूरी वृक्षः । कीटः खर्जूरकाख्यः । कण्डुः कण्डूतिः । तत्र यथा-ममार्ज गजेन्द्रारि-शौर्यखर्जूम् । गंजो भाण्डागारे रीढाखन्योः । गंजति गजन वा गंजः भाण्डागारे पुंक्लीबः तत्र यथा -गञ्ज्यञ्जितरत्नपुञ्जविलसलक्ष्मी-मदभ्रान्तिभिः । रीढायां पुंसि । खनौ स्त्रीपुंसः । तत्र यथा-मखभुजां पीयूषगञ्जापतिः । गञ्जा सुरागृहे । यथा-गञ्जाङ्गणे गुञ्जति मञ्जुशौण्डः ॥ ६७ ॥ गुञ्जा तु कृष्णलायां स्यात् पटहे मधुरध्वनौ । गुञ्जति गुञ्जनं वा गुञ्जा । कृष्णला रक्तिका तत्र यथा-सहसि प्लवगैरुपासितं नहि गुञ्जा फलमेति सोष्मताम् । पटहः आनकः तत्र यथा-विरहिणीप्राणाध्वगुञ्जेव सा । मधुरध्वनिर्मधुरो-नादः । द्विजो विप्रक्षत्रियवैश्ये दन्ते विहङ्गमे । द्विर्जातो द्विजः "क्वचित्" इति डः । विप्रादिषु त्रिषु स्मृतिर्यथा-ब्रह्मक्षत्रिय-विट्शूद्राः वर्णाः । आद्या स्त्रयो द्विजाः । सर्वेषु यथा-उत्सन्नविषय-

*मुद्रितमुले-गजो मतङ्गजे माने स्थानेभेदेपि वास्तुनः । गञ्जो० ।

द्विजा भार्गी रेणुकयोर्ध्वजः पूर्वदिशो गृहे ॥
शिश्ने चिह्ने पताकायां खट्वांगे शौण्डिकेऽपि च ॥६९॥
निजो नित्ये स्वकीये च न्युब्जः कुब्जे कुशेस्त्रुचि ।
अधोमुखेऽपि च न्युब्जं कर्मरङ्गे तरोः फले ॥७०॥

ग्रामा स्थानादुच्चलितद्विजाः। सर्वत्र वलिभिः क्रान्ता वृद्धेव युवतिः क्षितिः ॥ ६८ ॥ द्विजा भार्गी रेणुकयोः। भार्गी हञ्जिकाख्या ओषधिः। रेणुका हरेणुकाख्यं गन्धद्रव्यम्। ध्वजः पूर्वदिशो गृहे। शिश्ने चिह्ने पताकायां खट्वाङ्गे शौण्डिकेऽपि च। ध्वजति ध्वजः। शौण्डिके वाच्यलिङ्गः। शेषेषु पुंक्लीबः। पूर्वदिग्गृहे व्याडिर्यथा—ध्वजोधूमश्च सिंहश्च श्वा वृषश्च खरो गजः ध्वाङ्क्षोऽष्टमश्च प्राच्याद्या ईशानान्ता अमी क्रमात्। शिश्ने यथा—उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते चिह्ने यथा—विश्राणयतु वः श्रीमान् श्रेयांसि वृषभध्वजः। पताकायां यथा आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा। खट्वाङ्गे यथा—ध्वजपाणेः पिनाकिनः। शौण्डिके यथा—दशवक्त्रसमो ध्वजः ॥ ६९ ॥ निजो नित्ये स्वकीये च। नितरां जायते निजः "क्वचिद्" डः। नेनेक्ति वा "नाम्युपान्त्य इति कः। वाच्यलिङ्गः। द्वयोर्यथा—निजौजसोज्जासयितुं जगद्द्रुहाम्। न्युब्जः कुब्जेकुशेस्त्रुचिः अधोमुखेऽपि च। न्युब्जति न्युब्जः कुशेस्त्रुचि पुंसि। शेषयोर्वाच्यलिङ्गः। सर्वेषु यथा—न्युब्जमुब्जांचकार। रोगेऽपि। न्युब्जं कर्मरङ्गतरोः फले। कर्मरङ्गतरुः निम्बुकाख्यो वृक्षस्तस्य फले ॥ ७० ॥ प्रजा लोके संततौ च। प्रजायते प्रजां "क्वचित्" डः। द्वयोर्यथा नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः। पिञ्जा तूल-

प्रजा लोके संततौ च पिंजा तूल हरिद्योः ।
पिंजो व्यग्रे वधे पिंजं बले बीजं तु रेतसि ॥७१॥
स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे ।
भुजो बाहौ करे मजूः शुद्धौ च रजकेऽपि च ॥७२॥

हरिद्रयोः। पियञ्ज्यते पिञ्जा। "भिदादित्वात्" अङ्। तूलं पिचुः। पिञ्जो व्यग्रे वधे व्यग्रो व्याकुलः। तत्र वाच्यलिङ्गः वधे पुंसि। पिञ्जं बले। बलं स्थाम। बीजं तु रेतसि। स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे। वीयते बीजम् "वियो जक" (उ० १२७) रेतसि यथा—यदमोघमपामन्तरुप्तं बीजमज त्वया। आधाने यथा—गर्भबीजैर्विरेहुः। तत्त्वे यथा—सिद्धचक्रस्य सद्बीजम्। हेतौ यथा—अनुपमसुखबीजं धर्ममेकं गृणन्ति। अङ्कुरकारणे यथा—बीजैरङ्कुरितं लताभिरुदितम्। भुजो बाहौ करे। भुज्यतेऽनेन भुजः। "पुंनाम्नि" (५।३।१३०) इति घे "भुजन्युब्जं पाणिरोगे" (४।१।१२०) इति साधुः स्त्रीपुंसः। बाहौ यथा—उद्वेल्लद्भुजवल्लिकं कणझणत्कारस्तदा दुःसहः। करे यथा—चञ्चद्भुजभ्रमितचण्डगदाऽभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य। मजूः शुद्धौ रजकेऽपि च। मार्जनं मार्ष्टि वा मजूः "मृजेर्गुणश्च" इति ऊः। शुद्धौ स्त्रीलिङ्गः। रजके वाच्यलिङ्गः। ॥ ७२ ॥ राजी रेखायां पङ्क्तौ च। राजते राजिः "कमिवमि" (उ० ६१८) इति इः ङ्यां राजी। रेखायां यथा—मलयजरसराजीराजिता भालभित्तिः पङ्क्तौ यथा-राजीवराजीवशलोलभृङ्गम्। रुजा त्वामयभङ्गयोः। रोजनं रुजा "भिदादित्वात्" (५।३।१०८) अङ्। आमये यथा-मदनजरुजाच्छेदी वैद्यः

राजी रेखायां पंक्तौ च रुजा त्वामयभङ्गयोः ।
लञ्जः पट्टे च कच्छे च लाजः स्यादार्द्रतण्डुलाः*॥७३॥
लाजास्तु भृष्टधान्ये स्युर्लाजं पुनरुशीरके ।
व्रजोऽध्वगोष्ठसंघेषु वणिग् वाणिज्यजीविनि ॥७४॥

सदा सविधे प्रिया । भङ्गे यथा-भुजां रुजां ते तु मलनं मल्लः । लञ्जः पट्टे च कच्छे च । लञ्जति लञ्जः । पट्टो व्रणादिबन्धनम् । लाजः स्यादार्द्रतण्डुलाः । लाज्यते इति लाजः यथा-चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ॥ ७३ ॥ लाजास्तु भृष्टधान्ये स्युः । पुंस्त्रीलिङ्गो बहुवचनान्तश्च । यथा लाजस्फोटं स्फुटत्यस्या हृदये हारयष्टयः । लाजं पुनरुशीरके । उशीरं वीरणीमूलं । व्रजोऽध्वगोष्ठसंघेषु । व्रजन्त्यस्मिन् व्रजः "गोचरसंचर"- (५।३।१३१) इति घः पुंक्लीबः । अध्वनि यथा-व्रजेषु सर्वेषु निवृत्तसंचरः । गोष्ठे यथा-निरुद्धवीवधासारप्रासङ्गा इव व्रजम् । संघे यथा-गजव्रजाक्रमणभरावनम्रया । वणिक् वाणिज्यजीविनि वाणिज्ये करणभेदे । पणायति पणनं पण्यते वा वणिक् " भूपणिभ्याम् " (उ० ८७१) इति इज्, पणेर्वणादेशश्च । वाणिज्यजीविनि यथा-कुर्वतां गुञ्जया साम्यं वणिजामेव लाघवम् ॥७४॥ वाणिज्ये यथा-वणिक्पथप्रस्थित एष वाणिजः । करणभेदो ज्योतिःशास्त्रप्रसिद्धः । वाजं सर्पिषि वारिणि यज्ञान्ते (यज्ञान्ने)। वजन्ति अनेन वाजम् " व्यञ्जनाद् घञ् " (५ । ३ । १३२) बाहुलकाद् क्लीबे । वाजस्तु पक्षे मुनौ निस्वनवेगयोः । पक्षनि-

* प्र० स्यादार्द्रतण्डुले ।

वाणिज्ये करणभेदे वाजं सर्पिषि वारिणि ।
यज्ञान्ते वाजस्तु पत्रे मुनौ निस्वनवेगयोः ॥७५॥
व्याजः शाठ्येऽपदेशे च सज्जौ संनद्धसंभृतौ ।
संजौ ब्रह्मशिवौ प्रज्ञः प्राज्ञे प्रज्ञा तु शेमुषी ॥७६॥

स्वनवेगेषु यथा-वाजिनः शकसैन्यस्य समारब्धवन्वाजिनः । वाजिनश्च शरामध्यमविशन् द्रुतवाजिनः ॥ ७५ ॥ व्याजः शाठ्येऽपदेशे च । व्यजनं व्याजः । शाठ्ये यथा-निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् । अपदेशे छले यथा-काव्यव्याजात्सदियमपरा काप्यहो कामधेनुः । सज्जौ संनद्धसंभृतौ । सज्जति सज्जः । अच् सज्जायते वा "क्वचित्" इति डः । वाच्यलिङ्गः। संनद्धे यथा-मज्जन्ति सज्जे तव देव सैन्ये विरोधियोधाः । संभृतः परिपूर्णः प्रगुण इति यावत् । तत्र यथा-कर्तव्यं कृतमर्थिता यदि विधेस्तत्रापि सज्जा वयम्। संजौ ब्रह्मशिवौ । सजति संजः । द्वयोर्यथा-संजः संजायतां श्रिये ॥ अथ ञान्ताः ॥ प्रज्ञः प्राज्ञे । प्रजानाति प्रज्ञः । "नाम्युपान्त्य" इति कः । वाच्यलिङ्गः । प्रज्ञा तु शेमुषी । प्रज्ञानं प्रज्ञा "उपसर्गादातः" (५।३।११०) इत्यङ् । शेमुषी बुद्धिः। यथा – आकारसदृशः प्रज्ञः प्रज्ञया सदृशागमः ॥ ७६ ॥ यज्ञः स्यादात्मनि मखे नारायणहुताशयोः । इज्यते । यजनं वा यज्ञः "यजस्वपि" इति नः । मखे यथा-स विश्वजितमारेभे यज्ञं सर्वस्वदक्षिणम् । शेषेषु यथा-यज्ञं हि जिज्ञासति विज्ञ एव । संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचने चेतनाऽर्कस्त्रियोः । संज्ञायतेऽनया संजानाति संज्ञानं वा संज्ञा ।

यज्ञः स्यादात्मनि मखे नारायणहुताशयोः ।
संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचने ॥७७॥
चेतनाऽर्कस्त्रियोरट्टो हट्टाऽट्टालकयोर्भृशे ।
चतुष्कभक्तयोरिष्टमीप्सिते क्रतुकर्मणि ॥७८॥

नामनि यथा–तिरोहितात्मा शिशुपालसंज्ञया । गायत्र्यां यथा–जपन्ति संज्ञामधिसंध्यमग्रजाः । हस्ताद्यैरिति आदिशब्दात् अक्षिविकोचनाद्यैरर्थस्य प्रयोजनस्य सूचने यथा–मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ॥ ७७ ॥ चेतनायां यथा–त्वक्भेदात् शोणितस्रावादामांसव्यथनादपि । संज्ञां न लभते यस्तु हस्ती गम्भीरवेद्यसौ । अर्कस्त्रियां यथा–षट् संज्ञायां रवेः सुताः ॥ अथ टान्ताः ॥ अट्टो हट्टाट्टालकयोर्भृशे । चतुष्कभक्तयोः । अट्टते अट्टयति वा अट्टः पुक्लीबः । हट्टे यथा–नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं समभूमिपालः । अट्टालके यथा–अट्टेषु वप्राग्रविभूषणेषु । भृशम् अत्यर्थं तत्र यथा–सर्वस्वापहृतौ हि कामुकजनस्याट्टायते कुट्टिनी । अट्टं भृशमाचरतीत्यर्थः । यद्वा पुञ्जीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः । अत्र अट्टम् अत्यर्थं हासोऽट्टहासः । गृहेऽपि इति मंखः । यथा–विशीर्णतल्पाट्टशतो निवेशः । चतुष्कः स्वस्तिकादिश्चतुष्पथं वा । भक्तं गोधूमादिचूर्णम् । इष्टमीप्सिते क्रतुकर्मणि । पूज्ये प्रेयसि संस्कारे योगे । इष्यते यजनं इज्यते वा इष्टम् । क्रतुकर्मणि संस्कारे योगे च क्लीबे । अन्यत्र वाच्यलिङ्गः । ईप्सिते यथा–इष्टोऽयमर्थः शक्येत ज्ञातुं सातिशयेन चेत् । क्रतुकर्मणि यज्ञादिदाने यथा–हितमिष्टं च तप्तं च धर्मश्चायं कुलस्य ते ॥ ७८ ॥ पूज्ये यथा–प्रणनामेष्टदेवताम् । प्रेयसि यथा–आशु लङ्घितवती-

पूज्ये प्रेयसि संस्कारे यं गेऽथेष्टिर्मखेच्छयोः ।
संग्रहश्लोकेऽथ कटो गजगण्डे कटौ भृशे ॥७९॥
शवे शवरथौषध्योः क्रियाकारश्मशानयोः ।
किलिञ्जे समये चापि कष्टं गहनकृच्छ्रयोः ॥ ८० ॥

ष्ठकराग्रे । मन्त्रादिभिर्गुणाधानं संस्कारः तस्य योगः संबन्धः । योगेऽपि यथा-पुरोडाशभुजामिष्टमिष्टं कर्तुमलंतराम् । अथेष्टिर्मखेच्छयोः संग्रहश्लोके । यजनं एषणं वा इष्टिः । मखे यथा-पुत्रीयामिष्टिमृत्विजः । इच्छायां यथा-इष्टिं न शिष्टाः प्रकटन्ति कूटे। यत्र बहवोऽर्थाः संगृह्योच्यन्ते स संग्रहश्लोकः । अथ कटो गजगण्डे कटौ भृशे । शवे शवरथौषध्योः क्रियाकारश्मशानयोः। किलिञ्जे समये चापि। कटति कटः । दशस्वर्थेषु कटौ औषधिभेदे च स्त्रीपुंसः किलिञ्जे त्रिलिङ्गः । शेषेषु पुंसि । गजगण्डे यथा-धदन्तिनः कटकटाहतटान् मिमङ्क्षोर्मङ्क्षूदपादि परितः पटलैरलीनाम् । कटौ यथा-स्रंसत्सारसने कटे । भृशे यथा-कटमहति कपाटं दन्तिदन्ताग्रपिष्टम् ॥ ७९ ॥ शवे यथा-उत्तालाः कटपूतनप्रभृतयः साराविणं कुर्वते । शवरथः शवशिबिका । क्रियाकारो व्यवस्थापनं। किलिञ्जे यथा-संविष्टो ग्रामदेव्याः कटघटितकुटीकुड्यकोणैकदेशे शीते संवाति वाते हिमकणिनिकणद्दन्तपङ्क्तिर्द्वयाग्रः । समयः कालः । कष्टं गहनकृच्छ्रयोः । कृषिष्यति कष्टं "कषोऽनिट्" (५।३।२) इति भविष्यति क्तः। "कषः कृच्छ्रगहने" (४।४।६७) इति इडभावः । गहनं दुरवगाहं, कृच्छ्रं दुःखं दुःखकारणं वा । गहने दुःखकारणे च वाच्यलिङ्गः । दुःखे क्लीबे । गहने यथा-कष्टा दृष्टाऽ-

कटुत्वकार्ये मत्सरे च दूषणे च कटू रसे ।
तिक्ते प्रियङ्गुसुरभिकटुकाराजिकास्वपि ॥ ८१ ॥
कुटः कोटे शिलाकुट्टे घटे गेहे कुटी मुरा × ।
चित्रगुच्छः कुम्भदासी कूटं पुद्वारयन्त्रयोः ॥ ८२ ॥

टवी तेन । कृच्छ्रे यथा—हा धिक् कष्टमनिष्टमस्तकरुणः कोयं विधेः प्रक्रमः ॥ ८० ॥ कटुत्वकार्ये मत्सरे च दूषणे । कटति कटुः "भृमृतृत्सरि" (उ. ७१६) इति उः । अकार्ये दूषणे च क्लीबे । मत्सरो मात्सर्यं मत्सरी वा । यच्छाश्वतः । असोढापरसंपत्ते-र्मात्सर्यमपि मत्सरः । तत्र मत्सरे क्लीबे मत्सरिणि वाच्यलिङ्गः । अकार्यमत्सरयोः पुंसि इति एके । अकार्ये यथा—कटूवाचारो हि दुर्जनः मत्सरे यथा—खलानां गुणिविद्वेषात् प्रकृत्या हृदयं कटु । दूषणे यथा—किं नु श्रोत्रकटूत्कर्णात मधुपास्तस्य पारिजातस्रजि । श्रोत्रदूषणं यथा भवतीत्यर्थः । कटू रसे तिक्ते प्रियङ्गु सुरभि कटु-काराजिकास्वपि । रसे पुंसि । तिक्ते सुरभौ च वाच्यलिङ्गः । प्रियङ्गुः फलिनी । कटुका कटुरोहिणी राजिका राजसर्षपः । एषु स्त्रियाम् । रसे यथा—कट्वम्लोष्णभुजः शरद्यधिभुजो हेमन्त-निद्रालसा । तिक्ते यथा—तत्कटुस्तोकमुष्णं च न करोति वितृष्ण-ताम् । सुरभौ यथा—सतच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् । दुर्गन्धे चाप्रिये च उपचारात् ॥ ८१ ॥ कुटः कोटे शिलाकुट्टे घटे गेहे । कुटनं कुटति वा कुटः "अः" (उ० २) इति अः । कोटः कौटिल्यम् । शिलाकुट्टः शिलाकुट्टकः पुरुषः । अनयोः

×प्र० सुरा

माया दम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः ।
निश्चलेऽयोघने राशौ कृष्टिः कर्षणधीमतोः ॥८३॥
कोट्युत्कर्षाटनी संख्याश्रिषु खस्टतृणे कफे ॥
टङ्केऽधकूपे प्रहारे खाटिः शवरथे किणे ॥ ८४ ॥

पुंसि । घटे पुंक्लीबः । यथा–आहुतैः कुटहारकैः । गेहे स्त्रीपुंसः । यथा–निर्वाता न कुटी प्रिया न गुमटी नास्ति द्वितीया पटी । कुटी मुरा चित्रगुच्छः कुम्भदासी । मुरा नालपर्णी नामौषधिः । चित्रगुच्छो नानास्तबकः कुम्भदासी या कुम्भं वहति । कूटं पूद्वारयन्त्रयोः । मायादम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः । निश्चलेऽयोघने राशौ । कूटयति कूट्यते वा कूटम् । एकादशस्वर्थेषु पुंक्लोबः । पूद्वारम् गोपुरम् । यन्त्रं मृगादिवधार्थं छलम् । यथा–छित्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुराम् ॥८२॥ माया रूपपरावर्तनादिका यथा–कूटयुद्धं विकल्पेऽपि । दम्भः कैतवम् । तत्र यथा–कुट्टनी कूटपट्वी । अद्रिशृङ्गे यथा–तमङ्कदे मन्दरकूटकोटि व्याघट्टनोत्तेजनया मणीनाम् । सीराङ्गं दारुमयो लोहाधारः । अनृते असत्ये यथा–कूटवादी स रुद्रः । तुच्छमल्पम् । निश्चले यथा–कूटस्थोऽक्षर उच्यते । निश्चलं व्योम इति गौडाः । अयोमयो घनोऽयोघनः आघातार्थमयस्कारभाण्डम् । कुट्टनाकारो वा । कूटशाल्मलिरिति एको राशीर्धान्यादिपुञ्जः । तत्र यथा–भक्तानामागतान् कालान् समाहृत्य स्वमायया । काले कूटच्छलात् कण्ठे कालकूटः कृतस्त्वया । भग्ने शृङ्गेऽपि । कृष्टिः कर्षणधीमतोः । कर्षणं कर्षति वा कृष्टिः 'इ मुषिकृषिरिषि' (उ० ६९१) इति

एकग्रहेऽथ खेटः स्याद्ग्रामभेदे कफेऽधमे ।
स्फरे* मृगव्ये गृष्टिस्तु सकृत्सूतगवी भवेत् ॥८५॥
वराहक्रान्ता च घटा घटने गजसंहतौ ।
गोष्ठयां घटस्त्विभशिरःकूटे समाधिकुम्भयोः ॥८६॥

कित् तिः । कषणे स्त्रियाम् । धीमति वाच्यलिङ्गः । कर्षणे यथा—ज्याकृष्टिघृष्टिवचः । धीमति यथा—येषामिष्टाः कृषयस्तेऽपि मध्ये ॥ ८३ ॥ कोटयुत्कर्षाटनी संख्याश्रिषु । कुटति कोटिः "कृषकुटि" (उ० ६१९) इति णित् इः ङ्यां कोटी । उत्कर्षे यथा— ऋते रामादन्यः किमुत परकोटौ घटयितुं रसान्नाटयप्राणान् पटुरिति वितर्को मनसि नः । अटन्यां यथा—मौर्वीस्वयं यदधिरोहति चापकोटिम् । अश्रिर्धारा कोणो वा । संख्याश्र्योर्यथा—त्रयस्त्रिंशत्कोटि त्रिदशमयमूर्तेर्भगवतः सहस्रांशोर्वंशे जयति जगदीशो दशरथः । यद्वैरस्निग्धैरसुरयुवतिश्वासपवनप्रकोपे सिद्धे न स्पृशति शतकोटिं शतमखः । खटस्तृणे कफे । टङ्केऽधकूपे प्रहारे । खटति खटः । तृणे यथा खटकैराच्छादयं मन्दिरम् । खाटिः शवरथे (घे) किणे । एकग्रहे । खटति खाटिः "कमिवमि" इति बहुवचनात् णिदिः स्त्रियाम् ॥ ८४ ॥ एकग्रहोऽन्य परिहारेण तदेकनिर्बन्धः । शवरथे यथा—तस्यस्तद्विरहे कुरङ्गकदृशः खट्वापि खाटीयते । अथ खेटः स्याद् ग्रामभेदे कफेऽधमे । स्फारे मृगव्ये । खेटयति खेटयतेऽनेन वा खेटः । अधमे वाच्यलिंगः । शेषेषु पुंक्लीबः । ग्रामभेदे गह्वरप्राये ग्रामे यथा—खेटैः खेटनिवासिभिः सरभसं संघोषितो विद्रुतः । कफे यथा—खेटं स्फेटय चेटकस्य

*प्र० स्फारे

घृष्टिः स्पर्धाघर्षणयोर्विष्णुक्रान्तावराहयोः ।
घोण्टा पूगबदरयोश्चटुश्चाटुपिचण्डयोः ॥ ८७ ॥
व्रत्यासने जटाकेशविकारे मांसिमूलयोः ।
झाटो व्रणादिसंमार्ष्टौ कुन्तकान्तारयोरपि ॥८८॥

झटिति । अधमे कुत्सिते स्फरे स्फुरके मृगव्ये आखेटके च यथा—घटयति भटखेटः खेटकं खेटहस्तः । गृष्टिस्तु सकृत् सूतगवी भवेत् । वराहक्रान्ता च । गिरति गृष्टिः "ग्रो गृश् च" (उ० ६३९) इति तिः । स्त्रियां सकृत् एकवारं सूता सा चासौ गौश्च सकृत्सूतगवी तस्यां यथा—आपीनभारोद्वहनप्रयत्नाद् गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः ॥ ८५ ॥ वराहक्रान्ता ओषधिः । घटा घटने गजसंहतौ गोष्ठ्याम् । घटनं घटन्तेऽस्यामिति वा घटा "अङ्" घटने यथा—तव वैधेन घटामुपेयुषा । गजसंहतौ यथा—दिग्मातङ्ग-घटाविभक्तचतुरा घाटा मही साध्यते । गोष्ठ्यां यथा—उत्कण्ठा-व्रजमानषट्पदघटासंघट्टदष्टच्छदः । घटस्त्विभशिरःकूटे समाधि-कुम्भयोः । घटते घटः । इभशिरःकूटे समाधौ च पुंसि । कुम्भे स्त्रीपुंसः । तत्र यथा—नाहं घटाङ्कितकटिं प्रमदां भजामि ॥ ८६ ॥ घृष्टिः स्पर्धाघर्षणयो विष्णुक्रान्तावराहयोः । घर्षणं घृष्टिः । "स्त्रियां क्तिः" (५।३।९१) "घृष्यादि ति वा नाम्नि" तिक् । वराहे पुंसि । शेषेषु स्त्रियाम् । स्पर्धायां यथा—न कार्या कृष्टिभि-र्घृष्टिः । घर्षणे यथा—वृक्षैर्विभिन्नैरिव कुम्भघृष्ट्या । विष्णुक्रान्ता ओषधिः । वराहे यथा—वनावनिं घृष्टिविकृष्टमुस्ताम् । घृष्टिर्वाराही*

* गौरी देवी

त्वष्टाऽर्के विश्वकृत्तक्ष्णोस्त्रुटिः संशयलेशयोः ।
सूक्ष्मैलायां कालमाने त्रोटिश्चञ्च्वां खगान्तरे ॥८९॥
मीनकज्जुलयोर्दिष्टं* दैवे दिष्टस्त्वनेहसि ।
दिष्टिरानन्दे माने च दृष्टिर्ज्ञानेऽक्षिण दर्शने ॥९०॥

इति अमरः । घोण्टा पूगबदरयोः । घुर्णति अस्मिन्निति घोण्टा "घटा घाट" (उ० १४१) इति साधुः । पूगः क्रमुकः तत्फलं वा । फले यथा–घोण्टाकुट्टनकुण्ठितोरुदशनाः । बदरं बदरीफलम् बदर्यामपि । चटुश्चाटुपिचण्डयोः । व्रत्यासने । चटति चटुः "मिवह्नि" (उ० ७२६) इति उः । चाटु प्रियं वाक्यं तत्र पुंक्लीबः । पिचण्डम् उदरम् । व्रतिनामासनविशेषो व्रत्यासनम् । अनयोः पुंसि । चाटौ यथा–बत कियन्ति चटूनि करिष्यसि । पिचण्डे यथा–आलस्याच्चटुमर्दनैकपटवः । वैजयन्ती तु चटुश्चाटुश्च प्राजादिस्तुतौ । पशुपिचण्डके इत्याह ॥ ८७ ॥ जटा केशविकारे मांसि-मूलयोः । जटति जटा जायते वा । "नमितनिजनिषनिसनि तुक् च (उ० १३९) केशविकारः संश्लिष्टकेशता । मांसि गंध-द्रव्यम् । केशविकारमूलयोर्यथा–सदासेव्यः सद्भिर्मुनिरिव जटालस्तरुरयम् । झाटो व्रणादिसंमार्ष्टौकुञ्जकान्तारयोरपि । झटनं झाट्यते वा झाटः वृक्षाणां गुपिलः संनिवेशः कुञ्जः । वृक्षाणां संहतिमात्रं कान्तारम् । तत्र यथा–जम्बूजम्बीरझाटे झटिति सरलके झीरुकात्साकृतेन । त्रासात् सुप्तप्रबुद्धः कथमपि पथिको नष्टदिक्कः प्रयाति । ॥ ८८ ॥ त्वष्टाऽर्के विश्वकृत्तक्ष्णोः ।

*प्र० कटफलयो०

**पट्टश्चतुष्पथे पीठे राजादेः शासनान्तरे ।**
**व्रणादिबन्धने पेषाश्मनि पट्टी ललाटिका ॥ ११ ॥**
**रोध्रेऽथ पटु लवणे पटुस्तीक्ष्णपटोलयोः ।**
**स्फुटे रोगविहीने च छत्रायां चतुरेऽपि च ॥ १२ ॥**

---

त्वक्ष्यते तेजः शातनात् त्वक्षति वा त्वष्टा "त्वष्टृक्षत्तृ" (उ० ८३५) इति साधुः । अर्के यथा—त्वष्टा विष्टपदृष्टिपाटवमयं कुर्वन्नुदेति स्फुटम् । विश्वकृत् ब्रह्मा देववर्धकिर्वा तत्र यथा—त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्य सीमा । तक्ष्णि यथा—घटयति शकटानि त्वष्टरि श्लिष्टसंधि । त्रुटिः संशयलेशयोः । सूक्ष्मैलायां कालमाने । त्रुटति त्रुटिः "नाम्युपान्त्य" (५।१।५४) इति किः । कालः क्षणद्वयाख्यः तस्य मानं तत्र स्त्रीपुंसः । शेषेषु स्त्रियाम् । संशये यथा—त्रुटिप्राप्तो जीवः सपदि अलब्धे जातविभवे । लेशे यथा—त्रुटिमत्र त्रुटिमात्रं मधु संह्रियते यथा मधुकरीभिः । सूक्ष्मैला वृक्षभेदः । यन्निघण्टुः सूक्ष्मैलायां चन्द्रबाला द्राविडी निष्कुटिस्त्रुटिः । कालमाने यथा—कः संघटयति तामिह जन्तोर्या त्रुटिरपि त्रुटति । त्रुटिरन्येष्वर्थेषु । त्रोटिश्चञ्च्वां खगान्तरे । मीनकज्जुले । त्रोटयति त्रोट्यते वा त्रोटिः "किलिपिलि" (उ० ६०८) इति इः स्त्रियाम् । चञ्च्वां यथा—त्रोटिकोटिकुटिलाञ्चितसर्पम् । कज्जुलो वृक्षः । वस्तुनो द्वैधीभावेऽपि यथा—त्रुटितः कुचतटात्रुटितमापश्च हारः । दिष्टं दैवे । दिशति शुभाशुभमिति दिष्टम् "शीरि" (उ० २०१) इति बहुवचनात् किन् तः । दिश्यते स्म वा । यथा—आलम्बते दैवकृतां न निषीदति पौरुषे । अत्र दिष्टं दैवं प्रमाणमस्येति व्युत्पत्तिः । विष्टस्त्वनेहसि ।

पुष्टिः स्यात् पोषणे वृद्धो फटा तु कैतवे फणे ।
भटो वीरे म्लेच्छभेदेऽपि च भृष्टिस्तु भर्जने ॥ १३ ॥
शून्यवाद्यामथ म्लिष्टं म्लानमस्पष्टभाषितम् ।
यष्टिर्भार्ग्यां मधुयष्ट्यां ध्वजदण्डेऽस्त्रहारयोः ॥१४॥

अनेहा कालः । यथा-दिष्टो गच्छन् केन दृष्टो हि दृष्टया । दिष्टिरानन्दे माने च । दिश्यतेऽनया दिष्टिः । आदित्वात् क्तिः । आनन्दे यथा-दिष्टया दृष्टोऽसि सुन्दरमानन्दं । द्वादशाङ्गुलम् । तत्र यथा-दिष्टिमात्रास्तु समिधः । आनन्दे तृतीयैकवचनान्तप्रतिरूपकमव्ययमपि । दृष्टिर्ज्ञानेऽक्ष्णि दर्शने । दृश्यतेऽनया दर्शनं वा दृष्टिः । आदित्वात् क्तिः । ज्ञाने यथा-मिथ्यादृष्टिभिराम्नातो हिंसाद्यैः कलुषीकृतः । अक्ष्णि यथा-दृष्टिर्विष्टपचन्द्रिका । दर्शने चक्षुर्व्यापारे यथा-त्वद्दृष्ट्यैव कृतार्थोऽस्मि ॥ १० ॥ पट्टश्चतुष्पथे पीठे राजादेः शासनान्तरे । व्रणादिबन्धने पेषाश्मनि । पटति पट्टः "घटाघट" इतिसाधुः । पीठे यथा-अर्हद्बिम्बं रत्नमयं न्यस्य पट्टे मणीमये । राजादीनां शासनविशेषे यथा-संजातः पृथुपट्टकः करगतः स्वर्भूमिभुक्तेरपि । व्रणादिबन्धने यथा-अभिषेकपट्टबन्धो बालव्यजनं व्रणस्यापि । पेषाश्मनि यथा-चन्द्रं चूर्णय तक्ष्णाश्च कणशः कृत्वा शिलापट्टके । पट्टी ललाटिका रोध्रः । गौरादित्वात् ङीः । ललाटिका ललाट-भूषा । तत्र यथा-मृगमदघटितेयं पट्टिकाभालपट्टे ॥ ११ ॥ रोध्रस्तरुविशेषः । अथ पटु लवणे । पटति पटु "भृमृतृत्सरि" इति उः क्लीबे पुंसि इत्यमरः । यथा-कालकूटसगोत्रेण कटुना

पटु नाप्यलम् । पटुस्तीक्ष्णपटोलयोः । स्फुटे रोगविहीने च छत्रायां चतुरेऽपि च । पटोल ओषधिभेदः । छत्रा शिलिन्ध्रः । अनयोः पुंसि । शेषेषु वाच्यलिङ्गः । तीक्ष्णे यथा—कः पटुमतिरपि वाङ्मयमनवद्यं गाहितुं समुत्सहते । स्फुटे यथा—पटुभिरपि नोपसर्पति चटुभिरयं निष्प्रयोजनो लोकः । रोगविहीने यथा—आत्मसममेव मन्दाः पटुरपि पश्यन्ति नयनयोः पश्य । परिनीलपटलभाजो हरिमरुचिर्भाति हरिदश्वः । चतुरे यथा—स्वर्गद्वारकपाटपाटनपटुर्धर्मो न चीर्णो मया ॥ ९२ ॥ पुष्टिः स्यात् पोषणे वृद्धौ । पोषणं पुष्टिः । पोषणे यथा—ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये । वृद्धौ यथा—सस्यपुष्टिकरी वृष्टिः । फटा तु कैतवे फणे । स्फटति फटा "पृषोदरादित्वात्" (३।२।१५५) स लोपः । फणे स्त्रीपुंसः । तत्र यथा—फटाटोपो भयंकरः भटो वीरे म्लेच्छभेदेऽपि च । भटति भटः । वीरे यथा—असमसमरसंपल्लम्पटानां भटानाम् । भृष्टिस्तु भर्जने शून्यवाधाम् । (प्र० शून्यवाट्यां) भर्जनं भृज्यते वा भृष्टिः । भर्जने यथा—किमपि चणकभृष्टिं घ्राणतुष्टिं विधत्ते ॥ ९३ ॥ अथ म्लिष्टं म्लानमस्पष्टभाषितम् । म्लेच्छति स्म म्लिष्टम् "क्षुब्ध" (४।४।७१) इति अस्पष्टार्थे साधुः । म्लाने उपचारात् । वाच्यलिङ्गः । म्लाने विच्छाये यथा म्लिष्टं चित्रममित्रवासभवने वक्ति त्वदीयं यशः । अस्पष्टभाषिते यथा—रोगावृत इव धनवान् वक्ति म्लिष्टं च वक्रं च । यष्टिर्भार्ग्यां मधुयष्ट्यां ध्वजदण्डेऽस्त्रहारयोः । इज्यते अनया यष्टिः । "अनुक्षायजि" (उ० ६४९) इति तिः । स्त्रीपुंसः । भार्गी मधुयष्टी च ओषधिभेदौ । ध्वजदण्डे यथा—स्वावासभागमुरगासनकेतुयष्ट्या । अस्त्रे यथा—मुष्ट्याऽवष्टभ्य यष्टिं कटितटविचटत्कर्पटः । हारे यथा—यष्टि-

रिष्टं क्षेमेऽशुभे रिष्टोऽसौ लाटो वस्त्रदेशयोः ।
वटो गोले गुणे भक्ष्ये वृक्षे साम्यवराटयोः ॥ ९५ ॥
वाटः पथि वृतौ वाटं वरण्डेऽङ्गान्नभेदयोः ।
वाटी वास्तौ गृहोद्यानेत्कट्योर्विटस्तु मुषिके ॥९६॥

कट्न्मौक्तिकचूषिदन्तुरे ॥९४॥ रिष्टं क्षेमेऽशुभे । रेषति हिनस्ति रिष्टम् । "शीरि" इति बहुवचनात् क्तिः क्षेमे यथा–अरिष्टनेमे भवरिष्टतातिः । अशुभं पापम् अशुभसूचकं वा यथा–भवेन्न कस्यापि हि रिष्टमिष्टकृत् । रिष्टोऽसौ । असौ खड्गे यथा–मुष्टौ रिष्टमयं बिभर्ति सुभटः संस्फोटबद्धोत्सवः । अभावेऽपि । लाटो वस्त्रदेशयोः । लटन्ति अनेन अस्मिन् वा लाटः । द्वयोर्यथा–भ्रमति जगति लाटी लाटशाटीवसाना । वटो गोले गुणे भक्ष्ये वृक्षे साम्यवराटयोः । वटति वाटः वनति वा । "नमितनि" इति टो नलुक् च । वृक्षे गुणे च त्रिलिङ्गः । वराटे पुंसि । अन्यत्र पुंक्लीबः । गोले यथा–क्षिपन्ति यन्त्रेण भटौ वटानि । गुणे यथा–वुटद्वटन्यूतसुजीर्णमञ्चके । भक्ष्ये यथा–सुकुमारा मर्मराला(पर्पटा)वटकाश्चेति पेशलाः । वृक्षे यथा–सोऽयं वटः श्याम इति प्रसिद्धः । साम्ये यथा–त्वन्मुखस्य मृगाङ्कोऽपि स्फुटं न लभते वटम् ॥९५॥ वाटः पथि वृतौ । वट्यते वाटः वृतौ त्रिलिङ्गः । पथि यथा–शिष्टा वाटमटाटयन्ते वृतौ यथा–यत्र प्ररूढनवशाकविवृद्धलोभगोभग्नवाटघटनोच्चितपल्लवो (चम्पकोऽ) सि । वाटं वरण्डेऽङ्गान्नभेदयोः । वरण्डः इक्ष्वादिसमूहः । अङ्गमवयवः । अन्नभेदो यवादिविकारः । वरण्डान्नभेदयोर्यथा–यवेक्षुवाटानि च वाटभक्ष्यं समालवः कालवशाद्विशीर्णः । वाटी वास्तौ

खदिरे लवणे षिड्गेद्रौ च व्युष्टं फले दिने ।
पर्युषिते प्रभाते च व्युष्टिः स्तुतिफलर्द्धिषु ॥१७॥
विष्टिः कर्मकरे मूल्ये भद्राजूप्रेषणेषु च ।
सटा जटाकेसरयोः स्फुटो व्यक्तप्रफुल्लयोः ॥१८॥

गृहोद्यानेत्कटयोः । वास्तुगृहभूमिः । गृहोद्याने यथा-केनात्र चम्पकतरो बत रोपितोसि कुग्रामपामरजनान्तिकवाटिकायाम् । इत्कटी ओषधिविशेषः । विटस्तु मूषिके खदिरे लवणे षिड्गेद्रौ च । वेटति शब्दायते विटः । षिड्गे पुंक्लीबः । शेषेषु पुंसि ॥ १६ ॥ षिड्गे यथा-मूर्ख प्रव्रजितं विटं प्रवयसम् । द्रुमेक्षः । व्युष्टं फले दिने । पर्युषिते प्रभाते च । व्युच्छनं व्युछतिर्वा व्युष्टं पर्युषिते वाच्यलिङ्गः । फलं प्रवृत्तिसाध्यार्थः । प्रभाते यथा-व्युष्टं प्रयाणं च वियोगवेदनाविदूननारीकमभूत्समं तदा । व्युष्टिः स्तुतिफलर्द्धिषु । व्युच्छनं व्युष्टिः । फलं नियमादेः । सर्वेषु यथा-व्युष्टिं विशिष्टा-स्तपसां गृणन्ति ॥ १७ ॥ विष्टिः कर्मकरे मूल्ये भद्राजूप्रेषणेषु च । वेवेष्टि वेषणं वा विष्टिः "इमुषि" इति क्तिन् तिः । कर्मकरे वाच्यलिङ्गः । शेषेषु स्त्रियाम् । मूल्यं वेतनम् । भद्रा करणविशेषः । आजूर्नरके हठात् क्षेप्यः । प्रेषणं कर्मनियोग इति यावत् । कर्मकरे यथा-विशन्तु विष्टयः सर्वे रुद्रा इव महौजसः । भद्रायां यथा-विष्टिपुच्छे ध्रुवं जयः । प्रेषणे यथा-वर्णाश्रमवती धान्य-हिरण्यपशुकुप्यविष्टिप्रदानफला च पृथ्वी । सटा जटाकेसरयोः । सटति सटा सनति वा । "नमितनि" इति टो न लुक् च । स्त्रीपुंसः । जटा संश्लिष्टकेशाः । यथा-सिंहकेसरसटासु भूभृताम् ।

सिते व्याप्ते स्फुटिस्त्वंह्रिस्फोटे निर्भिन्नचिर्भटे ।
सृष्टिः स्वभावे निर्माणे सृष्टं निश्चितयुक्तयोः ॥९९॥
प्रचुरे निर्मिते चाथ हृष्टः स्यात् केशरोमसु* ।
जातहर्षे प्रतिहते विस्मिते हृषिते यथा ॥१००॥

केसरः सिंहादिस्कन्धकेशाः । तत्र यथा-सटच्छटाभिन्नघनेन विभ्रता । स्फुटो व्यक्तप्रफुल्लयोः । सिते व्याप्ते । स्फुटति स्फुटः । वाच्यलिङ्गः ( व्यक्ते यथा-स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम् । प्रफुल्ले यथा-स्फुटकुटजप्रसवप्रसाधिता भूः ॥ ९८ ॥ सितव्याप्तयोर्यथा-सुधांशुरोचिः स्फुटकुट्टिमेषु । स्फुटिस्त्वंह्रिस्फोटे निर्भिन्नचिर्भटे । स्फुटति स्फुटिः "नाम्युपान्त्य" इति कित् इः स्त्रियाम् । अंह्रि (घ्रि)स्फोटे विपादिकायां यथा-स्फुटिः स्फुटति हैमने मरुति वाति पान्थस्य च । निर्भिन्नचिर्भटे यथा-स्फूटिभिः स्फोटितक्षुधः । सृष्टिः स्वभावे निर्माणे । सर्जनं सृष्टिः "स्त्रियां क्तिः" स्वभावे यथा-स्त्रीणां सृष्टिर्हि चापलम् । निर्माणे यथा-मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता । सृष्टं निश्चितयुक्तयोः । प्रचुरे निर्मिते । यथा-सृज्यते सृष्टम् वाच्यलिङ्गः । निर्मिते यथा-सृष्टा गौरीदृशी येन भवे विस्तारिभारता ॥९९॥ अथ हृष्टः स्यात् केशरोमसु । जातहर्षे प्रतिहते विस्मिते हृषिते यथा । हृष्यति हृष्टः । हृषितः "हृषेः केशलोमविस्मयप्रतिघाते" (४।४।७६) इति वेट् । वाच्यलिङ्गः । केशरोमसु इति वैषयिकेऽधिकरणे सप्तमी । तेन केशरोमविषये-नानयोः पर्यायसन्धता । यत्तु शाश्वतः । जातहर्षे

* मुद्रितमूले-रोमाञ्चयुते ।

कठो मुनौ स्वरऋचां भेदे तत्पाठिवेदिनोः ।
कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे ॥१०१॥
काष्ठं दारुणि काष्ठा तु प्रकर्षे स्थानमात्रके ।
दिशि दारुहरिद्रायां कालमानप्रभिद्यपि ॥१०२॥

प्रतिहते विस्मिते च मनीषिभिः । रोम्णां तु विषये हृष्टो हृषितश्च प्रयुज्यते । केशविषये यथा-दाहव्यापच्छमनविषये कलशसीतोपचारैर्हृष्टाः केशा विरहशिखिनो (धूमतां) यान्ति तस्याः । रोमविषये यथा-हृष्टै रोमभिरेषरञ्जिततनुर्धत्ते कदम्बश्रियम् । जातहर्षे "हृषू अलीके" "हृष्च तुष्टौ" इति एकस्यानिटि एकस्य वेटि द्वयोः प्रयोगः । यथा-प्रियं दृष्ट्वा हृष्टा किमिव न करोति प्रियतमा । प्रतिहते यथा-शीतहृष्टरवनः सखेपशुः । विस्मिते यथा-दृष्ट्वा कृष्णं विधिविलसितं हृष्टबुद्धिः स साधुः । एवं सर्वत्र हृषितस्यापि लक्ष्यं लक्षणीयम् । रोमविषये यथा-सुखवेदना हृषितरोमकूपया ॥ १०० ॥ अथ ठान्ताः ॥ कठो मुनौ स्वरऋचां भेदे तत्पाठिवेदिनोः । कठति कठः । पश्चस्वर्थेषु । कठेन प्रोक्तं वेदं वेत्त्यधीते वा कठः "तेन प्रोक्ते" (६।३।१८१) इत्यण् : तस्य "कठादिभ्यो वेदे लुप्" (६।३।१८२) इति लुप् । ततः "तद्वेत्त्यधीते" (६।२।११७ इत्यण् तस्य "प्रोक्तात्" (६।२।१२९) इति लुप् । स्वरे उदात्तादौ । तत्पाठिवेदिनोरिति तं ऋग्भेदं शाखाविशेषं पठति वेत्ति वा तत्पाठी तद्वेदी च । तयोर्यथा-उद्गुः कठकालापाः । कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे । कणति कण्ठः "वनिकणि" (उ० १६२) इति ठः कण्ठ्यते वा । ध्वनौ यथा-प्रणिजगदुरकाकिश्रावकस्निग्धकण्ठाः । संनिधाने

कुण्ठो कर्मण्ये मूर्खे च कुष्ठं भेषजरोगयोः ।
कोष्ठो निजे कुसूले च कुक्षेरन्तर्गृहस्य च ॥१०३॥
गोष्ठं गोस्थानके गोष्ठी संलापे परिषद्यपि ।
ज्येष्ठः स्यादग्रजे श्रेष्ठे मासभेदातिवृद्धयोः ॥१०४॥

यथा-त्वदरिनृपतिवण्ठाः कूपकण्ठे लुठन्ति । ग्रीवायां यथा-विश्वामित्रोऽपि सोत्कण्ठं कण्ठे जग्राह मेनकाम् ॥ १०१ ॥ काष्ठं दारुणि । काशते काष्ठम् "वनिकणि" इति ठः । यथा-नो हरेत् तृणकाष्ठानि । काष्ठा तु प्रकर्षे स्थानमात्रके । दिशि दारुहरिद्रायां कालमानप्रभिद्यपि । प्रकर्षे यथा-काष्ठागतस्नेहरसानुविद्धम् । स्थानमात्रं स्थितिमर्यादा इति यावत् । तत्र यथा-परा हि काष्ठा तपसस्तया पुनः । दिशि यथा-काष्ठास्तृणीते तमः । कालमानप्रभिदि यथा-अष्टादश निमेषाः स्युः काष्ठाः ॥१०२॥ कुण्ठोऽकर्मण्ये मूर्खे च । कुण्ठति कुण्ठः कुणति वा "पीविशि" (उ० १६३) इति कित् ठः । वाच्यलिङ्गः । कर्मणि साधुः कर्मण्यः । न कर्मण्योऽकर्मण्यः क्रियासु मन्दः । तत्र यथा-कुण्ठः सिद्धपतेः कृपाण इति रे मा मंसत क्षत्रियाः । मूर्खे यथा-कुण्ठा गोष्ठयां न तिष्ठन्ति सुप्रतिष्ठामहौजसः । कुष्ठं भेषजरोगयोः । कुष्णाते कुष्ठम् "कुषेर्वा" इति ठः । पुंक्लीबः । भेषजे यथा-काकजङ्घा वचा कुष्ठं शुक्रशोणितमिश्रितम् । रोगे यथा-कुरुते मक्षिका वान्ति कुष्ठरोगं च कोलिकः । कोष्ठं निजे कुसूले च कुक्षेरन्तर्गृहस्य च । कुष्यते कोष्ठः "कुषेर्वा" (उ० १६४) इति ठः । निजे वाच्यलिङ्गः । तत्र यथा-राज्ञा कोष्ठीकृतो देशः । कुसूलो धान्याधारः तत्र यथा-कोष्ठागारेषु धान्यं निदधति सुधियः । कुक्षेर्जठरस्य अन्तः अभ्य-

ज्येष्ठा भे गृहगोधायां निष्ठोत्कर्षव्यवस्थयोः ।
क्लेशे निष्पत्तौ नाशेऽन्ते निर्वाहे याचने व्रते॥१०५॥
पृष्ठं पश्चिममात्रे स्याच्छरीरावयवान्तरे* ।
वराठः कुन्तायुधे खर्वे भृत्याकृतविवाहयोः ॥१०६॥

न्तरम् । तत्र यथा-मृदुकोष्ठः पुमानयम् । गृहस्याभ्यन्तरम् अपवरकाख्यम् तत्र यथा-कोष्ठात् कोष्ठं प्रविशति शनैः शीतसरम्भभीतः ॥ १०३ ॥ गोष्ठं गोस्थानके । गावस्तिष्ठन्त्यस्मिन् गोष्ठम् "स्थादिभ्यः कः" (५।३।८२) इति "गोऽम्बाम्ब" (२।३।३०) इति षत्वम् । यथा-गौष्ठेवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् । गोष्ठी संलापे परिषद्यपि । "गौरादित्वात्" (२।४।१९) ङीः । संलापे यथा-विषं गोष्ठी दरिद्रस्य । परिषदि यथा-अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि । ज्येष्ठः स्यादग्रजे श्रेष्ठे मासभेदातिवृद्धयोः । अतिशयेन वृद्धः प्रशस्यो वा ज्येष्ठः "गुणाङ्गाद्वा" (७।३।९) इति इष्ठः "वृद्धस्य च ज्यः" (७।४।३५) इति ज्यादेशः । अग्रजे यथा-ज्येष्ठभ्राता समः पित्रा । श्रेष्ठे यथा-लघिष्ठोऽपि गुणज्येष्ठः । मासभेदे यथा-ज्येष्ठे मासि ततार्कतेजसि कथं पान्थ व्रजन् जीवसि । अतिवृद्धे यथा-परमेष्ठी सुरज्येष्ठः ॥ १०४ ॥ ज्येष्ठा भे गृहगोधायाम् । भे नक्षत्रे यथा-अनुराधामघाज्येष्ठा विरुद्धा सर्वकर्मसु । गृहगोधायां यथा-ज्येष्ठारुतं ब्रवाणि । निष्ठोत्कर्षव्यवस्थयोः क्लेशे निष्पत्तौ नाशेऽन्ते निर्वाहे याचने व्रते । निर्व्यूढं निर्वृतं नियतं वा स्थानम् निष्ठा "उपसर्गाद्वातः" (५।३।११०) इति अङ् नवस्वर्थेषु ।

*मुद्रित मूले-प्रष्ठः श्रेष्ठाग्रयोरुक्तः प्रष्ठा चाण्डालिकौषधौ। पृ०

शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च ।
श्रेष्ठोऽग्रे धनदे षष्ठी गौरी षण्णां च पूरणी ॥१०७॥
हठोऽम्बुपर्ण्यां प्रसभेऽण्डं पेशीकोशमुष्कयोः ।
इडेलावत् स्वर्गनाडीभूवाग्गोषु बुधस्त्रियाम् ॥१०८॥

उत्कर्षे यथा-निष्ठां गतं तस्य तपोऽवलोक्यते । व्यवस्थायां यथा-ईदृशी यतिनां निष्ठा । क्लेशव्रतयोर्यथा-निष्ठया क्लिश्यते निष्ठा । निष्पत्तौ यथा-निष्ठां गतं संप्रति काष्ठपीठम् । नाशान्तयोर्यथा-कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः । श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् । निर्वाहे यथा-कृमयो भस्मविष्ठा वा निष्ठा यस्येयमीदृशी । याचने यथा-लघिष्ठः को न निष्ठया ॥ १०५ ॥ पृष्ठं पश्चिममात्रे स्याच्छरीरावयवान्तरे । पृष्यते पृष्ठम् "पीविशि" इति कित् ठः । पश्चिममात्रे यथा-पृष्ठतः सा पुरतः सा । शरीरावयवान्तरे यथा-जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठम् । वण्ठः कुन्तायुधे खर्वे भृत्याकृतविवाहयोः । वनति वण्ठः "वनिकणि" इति ठः वण्ठते वा । चतुर्ष्वर्थेषु । कुन्तायुधे खर्वे च यथा-वण्ठघातैर्भटो वण्ठः कुण्ठस्तव रणाङ्गणे । भृत्ये पदातौ अकृतविवाहे अनूढे च यथा-त्वद्वैरिनृपतिवण्ठाः कूपकण्ठे लुठन्ति ॥ १०६ ॥ शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च । शठति शठः शाम्यति वा "शमेर्लुक् च वा" इति ठः । मध्यस्थपुरुषे यथा-शठो निर्णयकर्मठः धूर्ते यथा-दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायकाः । श्रेष्ठोऽग्र्ये धनदे । अतिशयेन प्रशस्यः श्रेष्ठः "गुणाङ्" इति इष्ठे "प्रशस्य" इति श्रादेशः । अग्र्यं प्रधानं तत्र यथा-व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव।

काण्डो नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे ।
सहः श्लाघाम्बुषु स्तम्बे क्रीडा केल्यामनादरे ॥१०९॥
कुण्डी कमण्डलौ कुण्डो जाराज्जीवत्पतेः सुते ।
देवतोयाशये स्थाल्यां क्ष्वेडः कर्णामये ध्वनौ ॥११०॥

---

धनदे यथा-श्रेष्ठः श्रीकण्ठमित्रम् । षष्ठी गौरी षण्णां च पूरणी। जाते शिशौ षष्ठयां रात्रौ पूज्यमानत्वात् षष्ठी षण्णां पूरणी इति वा "षट् कतिकतिपयात्थट्" टित्वात् ङीः । द्वयोर्यथा-फलेति षष्ठोलिखितानि षष्ठ्याम् ॥ १०७ ॥ हठाऽम्बुपर्णी प्रसभे हठति हठः । अम्बुपर्णी फञ्जा नाम शाकः । प्रसभ बलात्कारः तत्र यथा-कान्ते हठालिङ्गनम् ॥ अथ डान्ताः ॥ अण्डं पेशीकोशमुष्कयोः । अण्यते अण्डम् "कण्यमि" इति डः। पेशीकोशे पुंक्लीबः । मुष्के क्लीबे । पेशीकोशे यथा अण्डजाः पक्षिसर्पाद्याः । मुष्के वृषणे यथा-निरण्डास्ते हयाः शूराः । कठिन-ब्रह्मकोशवीर्येष्वपि । कठिने तापसमाजने यथा-खण्डीकृत.ण्डस्य शरे सुतीक्ष्णैः । ब्रह्मकोशे यथा-अव्यक्तादण्डमभूदण्डाद्ब्रह्मा । वीर्ये यथा-क्षीणाण्डस्य कुतः सुतः । इडेलावत्स्वर्गनाडीभूवाग्-गोषु बुधस्त्रियाम् । ईड्यते ईडा "म्लेच्छीडेर्ह्रस्वश्च वा" इति साधुः "ऋफिडादित्वात्" (२।३।१०४) लत्वम् इला षट्स्वर्थेषु । स्वर्गे यथा-इडां पुनाति निबिडं बिडौजाः नाड्यां यथा इडा च पिङ्गला चैव सुषुम्णा चेति नाडिकाः । भुवि यथा-इडां कः ।डः समुद्धे । वाचि यथा-व्रीडादिडां नैव ददाति धीरः । गवि यथा-ईडां घटोध्नीं न दुदोह मोहात् । बुधस्त्रियां बुधभार्यायां यथा-चन्द्राद्बुधः समभवद्भगवान् नरेन्द्रमाद्यं पुरूरवसमैलमसावसूम । अत्र क्लि

विषे वक्रे क्ष्वेडा सिंहनादवंशशलाकयोः ।
क्ष्वेडं लोहितार्कफले घोषपुष्पे दुरासदे ॥ १११ ॥
क्रोडः कोले शनौ क्रोडमङ्के खण्डोऽर्द्धं ऐक्षवे ।
मणिदोषे च गण्डस्तु वीरे पिटकचिह्नयोः ॥११२॥

इडायाः अपत्यमिति शिवाद्यणि येण्डः लत्वे पेलः इति ॥ १०८ ॥ काण्डो नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे। सहः श्लाघाम्बुषु स्तम्बे । कणति काण्डम् " कण्यणि " इति णित् डः । पुंक्लीबः दशस्वर्थेषु । नाले यथा–सरसबिसिनीकाण्डसंजातशङ्का दिग्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति । अधमे शरे च यथा–चण्डकाण्डाहतित्रस्तो भटकाण्डः पलायते । वर्गे यथा–क्षपातमस्काण्डमलीमसं नभः । द्रुस्कन्धे यथा–आरभ्य काण्डात्तक मुच्छिनत्ति । अवसरे यथा–अकाण्डकोऽपि नो भर्तुरन्यासक्तेश्च योषितः । सहाबलं तत्र यथा–काण्डेन कोदण्डमयं चकर्ष । रह इत्येके । श्लाघायां यथा–नृकाण्डैर्मण्डिता मही। अम्बुनि यथा–का[illegible] जगाहे सगजप्रकाण्डम् स्तम्बे यथा–तदलं समित्काण्डखण्डनाय । दण्डलतयोरपि । क्रमेण यथा–द[illegible]काण्डकण्डूजुषः । क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डम् । क्रोडा केल्यामनादरे । क्रीडनं क्रीडा। केल्यां यथा स च क्रीडाचन्द्रो दशनकिरणा पूरिततनुः । अनादरे यथा–तस्य द्वयमपि व्रीडा क्रीडादलितदन्तिनः ॥ १०९ ॥ कुण्डी कमण्डलौ । कुण्डते कुण्डी अच् । कुणति वा "कुगुहनी" इति कित् डः "गौरादित्वात्" ङीः । यथा–कुण्डिकापुस्तिकाछत्रिकाभियुतो ब्रह्मशान्तिः प्रभातेऽस्तु शान्तिदः । कुण्डो जाराज्जीवत्पतेः सुते । देवताघाशये स्थाल्याम् । देवताघाशये स्थाल्यां च त्रिलि[illegible] ।

कपोले गण्डकः योगे वाजिभूषणबुद्बुदे ।
गड्डुः पृष्ठगुडे कुब्जे गडो मीनान्तराययोः ॥११३॥
गुडः कुञ्जरसंनाहे गोलकेक्षुविकारयोः ।
गुडा तु गुडिका स्नुह्यो गोण्डः स्याद्वृद्धनाभिके ॥११४॥

जाराज्जीवत्पतेः सुते यथा—पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः। देवतोयाशये यथा—कुण्डे कुण्डलिताम्बुवीचिनिचये मज्जन्ति तीर्थस्य ये। स्थाल्यां भाजने यथा—अमृतस्येव कुण्डानि क्ष्वेडः कर्णामये ध्वनौ। विषे वक्रे। "क्ष्विडा अव्यक्ते शब्दे" सौत्रः। क्ष्वेडत्यनेन क्ष्वेडः। वक्रे वाच्यलिङ्गः। कर्णामये यथा—क्ष्वेडपीडितकर्णस्य। ध्वनिविषयोर्यथा—तस्य क्ष्वेडजडीकृतेन्द्रियतया ॥ ११० ॥ वक्रे यथा—मानसं क्षोभयत्येव मृगाक्ष्याः क्ष्वेडमीक्षितम्। क्ष्वेडा सिंहनादवंशशलाकयोः। क्ष्वेडनं क्ष्विड्यते वा क्ष्वेडा। सिंहनादो योधानां युद्धप्रारम्भे निनादः। तत्र यथा—धपद्व्याप्तदिगन्तरः कपिकुलक्ष्वेडारवैर्बृंहितः। वंशशलाकायां वंशाङ्कुरे यथा—क्ष्वेडाभक्षणतृप्तसिन्धुरवधूतर्षप्रकर्षापहः। क्ष्वेडोऽपि। क्ष्वेडं लोहितार्कफले घोषपुष्पे दुरासदे। लोहितार्कफलं रक्तार्कफलम् घोषपुष्पदुरासदे औषधे। क्रोडः कोले शनौ। किरति कीर्यते वा क्रोडः विहडकहोड" (उ० १७२) इति साधुः। कोलः सूकरः तत्र यथा—क्रोडक्रोडां विमुञ्च त्यज गजकरिणीगण्डगण्डूषलीलाम्। शनौ यथा—क्रोडः क्रूरो द्वादशः स्याज्जनस्य। क्रोडमङ्के। अङ्कः उत्सङ्गो वक्षश्च। वक्षसि क्लीबः। क्रमेण यथा-वने पद्मासनासीनं क्रोडस्थितमृगार्भकम्। क्रोडे पीनपयोधरे मृगदृशः कः क्रीडितुं नेच्छति। खण्डोद्ध पक्षवे।

मणिदोषे च । खण्ड्यते खडिः खन्दते वा "कण्यणि" इति डः अर्द्धः शकलः । ऐक्षवः इक्षुविकारः अनयोः पुंक्लीबः । शकलार्थस्य गुणवृत्तित्वे त्वाश्रयलिङ्गता । यथा-खण्डो घटः । खण्डी स्थाली । खण्डं कुण्डम् । यद्वैजयन्ती अर्द्धे गुडविकारे च खण्डोऽस्त्री खण्डिते त्रिषु । मणिदोषे पुंसि । यद्गौडः खण्डोऽस्त्री शकले नेक्षुविकारमणिदोषयोः । अर्द्धे यथा-भुजादण्डे दधुः-कतिनव खण्डां वसुमतीम् । ऐक्षवे यथा-खण्डः किमु त्वद्गिर एव खण्डः किं शर्करा तत्पथ शर्करैव । कुशाङ्कि तद्भङ्गिरसोत्सकच्छतृणं तु दिक्षु प्रथितं । तद्दिक्षु स्फुटितश्रृङ्गे गवाश्वावपि । यथा-शाबलेयो बाहुलेयः खण्डो मुण्ड इत्यादि गण्डस्तु वीरे पिटकचिह्नयोः । कपोले गण्डके योगे वाजिभूषणबुद्बुदे । गण्डति गण्डः गणेर्गमेर्वा "पञ्चमाडुः" (उ० १६८) इति डः सप्तस्वर्थेषु । वीरे यथा-त्रिभुवनगण्डः । पिटके यथा-समाश्लिष्यत्युच्चैः पिशितगुरुगण्डौ स्तनधिया । चिह्ने यथा-लडति लगुडगण्डः कंसविध्वंसचण्डः॥ १११ ॥ कपोले यथा-गण्डस्थलीः शुचितया न चुचुम्बुरासाम् । गण्डके यथा-गण्ड खण्डन चण्डेन । योगो विष्कम्भादशमः । तत्र यथा-खड्गेचातिगण्डेण्व । वाजिनां भूषणेषु बुद्बुदाकारत्वात् बुद्बुदः तत्र यथा अर्वाणो वल्गु वल्गन्ति गण्डमण्डितकन्धराः । गडुः पृष्ठगुडे कुब्जे । गडति गडुः भृमृदृसरीत्युः पुंसि । पृष्ठ गुडो गोलाकृतिः पृष्ठगतो मांसपिण्डस्तत्र यथा-विच्छेद निविडं गुडं । कुब्जे वाच्यलिङ्गः तत्र यथा असौ गडुर्जातु निषिद्धहस्तः । स्फोट मात्रेऽपि यथा-तं भिन्दन् जगतोऽन्धक गडुमिव त्र्यक्षः क्रियाद्वः शिवम् । गडो मीनान्तराययोः । गडति सिञ्चति गडः । गुडः कुञ्जरसंनाहे गोलकेक्षुविकारयोः । गुडति रक्षति गुडः गुडशब्दे वा "कुगुडुनी" (उ० १७०) इति कित् डः । कुञ्जरसंनाहे स्त्रीपुंसः । तत्र यथा-सगुड

पामरजातौ चण्डस्तु यमदासेऽतिकोपने ।
तीव्रे दैत्यविशेषे च चण्डी तु शिवयोषिति ॥११५॥
चण्डा धनहरीशङ्खपुष्प्योश्चूडा शिखाग्रयोः ।
बाहुभूषावलभ्योश्च चोडः कञ्चुकदेशयोः ॥११६॥

भेत्सि हस्तिनम् । गोलको वृत्तो मृदादिगुलकस्तत्र यथा-भक्षिता वाप्ययो गुडाः । इक्षुविकारे यथा-इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् । गुडा तु गुलिकास्नुह्योः । गोल एव सूक्ष्मो गुलिका । स्नुही वज्रवृक्षः । गुलिकायां यथा-कण्ठे किं कलकण्ठि चन्दनगुडाहारोऽपि नारोपितः । गोण्डस्योच्चुद्धनाभिके । पामरजातौ । गूयते गोण्डः "पिचण्डे" (उ० १७६) इति साधुः । गोरिव गण्डो यस्येति वा "पृषोदरादित्वात्" ॥११४॥ चण्डस्तु यमदासेऽतिकोपने । तीव्रे दैत्यविशेषे च । चण्डते इति चण्ड । चणेश्चमेर्वा "पञ्चमाडः" इतिः डः । अतिकोपने तीव्रे च वाच्यलिङ्गः । यमदासे यथा-दासौ चण्डमहाचण्डौ अतिकोपने यथा-कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् । तीव्रे यथा-चण्डाश्चामुण्डराजस्य प्रतापशिखिनः कणाः । दैत्यविशेष यथा-हत्वा चण्डं च मुण्डं च चण्डी तु शिवयोषिति । यथा-पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ॥ ११५ ॥ चण्डा धनहरीशङ्खपुष्प्योः । द्वे अपि ओषधी । चूडा शिखाग्रयोः । बाहुभूषावलभ्योश्च । चोट्यतेऽनया चूडा "भिदादित्वात्" साधुः । शिखा केशपाशी मयूरादि शिखा वा तत्र यथा-चूडाकर्म द्विजातीनाम् । यद् युद्धोत्सवदर्शनैकरसिकः श्रीताम्रचूडध्वजो देवः पश्यत नाधुनापि रचयत्येकातपत्रां महीम् । अग्रे अग्रमात्रे यथा-मेरु चूडाधिरूढः । बाहुभूषायां यथा-

जडो मूर्खे हिमाघ्राते जडा स्याच्छूकशिम्बिका ।
ताडोऽद्रौ ताडने घोषे मुष्टिमेयतृणादिके ॥११७॥
ताडी ताली दलतरौ दण्डः सैन्ये दमे यमे ।
मानव्यूहग्रहभेदेष्वश्वेऽर्कानुचरे मथि ॥११८॥

दन्तचूडा प्रकोष्ठे । वलय्यां यथा–क्रीडन्ति चूडासु निकेतनानाम् । चोडः कञ्चुकदेशयोः । चुलिः सौत्रः । चुल्यते चूलः डलयोरैक्ये चोडः । कञ्चुके यथा–प्राणप्रियश्चोलकः । देशे यथा–येषां चोर्यरतोत्सवैकसुहृदां चोडाङ्गनाभिः पुरा, कर्तुं कौतुककर्णपूरमपि नच्छिन्नः प्रवालोद्गमः ॥ ११६ ॥ जडो मूर्खे हिमाघ्राते । जलघात्ये डलयोरैक्यात् । जडति जडः । मूर्खे यथा-शतकृत्वोऽप्यधीयाना हि न विप्रो जडा च यम् । हिमाघ्राते यथा–उत्कम्पो कर्पटार्द्ध परिजरति जडे छिद्रिणि च्छिन्ननिद्रो, वाते वाति प्रकामं हिमकणिनि कणन् कोणतः कोणमेति । मूकेऽपि यथा–जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः । जडा स्याच्छूकशिम्बिका । शूकशिम्बिका कपिकच्छूः । ताडो द्रौ ताडने घोषे मुष्टिमेयतृणादिके । ताडयते ताडनं वा ताडः । द्रौ वृक्षे यथा–नान्यस्य नात्मनः श्छायां कुरुते ताडपादपः । रूफिडादित्वाल्लत्वे ताल इत्यपि । यथा सप्ततालानयं भित्त्वा वालिप्रहरणीकृतान् । ताडने यथा–स्वञ्चितपक्ष्मकपाटं नयनद्वारं स्वरूपताडेन । उद्घाटय मे प्रविष्टा देहगृहं सा हृदयचोरी । घोषो ध्वनिः ॥११७॥ ताडी ताली दलतरौ "गौरादित्वात्" ङीः दलप्रधानस्तरुः दलतरुः, तालीनामा दलतरुः ताली दलतरुः । तत्र यथा–प्राप तालीवनश्याममुपकण्ठं महोदधेः । ताडिरिति इदन्तोऽपि । यथा–कर्णे ताडिदलम् । दण्डः सैन्ये दमे यमे । मानव्यूहग्रहभेदेष्वश्वेऽ

प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः ।
नाडी कुहनचर्यायां घटिकागण्डदूर्वयोः ॥ ११९ ॥
नाले गुणान्तरे* स्नायौ नीडं स्थाने खगालये ।
पण्डः षण्ढे पण्डा बुद्धौ पाण्डुः कुन्तीपतौ सिते ॥ १२० ॥

र्कानुचरे मथि । प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः । दण्डयतेऽनेन दण्डनं वा दण्डः । दमेर्वा "पञ्चमाड्डः" चतुर्दश-स्वर्थेषु । सैन्ये दमे लगुडे मथि चतुर्थोपाये च पुंक्लीबः । शेषेषु पुंसि । सैन्ये यथा–प्रचण्डैर्दण्डनायकैः । दमे दमने यथा–दण्डं दम्येषु कुर्वते । दमे यथा–दण्डेन दण्डितं विश्वम् । मानभेदश्च दुष्करः । तत्र यथा–अष्टदण्ड (पृथुः पन्थाः)। व्यूहभेदे यथा–दण्डव्यूहेन तं मार्गं यायात्तु शकटेन वा । ग्रहभेदो ज्योतिःशास्त्रप्रसिद्धः । अश्वे यथा-भृशमपि शततुण्डिर्मण्डितं जात्यदण्डैः । अर्कानुचरे यथा–माठरः । पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः । मथि मन्थाने यथा–अब्धिर्मन्दरदण्डेन ममन्थे देवदानवैः ॥ ११८ ॥ प्रकाण्डं तरुस्कन्धस्य अधोभागो नालं वा । नाले यथा–उद्दण्डैः पुण्डरीकैः । लगुडे यथा-यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा । कोणे वादनोपकरणे यथा–दण्डाहतो दुन्दुभिः । चतुर्थोपाये यथा–दण्डसाध्योऽधुना रिपुः । गर्वे यथा–खण्डितोद्दण्डयोधाः । नाडी कुहनचर्यायां घटिकागण्डदूर्वयोः । नाले गुणान्तरे स्नायौ । नडिः सौत्रः नडति नाडिः "कमि चमि" इति बहुवचनात् णित् इः ङ्या नाडी "नडेर्णित्" (उ० १७२) इति ईप्रत्यये ईकारान्तोऽपि । षट्सु अर्थेषु । कुहनचर्या दम्भचर्या । घटिका

* मु. मू. व्रणान्तरे ।

पिन्डो वृन्दे जपापुष्पे गोलबोलेऽङ्गसिह्लयोः ।
कवले पिण्डं तु वेश्मैकदेशे जीवनायसोः ॥ १२१ ॥
बले सान्द्रे पिण्ड्यलाबूखर्जूर्योस्तगरेऽपि च ।
पीडार्तिमर्दनोत्तंसक्रुपासु सरलद्रुमे ॥ १२२ ॥

षट् क्षणकालः तत्र यथा–ताड्यते ताडयमानात् । गण्डदूर्वा श्वेतदूर्वाविशेषः ॥११८॥ नालं काण्डं तत्र यथा–आसेतुरुन्नाडिनि पुण्डरीके । गुणान्तरं चर्मरज्जुविशेषः । तत्र यथा– नाडिभिर्नह्यते युगम् । स्नायुः शिरा । तत्र यथा–पश्यैता रुचयः पतङ्ग दृषदामानेय नाडिंधमाः । तन्तुवायोपकरणेऽपि । नीडं स्थाने खगालये । नीयते नीडम् "कुगुहुनो" इति कित् डः । स्थाने क्लीबे । खगालयः कुलायस्तत्र त्रिलिङ्गः । स्थाने यथा स बद्धकक्षः परनीडपीडने । खगालये यथा–शाखाकम्पचलत्खगे निबिडनीडेषु काकीकुलम् । पण्डः षण्ढे । पण्डते पण्डः । पणेर्वा "पञ्चमाड्डः" षण्ढो नपुंसकः तत्र यथा–पण्डश्चण्डरिरंसया । पण्डा बुद्धौ यथा–धर्मं वेत्ति स पण्डितः । अत्र पण्डा बुद्धिर्विद्यतेऽस्येति पण्डितः । पाण्डुः कुन्तीपतौ सिते । पण्यते पाण्डुः "पनेर्दीर्घश्च" (उ० ७६६) इति डुः । सिते वाच्यलिङ्गः । कुन्तीपतौ यथा–पाण्डोर्नन्दन नन्दनं वनमिदम् । सिते यथा–पाण्डुच्छायातटरुहतरुभ्रंशिभिः शीर्णपर्णैः ॥ १२० ॥ पिण्डो वृन्दे जपापुष्पे गोलबोलेऽङ्ग–सिह्लयोः । कवले । पिण्ड्यते पिण्डनं वा पिण्डः । वृन्दगोलकवलेषु स्त्रीपुंसः । जपापुष्पबोलसिह्लषु पुंसि । अङ्गं शरीरं तत्र पुंक्लीबः । वृन्दे यथा–पिण्डीभूतं सरस्य सितममरसरित् पुण्डरीकं शशाङ्कः । गोले यथा–मृत्पिण्डोजलरेखयावलयितः सर्वोऽप्ययं नन्वणुः । बोलः औषधम् । अङ्गे यथा–पिण्डेष्वनास्था खलु भौतिकेषु । सिह्लं गन्धद्रव्यभेदः । कवले

भाण्डं मूलवणिग्वित्ते तुरङ्गाणां च मण्डने ।
नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च ॥ १२३ ॥
मण्डो मस्तुनि भूषायामेरण्डे सारपिच्छयोः ।
शाके मण्डा चामलक्यां मुण्डो मुण्डितशीर्षयोः ॥ १२४ ॥

यथा– पिण्डं गृहाण पिब वारि यथोपनीतम् । पिण्डं तु बेःमैकदेशे जीवनायसोः । बले सान्द्रे । जीवनम् जलम् । अयो लोहम् ॥ १२१ ॥ बलं स्थाम । सान्द्रं बहुलम् । पिण्डघलाबूखर्जूर्योस्तगरेऽपि च । "गौरादित्वाद्" ङीः । अलाबूः तुम्बी । तगरो गन्धवृक्षः पीडार्तिमर्दनोत्तंसकृपासु सरलद्रुमे । पीडनं पीड्यते वा पीडा "भीषिभूषि" बहुवचनात् अङ् । पञ्चस्वर्थेषु । आर्तौ मर्दने च यथा–परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरः । कृपायां यथा–सन्तः सपीडा जने ॥ १२२ ॥ भाण्डं मूलवणिग्वित्ते तुरगाणाम् च मण्डने । नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च । भासते अनेन भाण्डम् "पञ्चमाड्" इति डः । मूलं वणिजो वित्तम् । तत्र यथा–तरीषु तत्रत्यमफल्गुभाण्डं सांयात्रिकानावपतोऽभ्यनन्दत् । तुरङ्गाणां मण्डनम् आभरणं पर्याणादि च । तत्र यथा–व्यंसिषुर्न खलु जनस्य दृष्टयः, तुरङ्गमादभिनवभाण्डभारिणः । नदीकूलद्वयीमध्ये यथा–भाण्डेऽपि नद्यम्बु न जानुदघ्नम् । भूषणे यथा–कनकभाण्डविडम्बितरण्डया । भाजने यथा–येनेदं स्फुटती विनिर्भरभृतं ब्रह्माण्डभाण्डोदरम् ॥ १२३ ॥ मण्डो मस्तुनि भूषायामेरण्डे सारपिच्छयोः । शाके । मण्डयति मण्डनं वा मण्डः । षट्स्वर्थेषु पुंक्लीबः । मस्तु दधिज तत्र यथा–अजाजी शृङ्गबेरं च दधिमण्डेन भावयेत् । भूषा अलंकारः तत्र यथा–पुनातु चण्डीकृतमुण्डमण्डा । एरण्डः पञ्चाङ्गुलः । सारं भक्तादिनिर्यासः तत्र यथा–

राहौ दैत्यान्तरे रण्डात्वाखुकर्णी मृतप्रिया ।
व्याडो हिंस्रपशौ सर्पे शुण्डा करिकरः सुरा ॥१२५॥
जलेभी नलिनी वारस्त्री शुण्डो मदनिर्भरे ।
शौण्डी च विकपिप्पल्योःशौण्डो विख्यातमत्तयोः॥१२६॥

मातङ्गोज्झितमण्डवारिकणिकापानं च कूर्चार्हतिः (कूर्चार्हतिः इति प्रत्यन्तरे)। पिच्छा। द्रवद्रव्याणामुपर्यच्छो भागः तत्र यथा-मण्डपे या विलेपीनामोदनस्य च लाघवं। यद्वा पूर्वम् शाकं मूलकादि। मण्डात्वामलक्याम्। आमलकी वृक्षभेदः। मुण्डो मुण्डित शीर्षयोः। राहौ दैत्यान्तरे। मुण्डयते मुण्डः। मुण्डिते वाच्यलिङ्गः। शीर्षे पुंक्लीबः। मुण्डिते यथा-मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः। शीर्षे यथा-क्षुण्णक्षत्रियमुण्ड-मण्डनवती ॥ १२४ ॥ राहौ यथा-मुण्डेन चण्डांशुरयं निगीर्णः। दैत्यान्तरे यथा-हत्वा चण्डं च मुण्डं च। कीलकाजातशृङ्गकाकृत-चूडेष्वपि। कीलके यथा-व्यालैरावृतकोटरेऽपि शुषिरे मुण्डे कृतावस्थितिः। अजातशृङ्गके गवादौ यथा-शावलेयो बाहुलेयः खण्डो मुण्ड इत्यादि। अकृतचूडे यथा-जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः। अत्र हि मुण्डमकृतचूडमबद्धकेशं शिरोऽ-स्यास्तीति मुण्डी। रण्डा त्वाखुकर्णी मृतप्रिया। रम्यते रमते वा रण्डा "पञ्चमाद्डः" आखुकर्णी आखुकर्णाभपत्रा ओषधिः मृतप्रिया विधवा तत्र यथा-तथापि रण्डा सुरताभिलाषिणी। व्याडो हिंस्रपशौ सर्पे। व्याडति हन्तु व्याडः। द्वयोर्यथा-व्याडव्यालवनान्तरे। शुण्डा करिकरः सुरा। जलेभी नलिनी वारस्त्री। शुनति शुण्डा "कुगुहुनी" इति कित् डः। सुरायां स्त्रीपुंसः। करिकरे यथा-क्रीडा कुण्डलितोद्दण्डशुण्डो वोऽव्याद् गणाधिपः। पानमदस्थानेऽपि सुरापानमदस्थानयोर्यथा-शुण्डायां

षडः पेयान्तरे भेदे षण्डः कानन इद्धरे ।
गूढं रहः संवृतयोर्दाढा दंष्ट्राभिलाषयोः ॥ १२७॥
दृढः शक्ते भृशे स्थूले, बाढं भृशप्रतिज्ञयोः ।
माढिर्दैन्यं पत्रशिरार्चा मूढस्तन्द्रिते जडे ॥ १२८॥

प्रविजृम्भते परिमलः कोप्येष शुण्डाकृतः ॥ १२५ ॥ जलेभी जलहस्तिनी, नलिनी पद्मिनी, वारस्त्री वारवेश्या। त्रिबुकेऽपि। यथा–शुण्डा मुण्डीकरणरसाद्भक्ति नपुंसकतां यः। शुण्डो मदनिर्भरे। मदेन निर्भरः उन्मत्तः इत्यर्थः। वाच्यलिङ्गः शौण्डी चविकपिप्पल्योः। शौण्डीव शौण्डी स्वकार्यसक्तत्वात्। चविकं पिप्पली च ओषधिभेदौ। शौण्डो विख्यातमत्तयोः। शुण्डाऽस्त्यस्य शौण्डः "ज्योत्स्नादित्वात्" (७।२।३४) अण् वाच्यलिङ्गः। विख्याते यथा–त्रैलोक्यत्राणशौण्डः सरसिजवसतेः संप्रसृतौ भुजाभ्याम्। मत्ते यथा-हरिजयमदशौण्डः सैषलङ्काधिनाथः ॥ १२६ ॥ षडः पेयान्तरे भेदे। सनतीति षडः। "कुगुहिनी" इति बहुवचनात् कित् डः। "पृषोदरादित्वात्" साधुः पेयान्तरं पानकविशेषः। भेदो विदारणम्। षण्डः कानने इद्धरे। सनति षण्डः। "पञ्चमाड्डः" बाहुलकात् सत्वाभावः। कानने पुंक्लीबः। तत्र यथा-कुमुदकमलखण्डे तुल्यरूपामवस्थाम्। इद्धरः उत्सृष्टः पशुः। यथा–चौरैरपहृते षण्डे पृष्ठतः कोनुधावति ॥ अथ ढान्ताः ॥ गूढं रहःसंवृतयोः। गुह्यते स्म गूढम्। संवृते वाच्यलिङ्गः। रहसि यथा–गूढमैथुनधार्ष्ट्यं काले चालयसंग्रहम्। संवृते यथा–तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च। दाढा दंष्ट्राभिलाषयोः। दह्यतेऽनया दाढा "भिदादित्वात्" (५।३।१०८) साधुः। दंष्ट्रायां यथा–दाढावलीढ दृढपल्वलगूढमुस्तः ॥१२७॥ दृढः शक्ते

राढा सुह्मेषु शोभायां व्यूढा न्यस्तोरुसंहताः ।
वोढा स्याद् भारिके सूते शण्ढषण्ढौ तु सौविदे॥१२९॥
वन्ध्यपुंसीध्द्रे क्लीबे सोढा मर्षणशक्तयोः ।
अणिराणिवदश्रौ स्यात्सीमन्यक्षाग्रकीलके ॥१३०॥

भृशे स्थूले। दर्हति दृहति वा दृढः "बलिस्थूले दृढः" (७।२।१०७) इति साधुः। शक्तस्थूलयोः पुंक्लीबः। भृशे वाच्यलिङ्गः। वैजयन्ती तु सर्वेष्वपि वाच्यलिङ्गमाह। शक्तो बलवान्। तत्र यथा–हे नागराज नगवद्दृढीभूय धरां धर। भृशे अत्यर्थे यथा–कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वसहे। स्थूले यथा–दृढस्कन्धो महोत्साहः। बाढं भृशप्रतिज्ञयोः। बाह्यते बाढम् "क्षुब्धविरब्ध" (४।४।७१) इति साधुः। भृशे यथा–बाढमाविद्धकर्णः। प्रतिज्ञायां यथा–बाढमेतत् करोति। प्रायः क्रियाविशेषणमेतत्। माढिर्दैन्यं पत्रशिराऽर्चा। मह्यते अनया महनं वा माढिः "आदिकात्" स्त्रियां क्तिः। पत्रशिरा दलस्नसा। अर्चा पूजा। तत्र यथा–उमामाढिप्रसक्तानाम्। मूढस्तन्द्रिते जडे। मुह्यति स्म मूढः वाच्यलिङ्गः। तन्द्रिते यथा–किं किं मूढः करोमीत्यसकृदपि कृतारम्भवैयर्थ्यखिन्नः। जडे यथा–मया मूढेन त्वां कृपणमगुणज्ञं प्रणमता ॥ १२८ ॥ राढा सुह्मेषु शोभयाम्। राजतेऽनया राढा "भिदादित्वात्" साधुः द्वयोरपि स्त्रियाम्। सुह्मा जनपदविशेषस्तत्र यथा–राढीया दृढबुद्धयः। शोभा विभूषा तत्र यथा–आषाढः प्रौढराढः। व्यूढा न्यस्तोरुसंहताः। व्यूह्यते स्म व्यूढः। न्यस्तं विन्यस्तं रचितमिति यावत्। तत्र यथा–व्यूढं द्रुपदपुत्रेण। उरौ विशाले यथा–व्यूढोरस्को वृषस्कन्धः। संहते यथा–व्यूढजानुर्जुहुयात् सर्वदा हविः। वोढा स्यात् भारिके सूते। वहति

अणु व्रीह्यल्पयोरुषणा ग्रीष्मदृत्तातपोऽहिमाः
ऊर्णा भ्रूमध्यगावर्ते मेषादीनां च लोमनि: ॥१३१॥
ऋणं देये जलदुर्गे कणो धान्यांशलेशयोः ।
कणा जीरकपिप्पल्योः कर्णश्चापापतौ श्रुतौ ॥१३२॥

वोढा । तृच् तृन् वा । "सहिवहेः" (१।२।४३) इत्योत्वम् । भारिके भारवाहके यथा-भागीरथीनिर्झरशीकराणां वोढा मुहुः कम्पितदेवदारुः । सूते सारथौ यथा-यस्य वोढाऽरुणो रथे । शण्ढषण्ढौ तु सौविदे । वन्ध्य पुंसीद्वरे क्लीबे । शाम्यति शण्ढः "शमिषणिभ्यां ढः" (उ. १७९) बाहुलकात् सत्वाभावः । सौविदो वर्षवरः । तत्र यथा-अन्तःपुरं शण्ढशतावगाढम् ॥ १२९ ॥ वन्ध्यो निष्फलबीजः पुमान् । तत्र यथा-शण्ढातनयदो हृदः । इद्वरः उत्सृष्टः पशुः । तत्र यथा-कण्ठे बध्नासि किमिमां मूढे शण्ढस्य गामिव । क्लीबो नपुंसकस्तत्र यथा-परिष्वक्तः शण्ढो युवतिरिति लावण्यरहितः । एवं सर्वत्र षण्ढोऽपि । सोढा मर्षण-शक्तयोः । सहते षोढा । तृच् तृन् वा । मर्षणः तितिक्षुः । तत्र यथा-तव भुजतरुखण्डं मत्कुठारो न सोढः । शक्तः समर्थस्तत्र यथा-न सोढा वर्णने गुरुः ॥ अथ णान्ताः ॥ अणिराणिवदश्रौ स्यात् सीमन्यक्षाग्रकीलके । अणति अणिः । आणिः "कृशृकुटीनि वाणिविः" उभौ स्त्रीपुंसौ । अश्रिः कोणः । तत्र यथा-तीक्ष्णाणि-मरणिं छिन्द्धि । सीमा मर्यादा । अक्षस्य चक्रनाभिक्षेप्यस्य काष्ठस्य अन्ते बन्धार्थं कीलकः । अक्षाग्रकीलकः तत्र यथा-अणुनाऽप्याणिना हीनो न गच्छति रथः पथि ॥ १३० ॥ अणुर्व्रीह्यल्पयोः । अणति अणुः "भृमृतृत्सरी" इति उः । व्रीहौ पुंक्लीबः अल्पे वाच्य-लिङ्गः । व्रीहौ यथा-अणवः प्रियङ्गुकोद्रवमयुष्टिकाः शालिरादकयः ।

अल्पे यथा–निजभुजदर्पादणुरपि नावज्ञेयो बलीयसाऽप्यबलः । उष्णा ग्रीष्मदक्षातपोहिमाः । ओषति उष्णः "धृवीह्वा" (उ० १८३) इति कित् णः । चतुर्ष्वर्थेषु दक्षे हिमे च वाच्यलिङ्गः । ग्रीष्मे यथा–उष्णर्त्तावुष्णकिरणकिरणैरतिदारुणैः । दक्षे यथा–उष्णकः सर्वकार्येषु । आतपे यथा–यदर्थमम्भोजमिवोष्णवारणम् । अहिमोऽशीतलस्तत्र यथा–क संप्रत्युष्णांशुरिति इति तदन्वेषणपराः । ऊर्णा भ्रूमध्यगावर्ते मेषादीनां च लोमनि । ऊर्वति अशुभम् ऊर्णा "इणुविश" इति णः "राल्लुक्" इति वलोपे "य्वादेः" इति दीर्घः । भ्रूमध्यगावर्तः चक्रवर्तिचिह्नम् । तत्र यथा–ऊर्णारोमसखं मुखं च शशिनः पूर्णस्य धत्ते तुलाम् । मेषादीनां लोमनि यथा–ऊर्णामयैस्तन्तुभिः ॥ १३१ ॥ ऋणं देये जलदुर्गे । अर्यते ऋणम् "धृवीह्वा" (उ० १८३) इति कित् णः "क्ते वा" ऋहीघ्राध्रेति तस्य नत्वम् । देयम् अर्थादधमर्णेन उत्तमर्णाय यथा–ये ऋणव्याधिपीडिताः । जलदुर्गे यथा–संपत्स्यन्ते (सम्पश्यन्ते) कतिपयदिनस्थायिहिंसा (हंसा) दशार्णाः । अत्र हि दश ऋणानि जलदुर्गाणि अत्र इति व्युत्पत्तिः । कणो धान्यांशलेशयोः । कणति कणः । धान्यांशे पुंसि लेशे स्त्रीपुंसः । धान्यांशे यथा–कणान् वा भक्षयित्वा तु माहिषाणि दधीनि वा । लेशे यथा–चण्डाश्चामुण्डराजस्य प्रतापशिखिनः कणाः । वित्पृष्वपि यथा – स्थूलाः किमित्यश्रुकणाः पतन्ति । कणा जीरकपिप्पल्योः (पिप्पलयोः) । स्त्रीलिङ्गः । जीरकं पिप्पली च ओषधिः । अतिविषायामपि । कर्णश्चम्पापतौ श्रुतौ । कर्णयति कर्णः । किरतेर्वा "इणुविश" (उ० १८२) इति णः । चम्पापतौ यथा–संशय्य कर्णादिषु तिष्ठते यः । श्रुतौ यथा–सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् । अरित्रेऽपि । संसारवारांनिधिकर्णधारः ॥ १३२ ॥ क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे । व्यापारविकलत्वे च परतन्त्रत्व-

क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे ।
व्यापारविकलत्वे च परतन्त्रत्वमध्ययोः ॥ १३३ ॥
कीर्णः क्षिप्ते हते छन्ने कुणिः कुकरवृक्षयोः
कृष्णः काले पिके वर्णे विष्णौ व्यासेऽर्जुने कलौ ॥ १३४ ॥

मध्ययोः । क्षणुते क्षणः सततस्वर्थेषु । कालविशेषः नाडिकाषष्ठांशः मुहूर्तो वा । तत्र यथा-क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः । पर्व विषुवदादि तत्र यथा-रवेः संक्रमणक्षणः । अवसरे यथा-सेवाक्षणः वर्तते । महे उत्सवे यथा-क्षणे रथ्याः कुलस्त्रियः । व्यापारविकलत्वे यथा-रहो नास्ति क्षणो नास्ति । परतन्त्रत्वे यथा-क्षणिकास्मिन् ते क्षणः । मध्ये यथा-प्रासादक्षण-रक्षणम् ॥ १३३ ॥ कीर्णः क्षिप्ते हते छन्ने । "कीर्यते स्म कीर्णः वाच्यलिङ्गः । क्षिप्ते यथा-कीर्णैः पिष्टातकौघैः । हते यथा-कर्णश्च कीर्णाखिलशत्रुपक्षः । छन्ने व्याप्ते यथा-दर्भैरर्द्धाव(सस्यैरर्द्धाव) लीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा । कुणिः कुकरवृक्षयोः । कुणति कुणिः "नाम्युपान्त्य" इति कित् इः । कोलेर्वा "कृघृ" इति कित् णिः । पुंसि कुकरे विकले पाणौ यथा-कान्तिं कामिव कुर्वीत कुणौ कङ्कणकल्पना । कुत्सितः करोऽस्येति व्युत्पत्त्या तद्वत्यपि तत्र तु वाच्यलिङ्गः । कृष्णः काके पिके वर्णे विष्णौ व्यासेऽर्जुने कलौ । कर्षति कृष्णः "घृवीह्वा" इति कित् णः । वर्णे गुणे पुंसि तद्वति तु वाच्यलिङ्गः । वर्णे विष्णौ च यथा-कृष्णोऽहं दयिते बिभेमि सुतरां कृष्णादहं वानरात् । व्यासे यथा-कृष्णेन विष्णुभक्तेन कृतं भारतमद्भुतम् । कृष्णद्वैपायतन इत्यादौ स्थितस्य कृष्णशब्दस्य भीमो भीमसेन इति न्यायेन व्यासे प्रयोगः । अथवा द्वैपायनशब्दस्य । चण्डश्चण्डीपतेरंशो मुनिर्द्वैपायनोऽस्तु वः ।

कृष्णा तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि।
कृष्णं तु मरिचे लोहे कोणो वीणादिवादने ॥१३५॥
लगुडेऽश्रौ लोहिताङ्गे गणः प्रथमसंख्ययोः ।
समूहे सैन्यभेदेऽथ गुणो ज्यासूदतन्तुषु* ॥१३६॥

रथयोजितगोविन्दरुक्मिणीकः सदा मुदे इत्यादौ दुर्वासस्यापि वर्तनात् । कृष्णशब्देन व्यासवाचिना विशिष्यते द्वैपायनशब्दः। अर्जुने यथा-अर्जुनः फाल्गुनः पार्थः किरीटी श्वेतवाहनः। बीभत्सो विजयी कृष्णः सव्यसाची धनंजयः । कलिश्चतुर्थ युगम् ॥ १३४ ॥ कृष्णा तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि । नीली पिप्पली द्राक्षा च ओषधयः । द्रौपद्यां यथा-कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः। कृष्णं तु मरिचे लोहे । मरिचम् ऊषणम् । लोहम् अयः । कोणो वीणादिवादने । लगुडेऽश्रौ लोहिताङ्गे । कुणत्यनेन कोणः "व्यञ्जनाद् घञ्" (५। ३। १३२) वीणादिवादने अश्रौ च यथा-धृत्वा कोणं विरचितलयो वादयन् दन्तवीणाम् ॥ १३५ ॥ लगुडे यथा-उद्धूर्णकोणे रभसादनुद्रुतः । लोहिताङ्गो मङ्गलः । शनावपि । यथा-भानुवक्रतमः कोणाः सप्तमस्था द्विप-श्रगाः । द्वादशस्था गुरोरेते भञ्जन्ति सकलं जगत्। शब्देऽपि । गणः (प्रथम) प्रमथसंख्ययोः। समूहे सैन्यभेदे। गण्यते गणः। प्रथमे यथा-गणानुमेरुप्रसवावतंसाः । संख्यायां यथा-अजगणन् गणशः प्रियमग्रतः प्रणतमप्यभिमानतया नयाः। समूहे यथा-मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः । सैन्यभेदे यथा-त्रिभिर्गुल्मैर्गणस्तैश्च वाहिनी त्रिभिरिष्यते । अथ गुणो ज्यासूदतन्तुषु ।

* मुद्रितमूल – सूत्रतन्तुषु ।

रज्जौ सत्वादौ संध्यादौ शौर्यादौ भीम इन्द्रिये ।
रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे ॥१३७॥
*गेष्णो नटे गायने च घ्राणं तु घ्रातघोणयोः ।
घृणा तु जुगुप्सायां करुणायां घृणिः पुनः ॥१३८॥

रज्जौ सत्वादौ संध्यादौ शौर्यादौ भीम इन्द्रिये । रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे । गुण्यते गुणः । ज्या मौर्वी । तत्र यथा—स्फुटिष्यति न कोदण्डं त्रुटिष्यति न वा गुणाः । सूदः सूपकारः । तत्र यथा—महानसे किं नु गुणा गृणन्ति । तन्तौ यथा—कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितः ॥ १३६ ॥ रज्जौ यथा—संपूर्णोऽपि घटः कूपे गुणच्छेदात् पतत्यधः । सत्वादीनि सत्वरजस्तमांसि । तत्र यथा—त्रयीमयाय त्रिगुणात्मने नमः । संध्यादयः संधिविग्रहयानासनद्वैधीकभावसंश्रयाः । तत्र यथा-षड् गुणाः शक्तयस्तिस्रः । शौर्यादयः शौर्यगाम्भीर्यस्थैर्यादयः । तत्र यथा—भीमकान्तैर्नृपगुणैः । भीमे यथा—धृतराष्ट्रोऽपि गुणप्रियः । अत्र हि विरोधाभासे गुणशब्देन विराटगृहे सूपकारत्वाद्भीमसेन उच्यते । इन्द्रिये स्पर्शनादौ यथा—प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु । रूपादयो वैशेषिकोक्तश्चतुर्विंशतिः । तत्र यथा-गुणवति यौवनशालिनि । अप्रधाने दोषान्यस्मिन् उत्कर्षे च यथा—गुणाः खलु गुणा एव । विशेषणे यथा—गुणवृत्तेराश्रयाद्वचनलिङ्गे ॥ १३७ ॥ गेष्णो नटे गायने च । गायति गेष्णः "गादाभ्यामेष्णक्" (उ० १९९) वाच्यलिङ्गः । द्वयोर्यथा – गेष्णो विष्णुचरित्रस्य । घ्राणं तु घ्रातघोणयोः घ्रायते स्म घ्राणं "क्तह्रीघ्रा" (४।२।७६) इति क्तस्य नत्वम् ।

---

१ मु० गेष्णु ।

अंशुज्वालातरङ्गेषु चूर्णानि वासयुक्तिषु ।
चूर्णं क्षोदे क्षारभेदे जर्णो जीर्णद्रुमेन्दुषु ॥ १३९ ॥
जिष्णुः शक्रेऽर्जुने विष्णौ जित्वरेऽर्के वसुष्वपि ।
झर्णिः क्रमुकभेदे स्याद्दुष्टदैवश्रुतावपि ॥ १४० ॥

जिघ्रति अनेन वा अनट् । घ्राते वाच्यलिङ्गः । यथा-घ्राण-गीर्वाणसौरभः । घ्राणायां यथा-शीर्णघ्राणाङ्घ्रिपाणीन् । घृणा तु जुगुप्सायां करुणायाम् । घरति घृणा "घृवीह्वा" इति कित् णः । घृणुते वा "नाम्युपान्त्य" इति कः । जुगुप्सायां यथा-चण्डाली-मपि यान्ति निर्घृणतया । करुणायां यथा-द्विगुणघनघृणानिघ्न-निर्विघ्नवृत्तेः । घृणिः पुंसः । अंशुज्वालातरङ्गेषु । घरति घृणिः "ऋद्‌घ्रेस्" (उ. ६३५) इति कित् णिः ॥ १३८ ॥ पुंसि अंशुषु यथा-विदधतु घृणयः शीघ्रमंहोविघातम् । ज्वालायां यथा-घृणौ कृशानौ घुसृणायमाने । चूर्णानि वासयुक्तिषु । चूर्यते स्म चूर्णानि । प्रायेण बहुवचनान्तः । यथा-ह्रीमूढानां भवति विफलप्रेरणश्चूर्ण-मुष्टिः । चूर्णं क्षोदे क्षारभेदे । क्षोदे पुंक्लीबः । तत्र यथा-छिद्रै-रमी भिरङ्घुभिः किरणव्याजेन चूर्णानि । क्षारभेदे ताम्बूलोपकरणे यथा-करहाटकचूर्णेन ताम्बूलं मम दीयताम् । जर्णो जीर्णद्रुमेन्दुषु । जीर्यति जर्णः । "इष्णुर्वैश" इति णः । त्रिष्वर्थेषु जीर्णे वाच्य-लिङ्गः । शेषयोः पुंसि ॥ १३९ ॥ जिष्णुः शक्रेऽर्जुने विष्णौ । जित्वरेऽर्के वसुष्वपि । जयनशीलो जिष्णुः "भुजेः ष्णुक्" (५।२।३०) जित्वरे वाच्यलिङ्गः । शेषेषु पुंसि । शक्रे यथा-जिष्णुना विजिते वृत्रे । अर्जुने यथा-आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः । विष्णौ जित्वरे च यथा-दैत्येन्द्रजिष्णुः किल जिष्णुरेव । अर्के यथा-जिष्णुनन्दीनः कमलप्रबोधौ । वसवो देवप्रभेदाः ।

त्राणं त्राते रक्षणे च त्रायमाणौषधावपि ।
तीक्ष्णं समुद्रलवणे विषायोऽमरकाजिषु ॥१४१॥
आत्मत्यागिनि तिग्मे च तूणी नीलीनिषङ्गयोः ।
द्रुणः स्याद् वृश्चिके भृङ्गे द्रुणं चापकृपाणयोः॥१४२॥

झूणिः क्रमुकभेदे स्याद् दुष्टदेवश्रुतावपि । झम्यते झूणिः "झूणि-धूणि" इति साधुः स्त्रीलिङ्गः। क्रमुकभेदः पूगविशेषः। दुष्टस्याशुभस्य दैवस्य प्रतिपादिका श्रुतिः दुष्टदैवश्रुतिः ॥१४०॥ त्राणं त्राते रक्षणे च त्रायमाणौषधावपि । त्रायते स्म त्राणं "ऋदः ह्री घ्रा" (४।२।७६) इति क्तस्य नत्वम् । त्रायते त्रायते अनेन वा भावे करणे वा अनट् । त्राते वाच्यलिङ्गः । शेषयोः क्लीबे । त्राते यथा-त्राणः अगीर्वाणगणेन बाणैः । रक्षणे यथा-त्वङ्गरया शिथिलीकृतत्रिभुवनत्राणाय नारायणः। तीक्ष्णं समुद्रलवणे विषायोमरकाजिषु। आत्मत्यागिनि तिग्मे च । तेजयतीति तीक्ष्णम् "भ्रणतृण" (उ० १८६) इति साधुः । सप्तस्वर्थेषु । आत्मत्यागितिग्मयोर्वाच्यलिङ्गः । विषेऽयसि आजौ च यथा-तीक्ष्णेन तीक्ष्णं विलिलेप तीक्ष्णे ॥ १४१ ॥ द्रव्यहेतोरात्मानं यस्त्यजति स आत्मत्यागी । यत् कौटिल्यः । ये द्रव्यहेतोर्व्याल हस्तिनं चापि योधयेयुस्तीक्ष्णा इति । तिग्मे यथा-अभीक्ष्णं तीक्ष्णांशुः क्षिपति किरणैः । क्षारमात्रेपि । तूणी नीलीनिषङ्गयोः । तूणण् संकोचने । अचि ङ्यां च तूणी । तौतेर्वा "स्थाक्षुतोरूच्च" (उ० १८५) इति णः । नीलौ ओषधिः । तत्र स्त्रियाम्। निषङ्ग इषुधिः। तत्र त्रिलिङ्गः। तत्र यथा-तूणी पुंवाद्द्राशेरम त्रिशोणाङ्कितः । द्रुणः स्याद्वृश्चिके भृङ्गे । द्रुणत् गतिकौटिल्ययोश्च "नाम्युपान्त्य" इति के द्रुणः । द्रवतेर्वा "द्रो" इति किद् णः । वृश्चिके यथा-

द्रुणी कूर्म्यां जलद्रोण्यां देष्णो दातरि दुर्दमे ।
द्रोणः पार्थगुरौ काके माने द्रोणी तु नीवृति ॥१४३॥
नौभेदे शैलसंधौ च पणः कार्षापणे ग्लहे ।
विक्रय्यशाकादि बद्धमुष्टौ मूल्ये भृतौ धने ॥१४४॥

द्रुगाघातव्रणार्दितः । द्रुणं चापकृपाणयोः । चापं धनुः । कृपाणः खड्गः । तत्र बाहुलकात् क्लीबे । मौर्व्यामपि । तत्र तु द्रुणा ॥ १४२ ॥ द्रुणी कूर्म्यां जलद्रोण्यां । गौरादित्वात् ङीः । कूर्मी कच्छपी । तत्र यथा-यत् पश्यति द्रुणीस्नेहाड्डिम्भस्तेनैव वर्द्धते। जलद्रोणी काष्ठाम्बुवाहिनी नौके यथाः । देष्णो दातरि दुर्मे (दुर्गमे)। ददाति द्यति वा देष्णः "गादाभ्यामेष्ण ष्टक्" वाच्यलिङ्गः । द्वयोर्यथा-केचा देष्णं विजिष्णवः । द्रोणः पार्थगुरौ काके माने । द्रवति द्रोणः "द्रुवेति" णः । माने पुंक्लीबः । पार्थगुरौ यथा- द्वाभ्यामपि भयं द्रोणे शापादपि शरादपि । काके काकभेदे यथा- उत्कूजत्क्रुद्धधूकावलिविहित हठास्कन्द सं मर्द जाग्र न्निद्राण द्रोण- काकप्रकरकृतमहाक्रन्दितेनार्द्धरात्रे । माने यथा-चतुराढको भवेद् द्रोणः । पर्वतेऽपि यथा-आनीते द्रोणशैलेन सौमित्रेः शल्यहारिणा । द्रोणी तु नीवृति । नौभेदे शैलसंधौ च । गौरादित्वात् ङी। : नीवृज्जनपदविशेषः ॥ १४३ ॥ नौभेदः काष्ठाम्बुवाहिनी बेडा । तत्र यथा-द्रोणीभिरम्भसि संचरन्ति महार्णवस्य । शैलसंधौ यथा-अद्रिद्रोणीकुटीरे कुहरिणि हरिणारातयो यापयन्ति । गवाद्यन्नादिभाजनेऽपि यथा-द्रोणीषु वाहा इव संग्रसन्ते । द्रोणिरिकारान्तः । श्रेण्यामपि यथा-भील्ली पल्लवशङ्कया विचिनुते सान्द्रद्रुमद्रोणिषु । पणः कार्षापणे ग्लहे । विक्रय्यशाकादिबद्धमुष्टौ मूल्ये भृतौ धने । व्यवहारे च द्यूताद्युत्सृष्टे गण्डकविंशतौ । पण्यबे

व्यवहारे च द्यूताद्युत्सृष्टे गण्डकविंशतौ ।
पर्णस्त्रिपत्रे पर्णं तु पत्रे प्राणोऽनिले बले ॥१४५॥
हृद्वायौ पूरिते गन्धरसे प्राणास्तु जीविते ।
पार्ष्णिः कुम्भ्यां चमूपृष्ठे पादमूलोन्मदस्त्रियोः ॥१४६॥

---

अनेन पणनं वा पणः "पणेर्माने" इत्यल्। कार्षापणो रूप्यात्मा नाणकभेदः। यद्वा कार्षिकाख्यो विंशत्यधिकैकपञ्चाशत् शतसंख्यो वराटकमानविशेषः। यद्वाचस्पतिः चतुष्कपर्दको गण्डो वा(बा)ड्डी तु पञ्च गण्डकाः। काकणी चाथ दशभिर्गण्डकैर्बिन्दुकोऽस्त्रियाम्। बिन्दुकाभ्यां पुनर्द्वाभ्यां पणपाणिकपादिकाः। पादिकाद्वङ्जो रौप्यः कार्षिकश्च यथोत्तरम्। चतुर्गुणाः कार्षिके तु पणः कार्षापणोंऽशकः। तत्र यथा–क्रीतं पणसहस्रेण। ग्लहोऽक्षग्रहणम्। तत्र यथा–विधाय्याक्षपणं पाणौ। विक्रय्यशाकादिबद्धमुष्टौ मूल्ये वस्ने च यथा–एका शाकपणं पणेन विपणौ क्रीणाति पण्याङ्गना। भृतिर्वेतनं तत्र यथा–आगन्तुकेन कार्यं घनसलिलं पणवधूवशीकारः। एतेषु त्रिषु शक्तो ब्रह्माऽपि न निर्णयं कर्तुम्। धने यथा–बहुपणैः पुरमापणिकैर्वृतम् ॥ १४४ ॥ व्यवहारे यथा–दुःशकः कृपणैः पणः। द्यूताद्युत्सृष्टे यथा–आश्लेषचुम्बनविलोकनकौतुकानि क्रीडादुरोदरपणः प्रतिभूरनङ्गः। आदिशब्दात् समाह्वये निपानादौ च। गण्डश्चत्वारो वराटकाः। यद्वाचस्पतिः चतुष्कपर्दको गण्डः। स्वार्थे के गण्डकः। तेषां विंशतिः अशीतिः कपर्दकाः इत्यर्थः। पर्णस्त्रिपत्रे। पृणाति पर्णः "इणुर्विशेति" इति णः। त्रिपत्रः पलाशः। तत्र यथा–जुहूः पर्णमयी कार्या। पर्णं तु पत्रे यथा–स्वयं विशीर्णद्रुमपर्णवृत्तिता। प्राणोऽनिले बले। हृद्वायौ पूरिते गन्धरसे। प्राणित्यनेन प्राणनं वा प्राणः। प्राक्

पूर्णः कृत्स्ने पूरिते च फाणिगुँडकरम्बयोः ।
बाणो वृक्षविशेषे स्याच्छरस्यावयवे शरे ॥ १४७॥
बलिपुत्रेऽप्यथ भ्रूणो गर्भिण्यां श्रोत्रियद्विजे ।
अर्भके स्त्रैणगर्भे च मणिस्त्वजागलस्तने ॥ १४८ ॥

पूरणे "बाले व्यञ्जनान्तस्था" इति तस्य मत्त्वे प्राणः । पूरिते वाच्यलिङ्गः । अनिले सामान्यपवने यथा—अभाङ्क्षीत् पादपं प्राणः । बले स्थाम्नि यथा—प्राणाधिकं विपुलबाहुभृतामपीदं । त्रैयम्बकं किमपि कार्मुकमन्तरायः ॥ १४५ ॥ द्व्यर्थौ यथा—प्राणो नासाग्रहृन्नाभिपादाङ्गुष्ठान्तगो हरित् । गन्धरसो बोलः । प्राणास्तु जीविते । पुंभूम्नि तत्र यथा—प्रिया कण्ठगतास्त्यै प्राणा मरण-हेतवे । पार्ष्णिः कुम्भ्यां चमूपृष्ठे पादमूलोन्मदस्त्रियोः पृष्यते पार्ष्णिः "पृषिहृषिभ्यां वृद्धिश्च" इति णिः । कुम्भ्याम् उन्मदस्त्रियां च स्त्रीलिङ्गः । पादमूले स्त्रीपुंसः । चमूपृष्ठे पुंसि । कुम्भी स्तम्भस्याधारः ओषधिर्वा । चमूपृष्ठे यथा—स गुप्तमूलपर्यन्तः शुद्धपार्ष्णिरयान्वितः । पादमूले यथा—उद्वेजयत्यङ्गुलिपार्ष्णिभागान् ॥ १४६ ॥ पूर्णः कृत्स्ने पूरिते च । पूर्यते स्म पूर्णः वाच्यलिंगः । कृत्स्ने यथा—पूर्णं व्याकरणं पपाठ न शठस्तूर्णं सजीर्णोद्यमः । पूरिते यथा—गृहात् प्रतिनिवर्तन्ते पूर्णकामा यदर्थिनः । फाणि-गुडकरम्बयोः फाण्यते फाणिः "स्वरेभ्य इ" स्त्रियाम् द्वयोर्यथा—धाणिः फाणिरिवोज्वला । बाणो वृक्षविशेषे स्याच्छरस्यावयवे शरे । बलिपुत्रेऽपि । वण्यते बाणः घञ् । वृक्षे स्त्रीपुंसः । शरे पुंक्लीबः । अन्यत्र पुंसि । वृक्षविशेषे शरावयवे च यथा—सद्यः प्रवालो-द्गमचारुपुत्रे नीतिं समाप्ते नवचूतबाले ॥ १४७ ॥ बलिपुत्रे यथा—जयन्ति बाणासुरमौलिलालिताः । देवभेदेऽपि मङ्कः । यथा—

मेढ्राग्रेऽलिञ्जरे रत्ने मोणः सर्पकरण्डके ।
वाने नक्रमक्षिकायां रणः कोणे क्वणे युधि ॥१४९॥
रेणुर्धूल्यां पर्पटके वर्णः स्वर्णे व्रते स्तुतौ ।
रूपे द्विजादौ शुक्लादौ कथायामक्षरे गुणे ॥ १५०॥

बाण.लक्षेण निर्मितं तथा देवे स्वयंभुवि । मङ्ख एव च बाण-शब्दो वाचि स्त्रियां वर्तते इत्याह । यथा-वाणीयवाणी यदि कर्णगोचरा । अथ भ्रूणो गर्भिण्यां श्रोत्रियद्विजे । अर्भके स्त्रैणगर्भे च भ्रियते भ्रूणः । "भ्रूण तृण" इति साधुः । सर्वेषु यथा-सद्यः पतति भ्रूणहा । मणिस्त्वजागलस्तने मेढ्राग्रेऽलिञ्जरे रत्ने । मणति मणिः "पदिपठि" इति इः । स्त्रीपुंसः । अजागलस्तने । यथा-अजामणेरिवैतस्य जन्म जातं निरर्थकम् ॥ १४८ ॥ मेढ्राग्रे यथा-गूढो मणिः स विपुलां श्रियमादधाति । अलिञ्जरो महाघटस्तत्र यथा-क्रमादपामपि मणौ पङ्कोऽवश्यं प्रवर्द्धते । उत्सिष्टेत्तु यथाकालं मलानां शोधनं प्रति । रत्ने यथा-यदि मणिस्त्रपुणि प्रतिबध्यते । हस्तमूलेऽपि यथा-मणेस्तु निःसृता रेखा । मोणः सर्पकरण्डके । वाने नक्रमक्षिकायाम् । मुणत् प्रतिज्ञाने । मोणनं मोणः । घञ् । वानं शुष्कफलम् । नक्रमक्षिका या नासिकायां प्रविश्य शब्दायते जलमक्षिका वा । रणः कोणे क्वणे युधि । रणत्यनेन अस्मिन् वा रणः । बाहुलकाद् घः । रमनं रण्यते वा "युवर्ण" इत्यल् । युधि पुंक्लीबः । कोणो वादनकाष्ठम् तत्र यथा-रणन्ति वीणा रणताडितास्ततः । क्वणे यथा-कर्षन्ति मञ्जीररणेन मानसम् । युधि यथा-रणे चाभिमुखो हतः ॥ १४९ ॥ रेणुर्धूल्यां पर्पटके । रिणाति रेणुः "अजिस्था" इति णुः । धूल्यां त्रिलिङ्गः । पर्पटको भेषजभेदः । तत्र पुंसि । यथा-भूरेणवो

भेदे गीतक्रमे चित्रे यशस्तालविशेषयोः ।
अङ्गरागे च वर्णं तु कुङ्कुमे वाणिरम्बुदे ॥ १५१ ॥
व्यूतौ मूल्ये सरस्वत्यां वीणा स्याद्वल्लकी तडित् ।
वृष्णिर्मेषे यादवे च वेणी सेतुप्रवाहयोः ॥ १५२ ॥

नभसि वद्धपयोदचक्राः । वर्णः स्वर्णे व्रते स्तुतौ । रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे । भेदे गीतक्रमे चित्रे यशस्ताल विशेषयोः । अङ्गरागे च । वर्ण्यते वर्णनं वा वर्णः । अल् । वृणातेर्वा "इणुविश" इति णः । पञ्चदशस्वर्थेषु । शुक्लादौ अक्षरे च पुंक्लीवः । अन्यत्र पुंसि । स्वर्णे यथा–कर्णेषु वर्णाभरणानि चक्रुः । व्रत ब्रह्मचर्यं तत्र यथा–अथाह वर्णी विदितो महेश्वरः । अत्र हि वर्णो ब्रह्मचर्यमस्यातीति वर्णी "वर्णाद्ब्रह्मचारिणि" इति इन् स्तुतौ यथा आकर्णयन्ति तव वर्णममुं सकर्णाः । रूपे आकारे यथा– वर्णस्वर्णमलंकरिष्णुरलिनीं जिष्णुः कचानां चयः । द्विजादौ यथा– वर्णाश्रमाणां गुरवे सवर्णी । शुक्लादौ यथा – कृष्याश्रयेष्वपि गुणेषु रराज नीलो वर्णः पृथग्गत इवालिगणो गजानाम् । कुथा गजाद्यास्तरणम् । तत्र यथा–परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः । अक्षरं स्वरादिः तत्र यथा अष्टौ स्थानानि वर्णानाम् । गुणो दोषेतरः । तत्र यथा–स्वगुणगिरो मुनिव्रताः परवर्णग्रहणे च साधवः ॥ १५० ॥ भेदः प्रकारस्तत्र यथा नानावर्णसुगंधपुष्पनिचयैः सर्वत्र यः पुष्पितः । गीतक्रमे रागपरिपाट्यां । यथा उपात्तवर्णे चरिते पिनाकिनः । चित्रमालेख्यं तत्र यथा–विवर्णवर्ण तव शत्रुहर्म्यम् । यशसि यथा अवर्णवादी न कापि राजादिषु विशेषतः । तालविशेषो वर्णतालः । अङ्गरागो विलेपनं तत्र यथा–निर्वर्ण्य वर्णं रतकेलि शीर्णम् । मखेऽपि । वर्णं तु

देवताडे केशबन्धे वेणुर्वंशे नृपान्तरे ।
शाणः कषे मानभेदे श्रेण्याल्यां कालसंहतौ ॥१५३॥
शोणो नदे रक्तवर्णे श्योनाकेऽग्नौ हयान्तरे ।
स्थाणुः कीले हरे स्थूणा सूर्म्यां स्तम्भे रुगन्तरे ॥१५४॥

कुङ्कुमे । कुङ्कुमं घुसृणं तत्र यथा–वर्णोदकैः काञ्चनशृङ्गसंस्थैः । वाणिरम्बुदे । व्यूतौ मूल्ये सरस्वत्याम् । वणति वाणिः "कमिवमि" इति णिदिः । वानं वा "का वा वी की" इति णिः । अम्बुदे पुंसि । अन्यत्र स्त्रियाम् ॥ १५१ ॥ व्यूतौ वाने यथा–क्षीणग्नि वाणिजाट्टेषु निष्प्रवाणि पटं जनाः । अत्र हि निर्गतः प्रवाण्या निष्प्रवाणिः । तत्कालोत्तीर्णः सदश इत्यर्थः । सरस्वत्यां यथा–मातर्वाणि तवेह पाणिकमले । वीणा स्याद् वल्लकी तडित् । वेति वीणा "घृवीह्वा" इति किन् णः । वल्लक्यां यथा–उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम् । तडित् विद्युत् । वृष्णिर्मेषे यादवे च । वर्षति वृष्णिः "ऋङ्ग्घ्रा" इति कित् णिः द्वयोर्यथा–न बिभेति रणे हरेरपि क्षितिपः का गणनास्य वृष्णिषु । वेणी सेतुप्रवाहयोः । देवताडे केशबन्धे । वेति वेणिः "कावावी" इति णिः, ङ्यां वेणी सेतुः पालिः ॥१५२॥ देवताडो वृक्षभेदः । सेतौ यथा – रागिसागरवेणिकाभ्यां यौवनकैलासिकाभ्यां भ्रूलताभ्यां विराजिता । प्रवाहकेशबन्धयोर्यथा–वेणीभूतप्रतनु सलिलां तामतीतस्य सिन्धुः । वेणुर्वंशो नृपान्तरे । अजति वेणुः "अजिस्था" इति णुः । पुंसि । द्वयोर्यथा–अथाम्तस्थे रणाट-व्यामसुहृद्वेणुदारिणा । नृपाङ्घ्रिपौघसंहर्षादग्निवद् वेणुदारिणा । अत्र यथा भीमसेनो भीमः, तथा वेणुदारी नृपो वेणुः । शाणः कषे मानभेदे । श्यति शाणः "इणुर्विश" इति णः । कषे

अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः ।
अवयवेऽप्यथार्हन् स्यात् पूज्ये तीर्थकरेऽपि च ॥१५५॥
अस्तः क्षिप्ते पश्चिमाद्रावर्तिस्त्वटनिपीडयोः ।
आप्तो लब्धे च सत्ये चाप्याप्तिः संबन्धलाभयोः ॥१५६॥

स्त्रीपुंसः । कषः कुरुविन्दद्रव्यनिष्पन्नं घर्षणोपकरणम् । तत्र यथा-मणिः शाणोल्लीढः । मानभेदे माषके यथा-सुवर्णशाणं तु लोमश-सुत्रेण वेष्टयेत् श्रेण्यात्यां कारुसंहतौ । श्रयति श्रीयते वा श्रेणिः "का वा वी" ति णिः । स्त्रीपुंसः । ङ्यां श्रेणी । आल्यां पङ्क्तौ यथा-उद्भिन्नवश्मश्रुश्रेणिरिव गणाधिपो जयति । कारुसंहतौ शिल्पिसंघाते यथा-जाया प्रमाणं श्रेणीनाम् । कुलेऽपि मङ्खः ॥ १५३ ॥ शोणो नदे रक्तवर्णे श्योनाकेऽग्नौ हयान्तरे । शोणृ संघाते अचि शोणः । रक्ते वर्णे पुंसि, तद्वति वाच्यलिङ्गः । नदे रक्तवर्णे च यथा-वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते । श्योनाकोऽरलुकाख्यो वृक्षः । अग्नौ यथा-चुल्ली-कोणान्तरे शोणं स्थगयत्यङ्गना निशि । हयान्तरं कोकनदच्छविः तुरङ्गस्तत्र यथा-शोणक्षुणितरणाङ्गणभूमिः । पद्मरागोऽपि । स्थाणुः कीले हरे । तिष्ठति स्थाणुः "अजिस्था॰" इति णुः । कीले पुंक्लीबः । हरे पुंसि । द्वयोर्यथा-तस्मै अगरुध्वसस्थाणवे स्थाणवे नमः । स्थूणा सूर्म्यां स्तम्भे रुगन्तरे । तिष्ठति स्थूणा "स्था श्रुत रुच्च" इति णः । सूर्मी लोहपुत्रिका । यस्यां प्रतप्तायां गुरुतल्पगेन प्रायश्चित्तं चर्यते । स्तम्भे यथा-अस्थिस्थूणं स्नसायुतं मांसशोणितलेपनं कीर्णं मूत्रपुरीषाभ्यां भूतावासमम् त्यज । रुगन्तरं रोगविशेषः ॥ १५४ ॥ अथ तान्ताः ॥ अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि । अमति अन्तः "दम्यमि" इति

ईतिरजन्ये प्रवासे स्याद्दूतिः स्यूतिरन्वयोः ।
ऋतं शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः ॥१५७॥
ऋतिर्जुगुप्साकल्याणगतिस्पर्धास्वथो ऋतुः।
स्त्रीणां पुष्पे वसन्तादावेतः कर्बुर आगते ॥१५८॥

तः निश्चयनाशावयवेषु पुंसि । शेषेषु पुंक्लीबः । स्वरूपे यथा-नान्तोऽस्य ज्ञायते कैश्चिद्दुर्जनस्योदधेरिव । निकटे यथा-हरस्यान्ते-वासी भृगुपतिरयं तिष्ठति पुरः । प्रान्ते यथा-केशा अपि विरज्यन्ते कोऽन्ते याति न विक्रियाम् । निश्चये यथा-पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥ अत्र हि दृष्टः अन्तो निश्चयोऽत्र इति दृष्टान्तः। नाशे यथा-शोचन्ति स्वजनानन्ते नीयमानान् स्वकर्मभिः। अवयवैकदेशस्तत्र यथा – घनकपिलजटान्तभ्रान्तगङ्गाजलौघः । अथार्हन् स्यात् पूज्ये तीर्थकरेऽपि च । अर्हति पूजाम् अर्हन् "सुगद्विषार्ह" इति अतृश ।, पूज्ये वाच्यलिङ्गः । तत्र यथा-यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते । तीर्थकरे यथा-नमोऽर्हते भगवते स्वयंबुद्धये वेधसे ॥ १५९ ॥ अस्तः क्षिप्ते पश्चिमाद्रौ । अस्यते स्म अस्यः क्तः "दम्यमि" इति वा तः । क्षिप्ते वाच्यलिङ्गः तत्र यथा-कर्णतालास्तसिन्दूरे हास्तिके यस्य सर्पति । पश्चिमाद्रौ यथा-बालोऽस्ताचलमौलिमस्वरमणिः । अर्तिस्त्वटनिपीडयोः अर्द्यतेऽनया अर्दनं वा अर्तिः । आदित्वात् स्त्रियां क्तिः । अटनौ धनुष्कोटौ यथा-संग्रामे विभगांचकार स रिपूनर्त्तौ गुणं रोपयन् । पीडायां यथा-शिरोऽर्त्तिजीर्णज्वररोग-शान्तये । आप्तो लब्धे च सत्ये चापि । आप्यते स्म आप्तः । वाच्यलिङ्गः लब्धे यथा-मयाप्तं रामत्वं कुशलवसुता न त्वधिगता। सत्यः प्रत्ययितः अविसंवाद इति यावत् । तत्र यथा-वाचां ह्याप्त-

क्षत्ता शूद्रात् क्षत्रियायां जाते सारथिवेधसोः ।
नियुक्ते दासजे द्वाःस्थे कन्तुः कामकुसूलयोः ॥१५९॥
कान्तो रम्ये प्रिये प्राण्णि कान्ता प्रियङ्गुयोषितोः
कान्तिः शोभाकामनयोः क्षितिर्गेहे भुवि क्षये ॥१६०॥

धीना प्रमाणता । बान्धवेऽपि मङ्गः । यथा–आप्तैः सुहृद्भिरपि च प्रथित .भा ः । आप्तिः संबन्धलाभयोः । आप्तिः । स्त्रियां क्तिः । संबन्धे यथा–न साधुभिस्तस्य कदाचिदाप्तिः । लाभे यथा–दुष्टाशयस्यात्र कुतः फलाप्तिः ॥ १५६ ॥ ईतिरजन्ये प्रवासे । ईङ् गतौ । ईयतेऽनया अयनं वा ईतिः । आदित्वाद् स्त्रियां क्तिः । अजन्यमुपद्रवः । तत्र यथा–अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः । प्रवासे यथा–ईतिवर्धितवियोगपीडया । स्यादूतिः स्यूतिरक्षयोः । ऊयनम् ऊतिः । स्त्रियां क्तिः "च्छ्वोः शूडनुनासिके च" अवनं वा ऊतिः "ज्वरत्वर" इति ऊट् । द्वयोर्यथा–कन्थोतिक्षपितक्षणास्तरुतले विश्रान्तिमायान्त्यमी । ऋतं शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः । अर्यते स्म ऋतम् । क्तः "शीरि" इति वा किच्चः । पूजितदीप्तसत्येषु वाच्यलिङ्गः । सत्ये तु धर्ममात्रे क्लीबः । शिलस्य कणिशादेरुञ्छनं वुञ्छनं शिलोञ्छः । तत्र यथा–ऋतेन जीवन्ति वने तपस्विनः । पानीये यथा–ऋतादृते जातु न वर्तते जगत् । पूजिते यथा–ऋतोऽपि किं प्रेतपतिः प्रसीदति । दीप्तः संतापितः प्रतप्त इत्यर्थः । तत्र यथा–कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु । अत्र हि कामेन ऋतः कामार्तः "ऋते तृतीया समासे" इति आर् । सत्ये यथा–दानं वित्तादृतं वाचः ॥ १५७ ॥ ऋति-र्जुगुप्साकल्याणगतिस्पर्धासु । ऋति घृणागतिस्पर्द्धेषु ।

कीर्तिर्यशसि विस्तारे प्रासादे कर्दमेऽपि च ।
*कृतं पर्याप्तयुगयोर्विहिते हिंसिते फले ॥१६१॥
कृत्तं छिन्ने वेष्टिते च केतुर्द्युतिपताकयोः ।
ग्रहोत्पातारिचिह्नेषु गर्तोऽवटे ककुन्दरे ॥१६२॥

ऋतीनर्गाञ्ऋतिः "नाग्युपाल्य" इति कि दिः अरणस्वा कि । चतुर्ष्वर्थेषु स्त्रियाम् । सर्वेषु यथा ऋति बलिष्ठेषु ऋतिं न कुर्यात् । अथो ऋतुः । स्त्रीणां पुष्पे वसन्तादौ । इयर्ति ऋतु "अर्त्त्यतेः कित्" इति तुन् । पुंसि । पुष्पम् आर्तवं तत्कालो वा । तत्र यथा–इमां राज्ञीमृतुस्नातां स्मृत्वा सपदि सत्वरः । वसन्तादौ यथा–उद्यानपालसामान्यमृतवस्तमुपासते । एतः कर्बुर आगते । एति एतः "दम्यमि" इति तः कर्बुरे गुणे पुंसि तद्वति आगते च वाच्यलिङ्गः । द्वयोर्यथा–एतामेतां मृगश्रेणीम् ॥ १५८ ॥ क्षत्ता शूद्रात् क्षत्रियायां जाते सारथिवेधसोः । नियुक्ते दासजे द्वाःस्थे । क्षद् खदने सौत्रः । क्षदति क्षत्ता "त्वष्टृक्षत्तृदुहित्रादय" इति साधुः । शूद्रात् क्षत्रियायां जाते यथा–क्षत्र्यां तु मागधं वैश्यात् शूद्रात् क्षत्तारमेव च । सारथौ यथा–क्षत्तारं पुरुहूतस्य । वेधसि यथा–क्षत्तुर्भुजा क्षत्रमिहोदपादि । नियुक्ते दासजे द्वाःस्थे च यथा–भाति राजकुलं भ्राम्यदनेकक्षत्तृसंकुलम् । कन्तुः कामकुसूलयोः काम्यते कन्तुः "कसिकमि" इति तुन् पुंसि । कामे स्मरे यथा–कन्तु किं तनुते विरक्तमनसाम् । कुसूलो धान्यकोष्टकः । कामिन्यपि ॥१५९॥ कान्तो रम्ये प्रिये प्राणिं । काम्यते कान्तः "ज्ञानेच्छार्चा" इति वर्तमाने क्तः । रम्ये प्रिये च वाच्यलिङ्गः । प्राणिं पुंसि ।

* मुद्रितमूले–कुन्तः प्रासे चण्डभावे क्षुद्रजन्तौ गवधुके ।
कुन्ती पाण्डुभार्यायां स्यात् सल्लक्यां गुग्गुलुद्रुमे । कृतं०

रम्ये यथा-कोपेऽपि कान्तं मुखम् । प्रिये भर्तरि यथा-कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात् । ग्राविणउपले यथा-व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः । कान्ता प्रियङ्गुयोषितोः । प्रियङ्गुः फलिनी । योषिति यथा-कान्ताकटाक्षविशिखा न खनन्ति यस्य । कान्तिः शोभाकामनयोः । कमनं कान्तिः स्त्रियाम् । शोभायां यथा-कान्तिं कामिव कुर्वीत कुणौ कङ्कणकल्पना । कामना इच्छा तस्यां यथा-भवति भवकान्तिः स्वान्तमध्येन कस्य । प्रभाकायगुणयोरपि । प्रभायां यथा-लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन् स्मेरेऽधुना तव मुखे तरलायताक्षि । कायगुणे यथा-ओजः प्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः । क्षितिर्गेहे भुवि क्षये । क्षयन्ति अत्र क्षयणं क्षणनं वा क्षितिः । त्रिष्वपि यथा-तैः समलंकृतं निजकुलं तैरेव लब्धा क्षितिः ॥ १६० ॥ कीर्तिर्यशसि विस्तारे प्रसादे कर्दमेऽपि च । कीर्त्यते अनया कीर्तनं वा कीर्तिः । "सातिहेति" इति साधुः । यशसि यथा-त्वत्कीर्त्तिर्भ्रमति क्षितीश्वरमणेः पारे पयोधेरपि । कृतं पर्याप्तियुगयोर्विहिते हिंसिते फले । डुकृंञ् करणे, कृंञ् हिंसायां वा क्रियते स्म कृतम् विहितहिंसितयोर्वाच्यलिङ्गः । पर्याप्तयुगयोर्यथा-कृतं कृतयुगादिभिः विहिते यथा-कृतं वीतश्रीडैर्निजगुणकथापातकमपि । फले यथा-सुकृतशतविलासः सोयमेकान्तवासः । अत्र हि शोभनं कृतं फलं यस्मात् सुकृतं पुण्यमुच्यते ॥ १६१ ॥ कृत्तं छिन्ने वेष्टिते च । कृतैस् छेदने कृतैण् वेष्टने वा । कृत्यते स्म कृत्तं वाच्यलिंगः । छिन्ने यथा-केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी । वेष्टिते यथा-कृत्ताजिनो नृत्यति चन्द्रमौलिः । केतुर्द्युतिपताकयोः । ग्रहोत्पातारिचिह्नेषु । चाय्यते केतुः "चायः को वा" इति तुन् । षट्स्वपि पुंसि । द्युतौ यथा-स्वेदोद्गमे हेतुरिहोष्णकेतुः । पताकायां यथा-स्वावासभाग्मुरग्रासन-

केतुयष्ट्यां । ग्रहः सूर्याद्नवमः । तत्र यथा-एकोत्तरं केतुशतं वदन्ति । उत्पाते यथा-कितव तव बभूवुः श्रेयसे केतवोऽपि । अरिः शत्रुः । चिह्ने यथा-उद्दामं दाक्षिणात्यो मलितमलयजः सारथिर्मीनकेतोः, प्रातः सीमन्तिनीनां मधुसमयसुहृन्मानचौरः समीरः । गर्तो वडे ककुन्दरे । त्रिगर्तांशेऽपि । गिरति गर्तः "दम्यमि" इति तः अवटे स्त्रीपुंसः । तत्र यथा-प्रपातयति संसारावर्त्तगर्ते जगत्त्रयीम् । ककुन्दरो नितम्बस्थः कूपकः ॥ १६२ ॥ त्रिगर्तस्य जालंधराख्यस्य देशस्यांशस्तृतीयो भागस्त्रिगर्तांशः । अथ ग्रस्तं जग्धे लुप्तपदोदिते । ग्रस्यते स्म ग्रस्तम् । वाच्यलिङ्गः । जग्धे भक्षिते ग्रस्तः शशी राहुणा । लुप्तपदं उदितं वचनं लुप्तपदोदितं तत्र यथा-ग्रस्तं वचः कस्य न हासहेतुः । गतिर्वहद्व्रणे ज्ञाने यात्रोपायदशाध्वसु । गच्छत्यनया गमनं वा गतिः । स्त्रियां क्तिः । षट्स्वर्थेषु । वहद्व्रणं नाडीव्रणः तत्र यथा-गतिं वहन्तीं न शशाक रोद्धुम् । ज्ञाने बोधे यथा-देव्या नतेः सकलशास्त्रगतिर्भवित्री । यात्रा प्रयाणं तत्र यथा-पद्म्यां मुक्तस्तरलगतयः संश्रिता लोचनाभ्याम् । उपायः सामादिः तत्र यथा-त्वत्तो नान्यागतिर्मम । दशा अवस्था तत्र यथा-का गतिर्महतां तेषां त्वयि ये वामवृत्तयः । अध्वनि यथा-मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ १६३ ॥ गीतिश्छन्दसि गाने च । गीयतेऽसौ गानं वा गीतिः । छन्दसि यथा-द्विः पूर्वार्धं गीतिः । गाने यथा-प्रीतिः पञ्चमरागगीतिषु रतिः श्रीखण्डपिण्डद्रवे । गीतं शब्दितगानयोः । गीयते स्म गीतम् । शब्दिते वाच्यलिङ्गः । तत्र यथा-आर्यैरार्या गीतिर्गीता । गाने यथा-तद्गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया । गुप्तं गूढे त्राते । गुप्यते स्म गुप्तं वाच्यलिङ्गः । गूढे यथा-गुप्तशापैः स तप्तः । त्राते यथा-गुप्ताखिलमहीतलः । गुप्तिर्धर्मे

त्रिगर्तांशेऽप्यथ ग्रस्तं जग्धे लुप्तपदोदिते ।
गतिर्वहद्व्रणे ज्ञाने यात्रोपायदशाध्वसु ॥ १६३ ॥
गीतिश्छन्दसि गाने च गीतं शब्दितगानयोः ।
गुप्तं गूढे त्राते गुप्तिर्यमे भूगर्तरक्षयोः ॥ १६४ ॥

भूगर्तरक्षयोः । कारायाम् । गोपनं गुप्यते अनया वा गुप्तिः । यमो मनोवाक्कायसंयमः तत्र यथा–गुप्तित्रयपवित्रितः । भूगर्तो दीर्घं भूमिविवरम् । रक्षायां यथा–शीलगुप्तिः कुलीनया ॥ १६५ ॥ कारा बन्धनागारम् । तत्र यथा – दलितदलकपाटः षट्पदा सरोजे सरभस इव गुप्तिस्फोटमर्कः करोति । घृतमाज्याम्बु दीप्तेषु । घृ सेचने । घरति घृतम् "शीरीभूहसु" इति क्तः । आज्ये पुंक्लीबः । दीप्ते वाच्यलिङ्गः । आज्येऽम्बुनि च यथा–घृतसंवर्धितरुचयो व्रततय इव योषितो विराजन्ते । अथ चिताचिती मृतार्थदारुषु चये । चीयते चिता । स्त्रियां क्तौ चितिः । मृतस्य दाहार्थं शय्यारूपाणि दारूणि तत्र यथा–तदङ्गसंस्पर्शमवाप्य कल्पते ध्रुवं चिताभस्मरजोऽपि शुद्धये । चयः समूहः । चिति शब्दे । द्वयोर्यथा–चितये काष्ठचितिं तनोति सः । चिति ज्ञानेऽपि इति मङ्खः । यथा–चितिः प्रत्यवमर्शात्मा । जगल्लोकेङ्गवायुषु । गच्छतीति जगत् "दिद्युद्द" इति साधुः । लोको विष्टपम् तत्र क्लीबः । इङ्गं जङ्गमम् तत्र वाच्यलिङ्गः । वायौ पुंसि । लोके यथा–परस्परक्रोधनलोलुपं जगत् । इङ्गे यथा–त्वं मुनीन्द्र जगत्तीर्थम् । वायौ यथा–जगज्जगन्ति भ्रमतीति चित्तम् ॥ १६५ ॥ जातं जात्योघजनिषु । जायतेऽस्मिन् जननं वा जातम् । जातिः सामान्यं तत्र यथा–रत्नं सुजातं कनकावदातम् । ओघे समूहे यथा–निःशेषविश्राणितकोशजातम् । जनिर्जन्म । संपन्नेऽपि । द्वयोर्यथा–जाते पुत्रस्य

कारायां घृतमाज्याम्बुदीप्तेष्वथ चिताचिती ।
मृतार्थदारुषु चये जगल्लोकेऽङ्गवायुषु ॥१६५॥
जातं जात्योघजनिषु जातिः सामान्यगोत्रयोः ।
मालत्यामामलक्यां च चुल्ल्यां काम्पिल्यजन्मनोः ॥१६६॥

जाते समजनि वनितावल्लभा भूमिभर्तुः । पुत्रेऽपि मङ्गः, यथा-जातलक्ष्मणपवित्रितं त्वया । जातिः सामान्यगोत्रयोः । मालत्यामामलक्यां च चुल्ल्यां काम्पिल्यजन्मनोः । जातीफले छन्दसि च । जायतेऽस्यां जननं वा जातिः । स्त्रियां क्तिः । नवस्वर्थेषु । सामान्ये गोत्रादौ यथा-आकृतिग्रहणा जातिः । गोत्रे अन्वये यथा-जातिर्यातु रसातलम् । मालत्यां यथा-सेव्यः सकलजनानां जातिविहीनोऽपि कुसुमर्तुः । आमलकी काम्पिल्यौ तरुविशेषौ । चुल्ल्यां यथा-सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे । अत्रैव जाति-शब्दोऽलंकारविशेषेऽपि । जन्मनि यथा- द्विजातिभावादुपपन्न-चापलः । अत्र हि द्वे जाती जन्मनी यस्य द्विजातिर्ब्राह्मणः ॥१६६॥ जातिफलं जातीकोशः । छन्दसि यथा - जातिर्वैतालीयादिः । स्वभावोत्तराभासगीतभेदेष्वपि । स्वभावे यथा-जात्यैव याति पुरुषः परमां प्रतिष्ठाम् । उत्तराभासे यथा-हेत्वाभासच्छलजाति-निग्रहस्थानान्तत्वज्ञानान्निःश्रेयसाधिगमः । गीतभेदे यथा-षड्गोदीच्यवती जाते भिन्नषड्ग उदाहृतः । ज्ञातिः पितृसगोत्रयोः । ज्ञायते ज्ञातिः । "भुज्ञायजि" इति तिः पुंसि । पितरि यथा-ज्ञातौ ज्ञाते हि कन्याया जन्यमात्रा प्रतन्यते । सगोत्रे स्वजने यथा-मुदं मन्दोदरी भर्त्ता ज्ञातयः सुखमासताम् । इक्ष्वाकु वृषभेऽपि । ततं वीणादि वाद्ये स्यात् । तन्यते स ततम् यथा-ततघनशुषिरसमत्वयुतम् । ततो व्याप्तेऽनिले पृथौ । व्याप्ते पृथौ च

जातीफले छन्दसि च ज्ञातिः पितृसगोत्रयोः ।
ततं वीणादिवाद्येस्यात् ततो व्याप्तेऽनिले पृथौ ॥१६७॥
तातोऽनुकम्प्ये पितरि तिक्तस्तु सुरभौ रसे ।
तिक्ता तु कटुरोहिण्यां तिक्तं पर्पटकौषधे ॥१६८॥
त्रेता युगेऽग्नित्रये च दन्तो दशनसानुनोः ।
दन्त्यौषध्यामथ दितिर्दैत्यमातरि खण्डने ॥ १६९ ॥

वाच्यलिङ्गः । व्याप्ते यथा-स तर्मी तमोभिरधिगम्य तताम् । पृथौ यथा-वनं ततानेकतमालतालम् ॥ १६७॥ तातोऽनुकम्प्ये पितरि। तनोति तातः "सुसितनि" इति कित् तो दीर्घत्वं च । अनुकम्प्ये यथा-तात ताडय ताडकाम् । पितरि यथा-न मां तातस्त्रातुं प्रभवति नवांम्बां न भवती । तिक्तस्तु सुरभौ रसे । तेजयति तिक्तः "पुत्तपित्त" इति साधुः । सुरभौ वाच्यलिङ्गः । रसे पुंसि । तद्वति वाच्यलिङ्गः । सुरभौ यथा-तस्यास्तिक्तैर्वनगज-मदैर्वासितं वान्तवृष्टिः । रसे यथा-ताम्बूलं कटुतिक्तमुष्णमधुरम् । अत्र तिक्तरसयोगात् तिक्तम् । तिक्ता तु कटुरोहिणी ओषधि-विशेषः । तिक्तं पर्पटकौषधे । पर्पटकौषधं पितोपशामकं द्रव्यं । तत्र क्लीबः ॥ १६८ ॥ त्रेता युगेऽग्नित्रये च । त्रीन् इता त्रेता "पृषोदरादित्वात्" एत्वम् स्त्रियाम् । युगे यथा-कृतयुगे बलि-स्त्रेतायां रावणो हतः । अग्नित्रयं दक्षिणाग्निगार्हपत्या-हवनीयाः । तत्र यथा-त्रेतायां यत्र हूयते । दन्तो दशनसानुनोः । दम्यते दन्तः "दम्यमि" इति तः । दशने यथा-हनूमन्तं दन्तै-र्दशति कुपितो राक्षसगणः । सानुनि यथा-दन्तप्रस्खलदच्छ-निर्झरजलै रम्या वनान्ता अमी । दन्त्यौषध्याम् । गौरादित्वात्

दीप्तं निर्भासिते दग्धे द्रुतं शीघ्रविलीनयोः ।
द्युतिस्तु शोभादीधित्योर्धाता वेधसि पालके ॥१७०॥
धातू रसादौ श्लेष्मादौ भ्वादिग्रावविकारयोः ।
महाभूतेषु लोहेषु शब्दादाविन्द्रियेऽस्थनि ॥१७१॥

डी । अथ दितिर्दैत्यमातरि खण्डने । दण्ड पालने "देड" इति ङित् इति ङित् इतिः । दोंच् छेदने । दानं वा दितिः । क्तिः, स्त्रियाम् । दैत्यमातरि यथा-बहुशश्चक्रं दहता मनसि दितिर्येन दैत्यचक्रं दहता । खण्डने यथा-दितिं सदैत्येषु चकार विष्णुः । ॥ १६९ ॥ दीप्तं निर्भासिते दग्धे । दीप्यते स्म दीप्तं वाच्यलिङ्गः । निर्भासितं भासुरम् । तत्र यथा-कोपदीप्तमुररीकृतधैर्यम् । दग्धे यथा-दवदीप्ता महीभृतः । ज्वलितेऽपि दीप्तेन सुवर्णं वह्निना यथा । द्रुतं शीघ्रविलीनयोः । द्रवति स्म द्रुतम् । वाच्यलिङ्गः । शीघ्रे यथा-आगच्छागच्छ शस्त्रं कुरु चतुरतुरगं संनिवेहि द्रुतम् मे । विलीने यथा-इदं भासां भर्तुर्द्रुतकनकगोलप्रतिकृति । द्युतिस्तु शोभादीधित्योः । द्योततेऽनया द्युतिः "नाम्युपान्त्य" इति कित् इः । स्त्रियाम् । शोभायां यथा-स्मरभरपरिरोहत्पाण्डिमा गूढद्युति-विजितमृगाङ्का मोदते गण्डभित्तिः । दीधितौ यथा-अद्यापि शीत-द्युतिरात्मबिम्बं निर्माय निर्माय पुनर्भनक्ति । धाता वेधसि पालके । दधाति धाता । पालके वाच्यलिङ्गः । वेधसि यथा-धात्रा स्वहस्तलिखितानि ललाटपट्टे । पालके यथा-धाता समस्त-क्षितेः ॥ १७० ॥ धातू रसादौ श्लेष्मादौ भ्वादिग्रावविकारयोः । महाभूतेषु लोहेषु शब्दादाविन्द्रियेऽस्थनि । दधाति धातुः "कृशिकमि" इति तुन् नवस्वर्थेषु पुंसि । रसादयो रसासृग्मांस-मेदोऽस्थिमज्जशुक्राणि । श्लेष्मादयः श्लेष्मा वातः पित्तं चेति

**धुतं त्यक्ते कम्पिते च धूतः कम्पितभर्त्सितौ ।**
**धूर्तं तु खण्डलवणे धूर्तौ धत्तूरमायिनोः ॥१७२॥**

त्रयः । भ्रादयो भूप्रभृतयः । ग्रावविकारो गैरिकादिः । महाभूतानि पृथिव्यप्तेजोवाय्वाकाशरूपाणि । लोहानि स्वर्णादीनि । यदाह-सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु । सीसं च धीवरं चैवमष्टौ लोहानि चक्षते । शब्दादयः शब्दस्पर्शरसरूपगन्धाः । इन्द्रियं चक्षुरादि शुक्रं वा । अस्थि पञ्चमो धातुः । रसादौ भ्वादौ श्लेष्मादौ लोहेषु च यथा-अभ्यस्तरूपसिद्धिः सुविदितधातूपसर्ग विनिपाताः । योगी वैयाकरणो जयति भिषक् कार्तिकेन्द्रो वा । ग्रावविकारे यथा-त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम् । महाभूतेषु यथा-धातवो विश्वधारणात् । शब्दादौ यथा-न धातूनपि गृह्णीयादुन्मनीभावमागतः । इन्द्रिये यथा-धातुपाटवमवेक्ष्य तिष्ठतः । अस्थ्नि यथा-यस्येह भज्यते धातुर्भवेत्तस्यैव वेदना ॥ १७१ ॥ धुतं त्यक्ते कम्पिते च । "धूग् कम्पने" स्वादौ अपरपठितः । धूयते स्म धूतम् वाच्यलिङ्गः । द्वयोर्यथा-तीव्रवेणधुतमार्गवृक्षया । धूतः कम्पितभर्त्सितौ । धूयते स्म धूतः । वाच्यलिङ्गः । द्वयोर्यथा-नादातुमन्यकरिमुक्तमदाम्बु तिक्तं धूताङ्कुशेऽनेन विहातुमपीच्छताम्भः । धूर्तं तु खण्डलवणे । धूर्वेति धूर्त्तम् "शीरि" इति कित् तः । खण्डलवणं लवणविशेषः । धूर्त्तौ धत्तूरमायिनोः । मायिनि वाच्यलिङ्गः । धत्तूरे यथा-शुष्येत् धूर्त्तेन पारदः । मायिनि यथा-अन्तर्हासिलसत्कपोलफलकां धूर्तोऽपरां चुंबति ॥ १७२ ॥ धृतिर्योगविशेषे स्याद्धारणाधैर्ययोः सुखे । संतोषाध्वरयोश्चापि । ध्रियतेऽनया धरणं वा धृतिः स्त्रियां क्तिः । योगविशेषे यथा-धृतिः शूलं तथैव च । धारणा तु क्वचिद्ध्येये चित्तस्य स्थिरबन्धनम् । भयेऽपि अनाकुलता

धृतिर्योगविशेषे स्याद्धारणाधैर्ययोः सुखे ।
संतोषाध्वरयोश्चापि नतस्तगरनम्रयोः ॥१७३॥

नीतिर्नये प्रापणे च *पक्तिर्गौरवपाकयोः ।
पङ्क्तिश्छन्दःश्रेण्योः सेनाभित्पद्गयोर्गतौ ॥१७४॥

धैर्यम् । यदर्थं सर्वमिदं यच्च नान्यार्थं तत्सुखम् । लौल्याभावे मनसो निर्वृतिः सन्तोषः । अध्वरो यागः । धारणादिषु सर्वेषु यथा–धृतिं विधत्ते परमां स योगी । नतस्तगरनम्रयोः । नमति स्म नतः । तगरवृक्षे पुंसि । नम्रे वाच्यलिङ्गः । नम्रे यथा–तस्याः प्रविष्टा नतनाभिरन्ध्रम् । निम्नकुटिलयोरपि मङ्खः । क्रमेण यथा–परिणमति कामहस्ती कामिन्याः स्तनतटे विशालेऽस्मिन् । स्पर्शने च दयितस्य नतभ्रूरङ्गसंयचपलाऽपि चकम्पे । नमस्कृतेऽपि । यथा–नौम्यहं मौलिना वीरं नतं प्राचीनबर्हिषा ॥ १७३ ॥ नीतिर्नये प्रापणे च । नयनं नीतिः । स्त्रियां क्तिः नये न्याये यथा–नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये । प्रापणे प्राप्तौ यथा–दिशति दयितनीतिः कस्य न प्रीतिमाशु । पक्तिर्गौरवपाकयोः । पचनं पक्तिः "गापा" इति क्तिः स्त्रियाम् । द्वयोर्यथा–नष्टप्रतापाग्नितया नृपाणां पक्तिर्न सा भूतिमुखेह काचित् । पङ्क्तिश्छन्दःश्रेण्योः । द्वौ पञ्च तौ मानमस्याः पङ्क्तिः दशाक्षरा छन्दो जातिः "विंशत्यादयः" इति साधुः । पञ्च्यते वा क्तिः स्त्रियाम् श्रेण्यां यथा–पङ्क्तौ विशन्तु गणिताः प्रतिलामवृत्त्या । दशसंख्यायामपि मङ्खः । यथा–कृतवान् पङ्क्तिरथो विशङ्कय यत् । पत्तिः सेनाभित्पद्गयोर्गतौ । पद्यते पत्तिः

*मु० मूले–नृतिः स्यान्नर्तने कर्मो । पतिः प्रभौ गतौ मूले पक्ति० ।

प्राप्तिर्महोदये लाभे पित्सन् पिपतिषन् यथा ।
पतनेच्छौ विहङ्गे च पीतो वर्णनिपीतयोः ॥१७५॥
पीता हरिद्रा पीतिः पानेऽश्वे प्रीतिः स्मरस्त्रियाम् ।
प्रेम्णि योगमुदो पुस्तं शिल्पे लेप्यादिकर्मणि ॥१७६॥

"पुष्रायंजि" इति तिः, पदनं वा। सेनाभेदे गतौ च स्त्रियाम्. पद्गे पुंसि। सेनाभेदे यथा—एकेभैकरथाश्यश्वा पत्तिः पञ्च पदातिका। पद्गे पदातौ यथा—पत्तिः पदाति रथिनं रथेशः। गतौ यथा-पत्तिः स्वर्गगृहे भवेत् सुकृतिनः कस्यापीति ॥ १७४ ॥ प्राप्तिर्महोदये लाभे। प्रापणं प्राप्तिः स्त्रियाम् । महान् उदयो महोदयः तत्र यथा-प्राप्तिः कस्य न साधुसंगमवशाच्छीघ्रं भवेज्जन्मिनः । लाभे यथा—स्थान-प्राप्त्या दधानं प्रकटितगमकं मन्द्रतारव्यवस्थाम् । पित्सन् पिपतिषन् यथा-पतनेच्छौ विहङ्गे च । पतितुमिच्छन् पित्सन् पिपतिषन् । सनि पक्षे "रभलभ" इति अत इत्वम् द्वित्वाभावश्च । अन्यत्र "इवृध भ्रस्ज" इति वेट् । चतुःस्वरस्यापि लाघवार्थं द्विस्वरेषु पाठः। वाच्यलिङ्गौ। द्वयोर्यथा-पित्सन्तः किल किं चितेन हृदयं कर्षन्त्यमी बालकाः । ऋगिति पिपतिषन्तः केन शक्या निषेद्धुम् । पीतो वर्णनिपीतयोः । पीयते स्म पीतः । वर्णे पुंसि तद्वति निपीते च वाच्यलिङ्गः । द्वयोर्यथा—दत्तमिष्टतमया मधु पत्युर्बाढमाप पिबतो रसवत्तमम् । यत्सुवर्णमुकुटांशुभिरासी-श्चेतनाविरहितैरपि पीतम् ॥ १७५ ॥ पीता हरिद्रा यथा—आर्द्रक-भद्रकपीतरसं वचवासकब्राह्मी सर्जरसम् । अत्र "ङ्यापो बहुलं नाम्नि" इति ह्रस्वः । पीतिः पानेऽश्वे । पानं पीतिः "मापा" इति स्त्रियां क्तिः । पेयादिति वा "तिकृकृतौ नाम्नि" इति तिक् । अश्वे पुंसि । द्वयोर्यथा-बद्धकक्षाः परं पीतौ पत्तयो

पुस्तके प्लुतमश्वस्य गतौ प्लुतस्त्रिमात्रके ।
पूर्तं पूरितखाताद्योः पृषतवत्पृषन् मृगे ॥१७७॥
बिन्दौ प्रेतो मृते भूतविशेषे च परेतवत् ।
पोतः शिशौ प्रवहणे प्रोतं गुम्फितवाससोः ॥१७८॥

मद्यपा इव । प्रीतिः स्मरस्त्रियाम् प्रेम्णि योगमुदोः । प्रीयतेऽनया प्रीणनं वा प्रीतिः । क्तिः, प्रीयादित्याशास्यमाना वा । नाम्नि इति तिक् । योगे पुंसि, अन्यत्र स्त्रियाम् । स्मरस्त्रियां यथा–रतिप्रीती उभे भार्ये । प्रेम्णि यथा–पितुः प्रीतिरपत्ये हि पत्नी प्रीति निबन्धना । योगे यथा विष्कम्भः प्रीतिरायुष्मान् इत्यादि । मुदि यथा–प्रीतिमांश्चक्रवाकः । पुस्तं शिल्पे लेप्यादिकर्मणि । पुस्तके । पुस् च विभागे पुस्यते पुस्तम् "शीरीभू" इति कित् तः । पुस्तण् आदरे इत्यस्य वा । पुंक्लीबः । त्रिष्वपि यथा–पुस्तं समस्तं सुदृशा निरस्तं सौभाग्यभूमि भवतो वियोगैः ॥ १७६ ॥ प्लुतमश्वस्य गतौ । प्लवनं प्लुतम् । अश्वस्य गतिस्तृतीया धारा । यदाह–प्लुतं तु लङ्घनं पक्षिमृगगत्यनुहारकम् । प्लुतस्त्रिमात्रके । प्लवते स्म प्लुतः । तिस्रो मात्रा उच्चारणकालविशेषोऽस्य त्रिमात्रः स्वरः यथा–यातोऽन्यतः प्लुतकृतस्वरमाशु दूरादुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः । आप्लाविते ऽपि यथा–प्लुतमिव शिशिरांशोरंशुभियत्रिशासु स्फटिकमयमराजद्राजताद्रिस्थलाभम् । पूर्तं पूरितखातादयोः । पॄश् पालनपूरणयोः । पूर्यते स्म पूर्तम् । पूरिते वाच्यलिङ्गः । खातादौ पुंक्लीबः । पूरिते यथा–गुणैः पूर्ता मूर्तिस्तव भुवनभर्तुर्विजयते । खातं वाप्यादि । आदिश दाद्देवतायतनादि । यदाह–" वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमारामाः पूर्त्तमध्याः प्रचक्षते " । पृषतवत्पृषन्मृगे बिन्दौ । पर्षति पृषतः

भक्तमन्ने तत्परे च भर्ता पोष्टरि धारके ।
भक्तिः सेवागौणवृत्त्योर्भङ्ग्यां श्रद्धाविभागयोः॥१७९॥

"पृषिरञ्जि" इति क्तिस्तः । "द्रुहिवृही" इति कर्तृप्रत्यये पृषत् । उभयोरपि पृषतशब्दः पुंसि । पृषत् शब्दस्तु मृगे पुंसि बिन्दौ पुंक्लीबः । द्वयोर्यथा–उद्दामघर्मपृषताः पृषताः कृषन्ति । पृषत् मृगे यथा–रुरुपृषद्व्रणसंकुलरूंचराः ॥ १७७ ॥ बिन्दौ यथा–पाथःपतैर्ननु पृषन्त्यपि दूषितानि । प्रेतो मृते भूतविशेषे च परेतवत् । प्रकर्षेण परावृत्या च एति स्म प्रेतः परेतश्च । मृते यथा–स्वजनाश्रुकिलातिसंततं दहति प्रेतमिति प्रचक्षते । भ्राम्यन्नृमांसपणनाय परेतभूमावाकर्ण्य भीरुरुदितानि तवागतोऽस्मि । भूतं देवयोनिः प्राणिमात्रं वा । तद्विशेषे यथा–प्रेतरङ्कः करङ्कात् । परेतभर्तुर्महिषाऽमुना धनुर्विधातुमुत्खातविषाणमण्डलः । पोतः शिशौ प्रवहणे । पुनाति पोतः "दम्यमि" इति तः । शिशौ यथा–खद्योतपोतद्युतिडम्बरेभ्यः । प्रवहणे यथा–पयोधिमध्यस्थितपोतकूपकस्थिता शकुन्तीव मुहुः प्रकम्पते । प्रोतं गुम्फितवाससोः । प्रोयते स्म प्रोतम् । गुम्फिते वाच्यलिङ्गः । तत्र यथा–प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा । वाससि यथा–प्रोतानि पोते पवनैः प्लवन्ते ॥ १७८ ॥ भक्तमन्ने तत्परे च । भज्यते भजति वा स्म भक्तम् । तत्परे वाच्यलिङ्गः । द्वयोर्यथा–भक्ते द्वेषो जडे प्रीतिरुचितं गुरुलङ्घनम् । मुखे च कटुता नित्यं धनिनां ज्वरिणामिव । भर्ता पोष्टरि धारके । बिभर्ति भर्त्ता । तृच् तृन् वा । पोष्टा स्वामी धवश्च । धवे पुंसि । शेषयोर्वाच्यलिङ्गः । स्वामिनि यथा–तथेति शेषामिव भर्तुराज्ञाम् । धवे यथा–शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति । धारके यथा––वज्रस्य भर्ता त्रिदिवं बिभर्ति । भक्तिः सेवागौणवृत्त्योर्भङ्ग्यां श्रद्धाविभागयोः । भजनं भज्यतेऽनया वा भक्तिः । सेवायां यथा–भक्तिभूतयतो पिनाकिनि । गौणवृत्तौ यथा–

भास्वान् दीप्रे रवौ भ्रान्तिर्मिथ्याज्ञानेऽनवस्थितौ ।
*भित्तिः कुड्ये प्रदेशे च भूतं सत्योपमानयोः ॥१८०॥
प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः ।
भूभृन्महीधरे पृथ्वीपतौ भूतिस्तु भस्मनि ॥ १८१ ॥

भक्त्या गङ्गाध्वनिस्तटे । भङ्ग्यां विच्छित्तौ यथा-लग्नद्विरेफाञ्जनभक्तिचित्रे। श्रद्धायां यथा-अन्तर्भक्तिनिवेदनाय हि सतां स्तुत्यै स्तवः। विभागे यथा-हंसो हि दुग्धोदकभक्तिकारी ॥ १७९ ॥ भास्वान् दीप्ते रवौ । भासो विद्यन्ते यस्य भास्वान् । दीप्तं भासुरम् । तत्र वाच्यलिङ्गः । द्वयोर्यथा-भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः । भ्रान्तिर्मिथ्याज्ञानेऽनवस्थितौ । भ्रमत्यनया भ्रमणं वा भ्रान्तिः । स्त्रियां क्तिः । मिथ्याज्ञानम् अतस्मिन् तदिति प्रत्ययः। द्वयोर्यथा-घ्रातुमक्षि तपति भ्रमरः स भ्रान्तिभाजि भवति क्व विवेकः । भित्तिः कुड्ये प्रदेशे च । भिद्यते भित्तिः । स्त्रियां क्तिः । कुड्ये यथा-तद्गेहं नतभित्तिमन्दिरमिदं रुद्धावकाशं दिशाम् । प्रदेशे यथा-द्युतिविजितमृगाङ्का मोदते गण्डभित्तिः। भूतं सत्योमानयोः। प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः । भवति भवते वा स भूतम् । क्तः "शीरी", इति वा कित्त्वः । सत्ये उपमाने प्राप्ते अतीते युक्ते च वाच्यलिङ्गः। पिशाचादौ पुंक्लीबः । अन्यत्र क्लीबे सत्ये न्यायोपपन्ने यथा-भूतमप्यनुपन्यस्तं हीयते व्यवहारतः। उपमाने यथा-भुवनतिलकभूतः क्षत्रगोत्रप्रसूतः ॥१८०॥ प्राप्ते यथा-प्रमाणभूताय जगद्धितैषिणे । अतीते यथा-कृपणेन समो दाता न भूतो न भविष्यति । पिशाचादौ यथा-भूतोपरुद्धमिति भूतविदो वदन्ति। आदिशब्दात् प्रेतादिपरिग्रहः। पृथ्व्यादौ यथा-

* भीतं भये भययुते भीतिः साध्वसकम्पयोः । भित्तिः ० ।

मांसपाकविशेषे च संपदुत्पादयोरपि।
भूतिर्भरणमूल्ययोर्मतं तु संमतेऽर्चिते ॥१८२॥

पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः। आदिशब्दात् जलादयः। जन्तौ यथा-आत्मवत् सर्वभूतानि यः पश्यति स पश्यति। युक्ते यथा-भूतवादी प्रमाणिकः स्यात्। भूभृत् महीधरे पृथ्वीपतौ। भुवं बिभर्ति भूभृत्। पुंसि द्वयोर्यथा-गजैर्विरेजे कटकेषु भूभृताम्। भूतिस्तु भस्मनि। मांसपाकविशेषे च संपदुत्पादयोरपि। भवत्यनया भवनं वा भूतिः स्त्रियाम्। भस्मनि यथा-स्फुटोपमं भूतिसितेन शंभुना ॥ १८१ ॥ मांसपाकविशेषे यथा-भृष्टामिषं भटित्रं स्यात्। भूतिर्भरूटकं च तत्। संपदि यथा-भूतिं परां प्रापितः। उत्पादे उत्पत्तौ यथा-मुक्तानां न पुनर्भूतिः। भूति-र्भरणमूल्ययोः। भ्रियतेऽनया भरणं वा भृतिः। स्त्रियां क्तिः। मूल्ये वेतने यथा-भृतिग्रहणमेवैषां फलं मुख्यम्। भरणे पोषणे यथा-कुक्षेर्यावदमी भवन्ति भृतये भिक्षाहृताः सक्तवः। मतं तु संमतेऽर्चिते। मन्यते मतम्। वाच्यलिङ्गः। संमते यथा-मम ता-वन्मतमिदः। अर्चिते यथा-मां कानानाय दिशता जगतां मतेन, तातेन कर्म किमुताद्य कृतं यशस्यम्। लोष्ठमर्दनकाष्ठेऽपि। बभुर्भुवः कृष्टमती कृता इव ॥ १८२ ॥ महद्बृहति धीतत्वे राज्ये। मह्यते महति वा महत्। "द्रुहिबृहि" इति कतृः बृहति वाच्यलिङ्गः। अन्यत्र क्लीबे। मङ्खस्तु महद्राज्ये सांख्यबुद्धौ न स्त्री बृहति तु त्रिषु इत्याह। धीतत्वं सांख्यप्रणीतम्। बृहति धीतत्वे च यथा-न महानयं न च बिभर्ति गुणसमतया प्रधानताम्। राज्ये यथा-साधिताखिलनृपं महन्महत्संप्रति स्वनयसंपदो च ते। मरुत् सुरेऽनिले। म्रियतेऽसौ अनेन वा मरुत्। "म्रउत्" पुंसि। सुरे यथा-क्रोधं प्रभो संहर संहरेति, यावद्गिरः खे

महद्ब्रह्मति धीतत्वे राज्ये मरुत्सुरेऽनिले ।
मतिर्बुद्धीच्छयोर्माता गौर्दुर्गाजननी मही ॥१८३॥
मातरस्तु ब्रह्माण्याद्या मितिर्मेयत्वमानयोः ।
मुक्ता मौतिकपुंश्चल्योर्मुक्तिर्मोचनमोचयोः ॥१८४॥

मरुतां चरन्ति । अनिले यथा-मरुत्सखस्येव बलाहकस्य । मति-र्बुद्धीच्छयोः । मननं मतिः । स्त्रियां क्तिः । बुद्धौ यथा-रात्रिर्गता मतिमतां वर मुञ्च शय्याम् । इच्छायां यथा-मतिरस्ति न मे भोक्तुम् । माता गौर्दुर्गाजननी मही । मन्यते माता "मानि-भ्राजेर्लुक् च" इति तृः । स्त्रियाम् गवि यथा-सत्वमेकांतरां तस्या मदीयां वत्स मातरम् । अत्र हि वत्स इति दिलीपस्य संबोधनम् मातरं गामित्यर्थः । दुर्गा गौरी । तत्र यथा-मातरं कल्पत्वेनामीशो हि जगतः पिता । अत्र हि जगत्पितृसं-बन्धात् । यौगिकोऽपि मातृशब्दो गौर्यां रूढः । जनन्यां यथा-त्यजन्ति तामपि क्रूरा मातरं दारहेतवे । मह्यां यथा-मातेव जननीव विश्वजननी कस्मै न दत्ते मुदम् । अकारादिवर्णेष्वपि । मातृकामपि नो वेत्ति ॥१८३॥ मातरस्तु ब्रह्माण्याद्याः । ब्रह्माणी आदिशब्दात् माहेश्वरीप्रभृतयः । तत्र मातृशब्दो बहुवचनान्तः । स्त्रियां तत्र यथा-तं मातरो देवमनुव्रजन्त्यः मितिर्मेयत्वमानयोः । मानं मीयतेऽनया वा मितिः । स्त्रियां क्तिः । इयतो भावः मेयत्वम् वस्तुसंख्यापरिच्छेदः । मानं प्रस्थादिः । द्वयोर्यथा-मितिं धनादेर्न विवेद पार्थिवः । मुक्ता मौक्तिकपुंश्चल्योः । मुच्यते मुक्ता । प्राप्त-मुक्तौ मोचितेऽपि च । यदाह: "मुक्ता स्त्री मौक्तिकप्राप्तमुक्ति मोचितयो स्त्रिषु । मौक्तिके प्राप्तमुक्तौ च यथा-ता एव निर्वृति-स्थानमहं मन्ये मृगेक्षणाः । मुक्ता नामास्पदं येन तासामेव

मूर्तिः पुनः प्रतिमायां कायकाठिन्ययोरपि ।
मृतं मृत्यौ याचिते च यन्ता सूते निषादिनि ॥१८५॥
यतिर्निकारे विरतौ भिक्षौ युतोऽन्विते पृथक् ।
युक्तिम्न्याय्ये योजने च रक्तं नील्यादिरञ्जिते ॥१८६॥

स्वनान्तरम् । पुंश्चल्यां यथा-मुक्तासु युक्तं विदुषां न मन्तुम् । मोचित इति " मुचण् पमोचने " इत्यस्य स्वार्थिकण्यन्तस्य प्रयोगः । तत्र यथा-मुक्तोऽध्वगैः पञ्जरात् । मुक्तिर्मोचनमोक्षयोः । मोचनं मुच्यतेऽनया वा मुक्तिः स्त्रियाम् । मोचने यथा-बन्धना-न्मुक्तिमासेदुः । मोक्षे यथा-मुक्तिद्वारपिधानकर्मणि महामोहः कपाटायते ॥ १८४ ॥ मूर्तिः पुनः प्रतिमायां कायकाठिन्ययोरपि । मूर्च्छत्यनया मूर्छनं वा मूर्तिः । स्त्रियां क्तिः । प्रतिमायां यथा-मूर्तिं नत्वा हिरण्यमयीम् । काये यथा-मूर्त्याद्भुतरतुङ्गया । काठिन्ये यथा-घृतस्य मूर्तिं कुरुते हिमर्तुः । मृतं मृत्यौ याचिते च । मरणं धातूनामनेकार्थत्वात् म्रियते याच्यते वा मृतम् । मृत्यौ यथा-मृतं हि प्राणिनां धर्मः । याचितं भिक्षितम् । यथा मनुः मृतं तु याचितं भैक्षम् । मृत्युमत्यपि यथा गते मृते प्रव्रजिते । यन्ता सूते निषादिनि । यच्छति यन्ता । अन्तर्भावितण्यर्थस्य यमे-स्तृचि रूपम् । सूतः सारथिः तत्र यथा-अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः । निषादी गजारोहस्तत्र यथा-याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥ १८५ ॥ यतिर्निकारे विरतौ भिक्षौ । यतण् निकारोपस्कारयोः । यतैङ् प्रयत्ने वा । यत्यते यतति वा यतिः । " पदिपठि " इति इः । यमनं वा यतिः । क्तिः विरतौ स्त्रियाम् । निकारे भिक्षौ च पुंसि । निकारे धिक्-क्रियायाम् यथा-किमनेन यतिना विरतिः । श्रव्यः पाठः विरामः ।

कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे ।
रतिः स्मरस्त्रियां रागे रते रीतिस्तु पित्तले ॥१८७॥
वैदर्भ्यादौ लोहकिट्टे सीमनि स्रवणे गतौ ।
लता ज्योतिष्मती दूर्वाशाखावल्लीप्रियङ्गुषु ॥१८८॥

भिक्षुर्मुमुक्षुः । द्वयोर्यथा-सर्वातिशायिवितपादं वर गणधरमूजितप्रवरवृत्तम् । युतोऽन्विते पृथक् । यौति स युतः । वाच्यलिङ्गः । अन्विते यथा-प्रमथैर्युतो वृषविलासवाहनः । पृथगर्थे यथा-अयुतसिद्धानामाधार्याधारभूतानाम् । युक्तिर्न्याये योजने च । युज्यतेऽनया योजनं वा युक्तिः स्त्रियाम् । न्याये यथा-युक्त्या यत्नघटामुपैति तदहं दृष्ट्वाऽपि न श्रद्दधे । योजने यथा-गन्धयुक्तिं विधायोच्चैः । रक्तं नील्यादिरञ्जिते । कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे । रज्यते रक्तम् । रञ्जितानुरक्तारुणेषु वाच्यलिङ्गः । अरुणे गुणे पुंसि । नील्यादिरञ्जिते यथा नीलीरक्ते-वाससि कुङ्कुमरागो दुराधेयः ॥ १८६ ॥ कुङ्कुमे यथा हेमन्ते घनरक्तपङ्कमलनक्रीडाजुषो योषितः । असृजि रुधिरे यथा-पदं तुषारस्रुतिधौतरक्तम् । अनुरक्ते अनुरागिणि यथा-सत्यं रक्ता विरक्ताश्च मारयन्त्येव योषितः । प्राचीनामलके यथा-हरीतकीरक्तबिभीतकानां चूर्णं विधाय । अरुणे यथा-रक्ता शोककृशोदरी क नु गता । मधुरेऽपि वल्लभटीका । रक्तवैणिकहताधरतन्त्रीमण्डलक्वणितचारु चुकूजे । रतिः स्मरस्त्रियां रागे रते । रमतेऽनया रमणं वा रतिः स्त्रियाम् । स्मरस्त्रियां यथा-त्वमनङ्गः कथमक्षतारतिः रागेऽनुरागे यथा-न स क्षितीशो रतये बभूव । रते सुरते यथा-रतो ह्रिया यत्र निशाम्य दीपान् । चित्तावस्थानाभिष्वङ्गस्थायिभावेषु अपि मङ्खः । क्रमेण यथा-

स्पृक्कामाधव्योः कस्तूर्यां लिप्तं भुक्तविलिप्तयोः ।
विषाक्ते लूता तु रोगे पिपीलकोर्णनाभयोः ॥१८९॥

वने रतिर्विरक्तस्य रक्तस्य तु जने रतिः । मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना । रतिर्हासश्च शोकश्च । रीतिस्तु पित्तले । वैदर्भ्यादौ लोहकिट्टे सीमनि स्रवणे गतौ । रिणाति रीयते वा रीतिः। "इगुपध" इति बहुवचनात् कित् क्तिः स्त्रियाम् । पित्तले लोहकिट्टे च यथा–स्वर्णरीत्योरिवान्तरम् ॥ १८७ ॥ वैदर्भ्यादौ यथा–केषांचिदेता वैदर्भीप्रमुखा रीतयो मताः । आदिशब्दात् गौडीयापाञ्चालीप्रभृतयो गृह्यन्ते । सीम्नि मर्यादायां यथा–निरीतिमापश्रुतिमविरीतिम् । स्रवणं स्यन्दनं तत्र गतौ च यथा–स वारिरीतिं न शशाक रोद्धुम् । लता ज्योतिष्मतीदूर्वाशाखावल्लीप्रियङ्गुषु । स्पृक्कामाधव्योः कस्तूर्याम् । लाति लायते वा लता । "पृषिरञ्जि" इति किदतः । अष्टस्वर्थेषु । ज्योतिष्मती लवणाशाकः । दूर्वा हरिताली । शाखा द्रुमावयवः । वल्ली प्रततिः । प्रियङ्गुः फलिनी । स्पृक्का गन्धद्रव्यविशेषः । माधवी वासन्ती । कस्तूरी मृगनाभिः । शाखायां यथा–कालिन्दीतटरूढवञ्जुललतामालिङ्ग्य सोत्कण्ठया । वल्ल्यां यथा–लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ १८८ ॥ कस्तुरिकावर्ज्ज शेषेषु यथा–लताभिरुचितं वल्लीभिरुज्जृम्भितम् । हारादिसरिकायामपि मङ्खः । यथा–चतुःषष्टिलताहारः । लिप्तं भुक्तविलिप्तयोः । विषाक्ते । लिप्यते स्म लिप्तं वाच्यलिङ्गः । भुक्ते यथा स्थाले क्षिप्तं न लिप्तम् । विलिप्ते यथा – स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः । विषेण अक्तं विषाक्तं तत्र यथा–क्षिप्तैर्लिप्तशरैररण्यकरटी जघ्ने जघन्यैर्नृभिः । लूता तु रोगे पिपी[illegible]र्णनाभयोः ।

वर्तिर्गात्रानुलेपिन्यां दशायां दीपकस्य च ।
दीपे भेषजनिर्माणे नयनाञ्जनलेखयोः ॥ १९० ॥
व्यक्तो मनीषिस्फुटयोर्वार्त्ता वार्त्ताक्युदन्तयोः ।
कृष्यादौ वर्तने वार्ता त्वारोग्यारोगफल्गुषु ॥ १९१ ॥

लुनाति लूयते वा लूना । "लूञो वा" इति कित् तः । रोगे यथा—नितान्तलूतामयपीडिताङ्गः । पिपीलिका वल्मीककृमिः । तत्र यथा लूतार्तितः सूचयतीह वर्षम् । ऊर्णनाभे यथा—बध्नाति मशकमेव हि लूतातन्तुर्न मातङ्गम् ॥ १८९ ॥ वर्त्तिर्गात्रानुलेपिन्यां दशायां दीपकस्य च । दीपे भेषजनिर्माणे नयनाञ्जनलेखयोः । वर्तते वर्तिः । "र्विदवृतेर्वा" इति इः । पञ्चस्वर्थेषु स्त्रियाम् । गात्रानुलेपिन्यां यथा—अङ्गैः कुङ्कुमवर्तिपिञ्जरतरैः । दीपकस्य दशायां यथा—कौसुम्भवर्तिर्घृतपूर्णदीपः । दीपे यथा अस्तंगते किरणमालिनि कार्यजातं नो वर्तयन्ति किमु वर्तिभिरत्र लोकाः । भेषजनिर्माणे यथा—वर्त्या व्रणं शोधयति स वैद्यः । नयनाञ्जनलेखायां यथा—इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः । धूपकूलकयोरपि । क्रमेण यथा-कर्पूरागुरुवर्तिकर्तितवपुर्दौर्गन्ध्यमेया वधूः । स्वेदकम्पवशसन्नवर्तिकः ॥ व्यक्तो मनीषिस्फुटयोः । व्यनक्ति व्यज्यते वा व्यक्तः वाच्यलिङ्गः । मनीषिणि यथा—व्यक्तः सूक्तं पठति कठिनम् । स्फुटे यथा-जलनिविडितवस्त्रव्यक्तनिम्नोन्नताभिः वार्ता वार्ताक्युदन्तयोः । कृष्यादौ वर्तने । वृत्तिरत्रास्ति वार्ता । "प्रज्ञाश्रद्धार्चावृत्तेर्णः" इति णः । वार्ताकी वात्तिगणी । उदन्ते यथा—श्रुत्वा वार्ता जलदकथितां तां धनेशोऽपि सद्यः । कृष्यादिः कृषिः पाशुपाल्यं वाणिज्या च । तत्र यथा-संपन्नो वार्तया साधुर्न वृत्तं भेदमिच्छति । वर्तने यथा-निर्धनस्य न वार्ता का वार्ता तस्य

वृत्तिशालिन्यथ व्याप्तिर्व्यापने लम्भनेऽपि च ।
वास्तु स्याद्गृहभूपुर्योर्गृहे सीमसुरङ्गयोः॥ १९२॥
वित्तं विचारिते ख्याते धने वित्तिस्तु संभवे ।
ज्ञाने लाभे विचारे च वीतमङ्कुशकर्मणि ॥ १९३ ॥

भोजने । वार्तं त्वारोग्यारोगफल्गुषु । वृत्तिशालिनि । अरोगे नीरुजि वृत्तिशालिनि वृत्तिमति च वाच्यलिङ्गः । आरोग्ये यथा—सर्वत्र नो वार्तमवेहि राजन्नाथ कुतस्त्वय्यशिवं प्रजानाम् । अरोगे यथा—वार्ताः किं किं न भुञ्जते । फल्गु निःसारं तत्र यथा—वार्त्तमेतदुदितं वृथा त्वया ॥ १९१ ॥ वृत्तिशालिनि यथा—वार्त्तोऽयं राजवेश्मनि । अथ व्याप्तिर्व्यापने लम्भनेऽपि च । व्यापनं व्याप्तिः । स्त्रियां द्वयोर्यथा—विश्वव्याप्त्या प्रतीतः प्रथयतु जगतः कामितं चक्रपाणिः । वास्तु स्याद्गृहभूपुर्योर्गृहे सीमसुरङ्गयोः । वसन्त्यत्रेति वास्तु । "वसेर्णिद्वा" इति तुन् । पञ्चस्वर्थेषु पुंक्लीबः । सर्वेषु यथा—वास्तुविद्याविशारदः ॥ १९२ ॥ वित्तं विचारिते (विस्तारिते) ख्याते धने । विदिप् विचारणे विद्रि प्रविचारणे । विद्यते स्म वित्तम् (क्षुद्रीभेति) इति विकल्पनात् कस्य नत्वाभावः । "विद्लृ लाभे" इत्यस्य वा । "वित्तं धनप्रतीतम्" इति साधुः । धने क्लीबः । शेषयोर्वाच्यलिङ्गः । विचारिते यथा—वित्तानि तानि शास्त्राणि । ख्याते यथा विद्या वित्तेष्वनादरः । धने यथा—त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः । सुवर्णेऽपि मङ्खः यथा—वित्तस्य विद्या परिसंख्यया मे कोटीश्चतस्रो दश चाहरेति । वित्तिस्तु संभवे ज्ञाने लाभे विचारे च । "विदि च सत्तायाम्," विदङ् ज्ञाने, विद्लृ लाभे, विदि प्रविचारणे वा । वेदनं वित्तिः स्त्रियाम् । सर्वेषु यथा—हरति दुरितजातं कस्य नो

असाराश्वगजे शान्ते वीतिरश्वेऽशने गतौ
प्रजने धावने दीप्तौ वृत्तं वृत्तौ दृढे मृते ॥१९४॥

धर्मवित्तिः । वीतमङ्कुशकर्मणि । असाराश्वगजे शान्ते । वीयते वेति स्म वा वीतम् । शान्ते वाच्यलिङ्गः । अङ्कुशकर्मणि हस्तिनां पादकर्मोग्रलक्षणम् । यदाह–पादकर्म यत्तु प्रोक्तं यालमङ्कुशवारणम् । उभयं वीतमाख्याऽनुतम् । तत्र यथा–निर्धूतवीतमपि बालक-मुल्लसन्तम् । बालको दुष्टगजः ॥ १९३ ॥ असारं फल्गु अश्व गजम् असाराश्वगजम् । तत्र यथा–वीतमात्रावशेषाणि सैन्यानि तव विद्विषाम् । शान्ते यथा–वीतदावानले वने । विगताच्छादितयोरपि मङ्कुः । क्रमेण यथा–अधरो वीतरागस्ते कापाये ते विलोचने । विहारः कण्ठदेशोस्ते इति प्रव्रजितासि किम् । संवीतवीमांशुक-मूर्तिरेषा । वीतिरश्वेऽशने गतौ । प्रजने धावने दीप्तौ । वेति वयनं वा वीतिः । "इमुषि" इति बहुवचनात् क्तिचिः । स्त्रियां क्तिर्वा । अश्वे पुंसि । अन्यत्र स्त्रियाम् । प्रजनो गर्भग्रहणम् । सर्वेषु यथा–वीतेर्वाप्ति संविज्ञाय राज्ञे ब्यज्ञपयत्तदा । वृत्तं वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृते । वर्तते वृत्तं वृ ते स्म वर्त्यते स्म इति वा । वर्तेवृत्तं ग्रन्थ इति साधुः । चरित्रे वर्तुले च पुंक्लीबः । वृत्तो छन्दसि च नपुंसकम् । अन्यत्र वाच्यलिङ्गः । वृत्तौ वर्तने यथा–व्रतेन वृत्त प्रवदन्ति मुख्यम् । व्रतं शिलोञ्छं स थ च । दृढे यथा–वृत्तदेहः स्नायुसारः । मृते यथा–वृत्तास्ते क्षितिपाः प्रतापनिधयः ॥ १९४ ॥ चरित्रे शोर्ड तत्र यथा–अहो स्त्रीवृत्तमद्भुतम् । वर्तुले यथा–तत्सर्वं वृत्त-पाषाण क्षम्यतामर्थिनो वयम् । छन्दसि यथा–शार्दूलवृत्तं वद । अतीते यथा–वृत्तोत्सवं तत्पुरम् आभिविषयं मृतत्वम् । अप्राधि-

चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृते ।
वृन्तं स्तनमुखे पुष्पबन्धे वृत्तिस्तु वर्तने ॥१९५॥
कैशिक्यादौ विवरणे वृतिर्वरणवाटयोः ।
शक्तिरायुधभेदे स्यादुत्साहादौ बले स्त्रियाम्॥१९६॥

---

विषयम् अतीतत्वम् । अधीते यथा-वृत्तं पारायणं तेन । वृते यथा-कण्टकैर्विटपो वृतः । अतीतार्थेऽपि मङ्क्षुः । यथा-वृत्त एव स घटोऽन्धकूप यस्त्वत्प्रसादमपि नेतुमक्षमः। वृन्तं स्तनमुखे पुष्पबन्धे। वृणोति वृन्तम्। "पुतपित्त" इति साधुः। स्तनमुखे यथा-अप्राप्नुवन् शिशुः स्तन्यं स्तनवृन्तं निकृन्तति । पुष्पबन्धे यथा-वृन्तश्लथं हरति पुष्पमनोकहानाम् । वृत्तिस्तु वर्तने । कैशिक्यादौ विवरणे । वर्तनं वृत्यतेऽनया वा वृत्तिः स्त्रियाम् । वर्तनं कृष्यादि वार्ता । यदाह-वाणिज्यं पाशुपाल्यं च कर्षणं चेति वृत्तयः । वर्तमानमात्रं वा । तत्र यथा-ते वाचंयमवृत्तयोऽपि मुनयो मौनव्रतं त्याजिताः ॥१९५॥ कैशिक्यादौ आदिशब्दात् आरभट्यादौ यदाह-कैशिक्यारभटी चैव सात्वती भारती तथा । चतस्रो वृत्तयो ह्येतास्तासु नाट्यं प्रतिष्ठितं । उपलक्षणं चैतत् । तेन ग्राम्या परुषोपनागरिका अपि गृह्यन्ते । तत्र यथा वाक्प्रपञ्चसारेण निर्विशेषाल्पवृत्तिना । स्वामिनेव नटत्वेन निर्विण्णाः सर्वथा वयम् । विवरणे यथा-तत्त्वज्ञानामृतजलनिधेर्योगशास्त्रस्य वृत्तिम् । करणे व्युत्पत्त्या जीवनमप्युच्यते । तत्र यथा-वृत्तिच्छेदो द्विजन्मनाम् । वृति-र्वरणवाटयोः ( पाटयोः ) । वरणं व्रियतेऽनया वा वृतिः स्त्रियाम् । वरणे यथा-भूपालपुत्र्याः सद्वृतिं निशम्य । वाटे कण्टकमयावरणे यथा-ग्रामीणवध्वस्तमलक्षिता जनैश्चिरं वृतीनामु-परि व्यलोकयत् । शक्तिरायुधभेदे स्यादुत्साहादौ बले स्त्रियाम्

शस्तं क्षेमे प्रशस्ते च, शान्तो दान्ते रसान्तरे ।
शास्ता जिने शासके च शान्तिर्भद्रे शमेऽर्हति॥१६७॥
शितं शातौ कृशे तीक्ष्णे, शितिर्भूर्जे सितेऽसिते ।
श्रीमान् मनोज्ञे तिलकपादपे धनवत्यपि ॥१६८॥

(प्र. स्त्रियाम्) । शक्यतेऽनया जेतुं शकनं शक्तिः स्त्रियाम् । उत्साहादाविति आदिशब्दात् प्रभुत्वं मन्त्रश्च । सर्वेषु यथा-शक्तिर्लक्ष्मणवक्षसो निरगमन्नेो रक्षसां वक्षसः ॥ १९६ ॥ शस्तं क्षेमे प्रशस्ते च । शस्यते स्म शस्तम् । क्षेमं कुशलम् । प्रशस्तं श्लाघ्यम् तत्र वाच्यलिङ्गः । द्वयोर्यथा-शस्तं समस्तं जगतस्तनोतु । शान्तो दान्ते रसान्तरे । शाम्यति स्म शान्तः । दान्ते निवृत्तविषये वाच्यलिङ्गः । तत्र यथा-सतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् । रसान्तरं शृङ्गाराद्यन्मो रसः । तत्र यथा-शान्तो रस इवाङ्गवान् । शास्ता जिने शासके च । शास्ति शास्ता "शासिशंसि" इति तृः । जिने पुंसि । शासके वाच्यलिङ्गः । जिनोऽर्हन् बुद्धो वा । तत्र यथा-जयन्ति शास्तुः पदपङ्कजानि । शासके शिक्षके यथा-शास्ताध्वे कांचेर्भुवः (प्र० शास्ताभिधका ते भुवः) । शान्तिर्भद्रे शमेऽर्हति । शाम्यत्यशुभमनया शास्यशुभमनया शमनं (शाम्यत्यशुभमनया) वा शान्तिः, शाम्यादित्याशास्यमानो वा "तिकृतौ नाम्नि" इति तिक् । भद्रशमयोः स्त्रियाम् । अर्हति पुंसि भद्रे यथा-शान्त्यै वोऽस्तु कपालदाम । शमे यथा-तस्मिन् काले नयनसलिलं यापितां खण्डितानाम् । शान्तिं नेयम् । अर्हति यथा-तीर्थकृत् षोडशः शान्तिः ॥ १९७ ॥ शितं शातौ कृशे तीक्ष्णे । शोंच् तक्षणे । शायते स्म शितं शातं वा "शोर्वा" इति क्ते वा इत्वम् । वाच्यलिङ्गौ । लघ्वक्षरत्वात् शितस्य प्राक् निपातः ।

क्रशे यथा न हसति शितमध्यास्त्वियं गे मृगाक्षी । आविर्भवद्घनपयोधरबाहुमूला शातोदरी युवदृशां क्षणमुत्सवाऽभूत् । तीक्ष्णे यथा-राजन्यानां शितशरशतैः । पुराणि दुर्गाणि निशातमायुधम् । अत्र नितरां शातं निशातम्, निना शातशब्दो विशिष्यते । शितिर्भूर्जे सितेऽसिते । शोंच् तक्षणे शायते श्यति वा शितिः । "हमुषि" इति कित् तिः । "शार्वा" इति ह्रस्वम् । भूर्जो वृक्षत्वक्तरुः । तत्र पुंसि तद्वति वाच्यलिङ्गः । सिते शुभ्रे यथा-श्वेतांशोः शितिभिः करैः प्रसृमरैः शुभ्राकृतं सर्वतः । असिते यथा-प्रणम्य शितिकण्ठाय । शबले पि मल्लः । यथा-रोमन्थफेनशितिशाद्वलशायिनस्ते । श्रीमान् मनोज्ञे तिलकपादपे धनवत्यपि । श्रीरस्यास्ति श्रीमान् । तिलकपादपे पुंसि । शेषयोर्वाच्यलिङ्गः । मनोज्ञे यथा-श्रीमदम्भोजखण्डम् तिलकाख्यः पादपः तिलकपादपः । यदमरः-तिलकः क्षुरकः श्रीमान् । धनवति यथा-श्रीमद्भिर्द्रविणव्ययश्च तकरक्लेशादविज्ञायसे ॥ ११८ ॥ शीतो हिमे च जिह्मे च वानीरबहुवारयोः । श्यायते स्म शीतः । क्तः । "श्यः शी द्रवमूर्ति" इति शीरादेशः । शेतेऽनेन वा "शीरी" इति कित् तः । वानीरो वेतसः । बहुवारः श्लेष्मातकः । तयोः पुंसि । हिमजिह्मयोर्वाच्यलिङ्गः । हिमशब्देन अत्र शैत्यगुणयुक्तं शीतलं सर्वमपि वस्तु उच्यते । तत्र यथा-शीतं विशृङ्खवारिपानमशनं कन्दाः सहायाः मृगाः । जिह्मोऽलसः तत्र यथा-शीतो बिभेति पुनर्निजकार्यभङ्गात् । शीतं गुणे उष्णविरोधिनि गुणे गुणमात्रे क्लीबे । तद्वति तु पूर्वमुक्तः । यथा-शीतभीतास्च ये विप्राः । शुक्तमम्ले पूतिभूते च कर्कशे । शाकैः शुचेर्वा शुक्तम् । "पुतपित्त" इति साधुः पूतिभूतकर्कशयोर्वाच्यलिङ्गः । अम्ले अम्लविशेषे यथा-हठकठिनमश्मशकलं विदारयत्येव काञ्जिकं शुक्तम् ।

शीतो हिमे च जिह्मे च वानीरबहुवारयोः ।
शीतं गुणे शुक्तमम्ले *पूतिभूते च कर्कशे ॥ १९९॥
शुक्तिः शङ्खनके शङ्खे, कपालखण्डदृग्रुजोः ।
नख्यश्वावर्तयोर्मुक्तास्फोटदुर्नामयोरपि ॥ २००॥
श्रुतमाकर्णिते शास्त्रे श्रुतिराम्नायवार्तयोः ।
षड्जाद्यारम्भिकायां च कर्णाकर्णनयोरपि ॥२०१॥

पूतिभूतं दुर्गन्धम् । तत्र यथा–शुक्तं त्यक्तं न कैश्चित् । कर्कशे परुषे यथा–उक्तिः शुक्तविमुक्ता ॥ १९९ ॥ शुक्तिः शङ्खनके शङ्खे कपालखण्डदृग्रुजोः । नख्यश्वावर्तयोर्मुक्तास्फोटदुर्नामयोरपि । शोचति शुक्तिः "शुचिर्" इति क्तिन् तिः अष्टस्वर्थेषु स्त्रियाम् शङ्खनकः क्षुद्रशङ्खः । शङ्खः कम्बुः । कपालखण्डम् शिरोऽस्थिशकलम् । दृशो नेत्रस्य रुग् रोगः दृग्रुक् । नखि गन्धद्रव्यविशेषः । अश्वावर्तः हयावर्तः । मुक्तास्फोटः अब्धिमण्डूकी । दुर्नामा जलौकाकृति दीर्घकोशिकाख्यो जलस्थजीवविशेषः । अश्वावर्तमुक्तास्फोट-शङ्खनक-शङ्खेषु यथा–आवर्तिताः शुभफलप्रदशुक्तियुक्ताः संपन्नदेव मणयो भृतरन्ध्रभागाः । अश्वाः व्यधुर्वसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतन्तः ॥ २०० ॥ श्रुतमाकर्णिते शास्त्रे । श्रूयते स्म श्रुतम् । आकर्णने क्लीबे । आकर्णिते तु वाच्यलिङ्गः । शास्त्रं ग्रन्थः । द्वयं यथा–न युक्तं स्वच्छमध्यानां बहु श्रुतं विलङ्घनम् । इत्यवेत्य स्थिते तन्व्याः कर्णावाश्रित्य लोचने । अथ भूथेऽपि मङ्गः । यथा–तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च । श्रुतिराम्नायवार्तयोः । षड्जारम्भिकायां च कर्णाकर्णनयोरपि ।

*प्रतिभूते ।

श्वेतं रूप्ये श्वेतो द्वीपे वर्णे शैले कपर्दके ।
श्वेता तु शङ्खिनीकाष्ठपाटल्योः स्यात् सती पुनः ॥२०२॥
कात्यायन्यां च साध्व्यां च, सातिर्दानावसानयोः ।
सितस्त्ववसिते बद्धे वर्णे सिता तु सर्करा ॥२०३॥

श्रूयतेऽसौ अनया वा श्रवणं वा श्रुतिः स्त्रियाम्। आम्नायो वेदस्तत्र यथा–श्रुतेरिवार्थं स्मृतिरन्वगच्छत् । वार्तायां यथा–सखि दशमुख निन्द्ये सीतामितीह जनश्रुतिः। षड्जादीनां स्वराणाम् आरम्भिकायां यथा–श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः । कर्णे यथा–श्रुतिपथमधुराणि सारसानाम्। आकर्णने यथा–नामश्रुतावपि भवेत् सखि रोमहर्षः । श्वेतं रूप्ये । श्वेतते श्वेतम् यथा–श्वेतप्राप्त्या रसोत्कर्षात् । श्वेतो द्वीपे वर्णे शैले कपर्दके । वर्णे पुंसि तद्वति तु वाच्यलिङ्गः । द्वीपे यथा–श्वेतद्वीपलक्ष्मीभिर्नान्यद्वीपासरावलोकनकुतूहलागताम् । वर्णे यथा–श्वेतातपत्रोज्ज्वला लक्ष्मीः । शैले यथा–तेन श्वेतसमेतेन मुनिना तप्यते तपः । कपर्दके यथा–श्वेतैः श्वेतं जलधिपुलिनं गाहते पोतवाहः । श्वेता तु शङ्खिनीकाष्ठपाटल्योः स्यात् । शङ्खिनी शङ्खपुष्पी । काष्ठपाटली पाटलीभेदः । सती पुनः । कात्यायन्यां च साध्व्यां च । अस्तीति सती "अधातूदितः" इति ङीः ॥ २०२ ॥
कात्यायनी गौरी साध्वी पतिव्रता । द्वयोर्यथा–सती सती योगविसृष्टदेहा । सातिर्दानावसानयोः । सननं सातिः । "आः सनि सनि" इति आत्वम् स्यतेर्वा "साति हेति" इति निपातनं स्त्रियाम् । सितस्त्ववसिते बद्धे वर्णे । सीयते स्म सितः । वर्णे पुंसि । तद्वति शेषयोश्च वाच्यलिङ्गः । अवसिते अवसानं प्राप्ते यथा–दिनमवसितं विश्रान्ताः स्मः । अत्र अनेन सितशब्दस्यैव

स्थित ऊर्ध्वं सप्रतिज्ञे, स्थितिः स्थाने च सीम्नि च
सीता जनकजागङ्गाभेदयोर्हलपद्धतौ ॥ २०४॥
सुतः पुत्रे नृपे सुप्तिः, स्वापे स्पर्शाज्ञता रुजि।
सूतः पारदसारथ्योः प्रसूतेरितवन्दिषु ॥ २०५॥

अद्योत्यतो। बद्धे यथा-पुरं विभाति स्म सितैः सितध्वजैः। वर्णः शुक्लस्तत्र यथा-स्फुटोपमं भूतिसितेन शम्भुना। सिता तु शर्करा। यथा-सितोपलानि चत्वारि ॥ २०३ ॥ स्थित ऊर्ध्वे सप्रतिज्ञे। तिष्ठति स्म स्थितः वाच्यलिङ्गः। ऊर्ध्वे यथा-स्थितः स्थितामुच्चलितः प्रयाताम् सप्रतिज्ञे यथा-अत्र स्थितोऽहम-विपर्ययचित्तवृत्तिः। वर्तमानेऽपि मङ्क्षुः। यथा-स्थितः पृथिव्या इव मानदण्डः। स्थितिः स्थाने च सीम्नि च। तिष्ठत्यनया स्थाने वा स्थितिः। स्थाने यथा-स्थितिः पुण्येऽरण्ये सह परिचयो हन्त हरिणैः। सीम्नि मर्यादायां यथा-निःशेषमाक्रान्तम-हीतल जलैश्चलन् समुद्रोऽपि समुज्झति स्थितिम्। करणव्युत्पत्त्या जीवनमप्युच्यते। यथा स्थितिः स्थिता संप्रति तं प्रतीह। सीता जनकजागङ्गाभेदयोर्हलपद्धतौ। सिनोति सीता "सुसितनि" इति ते दीर्घत्वं च। जनकजायां यथा-सीतामर्पय मुञ्च च क्रतु-भुजः कारा कुटुम्बीकृतान्। गङ्गाभेदे यथा-सीतायाः पीतमम्भो भवति भवभिदे। हलपद्धतौ यथा-वृषेव सीतां तदवग्रहक्षता ॥ २०४ ॥ सुतः पुत्रे नृपे। षुङ् प्रसवैश्वर्ययोः। षुञ् अभिषवे च सूयते स्म सुतः। पुत्रे यथा-न्यधायिषातामभिदेवकीसुतम्। सुतेन धातुश्चरणैर्भुवस्तले। नृपे यथा-असौ सुतः संततमीतिनीष्टः। सुप्तिः स्वापे स्पर्शाज्ञतारुजि स्वपनं स्वपित्यनया वा सुप्तिः स्त्रियाम्। स्पर्शस्य अज्ञता स्पर्शाज्ञता सा चासौ रुक् च तत्र।

ब्राह्मण्यां क्षत्रियाज्जाते तद्दिण सूतिर्गतौ पथि ।
स्मृतिः स्मरणधीच्छासु शास्त्रे सेतुस्तु संवरे ॥२०६॥
नदीसंक्रमेऽथ हस्तः करे मानोडुभेदयोः ।
केशात्कलापे शुण्डायां हरिर्दिदशि तृणान्तरे ॥२०७॥

द्वयोर्यथा-सुप्ता हि जानन्ति जना न किंचित् । सूतः पारद-सारथ्योः प्रसूतेरितबन्दिषु । ब्राह्मण्यां क्षत्रियाज्जाते तक्षिण । सूते सुवति सूयते स्म वा सूतः । प्रसूतेरितयोर्वाच्यलिङ्गः । पारदे यथा-सूतेन सह संमर्द्य नागवल्लीदलद्रवम् । सारथौ यथा-सूर्यसूनोऽवताद्वः । प्रसूते यथा-सूते सुते संततिवल्लिकन्दे । ईरिते यथा-शृङ्गेण सूतैः सलिलैः प्रभूतैः । बन्दिनि यथा-सूनात्मजाः प्रवयसः प्रथितप्रबोधम् ॥ २०५ ॥ ब्राह्मण्यां क्षत्रियाज्जाते यथा-न सूताः सोमपायिनः । तक्षा रथकारस्तत्र यथा-सूतो वा सूतपुत्रो वा । सूतिर्गतौ पथि । सरणं सरत्यनया वा सृतिः स्त्रियाम् । द्वयोर्यथा-दुर्लभा विपिने सृतिः । स्मृतिः स्मरणधीच्छासु शास्त्रे । स्मरणं स्मर्यतेऽनया वा स्मृतिः । चतुर्ष्वर्थेषु स्त्रियाम् । स्मरणं पूर्वानुभूतस्य धीः तात्कालिकी बुद्धिः । तयोर्यथा-कोसौ कास्मि रतं तु किं कथमिति स्वप्नापि मे न स्मृतिः । इच्छायां यथा-स्मृतिभुवः पथिका हरिणा इव । शास्त्रे यथा-श्रुतेरिवार्थं स्मृतिरन्वगच्छत् । सेतुस्तु संवरे नदीसंक्रमे । सिनोति सेतुः "कृमिकमि" इति तुन् । पुंसि । संवरो जलधारणाय पालिः । तत्र यथा-नलिनी-क्षतसेतुबन्धनो जलसंघात इवातिविद्रुतः ॥ २०६ ॥ संक्रामन्ति अनेन सोऽपि । नद्या नद्यां वा संक्रमः । नदी इत्युपलक्षणं तेन समुद्रादावपि । तत्र यथा-सेतुबद्धमिमं शृणोमि कपिभिः पश्यामि लङ्कां वृताम् ।

वर्णभेदेऽश्वभेदे च हितं पथ्ये गते धृते ।
हेतिर्ज्वालास्त्रसूर्यांशुष्वथर्थो हेतौ प्रयोजने ॥ २०८ ॥

अथ हस्तः करे मानोडुभेदयोः । केशात्कलापे शुण्डायां हरिद्दिशि तृणान्तरे । हसत्यनेन हस्तः "दम्यमि" इति तः करे पुंक्लीबः । उडुभेदे स्त्रीपुंस । शषेषु पुंसि । करे यथा-हस्ते लीलाकमल-मलकं बालकुंदानुविद्धम् । मानभेदे यथा हस्ती हस्तसहस्रेण । उडुभेदे यथा-हस्ताद्याः पञ्च नक्षत्रेषु प्रशस्त चोत्तरा त्र्यम् । केशात्कलापे समूहे यथा-कस्याश्चिद्धितत (न) वच्छिन्नांगुलीको लक्ष्मीवान् सरसि रराज के (को)शहस्तः ॥ शुण्डायां यथा-कीर्णं शनैरनुकपोलमनेकपानां हस्तैर्विगाढमदतापरुजः शमाय । हरिद्दिशि तृणान्तरे । वर्णभेदेऽश्वभेदे च । ह्रियते हरित् "हृ सृ रु हि" इति इत् । दिशि स्त्रियाम् । तृणान्तरे क्लीबे । यदाह वैजयन्ती हरित् स्त्री दिशि षण् तृणे वर्णभेदे नीले पुंसि । तद्वति वाच्य-लिङ्गः । अश्वभेदे सूर्याश्वे पुंसि । दिशिवर्णभेदे च यथा-दिशिवर्णभेदे च यथा-यत्पल्लवौघपरिरम्भविजृम्भितेन ख्याता जगत् स हरितो हरितः स्फुरन्ति । तृणान्तरे यथा-वर्षासु हर्म्या हरितो हरिद्भिः ॥ २०७ ॥ अश्वभेदे यथा-क्षुण्णानि हरितां खुरैः । हितं पथ्ये गते धृते । हिनोति स्म हितम्, धीयते स्म इति वा । "धाग" इति क्ते हिरादेशः । वाच्यलिङ्गः । पथ्ये यथा-हितं मनोहारि च दुर्लभं वचः । हेतिर्ज्वालास्त्रसूर्यांशुषु । हिनोति हीयतेऽ-नया वा हेतिः । "साति हेति" । इति क्तौ साधुः । ज्वाला वह्न्यर्चिः । अस्त्रं प्रहरणम् । सूर्यांशुः सूर्यद्युतिः । ज्वालायां सूर्यांशुषु च । यथा उदिते सहस्रहेतौ वह्ने हेतिर्न लक्ष्यते क्वापि । अस्त्रे यथा-हित्वा हेतीर्मल्लवन्मुष्टिघातं घ्नन्तौ बाहू बाहु-

निवृत्तौ विषये वाच्ये प्रकारद्रव्यवस्तुषु ।
आस्था यत्नालम्बनयोरास्थानापेक्षयोरपि ॥२०९॥
कन्था पुरे प्रावरणे क्वाथो व्यसनदुःखयोः ।
द्रवनिष्पाकेऽथ कुथः स्यादास्तरणदर्भयोः ॥२१०॥

विध्यासजेताम् । अथ थान्ताः । अर्थो हेतौ प्रयोजने । निवृत्तौ विषये वाच्ये प्रकारद्रव्यवस्तुषु । अर्थ्यते अर्थः । अल् । अर्यते वा "कमिभुगातिभ्यस्थः" अष्टस्वर्थेषु । हेतौ यथा-अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् । प्रयोजने यथा-आत्मार्थे पृथिवीं त्यजेत् । निवृत्तौ यथा-मशकार्थो धूमः। मशकनिवृत्तये इत्यर्थः । विषये यथा-इन्द्रियाणीन्द्रियार्थेषु । वाच्यमभिधेयं तत्र यथा-वागर्थाविव संपृक्तौ । प्रकारे यथा-नानार्थैः फलपुष्पपल्लवभरैर्व्यर्थं समध्यातपम् । द्रव्ये यथा-अर्थैरर्थानि वर्ध्यन्ते । वस्तुनि यथा-सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु । आस्था यत्नालम्बनयोरास्थानापेक्षयोरपि आस्थानमास्था "उपसर्गादातः" इत्यङ् । यत्ने यथा-आस्थापरेणैव नरेण लभ्या पादद्वयी ते यदपि त्रिनेत्र। आलम्बने यथा-आस्थाप्यनास्था सदृशी तवैषा । आस्थाने सभायां यथा-आस्थायां नृपतिस्तस्थौ । अपेक्षायां यथा-अनास्था बाह्यवस्तुषु ॥ २०९ ॥ कन्था पुरे प्रावरणे । काम्यते कन्था "कमिभुगातिभ्यस्थः" इति थः । पुरे यथा-अयं पन्थाः कन्थापुरपरिसरं पान्थ भजते । प्रावरणे यथा-एकैव काचिन्महतामवस्था। सूक्ष्माणि वस्त्राण्यथवा च कन्था । क्वाथो व्यसनदुःखयोः । द्रवनिष्पाके । क्वथ्यतेऽनेन क्वथनं वा क्वाथः । सर्वेषु यथा-क्वाथेन व्यथते पृथ्वी । अथ कुथः स्यादास्तरणदर्भयोः । कुथश् संक्लेशे कुथ्यतेऽनेन कुथः । स्थादित्वात् कः आस्तरणं वर्णक वल-

कोथस्तु मथने नेत्ररुग्भेदे शटितेऽपि च ।
ग्रन्थो गुम्फे धने शास्त्रे द्वात्रिंशद्वर्णनिर्मितौ ॥२११॥
ग्रन्थिर्वस्त्रादिबन्धे रुग्भेदे कौटिल्यपर्वणोः ।
ग्रन्थि तु ग्रन्थिपर्णे स्याद्गाथा वाग्भेदवृत्तयोः ॥२१२॥

स्तत्र त्रिलिङ्गः । दर्भे पुंसि । आस्तरणे यथा-कुथेन नागेन्द्रमिवेन्द्रवाहनम् । दर्भे यथा-कुथपविन्नकपूतकरो द्विजः ॥ २१० ॥ कोथस्तु मथने नेत्ररुग्भेदे शटितेऽपि च । कुथ्यतेऽनेन कोथनं वा कोथः । वाच्यलिङ्गः । सर्वेषु यथा-कोथो व्यथयते चेतः । ग्रन्थो गुम्फे धने शास्त्रे द्वात्रिंशद्वर्णनिर्मितौ । ग्रथ्यते ग्रन्थनं वा ग्रन्थः । गुम्फे यथा-पुष्पग्रन्थैः प्रथयति तरां कौशलं लोलनेत्रा । धने यथा निर्ग्रन्थता परा याचयो रूचैश्चक्रवर्तिता । शास्त्रे यथा-ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् । द्वात्रिंशद्वर्णनिर्मितौ यथा-ग्रन्थलक्षं चकार ॥ २११ ॥ ग्रन्थिर्वस्त्रादिबन्धे रुग्भेदे कौटिल्यपर्वणोः । ग्रथुङ् कौटिल्ये ग्रथ्यते ग्रन्थि "पदिपठि" इति इः पुंसि । वस्त्रादिबन्धे यथा-यत्पाणिर्न निवारितो निवसनग्रन्थि समुद्ग्रथयन् । रुग्भेदे यथा-ग्रन्थे स्म गुरुगर्भमुद्वह सखे ग्रैवेयकोऽस्मीति भोः । कौटिल्ये यथा-यद्यस्त्येव निसर्गतः सरलता किं ग्रन्थिमत्तेदृशी । पर्वणि यथा-नीरन्ध्राः पुनैरालिखन्तु जरठच्छेदानलग्नग्रन्थयः । ग्रन्थि तु ग्रन्थिपर्णं स्यात् । ग्रन्थिपर्णं गन्धद्रव्यं तत्र क्लीबे । गाथा वाग्भेदवृत्तयोः । गीयते गाथा "कमिपुगाति-भ्यस्थः" वाग्भेदे सगीतपदपाठे यथा-पौराणीभिरनेकविक्रमकथा गाथाभिरर्थापिता । वृत्ते वृत्तविशेषः । संस्कृते आर्या प्राकृते गाथा तत्र यथा-गौडस्यजतु या गाथामम्ब यास्तु सरस्वती ॥२१२॥ तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः । ऋषिजुष्टे जले

तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ।
ऋषिजुष्टे जले सत्रिण्युपाये स्त्रीरजस्यपि ॥२१३॥
योनौ पात्रे दर्शने च तुत्थोऽग्नौ तुत्थमञ्जने ।
तुत्था नील्यां सूक्ष्मैलायां दुःस्थो दुर्गतमूर्खयोः ॥२१४॥

सत्रिण्युपाये स्त्रीरजस्यपि । योनौ पात्रे दर्शनेषु । तरन्त्यनेन तीर्थम् "नीनूरभि" इति कित् थः । अयं दशस्वर्थेषु । पुण्यक्षेत्राव-तारयोः पुंक्लीबः । शेषेषु क्लीबे । शास्त्रम् आगमादि तत्र यथा-तिलकं तीर्थकृल्लक्ष्म्याः । गुरौ यथा-दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषक् । यज्ञे यथा-तीर्थं तद्व्यक्तव्ययं । पुण्यक्षेत्रे यथा-तीर्थनामादिपदं स जयति शत्रुंजयगिरीशः । अवतारे यथा-तीर्थं नदीये जलसेतुबन्धात् । ऋषिभिर्जुष्टम् उज्जयन्तप्रभासादिः । तत्र यथा-यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते । जले यथा-तीर्थेन मज्जनं व्यर्थं पापपिच्छिलचेतसाम् । सत्रिणि यज्ञप्रवृत्ते यथा-फलमविकलमेतत्प्राप्नुयात्तीर्थसार्थः । उपायः सामादिः तत्र यथा-अपरतीर्थेन हि किं साध्यते । स्त्रीरजसि यथा-तीर्थस्नातां स्त्रियं यायाद् ब्रह्मचार्यन्यथा भवेत् ॥ २१३ ॥ योनौ यथा-कामिनोऽपि कथं निन्द्या ये नित्यं तीर्थसेविनः । पात्रे यथा-शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः । दर्शनेषु बौद्धादिषु यथा-कृत्वा कृत्यविदस्तीर्थैरन्तःप्रणिधयः पदम् । तुत्थोऽग्नौ । तुदति तुत्थः । "नीनुरभि" इति कित् थः । तुत्थ-मञ्जने । अञ्जनं मयूरग्रीवं नामौषधम् तत्र यथा-सिन्दूरगुग्गुलु-रसाञ्जनसिक्थतुत्थैः । तुत्था नील्यां सूक्ष्मैलायाम् । नीली ओषधिः । सूक्ष्मैला गन्धद्रव्यम् दुःस्थो दुर्गतमूर्खयोः । दुःखेन तिष्ठति दुस्थः । "स्थापास्नो" इति कः । वाच्यलिङ्गः । दुर्गते

प्रस्थः सानौ मानभेदे पीथोऽर्के पीथमम्बुनि ।
पृथुर्विशाले भूपाले वापिकाकृष्णजीरयोः ॥२१५॥
प्रोथोऽश्वघोणाध्वगयोः कट्यां मन्थो रवौ मथि ।
साक्तवे नेत्ररोगे च यूथं तिर्यग्गणे गणे ॥२१६॥

यथा–कर्णद्वयी दुःस्थः श्रोष्यति नाम किं स हि सहस्राक्षः न चक्षुःश्रवाः । मूर्खे यथा–दुःस्थेन धनिनाऽपि किम् । दुःखितेपि यथा–इत्थं दिग्भित्तिरोधक्षतविसरतया मांसलैस्त्वद्यशोभिः । स्तोकावस्थानदुःस्थैः ॥२१४॥ प्रस्थः सानौ मानभेदे । प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः पुंक्लीबः । सानुर्गिरितटम् । मानभेदे एकः प्रस्थः चतुष्कुडवः । द्वयं यथा–यतो महार्घाणि भृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छ्रितानि । आकर्याद्व प्रापणिकादजस्रं जग्राह रत्नान्यमितानि लोकः । पीथोऽर्के । पीथः "नीनूरभि" इति कित् थः मकरेऽपि । पीथमम्बुनि । पीयते पीथम् । अम्बुनि सलिले । पृथुर्विशाले भूपाले वापिकाकृष्णजीरयोः । प्रथते पृथुः । "रभि प्रथिभ्यामृच्चरस्य" इत्युः । विशाले वाच्यलिङ्गः । भूपाले पुंसि । वापिकाकृष्णजीरयोः । स्त्रीलिङ्गः । यद्गौडः पृथुर्वाप्यां कृष्णजीरे स्त्रीष्यूढे त्रिषु राज्ञि ना । विशाले यथा–पृथुभुवनभरायार्पितं येन पृष्टम् भूपाले यथा–पृथूपदिष्टां दुदुहुर्धरित्रीम् । वापिका हिंगुपर्णी । धरणिरुन्दसोरपि मङ्खः । धरणौ यथा–पृथ्वि स्थिरीभव भुजङ्गम धारयैनाम् । छन्दः सप्तदशाक्षरो वृत्तभेदः । यथा निमीलितविलोचना किल चुलुक्य पृथ्वीपतौ ॥ २१५ ॥ प्रोथोऽश्वघोणाध्वगयोः कट्याम् । प्रवते प्रोथः "कमिपुगार्तिभ्यस्थः । अश्वघोणायां पुंक्लीबः अध्वगे वाच्यलिङ्गः । कट्यां पुंसि । अश्वघोणायाम् अश्वनासिकायां यथा–रिरसयिषति भूयः शष्पमग्रे (मार्ग)

**यूथी तु मागधीपुष्पविशेषयोः कुरण्टके ।**
**रथस्तु स्यन्दने पादे शरीरे वेतसद्रुमे ॥२१७॥**

विकीर्ण पटुतरचलत्लोष्टः प्रस्फुरत्प्रोथमश्वः । अश्वगे यथा—आ उदकान्तात् प्रियं प्रोथमनुव्रजेत् । कटी कटयवयवोऽत्र यथा—पृथुप्रोथा तु कुट्टनी । मन्थो रवौ मथि । साक्तवे नेत्ररोगे च । मथ्नाति मथयतेऽसौ अनेन वा मन्थः । रवौ यथा मथ्नाति मन्थः प्रथितं तमिस्रम् । मथि मन्थानके यथा—आपातालनिमग्नपीवरवपुर्जानाति मन्थाचलः । सक्तूनां विकारः साक्तवम् । तत्र यथा—मार्गेषु मन्थं पथिकाः पिबन्ति । यूथं तिर्यग्गणे गणे । यौति यूथम् "पथयूथ" इति साधुः तिरश्चां गणस्तिर्यग्गणः । तत्र यथा—आविर्बभूव कुशगर्भमुखं मृगाणां । यूथं तदग्रसरगर्वितकृष्णसारम् । गणे समूहमात्रे यथा—प्रत्यर्थियूथमथनप्रथमाभिदण्डः ॥ २१६ ॥ यूथी तु मागधीपुष्पविशेषयोः कुरण्टके । मागधी गुल्मभेदः । कुरण्टकः किंकरातः । सर्वेषु यथा—ससल्लकीसालभिलिन्ध्रयूथी प्रसूनदः पुष्पितलाङ्गलीकः । रथस्तु स्यन्दने पादे शरीरे वेतसद्रुमे । रमते रथः "नीनूरमि" इति कित् थः स्यन्दने स्त्रीपुंसः । शेषेषु पुंसि स्यन्दने यथा—रथस्थमालोक्य रथाङ्गपाणिम् । पादः क्रमः ॥ २१७ ॥ वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरूपके । वीयते वीथिः वीसञ्ज्यसि" इति कित् थिः, ङ्यां वीथी । वर्त्मनि पङ्क्तौ च यथा—घनवीथिवीथिमवत्तीर्णवनः । गृहाङ्गे गृहभित्तिपादे यथा—पृथुः समर्थावसथस्य वीथी । नाट्यरूपके यथा—सर्वरसलक्षणाढ्या युक्ता ह्यङ्गैस्त्रयोदशभिः । वीथी स्यादेकांका तथैकहार्या द्विहार्या वा । संस्था स्पशे स्थितौ मृत्यौ । संतिष्ठते संस्था । क्विप् सूत्रे व्यत्यये लुग्वेति रेफस्य लोपः । संस्थानं वा संस्था,

वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरूपके ।
संस्था स्पशे स्थितौ मृत्यौ सार्थो वृन्दे वणिग्गणे ॥२१८॥
सिक्थं नील्यां मधूच्छिष्टे सिक्थो भक्तपुलाकके ।
अब्दः संवत्सरे मेघे मुस्तके गिरिभिद्यपि ॥२१९॥

अङ् आप् । स्पशश्चरः तत्र पुंसि । शेषयोः स्त्रियाम् । सर्वेषु यथा–संस्थामुखेन स विवेद जनस्य संस्थाम् । चरे अकारान्तोऽपि इति मङ्खः । यथा–संस्थैः समीक्ष्य परकार्यमनन्यकार्यः । सार्थो वृन्दे वणिग्गणे सरति सार्थः । "सर्ते णित्" इति णित् थः । सह अर्थेन वर्तते इति वा । वृन्दे यथा–गृहान् प्रतिप्रस्थित-पान्थसार्थः कालोऽयमाध्मातनभाः पयोदैः । वणिग्गणे यथा–सार्थवाहो धनो नाम ॥ २१८ ॥ सिक्थं नील्यां मधूच्छिष्टे । सिच्यते स्म सिक्थम् । "नीनूरमि" इति कित् थः नीली ओषधिः । मधूच्छिष्टं मदनम् । तत्र यथा–वक्त्रोल्लसत्कुङ्कुमसिक्थ-काद्याः सगन्धतैलाः कबरीर्वहन्ति । सिक्थो भक्तपुलाकके । भक्त-पुलाकके भक्तकणे यथा–ग्रासाद् गलितसिक्थेन किं कष्टं करिणो भवेत् ॥ अथ दान्ताः ॥" अब्दः संवत्सरे मेघे मुस्तके गिरिभिद्यपि । आप्नोति अब्दः "आपोऽब्व" इति दः, आपो ददाति इति वा । संवत्सरे पुंक्लीबः । शेषेषु पुंसि । संवत्सरे यथा–वन्ध्याऽष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा । मेघे यथा–जायन्ते पुनरब्दशब्द-निवहादुत्सेकिनः केकिनः । मुस्तके मेघनामत्वादब्दः । यदमरः–कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥ २१९ ॥ अन्दुः स्यान्निगडे भूषाभेदे । अदु बन्धने अन्द्यतेऽनया अन्दुः "कृषिचमि" इति ऊः स्त्रियाम् । निगडे यथा–मृदुचलदपरान्तोदीरितान्दूनिनादम् । गजपतिमधिरोहः पक्षकव्यत्ययेन । भूषाभेदे यथा–लीलान्दोलित-

अन्दूः स्यान्निगडे भूषाभेदे ककुदवत् ककुत् ।
श्रेष्ठे वृषाङ्गे राट्चिह्ने क्रव्यान्मांसाशिरक्षसोः ॥२२०॥
कन्दोऽब्दे सूरणे सस्यमूले कुन्दोऽच्युते निधौ ।
[1]चक्रभूमौ च माध्ये च क्षोदः पेषणचूर्णयोः ॥२२१॥

---

कर्णाद्युतिद्योतितदिग्मुखा । ककुदवत् ककुत् । श्रेष्ठे वृषाङ्गे राट्चिह्ने । ककते ककुत् । बाहुलकात् "उत्ककेर्णिद्वा" इति उदे ककुदम् ककुत् क्लीबे । ककुदः पुंक्लीबः । गौडस्तु-"स्त्री ककुत् ककुदोऽप्यस्त्री वृषाङ्गे राट्ध्वजे वरे" इत्याह । श्रेष्ठे यथा-राजत्ययं मुनिककुत्तपसा कृशाङ्गः । इक्ष्वाकुवंश्यः ककुदं नृपाणां दिलीप इत्याहितलक्षणोऽभूत् । वृषाङ्गं शृंगमंसकूटो वा । तत्र यथा-समुल्लिखन् दर्पकलः ककुद्मान् । ककुदखुरविषाणैर्लक्ष्यतेऽसौ महोक्षः । राट्चिह्नं छत्रादि तत्र यथा-उच्छ्रितककुदमहाबलगजतुरगबलान्विते नृपतौ । नृपतिककुदं दत्वा यूने सितातपवारणम् । ककुदोऽपि पञ्चर्थेषु । क्रव्यान्मांसाशिरक्षसोः । क्रव्यम् आममांसम् अत्ति क्रव्यात् । क्रव्यात् क्रव्यादावाम पक्वादौ" इति क्विपि साधुः । मांसाशिनि वाच्यलिङ्गः द्वयार्थयथा-क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ॥ २२० ॥ कन्दोऽब्दे कन्दः सूरणे सस्यमूले । कं ददाति कन्यते वा "शाशपि" इति दः । कन्यते वा पुंक्लीबः । सर्वेषु यथा-कन्दैः कन्दलितं कन्दे मन्दं मन्दं प्रवर्षति । कुन्दोऽच्युते निधौ चक्रभूमौ च माध्ये च । कूयते कुन्दः "वृतकुसुभ्यो नोन्तश्च" इति दः । माध्यं कुन्द पुष्पम् । तत्र पुंक्लीबः । शेषेषु पुंसि । अच्युते यथा-कुन्देन वृन्दावने । निधौ यथा-मकुन्दं कुन्दनीलाश्च चर्चाश्च निधयो

---

[1]प्र० चक्रभ्रमौ प्र० चक्रभ्रमे

गदः कृष्णानुजे रोगे गदा प्रहरणान्तरे ।
छदः पत्रे पतत्रे च ग्रन्थिपर्णतमालयोः ॥ २२२ ॥
छन्दो वशेऽभिप्राये च दृषत् पाषाणमात्रके ।
निष्पेषणार्थपट्टेऽपि धीदा कन्यामनीषयोः ॥२२३॥

नव । चक्रभूमौ यन्त्रविशेषे यथा–तदयमपि हि त्वष्टुः कुन्दे भविष्यति चन्द्रमाः । माध्ये यथा–द्योतितान्तः सभैः कुन्दकुड्मलाग्रदतः स्मितैः । क्षोदः पेषणचूर्णयोः क्षुद्यते क्षोदः । पेषणे यथा–तुरङ्गमखुरक्षोदोत्थितै रेणुभिः । चूर्णे यथा – शङ्खक्षोद सहोदरं तव यशः ॥ २२१ ॥ गदः कृष्णानुजे रोगे । गदति गदः । कृष्णानुजे यथा–जगादाग्रे गदाग्रजम् । रोगे यथा–सगदोऽप्यगदवशीकृतः । गदा प्रहरणान्तरे यथा–चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य । छदः पत्रे पतत्रे च ग्रन्थिपर्णतमालयोः । छाद्यतेऽनेन छदः "पुंनाम्नि घः" "एकोपसर्गस्य" इति ह्रस्वः पुंक्लीबः । पत्रं दलं तत्र यथा-सतच्छदक्षीरकटुप्रवाहम् । पतत्रं पिच्छं तत्र यथा–सितच्छदैश्छादितमेतदम्बरम् ॥ २२२ ॥ छन्दो वशेऽभिप्राये च । चन्दनात् छन्दः । अत्र पृषोदरादित्वात् चस्य छत्वम् । वशे यथा–स्वच्छन्दस्य भुजंगनस्य वसतश्चिन्ताज्वरो निर्मितः । अभिप्राये यथा–छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः । दृषत् पाषाणमात्रके । निष्पेषणार्थपट्टेऽपि । दीर्यते दृणाति वा दृषद् "द्रोर्ह्रस्वश्च" इति सद् स्त्रियाम् । पाषाणमात्रके यथा–तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः । निष्पेषणार्थे पट्टे यथा–संपिष्यतां दृषदि सप्रति चन्द्रबिम्बम् । धीदा कन्यामनीषयोः । धियं ददाति धीदा मनीषा बुद्धिः । द्वयोर्यथा–धीदावतीयं ननु कस्य धीदा ॥ २२३ ॥

नदो वहेऽब्धौ [1]निनदे, नन्दा संपद्यलिञ्जरे ।
तिथिभेदेऽपि नन्दिस्तु, प्रतीहारे पिनाकिनः ॥२२४॥
आनन्दने च द्युते च निन्दा कुत्सापवादयोः ।
पदं स्थाने विभक्त्यन्ते, शब्दे वाक्येऽङ्कवस्तुनोः ॥२२५॥

नदो वहेऽब्धौ निनदे । नदति नदनं वा नदः । अच् बाहुलकादल् वा । वहे यथा–तीरं नदनदीपतेः । अब्धौ निनदे च यथा–क्षारोनदोऽयं कुरुते नदं वृथा । नन्दा संपद्यलिञ्जरे तिथिभेदेऽपि । नन्दनं नन्दयति वा नन्दा त्रिष्वपि यथा–आनन्दमेषा वितनोति नन्दा । नन्दिस्तु प्रतीहारे पिनाकिनः । आनन्दने च द्युते च नन्दति नन्दनं वा नन्दिः "पदिपठि" इति इः पुंसि । पिनाकिनः शंभोः प्रतीहारे यथा–अगजास्येन्दुनन्दिः स्तात् सगजास्येन्दुनन्दिभिः । अनङ्गदाहि माहेशं साङ्गदाहि मुदे वपुः । ॥ २२४ ॥ द्यूते यथा–लभ्यन्ते नन्दिना नन्द द्यूतकाराद्धि केन च । निन्दा कुत्सापवादयोः । निन्दनं निन्दा । कुत्सा गर्हा । अपवादः अवर्णवादः । द्वयोर्यथा–मन्निन्दया यदि जनः परितोषमेति । पदं स्थाने विभक्त्यन्ते शब्दे वाक्येऽङ्कवस्तुनोः ॥ २२५ ॥ त्राणे पादे पादचिह्ने, व्यवसायापदेशयोः । पद्यतेऽनेन पद्यते वा पदम् । "वर्षादयः क्लीबे" इत्यल् । एकादशस्वर्थेषु । स्थाने यथा–पदं लङ्केति दिव्यापुरी । विभक्त्यन्ते शब्दे वाक्ये च यथा–वैतालिकाः स्फुटपदप्रकटार्थमुच्चैर्भोगावलीः कलगिरोऽवसरेषु पेठुः । अङ्के लक्ष्मणि यथा–नवनखपदमङ्गं गोपयस्यंशुकेन । वस्तुनि यथा–पदे रिक्ते रिक्ते विनिहितपदार्थान्तरमिति । अत्र पदार्थान्तरं वस्त्वन्तरमित्यर्थः ॥ २२५ ॥ त्राणे शरणे यथा–परमं

[1] प्र० निनादे

आणे पादे पादचिह्ने, व्यवसायापदेशयोः ।
पादो मूलांशुतुर्यांशाङ्घ्रिषु प्रत्यन्तपर्वते ॥२२६॥
भन्द्रं कल्याणे सौख्ये च, भसद् भास्वरमांसयोः ।
भेदो विदारणे द्वैधे, उपजापविशेषयोः ॥२२७॥

पद्मार्तचेतसामभविष्यो यदि न त्वमीश्वरः । पादे चरणे यथा-तं वीध्यवेपथुरूती सरसाङ्गयष्टिर्निक्षेप एव पदमुद्धृतमुद्वहन्ती । पादचिह्ने चरणमुद्रायां यथा-पदं तुषारस्रुतिधौतरक्तम् । व्यवसाये निश्चये यथा-चित्ते विचारनिहितेऽपि पदं न किंचित् सम्यक् स्फुरत्यहह कोऽपि विधेः प्रमादः । अपदेशे व्याजे यथा-सानुतर्षमनुतर्षपदेन । चरणन्यासाश्चचिह्नयोरपि भेदः । क्रमेण यथा-पदं सहेत भ्रमरस्य पेलवम् । पदमपि वेलापतितं बहिरिति कितवाः प्रशंसन्ति । पादो मूलांशुतुर्यांशाङ्घ्रिषु प्रत्यन्तपर्वते । पद्यते पन्स्यतेऽपादि पेदे वा पादः "पदरुज" इति घञ् । मूले यथा-किंवैते फलपुष्पपल्लवभरैर्व्यस्तातपाः पादपाः । अत्र हि पादैः मूलैः पिबन्ति इति पादपाः । अंशौ किरणे यथा-पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान् । तुर्यांशे चतुर्थभागे यथा-पादमायान्निधि कुर्यात् । अङ्घ्रौ यथा-प्रेयान् सायमपाकृतः सशपथं पादानतः कान्तया । प्रत्यन्तपर्वते यथा-ध्वनिचकितवराहव्याकुला विन्ध्यपादाः । पूजायामपि यथा तातपादैर्लालितायां पालितायां च सुन्दर ॥२२६॥ भन्दं (भन्द्रं) कल्याणे सौख्ये च । भन्दते भन्द्रम् । द्वयोर्यथा-अमन्दभन्द्रोदयकन्दसार । भसद् भास्वरमांसयोः । भस भर्त्सनदीप्त्योः । बभस्ति भसद् "श्रृदृभसेरद्" भास्वरे वाच्यलिङ्गः । मांसे क्लीबे । भेदो विदारणे द्वैधे उपजापविशेषयोः । भेदनं भिद्यतेऽनेन वा भेदः । विदारणे यथा-पद्मभेद-

मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः ।
कस्तूरिकायां क्षैब्ये च मदी कृषकवस्तुनि ॥२२८॥
मन्दो मूढे शनौ रोगिण्यलसे भाग्यवर्जिते ।
गजजातिप्रभेदेऽल्पे स्वैरे मन्दरते खले ॥२२९॥

पिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः । द्वैधे द्विधाकरणे यथा-नीते भेदं धौतधारासिपातात् । उपजापे तृतीयोपाये यथा-शूरं भेदेन योजयेत् । विशेषे यथा-भेदस्तथापि नाख्यातुं सरस्वत्यापि शक्यते ॥ २२७ ॥ मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः । कस्तूरिकायां क्षैब्ये च । माद्यत्यनेन मदनं वा मदः "व्यधजपमद्भ्यः" इत्यल् । रेतसि यथा-क्षतविण्मदमूत्राणि भवन्ति युगपद्यदि । मासे तत्र तिथौ तत्र वर्षान्ते मरणं तदा । अहंकारे यथा-त्रैलोक्यं तपसा जितं यदि मदो दोषाणां किमेतावता । मद्ये यथा-अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मदः करिष्यति । हर्षे यथा-निर्वृतिं हि मनसो मदहेतुः । इभदाने यथा - अभिनवमदलेखाश्याम(साम)गण्डस्थलानाम् । कस्तूरिकायां यथा-बाला विभाति मदमण्डितगण्डभित्तिः । क्षैब्ये मत्ततायां यथा-कामिनेव तरुणेन मदेन । मदी कृषकवस्तुनि । यथा-मदीमदक्त प्रमदः कृषीवलः ॥ २२८ ॥ मन्दो मूढे शनौ रोगिण्यलसे भाग्यवर्जिते । गजजातिप्रभेदेऽल्पे स्वैरे मन्दरते खले । मन्दते मन्दः मन्यते वा । "शाशपि" इति दः । शनौ गजजातिप्रभेदे च पुंसि । अल्पे शनैरर्थे क्रियाविशेषणत्वात् क्लीबे । शेषेषु वाच्यलिङ्गः । मूढे यथा-मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् । शनौ यथा-शत्रू मन्दसितौ समस्तु शशिजो मित्राणि शेषा रवेः । रोगिणि यथा-यदपथ्यं

मृद्वतीक्ष्णे कोमले च, रदो दन्ते विलेखने ।
विदा ज्ञानधियोर्बिन्दुर्विप्रुड्ज्ञात्रो रदक्षते ॥२३०॥
वेदिरङ्गुलिमुद्रायां, बुधेऽलंकृतभूतले ।
शब्दोऽक्षरे यशोगीत्योर्वाक्ये खे श्रवणे ध्वनौ ॥२३१॥

शरीरस्य तद्धि मन्दाय रोचते । अलसे यथा-मानिन्या वपुषि पतन्ति सर्गमन्दे । भाग्यवर्जिते यथा-निन्दन्ति नि दास्तव भाषितानि । गजजातिप्रभेदे यथा-न मन्दजातिर्युधे शस्यते गजः । अल्पे शनैरर्थे यथा-मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् । स्वैरे यथा-मन्दैः पदैः संचरिते हि डिम्भः । मन्दरते यथा मन्दे नार्यो न रज्यन्ते । खले यथा-द्विषन्ति मन्दाश्चरितं पिनाकिनः ॥ २२९ ॥ मृद्वतीक्ष्णे कोमले च । मृद्यते मृदु "हकाद्दषि" इति किदुः । गुणे पुंसि तद्वति वाच्यलिङ्गः । द्वयोर्यथा-अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते हतान्तकः । रदो दन्ते विलेखने । रदत्ति रदनं वा रदः । अच् बाहुलकादल् वा दन्ते यथा-उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्यामीशादन्तः कुञ्जरं शात्रवीयम् । विलेखने यथा-प्रियहीना हृदयावनी रदैः । विदा ज्ञानधियोः । वेदनं वेत्त्यनया वा विदा "भिदादित्वात्" अङ् । बिन्दुर्विप्रुड्ज्ञात्रोः रदक्षते । विदु अवयवे बिन्दति बिन्दुः "भृमृतृत्सरि" इत्युः । वेत्ति इत्येवं शीलो वा "विन्द्विच्छू" इति साधुः स । ज्ञातरि तु वाच्यलिङ्गः । विप्रुषि यथा-चिरेण नाभिं प्रथमोदबिन्दवः । ज्ञातरि यथा-तथैव वैन्दवी कला । अत्र च बवयोरैक्यस्मरणात् बिन्दुशब्देन ज्ञाताप्युच्यते । रदक्षते यथा-अधरे बिन्दुः कण्ठे मणिमाला कुचयुगे शशप्लुतकम् । शून्यार्थप्रकृतिभ्रूमध्यतेजस्स्वपि इति मङ्खः । क्रमेण यथा-ओंकारं बिन्दु संयुक्तम् । बीजं बिन्दुः

शरद् वर्षात्यये वर्षे, शादः कर्दमशष्पयोः ।
संवित्संभाषणे ज्ञाने, संग्रामे नाम्नि तोषणे ॥२३२॥
क्रियाकारे प्रतिज्ञायां, संकेताचारयोरपि ।
संपद्वृद्धौ गुणोत्कर्षे, हारे स्वादुस्तु सुन्दरे ॥२३३॥

पताका च प्रकरीकार्यलक्षणाः अर्थप्रकृतयः पञ्चता एताः परिकीर्त्तिताः । अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ ॥२३०॥ वेदिरङ्गुलिमुद्रायां बुधेऽलंकृतभूतले । विद्यते वेत्ति वा वेदिः "विदिभूतेर्वा" इति इः । बुधो विद्वान् तत्र पुंसि । अन्यत्र स्त्रियाम् । अलंकृतभूतले यथा-क्लृप्तोपचारां चतुरस्रवेदीं । शब्दोऽक्षरे यशोगीत्योर्वाक्ये खे श्रवणे ध्वनौ । शपति शब्दः "शाशपि" इति दः । शब्द्यते वा शब्दः । अक्षरे यथा-शब्दाख्याय यद्यपि किल ते यः सखीनां पुरस्तात् । यशसि यथा-ततः समानीयसमानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः । शेषेषु यथा-जलान्तराणीव महार्णवौघः । शब्दान्तराण्यन्तरयांचकार ॥२३१॥ शरद् वर्षात्यये । वर्षे । शृणाति शरद् "श्रृदृभसेरद्" स्त्रियाम् । वर्षात्यये यथा-तपेन वर्षाः शरदा हिमागमः । वर्षे संवत्सरे यथा-परः सहस्राः शरदस्तपांसि । शादः कर्दमशष्पयोः । शद्लृ शातने । शीयते शादः "वा ज्वलादि" इति णः । कर्दमे यथा-आस्त्यानशादविलुठच्छफरीशतेषु । शष्पे यथा-ययौ मृगाध्यासितशाद्वलानि । संवित्संभाषणे ज्ञाने, संग्रामे नाम्नि तोषणे । क्रियाकारे प्रतिज्ञायां संकेताचारयोरपि । संवेदः संविद्यतेऽस्यामनयेति वा संविद् स्त्रियाम् । संभाषणे यथा-तदा वनान्ते कृतसंविदोस्तयोः । ज्ञाने यथा-अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् । संग्रामे नाम्नि तोषणे च यथा-संविदा संविदं दधे भीमं संविद्धरामणीः ॥२३२॥ क्रियाकारो व्यवस्थापनं

मृष्टे सूदः सूपकारे व्यञ्जनेऽपि च सूपवत् ।
स्वेदो धर्मे स्वेदने चान्धोऽन्धकारेऽक्षिवर्जिते ॥२३४॥

यथा । संविदं लङ्घयेच्च यः । प्रतिज्ञायां यथा-विपक्षोच्छेदसंविदा । संकेते यथा-स राजलोकः कृतपूर्वसंवित् । आचारे यथा-कथं तपोवनसंविदमतिक्रान्ता तत्र भवति । संपद्वृद्धौ गुणोत्कर्षे हारे संपद्यतेऽनया संपत् स्त्रियाम् । ऋद्धौ यथा-संपदा सुस्थितंमन्यो भवति स्वल्पयापि यः । गुणोत्कर्षे यथा-अकृष्टपच्या इव सस्यसंपदः । हारो हारभेदः संपदाख्यः । स्वादुस्तु सुन्दरे मृष्टे । स्वद्यते स्वादुः "कृवा पाजि" इति उण् । गुणे क्लीबः । तद्वति वाच्यलिङ्गः । सुन्दरे यथा-कृतिस्तु रामचन्द्रस्य सर्वा स्वादुः पुरः पुरः ॥ २३३ ॥ मृष्टे रुच्ये यथा-तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि । सूदः सूपकारे व्यञ्जनेऽपि च सूपवत् । सूदते सूद्यते वा सूदः । सुन्वन्ति तेन सूपः । "युसुकुरुतुभ्यः स्वादे रूश्च" इति पः । सूपकारे यथा-आदिशत् भरतः सूदान् सूपैः सांपायनैरिव । व्यञ्जने यथा-सूदस्वादनविषूचिकार्दितः । समुद्गसूप सघृतं सतेमनम् । स्वेदो धर्मे स्वेदने च । स्विद्यतेऽनेन स्वेदनं वा स्वेदः । धर्मे प्रस्वेदे यथा-स्वेदोद्गमः किं पुरुषाङ्गनानां चक्रे पदं पत्रविशेषेषु केषु । स्वेदने क्लेदने यथा-स्वेदो देयो नवज्वरे । सात्त्विकभावेऽपि मङ्खः यथा-आत्मनैव रुरुधे कृतिनेव स्वेदसंगि वसनं जघनेन ॥ अथ धान्ताः" अन्धोऽन्धकारेऽक्षिवर्जिते । अन्धयति अन्धः अमति वा । "स्कन्धमिभ्यां धः" । अन्धकारे पुंक्लीबः । अक्षिवर्जिते वाच्यलिङ्गः । अन्धकारे यथा-अन्धो वृतेषु ककुभां वदनेषु चन्द्रः । सान्द्रैः करैर्विकिरतीव सुधाप्रवाहम् । अक्षिवर्जिते यथा-अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् । अहो बत महाकष्टं च चक्षुष्मानोपि

अर्धः खण्डेऽर्धं समांशेऽथाब्धिः सरसि सागरे ।
आधिर्मनोर्त्तौ व्यसनेऽधिष्ठाने बन्धकाशयोः ॥२३५॥
ऋद्धं समृद्धे सिद्धान्ने, गन्धः संबन्धलेशयोः ।
गन्धकामोदगर्वेषु, स्यादगाधः स्ताधलिप्सयोः ॥२३६॥

---

याचते । जलेऽपि मज्जः आदरेण धृतिं तन्वी सावबन्धान्धकेलिषु । अन्धस्य मे हृतविवेकमहाधनस्य । निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते । इत्यादिषु तु अज्ञानविच्छायित्वयोरुपचारात् ॥२३४॥ अर्धः खण्डे । ऋध्नोति अर्धः । आविष्टलिङ्गः । पुंसि । अन्ये तु असमांशे वाच्यलिङ्गमेनमाहुः । यट्टीका—खण्डमात्रवृत्ततायां त्वभिधेयलिङ्गः । यथा—तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः । अर्धं समांशे क्लीबे यथा—प्रथमं कलाभवदथार्धमथो हिमदीधिति-र्महदभूदुदितः । अथाब्धिः सरसि सागरे । आपो धीयन्तेऽस्मिन् अब्धिः "कर्मण्यधिकरणे च" इति किः पुंसि । सरसि यथा-अब्धावब्धौ न पद्मानि । सागरे यथा—अब्धेर्लङ्घित एव वानर-भटैः । आधिर्मनोर्त्तौ व्यसनेऽधिष्ठाने बन्धकाशयोः । आधीयतेऽसौ अस्मिन् वा आधिः पुंसि । मनोर्त्तौ यथा—दरिद्रः । क्षुत्पिपासाभ्यां विघ्नाधिव्याधिभिर्धनी । व्यसने यथा—आधिप्राप्तौ न यो मुह्येत् स धीरः । अधितिष्ठन्ति अस्मिन्निति अधिष्ठानम् आधारः । तत्र यथा—आधेयमाधाविव तं न्यधत्त । बन्धको यद्-धमर्णेन उत्तमर्णस्य भूम्यादि आयत्तं क्रियते । तत्र यथा—न भोक्तव्यो बलादाधिः । आशायां यथा—धनाधिना धावति जीवलोकः ॥ २३५ ॥ ऋद्धं समृद्धे सिद्धान्ने । ऋध्नोति स्म ऋद्धम् । वाच्यलिङ्गः । समृद्धे यथा—ऋद्धं हि राज्यं पदमैन्द्रमाहुः । सिद्धं सुसंपन्नम् अन्नं सिद्धान्नम् तत्र यथा—सुस्निग्धमृद्धं मधुरं

गोधा प्राणिविशेषे स्याज्ज्याघातस्य च वारणे ।
दिग्धो लिप्ते विशाक्तेषौ प्रवृद्धस्नेहयोरपि ॥ २३७ ॥

गुरुभ्यः । गन्धः संबन्धलेशयोः । गन्धकामोदगर्वेषु । गन्धयते गन्धः । संबन्धे यथा-वशानागौ सगन्धाल्पकलभानुगताविति । वशानागौ करेणुहस्तिनौ । सजातियस्तोकगजपरिवृतौ इत्यर्थः । लेशे यथा-जलदगन्धिरराजत सानुमान् । अत्र हि जलदानां गन्धोऽल्पत्वं यत्र स जलदगन्धिः "वाल्पे" इति इत् समासान्तः । गन्धके शुल्वारौ यथा-गन्धचूर्णं ततः क्षिपेत् । आमदे यथा-आमं जातिलतापुष्पगन्धान्धं मधुप च वनम् । गर्वे यथा-नान्यस्य गन्धमपि मानभृतः सहन्ते । गन्धवति द्रव्येऽपि मङ्कुः । यथा-गान्धिकैर्विपणयो विराजिताः । अत्र हि गन्धाः पण्यमेषां गान्धिकाः । स्याद् गाधः स्ताघलिप्सयोः । गाधते गाधनं वा गाधः । स्ताघे लभ्यतलस्पर्शे वाच्यलिङ्गः । तत्र यथा-कियद्गाधमगाधं वा गज पृच्छ सरः सखे । लिप्सायां यथा-गाधेन बाधां सहते न कस्कः ॥ २३६ ॥ गोधा प्राणिविशेषे स्याज्ज्याघातस्य च वारणे गुध्यते अनया गोधा भिदादित्वात्" साधुः । प्राणि-विशेषे यथा-गोधालाङ्गूलबद्धे वा क्षिप्यमाणा बलीयसा । ज्याघातवारणे यथा- शरासनाभ्यासविधौ समाप्ते क्षिप्तेव गोधामकरध्वजेन । दिग्धो लिप्ते विषाक्तेषौ प्रवृद्धस्नेहयोरपि दिह्यते स दिग्धः । विषाक्तेषौ स्नेहे च पुंसि । अन्यत्र वाच्यलिङ्गः । लिप्ते यथा-दिग्धोमृतेन च विषेण च पक्ष्मलाक्ष्याः । विषाक्ते यथा-अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवार्दितः । प्रकर्षेण वृद्धः प्रवृद्धः । स्नेहः प्रीतिः ॥ २३७ ॥ दुग्धं क्षीरे पूरिते च । दुह्यते स दुग्धम् पूरिते वाच्यलिङ्गः । क्षीरे यथा-को हि तुलामधिरोहति शुचिना दुग्धेन सहजमधुरेण । दोग्धा गोपाल-

दुग्धं क्षीरे पूरिते च, दोग्धा गोपालवत्सयोः ।
अर्थोपजीवककवौ, बन्ध आधौ च बन्धने ॥२३८॥
बन्धुर्भ्रातृबान्धवयोर्बाधा दुःखनिषेधयोः ।
बुधः सौम्ये कवौ बुद्धः, पण्डिते बुद्धिते जिने ॥२३९॥

वत्सयोः । अर्थोपजीवककवौ । दोग्धि दोग्धा तृच् । गोपाले यथा-मेरौ स्थिते दोग्धरि दोहदक्षे । वत्से यथा-दोग्धारं जिह्वया लेढि दुह्यमाना पयस्विनी । अर्थोपजीवककवौ यथा-कवयः परदोग्धारो हारयन्ति निजं यशः । बन्ध आधौ च बन्धने । बध्यतेऽनेन बन्धनं वा बन्धः । आधिर्विनिमयस्थाप्यं वस्तु तत्र यथा-बन्धेन बबन्धुः प्रमदाः स्वदेहम् । बन्धने यथा-ज्याबन्धनिष्पन्दभुजेन यस्य । रचनास्नेहवृन्तेष्वपि मङ्खः क्रमेण यथा-बन्धच्छायाविशेषेण रसोऽप्यन्यादृशो भवेत् । विभेदेनोतां प्रतितस्य बन्धः । आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् ॥२३८॥ बन्धुर्भ्रातृबान्धवयोः । बध्नाति बन्धुः "भ्रमृतृ" इत्युः । पुंसि । भ्रातरि यथा-सुग्रीवबन्धोर्वधम् । बान्धवे स्वजने यथा-सार्धं बन्धुजनैः समेत्य न चिराद्रक्षा स्वयं रावणः । बाधा दुःखनिषेधयोः । बाधनं बाधा । स्त्रीपुंसः । दुःखे यथा-बाधां विधातुमधरे हि न तावकीने पीयूषसारघटिते घटतेऽस्य शक्तिः । निषेधे यथा-त्रिवर्गमुपभुञ्जीत परस्परमबाधया बुधः । सौम्ये कवौ । बुध्यते बुधः । सौम्ये यथा-चन्द्राद्बुधः समभवद्भगवान् । कवौ विदुषि यथा-विरमत बुधा योषित्सङ्गात् प्रतिक्षणभङ्गुरात् । अमरेऽपि मङ्खः । यथा-बुबुधे न बुधोपमः । बुद्धः पण्डिते बुधिते जिने । बुध्यते स बुद्धः । कर्तरि कर्मणि वा क्तः । पण्डिते बुधितयोर्वाच्यलिङ्गः । पण्डिते यथा-स्वयंबुद्धो नमिर्नृपः । बुधिते ज्ञाते

बोधिर्बौद्धसमाधौ चार्हद्धर्माप्तौ च पिप्पले ।
मधुश्चैत्रर्तुदैत्येषु जीवाशाकमधूकयोः ॥२४०॥
मधु क्षीरे जले मद्ये, क्षौद्रे पुष्परसेऽपि च ।
मिद्धं चित्ताभिसंक्षेपे निद्रालसतयोरपि ॥२४१॥

यथा–बुद्धोयमर्थो न हि केन धीमता । जिने यथा अनेन वीतरागेण बुद्धेनेवाधरेण ते ॥ २३९ ॥ बोधिर्बौद्धसमाधौ चार्हद्धर्माप्तौ पिप्पले । बुध्यतेऽनेन बोधिः "किलिगिलि" इति इः–बौद्धसमाधौ अर्हद्धर्माप्तौ च स्त्रियाम् । पिप्पले पुंसि बौद्धसमाधौ यथा–लोके हारि च बोधिसत्वचरितम् । अत्र हि बोधेरिव सत्वमस्येति बोधिसत्वः । यद्व्याडिः–बोधेः च बोधजं ज्ञानं तन्मयो बोधिसत्वकः । अर्हद्धर्माप्तो यथा–तत्वनिश्चयरूपं तु बोधिरत्न सुदुर्लभम् । पिप्पले यथा–ववन्द्य बोधिद्रुमपल्लवानि । मधुश्चैत्रर्तुदैत्येषु जीवाशाकमधूकयोः । मन्दते मधुः "मनिजनिभ्यां धतौ च" इति उः । जीवाशाके स्त्रीलिङ्गः । शेषेषु पुंसि । चैत्रे यथा–रेजतुर्गतिवशप्रवर्तिनो । भास्करस्य मधुमाधवाविव । ऋतौ यथा-तवप्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा । दैत्ये यथा–गच्छतः स मधुकटभौ विभोर्यस्य नैन्द्र सुखविघ्नतां क्षणम् । जीवाशाको (डोडीशाकः) मधूको वृक्षभेदः ॥ २४० ॥ मधु क्षीरे जले मद्ये क्षौद्रे पुष्परसेऽपि च । मद्ये पुं क्लीबः । शेषेषु क्लीबे क्षीरे जले च यथा–गौर्धुर्भिर्धीयते मधु । मद्ये यथा-निर्ववार मधुनीन्द्रीयवर्गः । क्षौद्रे सारघे यथा–अमृतममृतं का संदेहो मधून्यपि नान्यथा । पुष्परसे यथा–मधु द्विरेफः कुसुमैकपात्रे । माधुर्येऽपि मधुः । मधुमुचो यस्य च वाचाः किल । मिद्धं चिन्ताभिसंक्षेपे निद्रालसतयोरपि । मेधते स मिद्धम् ।

मुग्धो मूढे रम्ये मेधः क्रतौ मेधा तु शेमुषी ।
राधो वैशाखमासे स्याद्, राधा विद्युद्विशाखयोः ॥२४२॥
विष्णुक्रान्तामलक्योश्च, गोपीवेध्यविशेषयोः ।
लुब्ध आकाङ्क्षिणि व्याधे, वधो हिंसकहिंसयोः॥२४३॥

पृषोदरादित्वात् । चित्ताभिसंक्षेपश्चित्तव्याक्षेपः ॥ २४१ ॥ मुग्धो मूढे रम्ये मुह्यति स्म मुग्धः । वाच्यलिङ्गः । मूढे यथा-मुग्ध-मुग्धतयैव नेतुमखिलः कालः किमारभ्यते । रम्ये यथा-त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीम् । योषित्यपि मञ्जुः । दीर्घ मुग्धाः सिचयमरुता यत्र शान्ति नयन्ति । मेधः क्रतौ । मेधते मेधः । क्रतौ यज्ञे यथा-प्रीत्याश्वमेधावभृथार्द्र-मूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः मेधा तु शेमुषी । मेधले-ऽनया "स्फेट" इत्यः । शेमुषी बुद्धिः तत्र यथा-मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया । राधो वैशाख-मासे स्याद् । राध्नाति राधः । राधी पौर्णमासी अस्येति वा "सास्य पौर्णमासी" इत्यण् यथा-राधकृष्णचतुर्दश्याम् । राधा विद्युद्विशाखयोः । विष्णुक्रान्तामलक्योश्च गोपीवेध्यविशेषयोः । विशाखायां यथा-निशां राधानुराधीयाम् ॥ २४२ ॥ विष्णुक्रान्ता गिरिकर्णी । गोपी गोपवेषविष्णुभार्या । तत्र यथा-कनककलश-स्वच्छे राधापयोधरमण्डले । वेध्यविशेषे यथा-भोजराज मया ज्ञातं राधावेधस्य कारणम् । लुब्ध आकाङ्क्षिणि व्याधे । लुभ्यति स्म लुब्धः । वाच्यलिङ्गः । आकाङ्क्षिणि यथा-व्यनीयत मत्युपदेशलुब्धैः । व्याधे यथा-तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकैः । वधो हिंसकहिंसयोः । वधे बन्धने वधने वधः हननं वा । हिंसके वाच्यलिङ्गः । तत्र यथा-मम वधको भक्षक

वधूः पत्न्यां स्नुषानार्योः, स्पृक्का शारिवयोरपि ।
नवपरिणीतायां च, व्याधो मृगयुदुष्टयोः ॥२४४॥
विद्धं सदृग्वेधितयोः क्षिप्ते विधर्द्धिमूल्ययोः ।
प्रकारे भाग्नविधिषु, विधिर्ब्रह्मविधानयोः ॥२४५॥

विना । हिंसायां यथा–करोति कंसादिमहीभृतां वधात् ॥ २४३ ॥ वधूः पत्न्यां स्नुषानार्योः स्पृक्का शारिवयोरपि । नवपरिणीतायां च । उह्यते वधूः । "वहेर्ध च" इत्यूः स्त्रियाम्। पत्न्यां यथा–विवशा कामवधूर्विबोधिता । स्नुषायां यथा–किन्तु वध्वां तवैत-स्यामदृष्टसदृशप्रजम् । नार्यां यथा । पात्रीकुर्वन् दशपुरवधूनेत्र-कौतूहलानाम् । स्पृक्का शारिकौषधी । नवपरिणीतायां यथा–वधूवरं सङ्गमयाम्बभूव । व्याधो मृगयुदुष्टयोः । विध्यति व्याधः । "श्याद्व्यध" ॥५।१।६४॥ इति णः वाच्यलिङ्गः । मृगयौ यथा–व्याधा मृगवधं कर्तुं गेयं गायन्ति सुन्दरम् । दुष्टे यथा–पश्यैते व्याधवाक्येण संकुले विश्ववत्तमाः ॥ २४४ ॥ विद्धं सदृग्वेधितयोः क्षिप्ते । विध्यति स्म विद्धम् वाच्यलिङ्गः । सदृशि यथा–विद्ध-शालभञ्जिका । वेधिते यथा–भृङ्गश्रेणीश्यामभासां समुद्गे-र्गाराचानां विद्धनीरन्ध्रदेहः। क्षिप्ते यथा–येनापविद्धसलिलस्फुट-नागसद्म । अत्र हि अपेन विद्धशब्दस्यैवार्थो द्योत्यते । शौर्य-मेव: किमिव हि न विवेक्तुं जानते हन्त विद्धाः। विधर्द्धिमूल्ययोः। प्रकारे भाग्नविधिषु । विधीयतेऽनया विधानम् वा विधा । प्रकारे स्त्रीपुंसः । ऋद्धौ यथा–उद्भासितं मङ्गलसंविधाभिः । मङ्गलर्द्धिभिरित्यर्थः । मूल्यभाग्नयोर्यथा–स्वकर्मश्रान्तोऽसौ गज इव विधार्थी सभृतकः । प्रकारे यथा–स कस्य स्तोतव्यः क-तिविधगुणः कस्य विषयः । विधिः क्रिया तत्र यथा–कल्पवित्क-

वृद्धः प्राज्ञे स्थविरे च, वृद्धं शैलेयरूढयोः ॥
वृद्धिः कलान्तरे हर्षं, वर्द्धने भेषजान्तरे ॥२४७॥
श्रद्धास्तिक्येऽभिलाषेच श्राद्धं श्रद्धासमन्विते ॥
हव्यकव्यविधाने च, शुद्धः केवलपूतयोः॥ २४८॥

ल्पयामास वन्यामेवास्य संविधाम् । विधिर्ब्रह्मविधानयोः । विधिवाक्ये च दैवे च प्रकारे कालकल्पयोः । विधत् विधाने । विधति सृजति विधिः । "नाम्युपान्त्य" ( उ० ६०९ ) इति किदिः । विधानं विधीयतेऽनेन वा विधिः । उपसर्गाद्दः किः ५।३।८७॥ पुंसि । ब्रह्मणि यथा – गायन्नपि श्रुतिसुखं विधिरेव यत्र भृङ्गः स कोऽपि धरणीधरनाभिपद्मः । विधाने यथा-अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रोऽनुकान्तिप्रदः ॥२४५॥ विधिवाक्ये विधायके वाक्ये यथा-विधिप्रयुक्तां प्रतिगृह्य सत्क्रियाम् । दैवे शुभाशुभकर्मणि यथा—विधिना कृतमर्द्धवैशसम् । प्रकारे यथा- नवनवविविधिप्राज्यैर्भोज्यैर्द्विजे न हि भुज्यते । काले यथा — हतविधिललितानां ही विचित्रो विपाकः । कल्पो विनियोगशास्त्रम् । तत्र यथा- यथाविधिहुताग्नीनाम् । विधुश्चन्द्रेऽच्युते । विध्यति विधुः । "पृकाहृषि" (उ० ७२९) इति किदुः । पुंसि । चन्द्रे यथा- विधुर्विधुन्तुदस्येव पूर्णस्त- स्योत्सवाय सः । अच्युते विष्णौ यथा- विधुर्दानवनारीणां वैधव्य- व्रतसिद्धिदः । वीरुल्लतायां विटपेऽपि च । विरोहति वीरुत् । "वीरु- न्न्यग्रोधौ" ४।१।१२१ इति साधुः । स्त्रियाम् । लतावल्ली विटपः शाखादिः द्वयोर्यथा – सर्वाशारुधिदग्धवीरुधि ॥ २४६ ॥ वृद्धः प्राज्ञे स्थविरे च । वर्द्धते स्म वृद्धः । वाच्यलिङ्गः । द्वयोर्यथा- अनुपासितवृद्धानामापदः स्युः पदे पदे । वृद्धं शैलेयरूढयोः ।

स्कन्धः प्रकाण्डे कायेंऽसे, विज्ञानादिषु पञ्चसु ॥
नृपे समूहे व्यूहे च, सन्धा स्थितिप्रतिज्ञयोः ॥२४९॥
सन्धिर्योनौ सुरगायां नाट्याऽश्लेषभेदयोः ।
साधुर्जैनमुनौ वार्धुषिके सज्जनरम्ययोः ॥२५०॥

शैलेयं शिलाजतुरूढं प्ररूढमेधितमिति यावत् । रूढे वाच्यलिङ्गः । तत्र यथा-वृद्धस्तरुर्वारिधाराम्बुवर्षैः । वृद्धिः कलान्तरे हर्षे वर्धने भेषजान्तरे । वर्द्धतेऽनया वर्द्धनं वा वृद्धिः । स्त्रियाम् । कलान्तरे यथा-न वृद्धिर्भाषितं विना । हर्षे यथा - सन्तु ते सर्ववृद्धयः । वर्द्धने यथा-दिनानि पद्मानि च वृद्धिमीयुः । भेषजान्तरे यथा-स ऋद्धिवृद्धी भुजयोर्वबन्ध ॥२४७॥ श्रद्धास्तिक्येऽभिलाषे च । श्रद्धानं श्रद्धा । "मृगयेच्छा" ५।३।१०१। इति साधुः । आस्तिक्यं तथेति प्रत्ययः ॥ अभिलाषो वाञ्छा । द्वयोर्यथा - श्रद्धेव साक्षाद्विधिनोपपन्ना । श्राद्धं श्रद्धासमन्विते । हव्यकव्यविधाने च । श्रद्धाऽस्त्यस्य श्राद्धम् 'प्रज्ञाश्रद्धा । ७।२।३३। इति णः । श्रद्धा प्रयोजनमस्येति वा " चूडादिभ्योऽण् " । ६।४।११९॥ श्रद्धासमन्विते वाच्यलिङ्गः । तत्र यथा श्राद्धः श्रोता सुधीर्वक्ता युज्येयातां यदीश तत् । हव्यं सुरेभ्यो दातव्यं पितृभ्यः कव्यमोदनम् । तद्विधाने यथा—यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शुद्धः केवलपूतयोः । शुध्यति स्म शुद्धः । वाच्यलिङ्गः । द्वयोर्यथा-सक्तवो भक्षिता राजन् शुद्धाः कुलवधूरिव ॥२४८॥ स्कन्धः प्रकाण्डे कायेंऽसे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च । स्कन्दति स्कन्धः । " स्कन्धिभ्यां धः " ( उ० २५१ ) बाहुलकाद्दलोपः । प्रकाण्डो वृक्षजङ्घा ॥ तत्र यथा-स्कन्ध सुगन्धिमतुलीनवता नगस्य । काये यथा-स्थिरस्कन्धो

योगी भवति दृढयोगैकवसतिः । अंसे भुजशिरसि यथा-व्यूढोरस्को वृषस्कन्धः विज्ञानादयो विज्ञानं वेदना संज्ञा संस्कारो रूपं चेति पञ्च तेषु यथा – सर्वकार्यशरीरेषु मुक्ताङ्गस्कन्धपञ्चकम् । नृपे यथा-प्रविवेश विशाभीशः स्कन्धावारमवारितः । अत्र हि स्कन्धं राजानमावृणोति स्कन्धावारो राजधानी । समूहे यथा—सगुणस्कन्धबन्धुरः । व्यूहे यथा—स्कन्धावारनिवासिनो यदि जना जीवन्ति तत्के मृताः । अत्र हि स्कन्धं व्यूहमावृणोति स्कन्धावारः सैन्यम् । सन्धा स्थितिप्रतिज्ञयोः । सन्धानं सन्धा स्थितिर्मर्यादा । प्रतिज्ञा संश्रवः द्वयोर्यथा—दधार सन्धामिव सत्यसन्धः । सन्धारणेऽपि ॥२४९॥ सन्धिर्योनौ सुरङ्गायां नाट्याङ्गे श्लेषभेदयोः । सन्धीयते सन्धानं वा सन्धिः । उपसर्गादेः किः ५।३।८७। पुंसि । योनौ भगे सुरङ्गायां च यथा – सन्धिं भित्वाऽविशच्चौरश्छिद्रान्वेषी स लिङ्गवत् । नाट्याङ्गे यथा—पञ्चसन्धिचतुर्वृत्तिचतुःषष्ट्यङ्गसंयुतम् । श्लेषे यथा स्रस्ताङ्गसन्धौ विगताक्षपाटवे रुजानि कामं विकलीकृते रथे । सन्धानसंहिता गुणविशेषा अपि श्लेषभेदा एव । सन्धाने यथा-सख्यः किं करवाणि यान्ति शतशो यत्कञ्चुके सन्धयः । संहिता गुणविशेषयोर्यथा—मा स्म सन्धिं विजानन्तु मा स्म जानन्तु विग्रहम् । आख्यातं यदि शृण्वन्ति भूपास्तेनैव पण्डिताः । भेदे विश्लेषे यथा-पाषाणसन्धिं विदधे जलौघः । साधुर्जैनमुनौ वार्धुषिके सज्जनरम्ययोः । साध्नोति साधुः । कृवापाजि (उणादि १ ) इति-उण् । वाच्यलिङ्गः । जैनमुनौ यथा—जिनो देवः कृपा धर्मो गुरवो यत्र साधवः । वार्द्धुषिके वृद्धजीविनि यथा – सम्पन्नो वार्त्तया साधुः । सज्जने यथा-तत्साधवो न न विदन्ति विदन्ति किन्तु । रम्ये यथा—साध्वी सदा सदाचारसज्जसज्जनसेविता । रम्यवत् । युक्तेऽपि यथा – साधु वाले

सिद्धो व्याडयाडिके देवयोनौ निष्पन्नमुक्तयोः ॥
नित्ये प्रसिद्धे सिद्धिस्तु मोक्षे निष्पत्तियोगयोः ।२५१।
सिन्धुर्नद्यां गजमदेऽब्धौ देशनद्भेदयोः ॥
सुधा गङ्गेष्टिकास्नुह्योर्मूर्वालेपामृतेषु च ॥२५२॥

बहिर्दूरमकारि कुचमण्डलम् ॥२५०॥ सिद्धो व्याडयादिके देवयोनौ निष्पन्नमुक्तयोः । नित्ये प्रसिद्धे । सिध्यति स्म सिद्धः । निष्पन्न-नित्यप्रसिद्धेषु वाच्यलिङ्गः । व्याडयादिके यथा-अवाप्ताष्ट-गुणैश्वर्यः सिद्धः सद्भिरुदाहृतः । देवयोनौ यथा-गृङ्गाणि यस्यातपयन्ति सिद्धाः । निष्पन्ने यथा-असिद्धार्थानेव किंचदपि सदेवासुरनरे । मुक्ते यथा सर्वजगद्वन्दनीयान् सिद्धाँल्लोकाग्र-संस्थितान् नित्ये यथा-आकाशमेके निगदन्ति सिद्धम् । प्रसिद्धे यथा – काम्पिल्यांसद्धः सधुनीतटस्थः । सिद्धिस्तु मोक्षे निष्पत्तियोगयोः । सिध्यत्यस्यां सेधनं वा सिध्धिः । स्त्रियाम् मोक्षे यथा-सिद्धिं प्रयच्छन्तु नः । निष्पत्तौ यथा-अध्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् । योगे यथा-वज्रं सिध्धिर्व्यतीपातः ॥२५१॥ सिन्धुर्नद्यां गजमदेऽब्धौ देशनद्-भेदयोः । स्यन्दते सिन्धुः । स्यन्दिसृजिभ्यां सिन्धुरजौ च ( ७१७ ) इति-उः । नद्यामब्धौ च स्त्रीपुंसः । अन्यत्र पुंसि । नद्यां नदीमात्रे नदी विशेषे च यथा-मार्गाचलव्यतिकरा-कुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ । वेणीभूतप्रतनुसलिला तावती तस्य सिन्धुः । गजमदे यथा-दानाद्धुरैः सिन्धुरैः । अत्र हि सिन्धुर्मदो विद्यते येषां ते सिन्धुराः । मध्वादित्वाद् (७।२।२६) रः । अब्धौ यथा-अहो विततमूर्जितं भरसहं च सिन्धोर्वपुः । देशभेदे यथा-योषितः

अन्नं भक्तेऽशितेऽर्वाश्वेऽधमेऽध्वा कालवर्त्मनोः ॥
संस्थाने सास्रवस्कन्धेऽर्थिनौ याचकसेवकौ ॥२५३॥

सिन्धुदेशीया याश्चाभीरकुलोद्भवाः । नदभेदे यथा-सिन्धोस्तटा-घोघ इव प्रवृद्धः । सुधा गङ्गेष्टिकास्नुह्योर्मूर्वालेपामृतेषु च । सुष्ठु दधति धयन्ति वा एतां सुधा । गङ्गेष्टिका वृक्षभेदः । स्नुही वज्रतरुः । मूर्वा ज्याहेतुस्तृणविशेषः । लिप्यतेऽनेन लेपः । मक्कोलादिः । तत्र यथा-कालान्तरश्यामसुधेषुमक्तमितस्तोरूढ-तृणाङ्कुरेषु । अमृते यथा – तवेत् स्मितं का सुधा ॥२५२॥ । अथ नान्ताः । अन्नं भक्तेऽशिते । अनित्यनेन अन्नम् । ध्याधापन्यनि [ उ० २५८ ] इति नः । अद्यते स्म वेति । क्तं अद्दो नन्नाविति निर्देशात् । जग्धाभावः भक्ते यथा – आज्य-प्राज्यवराम्नकूर[भक्त]कवलैर्मन्दां विधाय क्षुधाम् । अशिते भोजने यथा-कृतान्नः किं चरेत्पुनः ।अर्वाश्वेऽधमे- । इयर्ति अर्वा । [स्ना] मदि [ उणादि ९०४ ) इति वन् । अधमे वाच्यलिङ्गः द्वयोर्यथा-अपि संयोजितार्वाणमनर्वाणं महारथम् । अध्वा काल-वर्त्मनोः । संस्थाने शास्रवस्कन्धे । अतन्ति अनेन अस्मिन्वा अध्वा " अतेर्धवेति वन्-" पुंसि । कालस्तुत्यादिः । वर्त्म मार्गः। संस्थानश्च तुष्यथम् आश्रवः कर्मबन्धहेतुः क्रिया हिंसादिः तेन सह वर्तते यः स्कन्धः शरीरभावापन्नो रूपरसादिसमूहः स सास्रवस्कन्धः । वर्त्मनि यथा - अध्वा जरा मनुष्याणाम् । अर्थिनौ याचकसेवकौ अर्थोऽस्यास्तीति अर्थी । अर्थाऽर्थाऽन्ता-द्भावात् ॥७।२।८ इति इन् । अर्थयति वा । वाच्यलिङ्गः । द्वयो-र्यथा-तत्सर्वं कृतपाषाणक्षम्यतामर्थिनो वयम् । ॥२५३॥ आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे । परमात्मनि जीवेऽर्के हुता-शनसमीरयोः स्वभावे । अतति आत्मा । सोत्मक्षात्मन् [उ०९१६]

आत्मा चित्ते धृतौ यत्ने, धिषणायां कलेवरे ॥
परमात्मनि जीवेऽर्के हुताशनसमीरयोः ॥२५४॥
स्वभावेऽथेन ईशेऽर्केऽथोन्नं क्लिन्ने दयापरे ॥
ऊष्माणस्तु निदाघोष्णग्रीष्माः शषसहा अपि ॥२५५॥

इति साधुः । पुंसि । एकादशस्वर्थेषु । चित्ते यथा – तदपि न हरिणाक्षी विसरत्यन्तरात्मा । धृतौ संतोषे यथा-अवष्टभ्यात्मनात्मानं संसारं त्यक्तुमर्हसि । यत्ने यथा-तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा । धिषणायां बुद्धौ यथा-जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः । कलेवरे परमात्मनि च यथा-यमक्षरं वेदविदुस्तमात्मानमात्मन्यवलोकयन्तम् । जीवे यथा-अयमात्मेव संसारः कषायेन्द्रियनिर्जितः । अर्के हुताशने समीरे च यथा – वर्तते जगदात्मना । स्वभावे यथा-न सन्ति याथात्म्यविदः पिनाकिनः ॥२५४॥ अथेन ईशेऽर्के । एति इनः । जीणशीदी (उ०२६१) इति कित् नः ईशे वाच्यलिङ्गः । तत्र यथा – ननमहीनमहीनपराक्रमम् । अर्के यथा-यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपसि नः । अथोन्नं क्लिन्ने दयापरे । उन्दैप् क्लेदने क्ते उन्नम् । वाच्यलिङ्गः । क्लिन्ने यथा-समुन्नमद्भिर्न समुन्नमद्भिः । ऊष्माणस्तु निदाघोष्णग्रीष्माः शषसहा अपि ऊषति ऊष्मा । मन् । चतुर्ष्वर्थेषु पुंसि । निदाघः स्वेदाम्बु तत्र यथा – निपीताध्वश्रमोष्मभिः । उष्णे यथा-स्मृतसयौवनसोष्मपयोधरान् सतुहिनस्तुहिनस्तु वियोगिनः । ग्रीष्मे यथा सूक्ष्माण्युष्माणि वस्त्राणि श्रीखण्डं मौक्तिकस्रजः । शषसहेषु यथा-कस्यापि न भवन्ति स्वा ऊष्माण इव योषितः । ॥ २५५ ॥
कर्मकारकभेदे स्यात्क्रियायाश्च शुभाशुभे । क्रियते तदिति

कर्म कारकभेदे स्यात्क्रियायां च शुभाशुभे ।
कामी स्यात्कमने चक्रवाके पारावतेऽपि च ॥२५६॥
कृती योग्ये बुधे खड्गी गण्डके खड्गधारिणि ॥
ग्रावाश्मनि गिरौ गोमी फेरौ गोमत्युपासके ॥२५७॥

करणं वा कर्म मन् ५।१।१४७ इति मन् । पुंक्लीबः । कारकभेदे यथा–दुहादेर्गौणकं कर्म नीवह्यादेः प्रधानकम् । क्रियायां यथा–कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भकर्मणि । शुभाशुभे यथा–नमस्तु कर्मभ्यो विधरपि न येभ्यः प्रभवति । कामी स्यात्कमने चक्रवाके पारावतेऽपि च । कामोऽस्यास्तीति कामी कमनः कामुकः । तत्र वाच्यलिङ्गः । यथा-कामिनां मण्डनत्वं श्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन ॥ २५६ ॥ कृती योग्ये बुधे । कृतमस्त्यस्य कृती । वाच्यलिङ्गः । योग्ये यथा–वय तत्त्वान्वेषान्मधुकरहतास्त्वं खलु कृती । बुधे यथा – जडानप्यनु-लोमार्थान् प्रवाचः कृतिनां गिरः । कृतकृत्येऽपि । यस्य चेतसि वर्त्तेथाः । स तावत् कृतिनां वरः । खड्गी गण्डके खड्गधारिणि । खड्गः शृङ्गमसिर्वा अस्त्यस्य खड्गी । खड्गधारिणि वाच्यलिङ्गः । द्वयोर्यथा – द्वारं खड्गिभिरावृतं बहिरपि प्रक्लिन्नगण्डैर्गजैः । ग्रावाश्मनि गिरौ–। गृह्यते ग्रावा । ग्रहेराच [ उ० ९०५ ] इति वन् । पुंसि । अश्मनि यथा – ग्रावाणासि गिरेः क्षता । गिरौ यथा–कूर्मराज भुजगाधिप गोत्रग्रावदिक्करभिरेकधुरीणः । गोमी फेरौ गोमत्युपासके गौर्गावो वचांसि गोधनं चाऽस्त्यस्य गोमी । गोरिति मन् गोमति उपासके च वाच्यलिङ्गः । फेरौ शृगाले यथा-क्रमेण जाह्नवीं याति यामिन्यां गोमिनां रुतम् ।

घनः सान्द्रे दृढे दाढ्र्ये विस्तारे मुद्गरेऽम्बुदे ॥
सङ्घे मुस्ते घनं मध्यनृत्तवाद्यप्रकारयोः ॥२५८॥

गोमति यथा-तन्कातनं जलं कश्चिन्मिनोति गोमिनो गृहे। उपासको बौद्धभक्तस्तत्र यथा- न चन्द्रगोमी सुगतं निहन्ति ॥ ॥२५७॥ घनः सान्द्रे दृढे दाढर्चे विस्तारे मुद्गरेऽम्बुदे । सङ्घे मुस्ते । हन्यते घनः मूर्तिनिचिताभ्रे घनः ।५।३।३७। इति साधुः। सान्द्रं निबिडं दृढं कठिनं तयोर्वाच्यलिङ्गा शेषेषु पुंसि। सान्द्राम्बुदयोर्यथा-उपरि घनं घनपटलम्। दृढे यथा-बलाद्घन-स्तनतटसर्वलितानि मन्दम्। दाढर्चे काठिन्ये विस्तारे सङ्घे च यथा - पितुर्जवादश्रवनाद्विपापः बहुत्वमपि विस्तारविशेष एव। तत्र यथा-कंकतकदन्तका इव लब्धप्रसरास्ततोऽनुघनाः। मुद्गरे लोहमुद्गरे यथा-अपतत्सघनैरिवाहतः। मुस्तमौषधं तत्र मेघनामत्वात् घनः यथा - घनपर्पटकोशीरम्। घनं मध्य-नृत्तवाद्यप्रकारयोः। मध्यनृत्ते यथा-विलम्बितं द्रुतं तत्वमोघो घनं क्रमात्। वाद्यप्रकारे यथा-कांस्यतालादिकं घनम् ॥२५८॥ चर्म त्वचि स्फुरे। चरन्त्यनेन चर्म। मन् ।५।१।१४७ इति मन्। क्लीबे। त्वचि यथा-चकासतं चारु चमूरु चर्मणा। स्फुरे फलके यथा प्राप्यासह्यां वेदनामस्तधैर्याद्भ्यभ्रश्यच्चर्म वान्यस्य पाणौ। चर्मी भूर्जे फलकीभृङ्गिणोः। चर्म त्वक् फलकं वाऽस्त्यस्य चर्मी। शिखादित्वादिन्। फलकिनि वाच्यलिङ्गः। भृङ्गी भृङ्गिरिटिः सर्वेष्वेषु यथा-कैलासशृंगमिव चर्मिवृतं वलन्ते। चक्री कोके कुलालेऽहौ वैकुण्ठे चक्रवर्तिनि। चक्रमस्यास्तीति चक्री। कोके यथा-चक्रो क्षिपासु विरहे खलु चक्रवाक्याः। कुलाले वैकुण्ठे च यथा-अर्गलया कः कपाटे प्रहरति कुटिलो माधवः

चर्म त्वचि स्फुरे चर्मी, भूर्जे फलकिभृङ्गिणोः ॥
चक्री कोके कुलालेऽहौ वैकुण्ठे चक्रवर्तिनि ॥२५९॥
चिन्हमङ्के पताकायां, चीनो देशैणतन्तुषु ॥
व्रीहौ वस्त्रे छद्मशाठ्येऽपदेशे घातिकर्मणि ॥२६०॥
छन्नं रहश्छादितयोश्छिन्ना स्यादमृतेत्वरी ।
छिन्नं भिन्ने जनो लोके जगद्भेदे पृथग्जने ॥२६१॥

किं वसन्तो । नाहं चक्री कुलालो नहि धरणिधरः किं फणीन्द्रो द्विजिह्वः । अहौ यथा—पदास्पृशन्तं सहते न चक्री । चक्रवर्तिनि यथा—विजिग्ये भरतश्चक्री राजचक्रं रणाङ्गणे। तैलिकरथयोरपि मंखः । क्रमेण यथा—दशशूनासमश्चक्री । वेगात्येतुश्चक्रिणो वक्रिताश्वाः॥२५९॥ चिन्हमङ्के पताकायाम्—चह कल्कने। दिननग्न (उ० २६८) इति निपातनात् चिन्हम् । अङ्के यथा—करजदशन-चिन्हं नैशमङ्गेऽन्यनारीजनितमिति । पताकायां यथा उच्च-चिन्हमुरसद्मगोचरः । चीनो देशैणतन्तुषु । व्रीहौ वस्त्रे । चीयते चीनः । दिननग्न (उ० २६८) इति साधुः । सर्वेषु यथा—चीनाश्चीनं समश्नन्ति चीनांशुकसुकोमलाः । छद्मशाठ्येऽपदेशे घातिकर्मणि । छाद्यते छद्म मन् क्लीबः । छदेरिस्मन् । ४।२।३३। इति ह्रस्वत्वम् । शाठ्ये कैतवे यथा—दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः । अपदेशे व्याजे यथा—जगाद वदनच्छद्मपद्मपर्यन्तपातिनः । घातिकर्मणि यथा—छद्मस्था न वदन्ति किञ्चन जिनाः । अत्र हि छद्मानि घातिकर्माणि ज्ञानावरणीयादीनि तिष्ठन्ति—अत्रेति छद्मस्थः ॥ २६० ॥ छन्नं रहश्छादितयोः—छाद्यते स्म छन्नम् । णौदान्तशान्त ४।४।७४। इति साधुः । छादिते वाच्यलिङ्गः । रहसि यथा—अथ प्रच्छन्न-पापानां शास्ता वैवस्वतो यमः । छादिते यथा—छन्नोपान्तः

**जनी स्नुषावनितयोर्जिनोऽर्हद्बुद्धविष्णुषु ॥**
**ज्योत्स्ना स्याज्ज्योतिः संयुक्तनिशिचन्द्रातपेऽपि च ॥२६२॥**
**ज्यौत्स्नी पटोली ज्योत्स्नावन्निशोस्तनुर्वपुस्त्वचोः ॥**
**विरलेऽल्पे कृशे दण्डी, यमे द्वाःस्थसदण्डयोः ॥२६३॥**

परिणतफलश्योतिभिः काननाम्रैः । छिन्नास्यादमृतेत्वरी । छिद्यते स्म छिन्ना । अमृता गुडूची । इत्वरी असती । छिन्नं भिन्ने । वाच्यलिङ्गः । यथा–सच्छिन्नबन्धद्रुतयुग्मशून्यम् । जनो लोके-जगद्भेदे पृथग्जने । जायते जनः । लोके यथा–दुर्वृत्तेऽप्यकुलीनेऽपि जनो दातारि रज्यते । जगद्भेदो भूर्लोकादि सप्तलोकी मध्ये जग्लोकाख्यं जगत् । पृथग्जने यथा–ननाटयज्जनरञ्जकम् ॥२६१॥ जनी स्नुषा वनितयोः गौरादित्वाद्ङीः । २।४।१९। द्वयोर्यथा–यातेति जन्या न वदत्कुमारी । अत्र हि जनीं वहन्ति जन्याः । जिनोऽर्हद्बुद्धविष्णुषु । जयति जिनः जीण्शीदी–(उ० २६१) इति कित् नः । अर्हति यथा–दशमद्वाररोधेन केशानां सागसामिव । यः समुन्मूलनं चक्रे स वीरः पातु वो जिनः । बुद्धे यथा–सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः । विष्णौ यथा–जिग्ये दैत्यजनो जिनेन । ज्योत्स्ना स्याज्ज्योतिः संयुक्तनिशिचन्द्रातपेऽपि च । ज्योतींषि सन्त्यस्यां ज्योत्स्ना । तमिस्राऽर्णवज्योत्स्नाः ।७।२।५२। इति साधुः । ज्योतींषि नक्षत्राणि तत्संयुक्ता निशा निरभ्रेत्यर्थः । तत्र यथा–ज्योत्स्नासु कृत्स्नानि विभान्ति भानि । चन्द्रातपे चन्द्रप्रभायां यथा–नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥२६२॥ ज्यौत्स्नी पटोली ज्योत्स्नावन्निशोः । ज्योत्स्नाऽस्त्यस्यां ज्यौत्स्नी । ज्योत्स्नादिभ्योऽण् ।७।२।३४। इति अण् । पटोली ओषधिः । ज्योत्स्नावन्निशि यथा–भूयस्तराणि यदमूनि तमस्विनीषु ज्यौत्स्नीषु च प्रविरलानि

**दानं मतङ्गजमदे, रक्षणच्छेदशुद्धिषु ॥**
**विश्राणनेऽप्यथ द्युम्नं द्रविणवद्धनौजसोः ॥२६४॥**

ततः प्रतीमः। तनुर्वपुस्त्वचोः। विरलेऽल्पे कृशे। तन्यते तनुः। भृमृत्दृत्सरीत्युः (उ० २१६) वपुस्त्वचोस्त्रियाम्। शेषेषु वाच्यलिङ्गः। वपुषि यथा—तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः। त्वचि यथा—तरुतनुभिः कृतवस्त्रसंहतिः। विरले यथा—रराज तन्वी नवरोमराजिः। अल्पे यथा—सुहृदपि न याच्यस्तनुधनः। कृशे यथा—तन्वङ्गी निरपायमध्वनि मुहुः श्रोणीभरं निन्दति। दण्डी यमे द्वाःस्थसदण्डयोः। दण्डोऽस्यास्ति दण्डी। सदण्डे वाच्यलिङ्गः। यमे यथा—दण्डं दण्डीव भूतेषु धारयन् धरणीपतिः। द्वाःस्थे यथा—नन्दिना हरदण्डिना। सदण्डे यथा—व्याप्तं शाक्तीकयाष्टीकैः खड्गिभिर्दण्डिभिर्नृभिः। ॥२६३॥ दानं मतङ्गजमदे रक्षणच्छेदशुद्धिषु। विश्राणनेऽपि। देङ् पालने। दौंच् छेदने। दैंच् शोधने। डुदांक् दाने वा। अनटि दानम्। मतङ्गजमदे यथा—कटस्थलप्रोषितदानवारिभिः। रक्षणे यथा—भूमण्डलदानशक्ताः। छेदे विश्राणने च यथा गोत्राणां शतकोटिदाननिरतः। शुद्धौ यथा—कृशानुयोगात्कनकस्य दानम्। लवनेऽपि यथा—नामूलं बर्हिषो दानं कुर्यात्पित्र्येषु कर्मसु। अथ द्युम्नं द्रविणवद्धनौजसोः। दिविमीयते द्युम्नम्। द्युसुनिभ्यो माङोडित् इति डित् नः। द्रवति द्रविणम्। द्रुहृवृहि (उ० ८८४) इति इणः। द्युम्नद्रविणशब्दौ प्रत्येकं धनौजसोर्वर्तेते—इत्यर्थः। द्युम्नशब्दोरूपेऽपि मंखः। त्रिष्वपि यथा—प्रद्युम्नः प्रद्युम्नो विरूपकः खलु विरूपको नियतम्। द्रविणशब्दो धनौजसोः। क्रमेण यथा—द्रविणमापदि भूषणमुत्सवे। उपोढ-

**धनं वित्ते गोधने च स्याद्धन्वस्थलचापयोः ।**
**धन्वामरौ धन्वी पार्थे छेके ककुभचापिनोः ॥२६५॥**
**धनुः [1]शब्दः पियालद्रौ राशिभेदे धनुष्यपि ।**
**[2]धामरश्मौ गृहे देहे, स्थाने जन्मप्रभावयोः ॥२६६॥**

बाहुद्रविणः शशास ॥२६४॥ धनं वित्ते गोधने च–धनति धनम् । पुंक्लीबः । वित्ते यथा–यदि भवति धनेन धनी । गोधने यथा–धनमचारयत् केशवः । स्याद्धन्वस्थलचापयोः । धवु गतौ । धन्वति धन्व । उक्षि तक्षि (उ० ९००) इति अन् । क्लीबे स्थले यथा–नीलेषु धन्वसु लुठन्ति नदन्ति दान्ताः । चापे यथा–धुन्वन् धन्व विघट्टयञ्‍शितशरैर्दानोद्धुरान् सिन्धुरान् । धन्वामरौ–पुंसि यथा–धन्वनि तृषितः पुरुषो रश्मिषु तोयाशया पतति । धन्वी पार्थे छेके ककुभचापिनोः । धन्व अस्यास्तीति धन्वी । शिखादित्वादिन् । ७।२।४। छेके चापिनि च वाच्यलिङ्गः । तयोः पार्थे च यथा–धुन्वन्ति धन्विनो गावः शिरः कस्य न हृद्गताः । ककुभोऽर्जुनवृक्षः ॥२६५॥ धनुः शब्दः पियालद्रौ राशिभेदे धनुष्यपि । धनति धनुः । भृमृन्दृत्सरि (उ० ७१६) इति उः । धनुषि क्लीबे । अन्यत्र पुंसि । पियालद्रू राजादनः । राशिभेदे यथा–स चक्राम धनौ शनिः । धनुषि यथा–धनुमतां ननु बिभ्यति के न वा । धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः । धीयते दधाति वा धाम । मन् । क्लीबे । रश्मौ यथा–उदयति विततोद्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् । गृहे यथा–यस्यां कपोलैः कलधौत-धामस्तम्भेषु भेजे नवदर्पणश्रीः । देहजन्मप्रभावेषु यथा–आत्मा

१ प्र० शब्दे । २ प्र० धामन् ।

**धाना भृष्टयवेऽङ्कुरे धन्याके चूर्णसक्तुषु ॥**
**धेनः समुद्रे धेनी तु नद्यां [1]नग्नो विवाससि ॥२६७॥**
**मागधे क्षपणके च, नन्दी गिरिशवेत्रिणि ॥**
**गर्दभाण्डे वटे न्यूनं हीनवच्चोनगर्ह्ययोः ॥२६८॥**

---

धामनिधेर्धाम हित्वा याति क्षणान्तरात् । स्थाने यथा—ध्वजाग्रधामा ददृशेऽथ शौरिः ॥२६६॥ धानाभृष्टयवेऽङ्कूरे धन्याके चूर्णसक्तुषु । धीयते धाना । प्याधापनीतिनः (उ० २५८) स्त्रियाम् भृष्टयवे चूर्णसक्तुषु च यथा—देहि मे गुडधानाकाः । अङ्कुरे यथा—नहि सर्षपबीजं सर्षपाङ्कुरमिव जनयति न्यग्रोधधानाम् । धन्याकं कुस्तुंबुरु । धेनः समुद्रे । दधाति धेनः । दिन नग्न (उ० २६८) इति साधुः । धेनी तु नद्याम् । गौरादित्वाद् ङीः (गौरादिभ्यः २।४।१९) नग्नो विवाससि । मागधे क्षपणके च । न वस्ते नग्नः । दिन नग्न (उ० २६८) इति साधुः । न विद्यन्ते नग्नः । श्रियं छन्दांसि वा यस्येति वा नखादित्वात्साधुः (नखादयः ३।२।१२८) विवाससि वाच्यलिङ्गः । तत्र यथा—मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे ॥२६७॥ मागधे यथा—यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो । क्षपणके यथा—नग्नः कमण्डलुकरः । नन्दी गिरिशवेत्रिणि । गर्दभाण्डे वटे । नन्दति नन्दी । ग्रहादित्वाद् णिनिः (ग्रहादिभ्यो णिन् ५।१।५३) पुंसि । गिरिशवेत्रिणि यथा—लतागृहद्वारगतोऽथ नन्दी । गर्दभाण्डो वटश्च वृक्षविशेषः । न्यूनं हीनवच्चोनगर्ह्ययोः । ऊनण् परिहाणे निपूर्वादचि न्यूनम् । हीयतेस्म हीनम् । सूयत्यादिति त्तस्य नत्वम् । वाच्यलिङ्गौ । द्वयोर्यथा—सूनुरन्यूनवैभवः । नन-

---

१ मु० नद्यां स्याद्धारतीभिदि । धेनुर्गोमात्रके दोग्ध्यां गवि नग्नो०

**पर्व प्रस्तावोत्सवयोर्ग्रन्थौ विषुवदादिषु ॥**
**दर्शप्रतिपत्सन्धौ च तिथिग्रन्थविशेषयोः ॥२६९॥**
**पक्ष्माऽक्षिलोम्नि तन्त्वादिसूक्ष्मांशे कुसुमच्छदे ।**
**गरुत्किञ्जल्कयोश्चापि पत्री काण्डे खगे द्रुमे ॥२७०॥**

---

महीनमहीनपराक्रमम् ॥२६८॥ पर्व प्रस्तावोत्सवयोर्ग्रन्थौ विषुवदादिषु । दर्शप्रतिपत्सन्धौ च तिथिग्रन्थदिशेषयोः । पृणाति पर्व स्थामदि (उ० ९०४) इति वन् । क्लीबे । प्रस्तावे यथा—अपर्वणि मुण्डितं शिरः । उत्सवे यथा—विलोक्य कान्तागमपर्व सर्वतो विलम्बिता दिक्षु कटाक्षमालिका । ग्रन्थौ यथा—सावक्रनखधारिण्या वेणुकर्कशपर्वया । विषुवदादिषु यथा—तुला संक्रमपर्वणि । दर्शप्रतिपत्सन्धौ यथा—पर्वात्यये सोम इवोष्णदीधितिः । तिथिविशेषोऽष्टमीपूर्णिमादिः । निजकरनिकर समृद्धया धवलय भुवनानि पार्वणशशाङ्क । ग्रन्थविशेषे यथा—महाभारतस्यादिपर्व ॥२६९॥ पक्ष्माऽक्षिलोम्नि तन्त्वादिसूक्ष्मांशे कुसुमच्छदे । गरुत्किञ्जल्कयोश्चापि । पच्यते पक्ष्म । सात्मन्नात्मन (उ० ९१६) इति साधुः । अक्षिलोम्नि तन्त्वादि सूक्ष्मांशे च पुंक्लीबः । शेषेषु क्लीबः । अक्षिलोम्नि यथा—स्थिताः क्षणं पक्ष्मसुताडिताधराः । तन्त्वादिसूक्ष्मांश इति—आदिशब्दाल्लोमादिग्रहः । यथा—निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा । कुसुमच्छदे पुष्पपत्रे यथा—कुसुमपक्ष्मभिरङ्कितमेकतः । गरुति पक्षे यथा—लक्ष्मीपतिं वीक्ष्य सुवर्णपक्ष्मा । किञ्जल्के केसरे यथा—कुसुमैश्चलसूक्ष्मपक्ष्मभिः कुसुमेषोरिव सायकैरियम् । पत्री काण्डे खगे द्रुमे । रथेऽद्रौ रथिके श्येने । पत्रं पिच्छं दलं पक्षो वाहनं वाऽस्त्यस्य पत्री पुंसि । काण्डे यथा—तेनाभिघातरभसस्पवि-

**रथेऽङ्घ्रौ रथिके श्येने, प्रेम तु स्नेहनर्मणोः ।**
**ब्रह्म तु तपसि ज्ञाने, वेदेऽध्यात्मे द्विजे विधौ ॥२७१॥**
**ऋत्विग्योगभिदोश्चाथ बुध्नो गिरिशमूलयोः ।**
**भर्म भारे भृतौ हेम्नि, भानुरंशौ रवौ दिने ॥२७२॥**

कृष्यपत्री वन्यस्य नेत्रविवरे माहिषस्य मुक्तः। खगे यथा–इतोऽपि शरणागताः शिखरि पत्रिणः शेरते। शेषेषु यथा–सपत्रिभिः क्रीडति राजपुत्रः ॥२७०॥ प्रेम तु स्नेहनर्मणोः। प्रीणाति प्रेम। मन् (उ० ९११) इति मन्। प्रियस्य भावो वा पृथ्वादित्वादिमनि प्रियस्थिरिति प्रादेशः। पुंक्लीबः। स्नेहे यथा–प्रेम पश्यति भयान्यपदेऽपि। नर्मणि यथा–विधत्ते मत्तेयं निधुवनविधौ प्रेमकलहम्। ब्रह्म तु तपसि ज्ञाने वेदेऽध्यात्मे द्विजे विधौ। ऋत्विग्योगभिदोश्चाथ बृंहति ब्रह्म बृंहेर्नोऽच्च (उ० ९१३) इति मन्। पुंक्लीबः। तपसि यथा–ब्रह्माङ्गभूर्ब्रह्मनियोजितात्मा। ज्ञाने यथा–समीभूतादृष्टिस्त्रिभुवनमपि ब्रह्म मनुते। वेदे यथा – यत्र त्वं ब्रह्म मीमांसा तत्वज्ञो दण्डधारकः। अध्यात्मे यथा–तृणं ब्रह्मविदः स्वर्गः। द्विजे यथा–ब्रह्मघ्ने च सुरापे च वा स्तेने च गुरुतल्पगे। विधौ यथा–ब्रह्माऽप्यन्तं न गच्छति ॥२७१॥ ऋत्विग् भेदे यथा–यजन्ति ब्रह्माणः। योगभेदे यथा–ब्रह्मा ऐन्द्रोऽथ वैधृतिः। तत्वेऽपि मंखः। यथा–ब्रह्मज्ञानाभ्यसनविधिना योगनिद्रांगतस्य। बुध्नो गिरिशमूलयोः। बुध्यते बुध्नः। जीण्शी (उ० २६१) इति कित् नः। गिरिशे यथा–अहये (शेषाय) बुध्नाय नमो नमोऽस्तु गणपतये। मूले यथा–बुध्नेन बुध्नाति बलिष्टतां तरुः। भर्म भारे भृतौ हेम्नि–भरणं

**भिन्नोऽन्यः संगतः फुल्लो दीर्णो भोगी भुजङ्गमे ।।**
**वैयावृत्यकरे राज्ञि गामण्यां नापितेऽपि च ।।२७३।।**
**मानं प्रमाणे प्रस्थादौ, मानश्चित्तोन्नतौ ग्रहे ।।**
**मीनो मत्स्ये राशिभेदे, *मृत्स्ना मृत्सा तुवर्यपि ।।२७४।।**

भ्रियतेऽनेन वा भर्म। मन् (उ० १११) इति मन्। क्लीबे। भारे यथा—त्रस्तस्य वर्म भर्मणे। भृतौ यथा—कर्मणो भवति भर्म सर्वथा। हेम्नि यथा—भाति भर्म परिकर्मकर्मणा। भानुरंशौ रवौ दिने। भाति भानुः। दाभाभ्यां नुः (उ०७८६) पुंसि। अंशौ रवौ च यथा—जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तु समभावि भानुना। दिने यथा—कृशानोर्न प्रभा भानौ भानोरत्युदये सति ।।२७२।। भिन्नोऽन्यः संगतः फुल्लोदीर्णः भिद्यते स्म भिन्नः। वाच्यलिङ्गः। अन्यस्मिन् पृथग्भूते यथा—शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः। संगते यथा—व्रीडा वक्रितकण्ठनालमवलाकैः कैर्न भिन्ना रसैः। फुल्ले यथा—संसृज्यते सरसिजैररुणांशुभिन्नैः। दीर्णे विदारिते यथा—भिन्न शंख वलयं परिणेत्रा पर्यरम्भि रभसादचिरोढा। भोगी भुजङ्गमे। वैयावृत्यकरे राज्ञि ग्रामण्यां नापितेऽपि च। भोगोऽहिकायोऽस्त्यस्य भोगी। भुङ्क्ते—इत्येवंशीलो वा युजभुज ५-२-५० इति घिनण्। पुंसि। भुजङ्गमे यथा—यस्याबाधितबद्धनीडचटकाश्रङ्कुः स्थितिं भोगिनः। वैयावृत्यकरः परिचारकः। व्यवहारिक इत्यन्ये तत्र यथा—पुष्पैर्गन्धसमुद्धरैर्विदधते देवार्चनं भोगिनः। राज्ञि यथा—किं तेनैव सहस्वयंनृदलशो याताःस्थ भो भोगिनः। ग्रामणीः प्रधानं पुण्यवानिति यावत्। तत्र वाच्यलिङ्गः। तत्र

*मु० मू० वाचंयमेऽर्हति, प्रियालाऽस्तिः पालाशो मत्स्ना०।

**यानं युग्ये गतौ योनिः, कारणे भगताम्रयोः ॥**
**रत्नं स्वजातिश्रेष्ठे स्यान्मणौ राजा तु पार्थिवे ॥२७५॥**

यथा–भोगिनामप्रतिष्ठन्ते भोगा एव निरन्तरम् । नापिते यथा–भोगी नियोगी वपनप्रयोगे ॥२७३॥ मानं प्रमाणे प्रस्थादौ । मितिर्मीयतेऽनेन वा मानम् । प्रमाणम् इयत्तापरिच्छेदमात्रम् तत्र यथा–स्थितः पृथिव्या इव मानदण्डः । प्रमाणं प्रत्यक्षादि इति मंखः । तत्र यथा–मातृमानमितिमेयमयीभिः प्रस्थादौ आदि शब्दादङ्गुलितुलादौ । यथा–न कूटमानानि समानयन्ति । मानश्चित्तोन्नतौ ग्रहे । माननं मानः । चित्तोन्नतौ पुंक्लीबः । तत्र यथा–नान्यस्य गन्धमपि मानभृतः सहन्ते । ग्रहे निर्बन्धे यथा–कः प्रिये सुभगमानिनि मानः । मानो मत्स्ये राशिभेदे । मीङ् हिंसायाम् । मीनः । जीण् शीदी (उ० २६१) इति कित् नः । मीनः । मत्स्ये यथा–मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् । राशिभेदे यथा–दिने दिने लब्धरुचिर्विवस्वान् । मीनं च मेषं च वृषं च भुङ्क्ते । मृत्स्ना मृत्सा तुवर्यपि । प्रशस्तामृत् मृत्स्ना । सस्नौ प्रशस्ते । ७–२–१७२ इति स्वार्थे स प्रत्ययः । तुवरी धातुविशेषः । मृत्स्नायां यथा–जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नाऽपि सा तव रुचा विजितश्रियस्या ॥२७४॥ यानं युग्ये गतौ । यात्यनेन यायते वा यानम् । युग्ये वाहने पुंक्लीबः । तत्र यथा–यानाज्जनः परिजनैरवतार्य्यमाणः । गतौ यथा–तस्मै निवेद्य नृपतेः परलोक-यानम् । नृपाणां गुणभेदेऽपि । यथा–यानं समाचरेच्छक्तौ । योनिः कारणे भगताम्रयोः । यौति योनिः । वीयुसुबह्यगिभ्योनिः (उ० ६७७) स्त्रीपुंसलिङ्गः । कारणे यथा–विश्वयोनिस्ति-रोदधे । भगे यथा–योनियन्त्रसमुत्पन्नाः सुसूक्ष्मा जन्तुराशयः ।

**निशाकरे प्रभौ शक्रे यक्षक्षत्रिययोरपि ।।**
**रास्नैलापर्णी सर्पाक्ष्यो, रागी कामिनि रङ्क्तरि ।।२७६।।**
**रोही रोहीतकेऽश्वत्थे, वटे लग्नं तु लज्जिते ।।**
**राशीनामुदये सक्ते, लक्ष्म प्रधानचिन्हयोः ।।२७७।।**

---

ताम्रशुल्वम् । तत्र यथा–योनिं तेनैव वेधयेत् । रत्नं स्वजातिश्रेष्ठे स्याद् मणौ । रमतेऽस्मिन् रत्नम् । रमेस्त च (उ० २६४) इति नः । स्वजातिश्रेष्ठे यथा–पुरुषरत्नमलंकरणं भुवः । यदाह जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते । मणौ यथा– भास्वन्ति रत्नानि महौषधीश्च । राजा तु पार्थिवे । निशाकरे प्रभौ शक्रे यक्षक्ष त्रिययोरपि । राजते राजा । उक्षितक्षि (उ० ९००) इति अन् । पार्थिवनिशाकरयोर्यथा–राजा हरति लोकस्य हृदयं मृदुभिः करैः ।।२७५।। प्रभौ यथा–हे नागराज पृथुमस्य नितम्बभागं भोगेन वेष्टय दृढं ननु मन्दराद्रेः । शक्रे इन्द्रे यथा–सौधर्मराजस्य रराज वाजी । यक्षे यथा–चिरमनुचरो राजराजस्य दध्यौ । क्षत्रिये यथा–जज्ञिरे राजपुत्राः । रास्नैलापर्णीसर्पाक्ष्योः । रसत्यनया रास्ना । रसेर्वा (उ० २६०) इति नः । द्वे अप्यौषधिभेदौ । रागी कामिनि रङ्क्तरि । रागोऽस्त्यस्य रागी । रञ्जनशीलो वा । युजभुज ५–२–५० । इति घिनण् । अकट् घिनोश्च रञ्जेः ४–२–५० । इति नलोपः । वाच्यलिङ्गः । कामिनि यथा–अनिमिषमविरामा रागिणां सर्वरात्रं नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य । रङ्क्तरि यथा– वासांसि रागीव ररञ्ज लोकान् ।।२७६।। रोही रोहीतकेऽश्वत्थे वटे । रोहत्यवश्यं रोही । णिन् चावश्यक ५–४–३६ । इति णिन् । त्रयोऽपि वृक्षाः । लग्नं तु लज्जिते । राशीनामुदये सक्ते ।

**वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने ।।**
**वस्नं वस्त्रे धने मूल्ये, भृतौ वर्ष्म पुनस्तनौ ।।२७८।।**
**प्रमाणे सुन्दराकारे वर्त्म नेत्रच्छदेऽध्वनि ।।**
**वर्णी पुनश्चित्रकारे, लेखके ब्रह्मचारिणि ।।२७९।।**

लगतेस्म लग्नम् । लगतिस्म वा क्षुब्धविरब्ध ४–४–७० इति साधुः । लज्जितसक्तयोर्वाच्यलिङ्गः । लज्जिते यथा–भानुर्भूमिपतिप्रतापविजितो लग्नः समग्नोऽम्बुधौ । राशोनामुदये पुंक्लीबः । तत्र यथा–वसिष्ठदत्तलग्नोऽपि रामः पव्रजितो वने । सक्ते यथा–कराग्रलग्नाभिनवाथ बाला । लक्ष्म प्रधानचिन्हयोः । लक्ष्यतेऽनेन लक्ष्म मन् क्लीबे । प्रधाने यथा–वीक्ष्यैव तं सूर्यकुलैकलक्ष्म । चिन्हे यथा–क्वाकार्यं शशलक्ष्मणः क्व च कुलम् ।।२७७।। वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने । वन्यते वनम् । वर्षादयः क्लीबे इत्यल् । प्रस्रवणे निर्झरे यथा–वनानिशिथिलेषु वहन्ति यत्र । गेहे कानने च यथा–वनानि दहतो वह्नेः सखाभवति मारुतः । प्रवासे यथा–आहूतस्याभिषेकाय विसृष्टस्य वनाय च । अम्भसि यथा–वनमनुसृतं पंकजवनैः । समूहपर्वतयोरपि मंखः । समूहे यथा–पङ्कजवनैरिति पर्वते यथा–वनं याम्यहमप्यद्य यथा जीमूतवाहनः । वस्नं वस्त्रे धने मूल्येभृतौ । वस्यते–आच्छाद्यते वसन्ति अनेनेति वा वस्नम् । प्याधापनि (उ० २५८) इति नः । मूल्यं पटादिभाण्डविक्रयाल्लभ्यम् । तत्र पुंक्लीबः । अन्यत्र क्लीबे । भृतिः कर्मकरादीनां वेतनम् । सर्वेषु यथा–वस्नं न कृत्स्नं लभतेऽल्पपुण्यः । वर्ष्म पुनस्तनौ । प्रमाणे सुन्दराकारे । वृष्यति वर्ष्म । मन् (उ० ८११) इति मन् । क्लीबे । तनुः शरीरम् ।।२७८।। तत्र प्रमाणे च यथा–गजवर्ष्म

**वानं शुष्कफले शुष्के, सीवने गमने कटे ।**
***जलसंप्लुतवातोर्मिसुरङ्गासौरभेषु च ॥२८०॥**
**वाग्मी पटुबृहस्पत्योर्वाजी बाणे हये खगे ॥**
**विन्नं विचारिते लब्धे, स्थिते वृषा तु वासवे ॥२८१॥**

किरातेभ्यः शशंसुर्देवदारवः । सुन्दराकारे यथा–वर्ष्मणा विदधती जगज्जयम् । वर्त्म नेत्रच्छदेऽध्वनि । वर्ततेऽनेनास्मिन् वा वर्त्म । मन् (उ० ९११) इति मन् । क्लीबे । नेत्रस्य छदं पक्ष्म(वर्त्म)। तत्र यथा–नेत्रवर्त्मरुधिरारुणं ततः । अध्वनि यथा–पुरस्कृता वर्त्मनि पार्थिवेन । वर्णी पुनश्चित्रकारे लेखके ब्रह्मचारिणि । वर्णो नीलपीतादिरकारादिः ब्रह्मचर्यं वाऽस्यास्तीति वर्णी । वर्णाद्ब्रह्मचारिणि ७-२-६९ इत्यभिधानादन्यत्रापि – इन प्रत्ययः । चित्रकारे लेखके च यथा–वर्ण्यन्ते वर्णिनां वर्णाः । ब्रह्मचारिणि यथा–अथाह वर्णी विदितो महेश्वरः ॥२७९॥ वानं शुष्कफले शुष्के सीवने गमने कटे । जलसंप्लदवातोर्मिसुरङ्गासौरभेषु च । ओवै शोषणे । वायतिस्म वानम् । सूयत्यादीति ४–२–७०। क्तस्य नत्वम् । वेंग् तन्तुसन्ताने वांक् गति गन्धनयोर्वा अनयोर्भावे करणे वा अनट् नवस्वर्थेषु । शुष्के वाच्यलिङ्गः । तत्र शुष्के फले वातोर्मिषु जलसंप्लवे च यथा– वाने विताने नवगौस्तनीनां वानानि वानैर्निपतन्ति वाने । शेषेषु अन्वेष्यम् ॥२८०॥ वाग्मी पटुबृहस्पत्योः । प्रशस्ता वाग् विद्यतेऽस्य वाग्मी । ग्मिन् । ७–२–२५। इति ग्मिन् । पटौ वाच्यलिङ्गः । तत्र यथा–वागेका वाग्मिनः सतः । बृहस्पतौ यथा–अत्र स्याज्जडजिह्वोऽपि वाग्मी विद्यामठे पठन् । वाजी

*प्र० संप्लव ।

**वृषभे तुरङ्गे पुंसि, शाखी तु द्रुमवेदयोः ॥**
**राजभेदे शिखीत्वग्नौ, वृक्षे केतुग्रहे शरे ॥२८२॥**
**चूडावति बलीवर्दे, मयूरे कुक्कुटे हये ॥**
**शीनो मूर्खाजगरयोः, श्येनः शुक्ले पतत्रिणि ॥२८३॥**

बाणे हये खगे । वाजः पत्रं वेगः पिच्छं वाऽस्त्यस्य वाजी । बाणे हये च यथा–युक्तं चक्रुः सायका वाजितायाः । खगे पक्षिणि यथा–वाजिनो वियति विभ्रममापुः । विन्नं विचारिते लब्धे स्थिते । विदिंप् विचारणे विद्लृती लाभे विदिच् सत्तायां वा । विद्यतेस्म विन्नं वाच्यलिङ्गः । त्रिष्वपि यथा–अनिर्विण्णैर्विन्नाः । किल सकलशास्त्रोपनिषदः । वृषा तु वासवे । वृषभे तुरङ्गे पुंसि । वर्षति वृषा लूपूयुवृषि (उ० ९०१) इति किदन् । चचुर्षु अर्थेषु पुमान् वात्स्यायनप्रसिद्धः । वासवे यथा–वृषेव सीतां तदवग्रह-क्षताम् ॥२८१॥ शेषेषु यथा–वृषानिषेकं कुरुते रतान्ते । शाखी तु द्रुमवेदयोः । राजभेदे । शाखाः सन्त्यस्य शाखी । शिखादिभ्य इन् । ७–२–४ । द्रुमे यथा–नाभाजिकेवलमभाजि गजेन शाखी । वेदे यथा–पठन्ति शाखां वटवः स्वशाखिनः । राजभेदे यथा–संख्ये सशाखी विशिखैर्निजघ्ने । शिखी त्वग्नौ वृक्षे केतुग्रहे शरे । चूडावति बलीवर्दे मयूरे कुकुटे हये । शिखाऽस्त्यस्य शिखी । शिखादित्वादिन् (७–२–४) चूडावति वाच्यलिङ्गः । शेषेषु पुंसि । अग्नौ यथा–स्पर्शमुष्णमुचितं दधच्छिखी यद्दाह हविरद्भुतं न तत् । वृक्षे यथा–आखवः शिखिमूलानि खनन्ति नखरैः खरैः । केतुग्रहे यथा–आख्याति संख्यं शिखिनः समुद्गमः । ॥२८२॥ चूडावति यथा–जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः । मयूरे यथा–शिखिनां बर्हभारेषु केशान् । कुकुटे यथा–

**स्वप्नः स्वापे सुप्तज्ञाने, स्थानं स्थित्यवकाशयोः ।।**
**सादृश्ये सन्निवेशे च स्नानं स्नानीय आप्लवे ।।२८४।।**

शिखिकुलकूजितसुभगे प्रभातसमये प्रभुः समुत्थाय शेपेषु यथा-आकर्ण्य शिखिनां घोषम् । शीनो मूर्खाजगरयोः। शीते शीनः । जीणशीदी (उ० २६१) इति कित् नः । मूर्खे वाच्यलिङ्गः । श्येनः शुक्ले पतत्त्रिणि । श्यायते श्येनः । श्याकठि (उ०२८२) इति इनः । शुक्ले गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा जलनिधिनवफेनश्येनमेनं शजस्ते । पतत्त्रिणि यथा-श्येनपक्षपरिधूसरालकाः ।।२८३।। स्वप्नः स्वापे सुप्तज्ञाने । स्वपनं स्वप्नः । यजि स्वपि ५-३-८५ इति नः । स्वापे यथा-स्वप्न जागरणातीतं पदमाहुर्मनीषिणः । सुप्तस्य ज्ञानं बोधो दर्शनं वा तत्र यथा-स्वप्नेऽपि सा दुर्लभा । स्थानं स्थित्यवकाशयोः । सादृश्ये सन्निवेशे च । स्थितिः स्थीयतेऽनेन वाऽस्मिन् वा स्थानम् । स्थितौ यथा-सतेषु स्थानमवाप शोकः । अवकाशे यथा-दत्तस्थानः समुद्रेण समो ब्राह्मणदत्तभूः । सादृश्ये यथा-स्थविरोऽयं पितृस्थानः । सन्निवेशे यथा-उत्सन्नविषयग्रामाः स्थानादुच्चलितद्विजाः । आश्रयप्रदेशमात्रालीढादिगीतविषययोग्यप्रसङ्गेष्वपि मंखः । आश्रये यथा-स्थान भ्रष्टा न शोभन्ते । प्रदेशमात्रे यथा-कियन्ति भवती स्थानानि रक्षिष्यति । आलीढादौ यथा-स्थानान्यालीढवैशाखप्रत्यालिढानि मण्डलम् । समपादं च । गीत विषये यथा-स्थानप्रदायित्वमिवोपगन्तुम् । योग्ये यथा-स्थानमेतदुचितस्य वस्तुनः । प्रसङ्गे यथा-दर्भाणां स्थाने शरैरास्तरितव्यम् । स्नानं स्नानीय आप्लवे । ष्णांक् शौचे । भावे करणे वा अनटि स्नानम् । स्नायतेऽनेन स्नानीयं चूर्णम् । तत्र यथा-स्नानैर्धूपैर्नित्यमारा-

**स्त्यानं स्यात्स्निग्ध आलस्ये, प्रतिध्वानघनत्वयोः ।।**
**सादी तुरङ्गमारोहे, निषादिरथिनोरपि ।।२८५।।**
**स्वामी प्रभौ गुहे सूनं, पुष्पे सूना पुनः सुता ।।**
**अधोजिह्वा वधस्थानं, सूनुः पुत्रेऽनुजे रवौ ।।२८६।।**

---

धयेच्छिवम् । आप्लवेऽभिषवे यथा–लोकः प्रयागवासी कूपे स्नानं समाचरति ।।२८४।। स्त्यानं स्यात्स्निग्ध आलस्ये प्रतिध्वान-घनत्वयोः । स्त्यायतिस्म स्त्यानम् । क्ते "व्यञ्जनान्तस्था ४–२–७१ इति तस्य नत्वम् । स्त्यायते वाऽनट् । स्निग्धे वाच्यलिङ्गः । तत्र यथा–वक्त्रं तन्व्याः स्तबकितमिदं स्त्यानक-स्तूरिकाभिः । घनत्वे काठिन्ये यथा–स्त्यानावनद्धघनशोणितशोण-पाणिः । सादीतुरङ्गमारोहे निषादिरथिनोरपि ।। सीदति सादी ग्रहादित्वाण्णिन् । निषादी गजारोहः । रथी रथारोहः । त्रिष्वपि यथा–विवादः सादिनां जज्ञे ।।२८५।। स्वामी प्रभौ गुहे । स्वमस्यास्ति स्वामी । स्वान्मिन्नीशे । ७–२–४९ । मिन् । प्रभौ वाच्यलिङ्गः । द्वयोर्यथा–जनतीते मुदितमनसा नित्यं सुस्वामिना कृतानन्दा । सूनं पुष्पे सुनोति सूनम् । सोरू च (उ० २६३) इति नः । सूयतेस्म वा क्ते सूयत्यादीति तस्य नत्वम् । यथा–तस्यातसीसूनसमानभासः । पुष्पितेऽपि तत्र तु वाच्यलिङ्गः । सूना पुनः सुता । अधोजिह्वा वधस्थानम् । सुतायां यथा–सूनाः स्युः न्यूनपुण्यानाम् । अधोजिह्वा जिह्वातलम् । तत्र यथा–सूनाविधोच्छ्वासकासापनोदः। वधस्थाने यथा–पञ्चसूना गृहस्थस्य स्वर्गं तेन न गच्छति । सूनुः पुत्रेऽनुजे रवौ । सूयते सूनुः । सुवःकित् इति नुः । पुत्रे यथा–दिलीपसूनुर्मणिशकरोद्भवः प्रयुक्त-संस्कार इवाधिकं बभौ । अनुजे यथा-अनुस्मृताखण्डलसूनुविक्रमः ।

**हनुः कपोलावयवे, मरणामययोरपि ॥**
**हरिद्रायामायुधे च, हली कृषकसीरिणोः ॥२८७॥**
**कल्पो विकल्पे कल्पद्रौ, संवर्ते ब्रह्मवासरे ॥**
**शास्त्रे न्याये विधौ कूपो, गर्तेऽन्धौ गुणवृक्षके ॥२८८॥**

रवौ यथा—सूनुना धूनिते ध्वान्ते ॥२८६॥ हनुःकपोलावयवे मरणामयोरपि। हरिद्रायामायुधे च। हन्यते हनुः। कृहनेस्तुक्नुकौ (उ० ७९१) इतिनुक्। बाहुलकान्नलोपः। कपोलावयवे स्त्रीपुंसः। हरिद्रायां स्त्रियाम्। अन्यत्र पुंसि। कपोलावयवे यथा—वसन्तकालो हनुमानिवागतः। शेषेषु अन्वेष्यम्। हली कृषकसीरिणोः। हलमस्त्यस्य हली। कृषके कुटुम्बिनि यथा—कवलैर्गोरसान्नानां हलिनो बलिनः खलु। सीरिणि बलभद्रे यथा—हलिनो नीलवाससः ॥२८७॥ अथ पान्ताः। कल्पो विकल्पे कल्पद्रौ सम्वर्ते ब्रह्मवासरे। शास्त्रे न्याये विधौ। कल्पनं कल्प्यतेऽसावनेन वा कल्पः। विकल्पे यथा—अनल्प कल्पाकुलितं मनो मे। कल्पद्रौ यथा—धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातैः। संवर्ते प्रलये यथा—कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनम्। ब्रह्मवासरे यथा—नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। शास्त्रे शास्त्रविशेषे वेदाङ्गे यथा—शिक्षा कल्पो व्याकरणं छन्दोज्योतिर्निरुक्तयः। न्याये यथा—स एष प्रथमः कल्पः। विधौ यथा—कल्पवित्कल्पयामास वन्यामिवास्य संविधौ। कूपो गर्तेऽन्धौ गुणवृक्षके ॥२८८॥ मृन्माने कूपके। कूयते कूपः। युसुकुरु (उ० २९७) इति प ऊत्वं च। अन्धौ स्त्रीपुंसः। अन्यत्र पुंसि। गर्ते यथा—एतन्मूषिक कूपनिर्गतमहामृत्स्नाकुलं वैरिणाम्। अन्धौ उपादाने यथा— पयः कुग्रामकूपेऽपि तावन्मात्रं भविष्यति। गुणवृक्षे प्रवहणस्तम्भे

**मृन्माने कूपके क्षेपो, गर्वे लङ्घननिन्दयोः ।।**
**विलम्बे रणहेलासु, गोपौ भूपालवल्लवौ ।।२८९।।**
**ग्रामौघगोष्ठाधिकृतौ, गोपी गोपालसुन्दरी ।**
**शारिवा रक्तिका तल्पमट्टे शय्याकलत्रयोः ।।२९०।।**

---

यथा–नौः कूपबद्धैव तरङ्गनुन्ना तत्रैव संयाति चलाचलत्वम् । मृन्माने काचभाण्डे यथा–कूपे सुरूपे क्षिप गन्धतैलम् । कूपके विदारके नद्यादिपुलिनस्थक्षुद्रगर्ते यथा–सरांस्यनम्भांसि कूपकानि ।।२८८।। क्षेपो गर्वे लङ्घननिन्दयोः । विलम्बे रणहेलासु । क्षिप्यतेऽनेन क्षेपणं वा क्षेपः । षट्ष्वर्थेषु । गर्वे यथा–क्षेपेण चक्षुर्न जने क्षिपन्ति । लङ्घने विलम्बे च यथा–हनुमान् जलधि क्षेपमक्षेपेण चकार सः । निन्दायामवज्ञायां यथा–आत्मश्लाघां परक्षेपं न काङ्क्षन्ति विचक्षणाः। ईरणे प्रेरणे यथा–कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बम्। हेलायां यथा–भ्रूक्षेपैः कनकस्य दीपकपिशा विश्राणिता राशयः । गोपौ भूपालवल्लवौ । ग्रामौघगोष्ठाधिकृतौ । गां पाति गोपः । भूपाले गोष्टाधिकृते च यथा–गोपे सति त्वयि भयं कथमश्नुते गौः । वल्लवे गोपाले यथा–बर्हेणेव स्फुरति रचना गोपवेषस्य विष्णोः ।।२८ ।। ग्रामौघाधिकृते ग्रामवृन्दपतौ यथा–कुलानिश्रेणयो गोपाः शिल्पिनो वणिजस्तथा–पातर्यपि यथा–कलमगोपवधूर्न मृगव्रजम् । गोपी गोपालसुन्दरी । शारिवा रक्तिका । गोपालसुन्दर्यां यथा–गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् । शारिवा ओषधिः । रक्तिका गुञ्जा । तल्पमट्टे शय्याकलत्रयोः । तल्पते तल्पम् । भापाचणि (उ० २९६) इति पः । शय्यायां पुंक्लीबः । अन्यत्र क्लीबे । अट्टः दुर्गादिप्राकारोपरि युद्धस्थानम् । रणमण्डपे–इत्येके । अट्टे कलत्रे च यथा–यत्राधिरूढगुरुतल्पमतिग्मरश्मिं

**त्रपा लज्जाकुलटयोस्त्रपु सीसकरङ्गयोः ।**
**तापः संतापे कृच्छ्रे च तापी तु सरिदन्तरे ।।२९१।।**
**दर्पो मृगमदे गर्वे, पुष्पं विकास आर्तवे ।**
**धनदस्य विमाने च, कुसुमे नेत्ररुज्यपि ।।२९२।।**

भ्रष्टप्रभं दुरितराशिरिव प्रचक्रे । शय्यायां यथा—आस्तीर्णं तल्परचिता वसवः क्षणेन वेश्याजनः कृतनवप्रतिकर्म्मकाम्यः । वेश्मन उपरितनमण्डपिकायामपि यथा—विशीर्णतल्पो गृहसन्निवेशः ।।२९०।। त्रपा लज्जाकुलटयोः । त्रपणं त्रपयति वा त्रपा लज्जायां यथा—हृतेऽपि भारे बृहतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः । कुलटायां यथा—न तृप्यति त्रपा पुंसाम् । त्रपु सीसकरङ्गयोः । त्रपते त्रपु भ्रमृतृत्सरि (उ० ७६१) इति उः । क्लीबे । रङ्गं वङ्गम् । द्वयोर्यथा—कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते । तापः सन्तापे कृच्छ्रे च । तपनं तापयति वा तापः । सन्तापे यथा—तस्यास्तापमहं नृशंसकथयाम्येणीदशस्ते कथम् । कृच्छ्रे यथा—भवतापाभितप्तानां त्वमेवशरणं प्रभो । तापी तु सरिदन्तरे गौरादित्वाद् ङीः । सरिदन्तरे नदीभेदे यथा—तापीनेयं नियतमथवा तानि तीराणि नास्याः ।।२९१।। दर्पो मृगमदे गर्वे । दृप्यति अनेन दर्पणं वा दर्प्पः । मृगमदे यथा—दर्पस्य गन्धेन ससर्प सर्पः । गर्वे यथा—विनोदमिच्छन्नथ दर्पजन्मनः । पुष्पं विकास आर्तवे । धनदस्य विमाने च कुसुमे नेत्ररुज्यपि । पुष्पणं पुष्पति वा पुष्पम् । विश्वस्य दोपाविव पुष्पवन्तौ । अत्र हि पुष्पं विकासो विद्यते ययोस्तौ चन्द्रार्कौ । आर्तवे रजसि कुसुमे च यथा—लतां पुष्पवतीं स्पृष्ट्वा कृतस्नानो जलाशये । धनदस्य विमाने यथा—धनदसौधमिव पुष्पालंकृतम् । नेत्ररुजि

**बाष्प ऊष्माऽक्षिजलयो, रूपं तु श्लोकशब्दयोः ।**
**पशावाकारे सौन्दर्ये, नाणके नाटकादिके ॥२९३॥**
**ग्रन्थावृत्तौ स्वभावे च, रेपः क्रूरे विगर्हिते ।**
**रोपौ रोपणेषू रोपं, रन्ध्रे लेपस्तु लेपने ॥२९४॥**

---

यथा–पुष्पघ्नमिदमौषधम् ॥२९२॥ बाष्प ऊष्माऽक्षिजलयोः । बाधते बाष्पः । शादि वाधि खनिहनेः ष च (उ० २९९) इति पः । पुंक्लीबः । द्वयोर्यथा–चिरविरहजं मुञ्चतो बाष्पमुष्णम् । रूपं तु श्लोकशब्दयोः । पशावाकारे सौन्दर्ये नाणके नाटकादिके ग्रन्थावृत्तौ स्वभावे च । रूप्यते रूपयति वा रूपम् । नवष्वर्थेषु । श्लोको वृत्तम् । तत्र यथा-रूपकं गाथको जगौ । शब्दे यथा–दारूपाणां भवति विधिना रूपमेकं चतुर्णाम् । पशौ पशुविशेषे सौन्दर्ये च यथा–क्रूराकारमपि रूपसम्पन्नम् । आकारे यथा–मनुष्यरूपेण मृगाश्चरन्ति। नाणके-यथा तदपि साम्प्रतमाहर रूपकम्। नाटकादौ यथा–रूपं पुनातु जनितारिचमूविमर्शमुद्वृत्तदैत्यवध निर्वहणं हरेर्वः ॥२९३॥ ग्रन्थावृत्तौ यथा–अयुग्मैः सम्पठेद्रूपैः । स्वभावे यथा–तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः । रेपः क्रूरे विगर्हिते । रीयते रेपः । पम्पाशिल्पादयः (उ० ३००) इति साधुः । वाच्यलिङ्गः । रोपौ रोपणेषू । रोपणं रोपयति वा रोपः । रोपणे इषौ च यथा–उत्पाद्यरोपैः रिपुराजकानि रोपं पुनर्यः कुरुते जिगीषुः । रोपं रन्ध्रे । यथा–कोपेन रोपान्निरगाद्भुजङ्गः । लेपस्तु लेपने । अशने च सुधायां च । लेपनं लिप्यतेऽनेन वा लेपः । लेपने यथा–स्तनान्तरे चन्दनपंकलेपः । अशने भोजने यथा–लेपं विलेप्याविलपन्करोति । सुधायां मत्कोले यथा–लेपैर्विलिप्तं सदनं नृपस्य । मृत्क्रियायामपि मंखः यथा–लेपकर्म-

**अशने च सुधायां च, वपा विवरमेदसोः ।**
**शष्पं तु प्रतिमाहीनतायां बालतृणेऽपि च ॥२९५॥**
**शापः शपथ आक्रोशे शिष्यं स्रुवे क्रियोचिते ।**
**स्वापो निद्रायां रुग्भेदे, शयनाज्ञानमात्रयोः ॥२९६॥**
**गुम्फो दोर्भूषणे दृब्धौ, रेफोऽवद्यरवर्णयोः ॥**
**शफं खुरे गवादीनां, मूले विटपिनामपि ॥२९७॥**

रचिते यदि दार्ढ्यं स्यात्तु कालपरिणामवशेन । प्रत्युप्तेव च वज्रलेपघटिते वान्तर्निखातेव चेत्यादौ मृत्क्रियत्वोपचारात् न हि तस्या हृदा पच्छाया मृत्क्रियत्वम् सम्भवत्यत एवोपचारः ॥२९४॥ वपा विवरमेदसोः । उप्यते वपा भिदादित्वात्साधुः । द्वयोर्यथा–एते वपा निवसनादिव जातगर्वा धूर्त्ता वपां समरभूमिगता वदन्ति । शष्पं तु प्रतिभाहीनतायां बालतृणेऽपि च । शीयते शिष्यम् । शदि वाधि (उ० २९९) इति पो दस्य षत्वं च । पुंक्लीबः । बालतृणे यथा–शष्पैरर्धावलीढैः श्रमविततमुखभ्रंशिभिः । कीर्णवर्त्मा ॥२९५॥ शापः शपथ आक्रोशे । शपनं शापः । शपथे यथा–त्वत्पादस्पर्शनं शापो मम देवात्र वस्तुनि । आक्रोशे वाक्यारुष्ये यथा–शापेनास्तंगमितमहिमा वर्षभोग्येन भर्तुः । शिष्यं स्रुवे क्रियोचिते । शिनष्टि शिष्पम् । पम्पाशिल्येति साधुः । स्रुवो होमोपकरणम् । क्रियोचितः क्रियायोग्यः । तत्र वाच्यलिङ्गः। स्वापो निद्रायां रुग्भेदे शयनाज्ञानमात्रयोः । स्वपनम् स्वपित्यनेन वा स्वापः । शयनमत्र स्रस्तरादौ संवेशनमात्रम् । निद्राशयनयोर्यथा–रोगमार्गश्रमौ मुक्त्वा स्वापश्च सकलां निशाम् । रुग्भेदः प्रसूतिभेदः । अज्ञानमात्रे यथा–स्वापेन पापानि समाचरन्ति ॥२९६॥ अथ फान्ताः । गुम्फो दोर्भूषणे दृब्धौ ।

**शिफा मातरि मांस्यां च, जटायां च सरित्यपि ।**
**[1]कम्बिर्वंशलतादर्व्योः कम्बुर्वलयशङ्खयोः ॥२९८॥**

**गजे शम्बूके [2]कर्चूरे ग्रीवायां नलकेऽपि च ।**
**जम्बूर्मेरुतरङ्गिण्यां द्वीपवृक्षविशेषयोः ॥२९९॥**

---

गुम्फति अनेन गुम्फनं वा गुम्फः । दोर्भूषणे यथा—गुम्फगुम्फित-दोर्लतः । दृब्धौ सन्दर्भे यथा—गुम्फक्लेशमुपासितुं कृतधियां कस्तत्र काले क्रमः । रेफोऽवद्यरवर्णयोः । रीङ् स्रवणे । रीयते रेफः । रीशीभ्यां फः (उ० ३१४) । र एव वा रेफः । रादेफः । ७–२–१५७ । इति स्वार्थे एफः । अवद्यं गर्ह्यम् । द्वयोर्यथा—रेफैर्द्विरेफैः कमलेक्षणा क्षता । शफं खुरे गवादीनां मूले विटपिनामपि । श्यति शायते श्यायते शफः । शफ कफ (उ० ३१६) इति साधुः । पुंक्लीबः । द्वयोर्यथा—पशव इव शफौघैः पादपाः क्ष्मां खनन्ति ॥२९७॥ शिफा मातरि मांस्यां च जटायाश्च सरित्यपि । श्यति शिफा शफ कफ इति साधुः । चतुर्ष्वर्थेषु । अथ बान्ताः । कम्बिर्वंशलतादर्व्योः । काम्यते कम्बिः । छविच्छिवि (उ० ७०६) इति साधुः । स्त्रियाम् । दर्वी दारुहस्तः । द्वयोर्यथा – कम्बिचुम्बितकरः पुरो नरः । कम्बुर्वलयशङ्खयोः । गजे शम्बूके कर्चूरे ग्रीवायां नलकेऽपि च । काम्यते कम्बुः । कम्यमिभ्यां बूः (उ० ७९९) षट्ष्वर्थेषु । शङ्खे पुंक्लीबः । शेषेषु पुंसि । वलये यथा—शङ्खकम्बुरुचिरी-कृतबाहुः । शङ्खे यथा—कम्बु कम्ब्याः क्षणं कण्ठे कुरु कण्ठार्ति-मुद्धर । शङ्खः समुद्रजः । शम्बूकोम्बुमात्रजः । जम्बूर्मेरुतरङ्गिण्यां

---

१ शोफ औषधिभेदे स्याद्व्रणकृते त्वग्विवर्धने । कम्बि० । २ कर्बूरे ।

**डिम्ब एरण्डभययोर्विप्लवे प्लीह्निपुप्फुसे ।**
**बिम्बं तु प्रतिबिम्बे स्यान्मण्डले बिम्बिकाफले ।।३००।।**
**शम्बः पवौ लोहकाञ्च्यां, स्तम्ब आलानगुल्मयोः ।**
**व्रीह्यादीनां प्रकाण्डे च, कुम्भो वेश्यापतौ घटे ।।३०१।।**

द्वीपवृक्षविशेषयोः । जायतेऽस्यां जम्बूः । कमिजनिभ्यां बूः (उ० ८४७) स्त्रियाम् । मेरुतरङ्गिण्यां यथा—जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना नृत्स्नाऽपि सा तव रुचा विजितश्रियस्याः । तज्जाम्बवद्रवभवास्थ सुधाविधाम्बुर्जम्बूः सरिद्वहति सीमनि कम्बुकण्ठि । द्वीपविशेषे यथा—यन्मौलिरत्नमुदितासि स एष जम्बूद्वीपस्त्वदर्थं मिलितैर्युवभिर्विभाति । वृक्षविशेषे यथा—जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।।२९९।। डिम्ब एरण्डभययोर्विप्लवे प्लीह्निपुप्फुसे । डेयते डिम्बः । डीनीबन्धि (उ० ३२५) इति डिम्बः । पञ्चस्वर्थेषु पुंक्लीबः । भयं भीतिः विप्लवे डमरः । अनयोर्यथा—डिम्बानि बिबं हरतां हरेर्वः । प्लीहा पुप्फुसश्च शरीरावयवविशेषौ । तयोर्यथा—स्वादुं कारं कालखण्डोपदेशैः क्रोष्टाडिम्बं व्यष्वणद् व्यस्वनच्च । बिम्बं तु प्रतिबिम्बे स्यान्मण्डले बिम्बिकाफले । बध्नाति बिम्बम् । डीनीबन्धि इति डिंबः । प्रतिबिम्बे मण्डले च पुंक्लीबः । प्रतिबिम्बे यथा—बालं विहाय जलसंस्थितमिन्दुबिम्बमन्यः क इच्छति जनः सहसाग्रहीतुम् । मण्डले यथा—निमग्नं रविबिम्बताम्रघटिकायन्त्रेण वारां निधौ । बिम्बिकाफले यथा—तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ।।३००।। शम्बः पवौ लोहकाञ्च्याम् । शाम्यति शम्बः । शम्यमेर्णिद्वा (उ० ३१८) इति षः । पविरशनिः । लोहकाञ्चीमुसलाद्यग्रस्थो

**द्विपाङ्गे राक्षसे राशौ कुम्भं त्रिवृतिगुग्गुलौ ।**
**कुंम्युखायां पाटलायां, वारिपर्ण्यां च कट्वफले ॥३०२॥**

लोहमण्डलकः । पवौ यथा–अनाकलितमाहन्ति शम्बत्वत्तः परोऽत्र कः लोहकाञ्च्यां यथा–शम्बाकृत इव क्षेत्रे बीजमाशु प्ररोहति । अत्र शंबाकृत इति दारुकाण्डाग्रस्थितलोहमण्डल-चूर्णीकृते इत्यर्थः । श्रेयोऽन्वितेऽपि । तदा तु शमस्यास्तीति शंबः । कशंभ्याम् ७–२–१८ । इति वः । स्तंब आलानगुल्मयोः। व्रीह्यादीनां प्रकाण्डे च । स्तभ्नाति स्तंबः । तुंबस्तंबादयः । (उ० ३२०) इति साधुः । आलाने यथा–स्तंबेरमः परिणिनं-सुरसावुपैति । अत्र स्तंबे आलाने रमते इति स्तंबेरमः । गुल्मे यथा – कदंबलंबी रोलंबी निम्बस्तंबं न चुंबति । व्रीह्यादिप्रकाण्डे यथा–अमी पृथुस्तंबभृतः पिशङ्गतां गता विपाके न फलस्य शालयः । अथ भान्ताः । कुंभो वेश्यापतौ घटे । द्विपाङ्गे राक्षसे राशौ । कायति कुंभः । काकुसिभ्यां कुंभः । (उ० ३३७) घटे स्त्रीपुंसः । वेश्यापतौ यथा–कुंभस्तम्भित शंभलीभुजलतः पानोत्सवे नृत्यति । घटे यथा–शक्ता हि कूपमपि शोषयितुं न कुंभाः । कुंभोद्भवेन पुनरंबु-धयोऽपि पीताः । द्विपाङ्गे गजशिरः । पिण्डे यथा–वक्षोजाविभ-कुंभविभ्रमहरौ । राक्षसे यथा – कुंभकर्णसुतौ कुंभनिकुंभौ दंभपण्डितौ । राशौ यथा–समस्तु वृषकुंभयोः । कुंभं त्रिवृतिगुग्गुलौ । त्रिवृतनिश्रोत्रौषधिः । गुग्गुलुर्महिषाक्षः । क्लीबे । कुंभ्युखायां पाटलायां वारिपर्ण्यां च कट्वफले । उखा स्थाली । पाटला पुष्पतरुः । वारिपर्णी फंगानाम शाकः । कट्वफलः

**गर्भः कुक्षौ शिशौ सन्धौ, भ्रूणे पनसकण्टके ।**
**मध्येऽग्नावपवरके, जम्भः स्याद्दानवान्तरे ॥३०३॥**
**दन्तभोजनयोरंशे हनौ जम्बीरतूणयोः ।**
**जृम्भा जृम्भणे विकासे, डिम्भो वैधेयबालयोः ॥३०४॥**

---

सोमवल्काख्यो वृक्षः ॥३०२॥ गर्भः कुक्षौ शिशौ सन्धौ भ्रूणे पनसकण्टके । मध्येऽग्नावपवरके । गिरति गर्भः । गृहरमि (उ० ३२७) इति भः । कुक्षौ यथा–लोक एष तिमिरोल्वण-वेष्टितो गर्भवास इव वर्तते निशि । शिशौ बालके मध्ये च यथा–अम्भोजगर्भरुचिराथ विदभ्रसुभ्रूस्तं गर्भरूपमपि रूपजितं त्रिलोकम् । अत्र हि प्रशस्तो गर्भो गर्भरूपम् । सन्धौ दशरूप-कोक्ते यथा–मुखं प्रतिमुखं गर्भाशर्मनिर्वहणान्यमी । भ्रूणे उदरस्थे जन्तौ यथा–गर्भोऽभवद् भूधरराजपत्न्याः । अग्नौ यथा–शशाम न शमीगर्भः । अपवरके यथा–संचरन् सौधगर्भेषु । जंभः स्याद् दानवान्तरे । दन्तभोजनयोरंशे हनौ जंबीर-तूणयोः । जांभतेऽसावनेन वा जंभः । जायते वा । गृहरमि इति भः । सप्तस्वर्थेषु । जंबीरे पुंक्लीबः । अन्यत्र पुंसि । दानवान्तरे यथा–जंभारातीभकुंभोद्भवमिव दधतः सान्द्रसिन्दू-ररेणुम् ॥३०३॥ दन्ते हनौ अंशे च यथा–अहिपतिभुज-जंभस्तंभसंरंभधीरः । भोजने यथा–सज्जंभसज्जंभवती क्षणेन । जंबीरो वृक्षः । तूणा भस्त्रा जृम्भा जृम्भणे विकासे । जृम्भणं जृम्भा त्रिलिङ्गः । जृम्भणं वदनप्रसारणम् । तत्र यथा–जृम्भाविदारितमुखस्य परिस्फुरन्ती को हर्तुमिच्छति हरेः परिभूयदंष्ट्राम् । प्रसराङ्गमोदनयोरपि । तयोर्विकासे यथा–उद्दामोत्कलिकाम्चिपाण्डुररुचं प्रारब्धजृम्भां क्षणात् । डिम्भो

**दम्भ: कल्के कैतवे च, [1]नाभि: क्षत्रप्रधानयो: ।**
**चक्रमध्ये मृगमदे, प्राण्यङ्गे मुख्यराजि[2] च ॥३०५॥**
**निभ: स्यात्सदृशे व्याजे, दम्भो वैणवदण्डके ।**
**रम्भा त्रिदशभामिन्यां, कदल्यां च विभु: प्रभौ ॥३०६॥**

वैधेयबालयो: । डिंभयति डिंभ: । वैधेयो मूर्ख: । बाल: शिशु: । द्वयोर्यथा--कृतमुखवाद्यविकारा:। क्रीडन्ति सुनिर्भरं डिंभा:(डिंभगा:) ॥३०४॥ दंभ: कल्के कैतवे च । दभ्नोति दभनं वा दंभ: । कल्क: पापम् । कैतवं छद्म । द्वयोर्यथा--सुप्रयुक्तस्य दंभस्य ब्रह्माऽप्यन्तं न गच्छति । नाभि: क्षत्रप्रधानयो: । चक्रमध्ये मृगमदे प्राण्यङ्गे मुख्यराजि च । नह्यते नाभि: । नहेर्भ् च (उ० ६२१) इति णिदि: । छत्रियमुख्यराजयो: पुंसि । प्रधाने चक्रमध्ये मृगमदे च स्त्रियाम् । प्राण्यङ्गे स्त्रीपुंस: । क्षत्रं क्षत्रियविशेष: । चक्रमध्यं चक्रपिण्डिका । मुख्यराट् द्वादशराजमण्डलमध्यवर्ती विजिगीषु: । तेषु त्रिषु यथा--प्रयुक्तवेगा: सहसा सनाभयो रथा: समानं रथिनश्च सस्रु: । प्रधाने यथा--मेरुं गिरीणां निगदन्ति नाभिम् । मृगमदे यथा--निर्नाभिकौशेयमुपात्तबाणमभ्यञ्जने पथ्यमलंचकार । अत्र निर्नाभिकौशेयमिति नाभ्या मृगमदेन कौशेयेन च रहितमभ्यञ्जने पथ्यमलंचकारेत्यर्थ:। नाभौ कौशेयमिति नाभीकौशेयमिति न व्याख्या । अभ्यञ्जने पथ्ये प्राण्यङ्गोद्भवानां द्रव्याणां निषिद्धत्वात् । प्राण्यङ्गे यथा--नाभिप्रविष्टाभरणप्रभेण । हस्तेन तस्थाववलम्ब्यवास: ॥३०५॥ निभ: स्यात्सदृशे व्याजे । निभाति निभ: । सदृशे वाच्यलिङ्ग: ।

१ मु० दर्भो ग्रन्थे कुशेऽपि च । दृम्भू: पवौ भास्करे नाभि: ।
२ प्र० राज्ञि च

**व्यापके शङ्करे नित्ये, शम्भुर्ब्रह्मार्हतोः शिवे ।**
**शुभो योगे शुभं *भद्रे, स्तम्भः स्थूणाङ्गजाड्ययोः ।।३०७।।**

व्याजे पुंक्लीबः। सदृशे यथा–मुक्ताभानूकपालशुक्तिषु जटावल्लीषु मल्लीनिभाः। व्याजे यथा–कालकूटस्त्वया चक्रे कालकूटनिभात्प्रभो। रंभो वैणवदण्डके। रमतेऽनेन रंभः। गृहरमि (उ० ३२७) इति भः। रभते वा। यथा–अमुष्य सन्तापमुखामहिम्ना तृष्णाप्रशाम्येद्रजसा सहैव। श्रीमन्महाहंसनिषेवितत्वाददः सरोम्भो न रोचते मे। अत्र सरो रेफसाहितोम्भो (सहिताम्भो) मह्यं रोचते रंभ इत्यर्थः। अदः दकाररहितः। दंभस्तु न रोचते–इत्यर्थः। रंभा त्रिदशभामिन्यां कदल्यां च। द्वयोर्यथा – रंभारंभादलाग्रैर्व्यजतुविरहतां (प्र० विहरतां) हारदानेन हाराः। विभुः प्रभौ व्यापके शङ्करे नित्ये। विभवति विभुः। शंसं स्वय विप्राद् भुवो डुः। ५–२–८४। इति ड्वित् उः। शंकरे पुंसि। शेषेषु वाच्यलिङ्गः ।।३०६।। प्रभौ व्यापके नित्ये च यथा–अप्यनारम्भमाणस्य विभोरुत्पादिताः पदैः। व्रजन्ति गुणतामर्थाः। शब्दा इव विहायसः। शंकरे यथा–कमपरमवशनं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः। शम्भुर्ब्रह्मार्हतोः शिवे। शं सुखं तत्र भवति शंभुः। शंसं स्वयम् ५–२–८४। इति डुः। पुंसि। ब्रह्मणि शिवे च यथा–त्रैलोक्यनगरारंभमूलस्तंभाय शंभवे। अर्हति जिने यथा–शंभुः सप्तपदार्थभङ्गि-

*मु० मू० शुभं भद्रे शुभा कान्तीच्छयोर्मता ॥ स्तम्भोऽङ्गजाड्ये स्थूणायां सभा द्यूतसमूहयोः। गोष्ठ्यां सभ्येषु शालायां स्वभूर्विष्णौ विद्यावपि ॥ स्तंभः स्यात्सामविच्छेदे हेलने स्थम्भनेपि च। आमोऽपक्वे रोगभेदे रोगे चेध्मसमिद्धिदि ॥ कामे वसन्ते काष्ठे स्यादुमो नगरघट्टयोः ॥ उमा० ॥

**सभा सभ्येषु शालायां, गोष्ठ्यां द्यूतसमूहयोः ।**
**स्वभूर्विष्णौ विधावामोऽपक्वे रुग्भेदरोगयोः ॥३०८॥**

**उमा गौर्यां हरिद्रायां, कीर्तिकान्त्यतसीष्वपि ।**
**ऊर्मिः पीडा जवोत्कण्ठाभङ्गप्रकाशवीचिषु ॥३०९॥**

---

घटनामासूत्रयञ्ज् जृम्भते । शुभो योगे । शोभते शुभः । नाम्युपान्त्य ५-१-५४ । इति कः । यथा-सिद्धः माध्यः शुभः शुक्लः । अजेपि मंखः । कस्याच्छुभापचितिबद्धधृतिस्त्वदन्यः । शुभं भद्रे । यथा-हरत्यघं संप्रति हेतुरिष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः । स्तंभः स्थूणांगजाड्ययोः । स्तभ्नाति स्तंभनं वा स्तंभः । द्वयोर्यथा-स्तंभं महान्तमुचितं सहसा मुमोच दानं ददावतितरां सरसाग्रहस्तः ॥३०७॥ सभा सभ्येषु शालायां गोष्ठ्यां द्यूतसमूहयोः । सन्यते सभा । सनेर्डित् (उ० ३३०) इति भः । सभ्येषु यथा-सभायां न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम् । शाला मन्दिरं तत्र यथा-व्यद्योतिष्ट सभावेद्यां गोष्ठ्यां स हृदयैः सह । आसनबन्धे यथा-सभामौषीन्महीपतिः। द्यूते यथा-सभायां तादृश्यां नरपतिशतैरक्षकितवैः समभ्याकीर्णायाम् । समूहे यथा-(प्र० प्रसभोद्धृता सरभसा सभां जयत्) प्रसभोद्धृतासुरसभोऽसभाजयत । स्वभूर्विष्णौ विधौ । स्वस्माद् भवति स्वभूः । क्विप् । पुंसि । द्वयोर्यथा-देयात्स्वभूर्भूतिमनिन्दितां वः । अथ मान्ताः । आमोऽपक्वे रुग्भेदरोगयोः । आमयति आमः अपक्वे वाच्यलिङ्गः । तत्र यथा-आमगोरस सम्पृक्त द्विदलं पुष्पितौदनम् । रुग्भेदे यथा-स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति । रोगमात्रे यथा-आमं निकामं प्रवदन्ति कामम् ॥३०८॥ उमा गौर्यां हरिद्रायां कीर्तिकान्त्यतसीष्वपि । अवति

**वस्त्रसंकोचलेखायां, क्रमः कल्पांह्रि-शक्तिषु ।**
**परिपाट्यां क्षमः शक्ते, हिते युक्ते क्षमावति ॥३१०॥**

उमा । अवेर्ह्स्वश्च वेति मो मव्यवोति ऊटो ह्रस्वत्वं च । गौर्यां यथा–उमामुखं तु प्रतिपद्यलोला । हरिद्रायाम् अतस्यां च यथा–समन्तादौ मीनैः पिहितपथमत्युच्चविटपैः । कीर्तिकान्त्योर्यथा–सोमालङ्कृतविग्रहो वृषगतिः श्रीशंकरः सर्वदा । ऊर्मिः पीडाजवोत्कण्ठाभङ्ग–प्रकाशवीचिषु । वस्त्र संकोचलेखायाम् । इर्यात्त ऊर्मिः । अर्त्तेरुर्च (उ० ७३६) इति मिः । सप्तस्वर्थेषु स्त्रीपुंसः । पीडोत्कण्ठयोर्यथा–कुसुमकार्मुककर्मकृतोर्मिभिर्न लभते निशिशर्ममृगेक्षणा । जवो वेगः वीचिः कल्लोलः । तयोर्यथा–अश्वाप्यधुर्वसुमतीमतिरोचमानाः तूर्णं पयोधय इवोर्मिभिरापतन्तः। भङ्गो विच्छित्तिः भङ्गे प्रकाशे वस्त्रसंकोचे लेखायां च यथा–वातनिर्मितवस्त्रोर्मिर्नर्मपात्रं बभूव सा ॥३०९॥ क्रमः कल्पांह्रि-शक्तिषु । परिपाट्याम् । क्रामन्ति अनेन क्रमः । कल्पो न्यायः शास्त्रं वा । न्याये यथा–कोऽयं क्रमो यत्परिहृत्य दक्षतां, प्रयाति विक्लव्यमनुत्तरं भवान् । शास्त्रे यथा–क्रममधीते । अंह्रौ चरणे यथा–क्रमपरिमिताभूमिर्विष्णोर्न गौर्न च लाङ्गलम् । शक्तौ यथा–राज्ये पुण्यैकसंसाध्ये किमर्थं क्रमसम्भ्रमम् । परिपाट्यां यथा–प्रचक्रमे वक्तुमनुज्झितक्रमः । परम्परा पादविक्षेपानन्तर्य-पदसन्धिष्वपि मखः । परम्परायां यथा–न श्रीः कुलक्रमायाता शासने लिखितापि वा । पादविक्षेपे यथा–न चित्रमुच्चैः श्रवसः पदक्रमम् । आनन्तर्ये यथा–क्रमेण निस्तीर्य च दोहदव्यथाम् । पदसन्धौ यथा–नारुद्धः(द्रः)क्रमपाठकः । क्षमः शक्ते हिते युक्ते क्षमावति । क्षमते क्षमः । वाच्यलिङ्गः । शक्ते यथा–सर्वोपकार-

**क्षमा क्षान्तौ क्षितौ कामं, बाढेऽनुमितिरेतसोः ।**
**कामः स्मरेच्छाकाम्येषु क्षुमा *स्यान्नीलिकातसी ।।३११।।**
**कृमिः क्रिमिश्च लाक्षायां, कीटे क्षेमस्तु मङ्गले ।**
**लब्धरक्षणे मोक्षे च, क्षेमोमा धनहर्यपि ।।३१२।।**

क्षममाश्रमं ते। हिते यथा–त्वत्पादपद्मप्रणतिः क्षमं परम् । क्षमायुक्ते यथा–न समयपरिरक्षणं क्षमं ते। क्षमावति सहिष्णौ यथा–परीषहक्षमो भिक्षुः ।।३१०।। क्षमा क्षान्तौ क्षितौ। क्षमते क्षमणं वा क्षमा द्वयोर्यथा–व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव। कामं बाढेऽनुमितिरेतसोः। कामयते कामम्। बाढे भृशे यथा–कामं कामं कुसुमधनुषोप्यावहन्ती सुशोके। लोकेऽनुमतौ यथा–कामं क्षाम्यतु यः क्षमी। अनुमितौ अव्ययमिति केचित्। रेतसि यथा–न शीघ्रकामः किल कामिनीप्रियः। कामः स्मरेच्छाकाम्येषु। कामयते कामनं काम्यतेऽसाविति वा वा कामः। इच्छायां पुंक्लीबः। स्मरे यथा–दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे। इच्छायां काम्ये इन्द्रियभोग्ये च यथा–न यातु कामः कामानामुपभोगेन शाम्यति। क्षुमा स्यान्नी(ना)लिकातसी। क्षौति अनया क्षुमा। क्षुहिभ्यां वा (उ० ३४१) इति कित् मः। द्वेऽपि ओषधी। अतस्यां यथा–क्षोमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु। अत्र हि क्षुमाया विकारः क्षौमम् ।।३११।। कृमिः क्रिमिश्च लाक्षायां कीटे। करोति कृमिः। कृभूभ्यां कित् (उ० ६९०) इति मिः। क्रामति–इति क्रिमिः। कमितमि (उ० १०७) इति इप्रत्ययोऽकारस्येत्वं च। पुंल्लीङ्गः। लाक्षायां यथा–केवलः कृमिरक्तोऽयम्। कीटे यथा–कर्दमेऽपि कृमिः। स्थास्नुः कल्पं जीवितुमिच्छति।

**क्षौमं स्यादतसीवस्त्रे दुकूलेऽट्टालकेऽपि च ।**
**खर्मं क्षौमे पौरुषे च गमोऽध्वद्यूतभेदयोः ॥३१३॥**
**सहृक्पाठेऽप्यथ ग्रामो, वृन्दे शब्दादिपूर्वकः ।**
**खड्गादौ संवसथे च, गुल्मः सैन्योपरक्षणे ॥३१४॥**

रामः काममुदंवराक्रिमिरसौ सर्वं विधत्तां पुनः । रोगेऽपि मंखः । पितघ्नं कफनाशनं कृमिहरम् । क्षेमस्तु मङ्गले । लब्धरक्षणे मोक्षे च । क्षयत्यनेन अशुभं क्षेमः । अर्त्तीरि इति मः । पुंक्लीबः। मङ्गले यथा—क्षेमं भद्रकलिङ्गशैलतनया तीरे लतावेश्मिनाम् । लब्धरक्षणे यथा – युवाभ्यामभिनिर्वृत्तयोगक्षेमस्य वज्रिणः । मोक्षे यथा—क्षेमं काङ्क्षति भिक्षवः । क्षेमोमा धनहर्यारि । उभा गोरो । धनहरी औषधभेदः ॥३१२॥ क्षौमं स्यादतसीवस्त्रे दुकूलेऽट्टालकेऽपि च । क्षुमाया विकारः क्षौमम् । क्षूयते वा । रुक्मग्रीष्म इति साधुः । पुंक्लीबः । अतसीवस्त्रे दुकूले च यथा—क्षौममाकुलतरावचकर्ष क्रान्तपल्लवमभीष्टतमेन । अट्टालके यथा—क्षौमाः क्षमन्ते हृदयन्त्रघातम् । खर्मं क्षौमे पौरुषे च । खनति खर्मं । रुक्मग्रीष्म (उ० ६४६) इति साधुः द्वयोर्यथा—खर्माभावो नीचसेवकेषु न परिधानेषु । गमोऽध्वद्यूतभेदयोः । सहृक्पाठेऽपि । गम्यतेऽस्मिन्ननेन वा गमः । सर्वेषु यथा—आगमशास्त्रमिवानेकगमं दुर्गमं नगरम् ॥३१३॥ अथ ग्रामो वृन्दे शब्दादिपूर्वकः । खड्गादौ संवसथे च । ग्रस्यते ग्रामः । ग्रसिहाकृभ्यां ग्राजिहौ च (उ० ३३९) इति मः । शब्दादिपूर्वको ग्रामशब्दो वृन्दिसमूहे वर्त्तते । आदिशब्दात् विषयास्त्रभूतेन्द्रियगुणादिग्रहः । तत्र संवसथे च यथा—उत्सन्नविषयग्रामास्थानादुज्ज्वलितद्विजाः । षड्गादौ यथा—स्फुटीभवद् ग्रामविशेषमूर्च्छनाम् । गुल्मः सैन्योपरक्षणे ।

**रुक्सैन्यघट्टभेदेषु, स्तम्बे गुल्मी पटौकसौ ।**
**आमलक्येलयोर्वन्यामथ घर्म्मो निदाघवत् ॥३१५॥**
**स्वेदाम्भस्यातपे ग्रीष्मोष्मणोर्जाल्मस्तु पामरे ।**
**असमीक्ष्यकारिणि च जामिः स्वसृकुलस्त्रियोः ॥३१६॥**

रुक्सैन्यघट्टभेदेषु स्तम्बे । गुप्यतेऽनेन गुल्मः । रुक्मग्रीष्म इति साधुः । पुंक्लीबः । सैन्योपरक्षणम्–रक्षास्थानकम् । तत्र यथा–गुल्मोऽपि जाल्मेन नतेन निर्ममे ॥३१४॥ रुग्भेद उदर्योव्याधिः । तत्र यथा–दहन्नप्यग्निना तुन्दं गुल्मिभिः पूज्यते भिषक् । सेनाभेदे यथा–न जाल्मो गुल्मान्तः प्रविशति भयाघ्रातहृदयः । घट्टभेदे (शुल्क) शुल्कस्थानभेदे यथा–ममापि नाम रावणस्य रक्षापेक्षाणि गुल्मकस्थानानि । स्तम्बो लताप्रतानवृक्षादिसमूहः। तत्र यथा–तृणगुल्मवनस्पतन्दी । गुल्मी पटौकसि । आमलक्येलयोर्वन्याम् । गौरित्वाद्ङीः । पटौको गुणलयनो तत्र यथा–गुल्मी न वल्मीकमहीषु कार्य्या । आमलकी एला च वृक्षौ । वनी ह्रस्वं वनम् । यथ घर्मो निदाघवत् । स्वेदांभस्यातपे ग्रीष्मोष्मणोः । घरति घर्मः । अत्तीरि इति मः । निदह्यन्तेऽनेन निदाघः । व्यञ्जनाद् घञ् ।५–३–१३२। न्यङ्क्वद्गमेघादयः ।४–१–११२। इति साधुः । घर्म उष्मणे उष्णे पुंक्लीवौ–अन्यत्र पुंसि । निदाघो ग्रीष्मे पुंक्लीबोऽन्यत्र पुंसि ॥३१५॥ स्वेदाम्भसि यथा – अघर्मधर्मोदकबिन्दुमौक्तिकैरलंचकारास्य वधूरहस्करः । स निदाघवंगमिव मातरिश्वना । आतपे यथा–विरचयसि च यान्तं मूर्द्धिन घर्मः कठोरः । बहलनिदाघग्लपितैः । ग्रीष्मे यथा– घर्मः प्रियावेषमिवोपदेष्टुम् । स्मरसंजीवनम् औषधं निदाघे । ऊष्मणि उष्णे यथा–घर्मा-

**जिह्मः कुटिले मन्दे च, जिह्मं तगरपादपे ।**
**तोक्मं कर्णमले तोक्मः, स्याद्धरिते हरिद्यवे ॥३१७॥**
**दमः स्यात्कर्दमे दण्डे, दमने दमथेऽपि च ।**
**दस्मस्तु हव्यवाहे स्याद् यजमाने मलिम्लुचे ॥३१८॥**

शोस्तस्य चोन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेः । निदाघधामानमिवाधिदीधितिम् । जाल्मस्तु पामरे । असमीक्ष्यकारिणि च । जलति जाल्मः । रुक्म ग्रीष्म (उ० ३४६) इति साधुः । वाच्यलिङ्गः । द्वयोर्यथा—दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते । जामिः स्वसृकुलस्त्रियोः । जमू अदने । जमति विरुद्धमिति जामिः । कमि वमि जमि (उ० ११८) इति णिदिः । स्त्रियाम् । द्वयोर्यथा—जामयोर्यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति क्षणादपि ॥३१६॥ जिह्मं (प्र० जिम्हः) कुटिले मन्दे च । जहाति मार्दवं हीयते वा जिह्मः । ग्रसिहांक्भ्यां ग्राजिहौ च (उ० २३९) इति मः । वाच्यलिङ्गः । द्वयोर्यथा—परस्य मर्माविधमुण्णता निजं द्विजिह्वतादोषमजिह्मगामिभिः । जिह्मं तगरपादपे । बाहुलकात् क्लीबे । तोक्मं कर्णमले । तूयते तोक्मम् । रुक्मग्रीष्म इति साधुः । तोक्मः स्याद्धरिते हरिद्यवे । हरितं हरिन्मात्रं तत्र वाच्यलिङ्गः। हरिद्यवे पुंक्लीबः । यन्मंखः । त्रिषु तोक्मं हरिन्मात्रे न स्त्रियाम्। हरिते यवे । हरिते यथा—ब्रह्मवर्चसकामस्य तोक्मास्तु समिधः स्मृताः । हरिद्यवे यथा—क्लीबात्क्रीणति तोक्मानि ॥३१७॥ दमः स्यात्कर्दमे दण्डे दमने दमथेऽपि च । दाम्यत्यनेन दमनं वा दमः । कर्दमे यथा—वर्षात्यये याति शमं दमौघः । दण्डश्चतुर्थोपायः। दमनं तर्णकादीनाम् । दमथ उपशमः। दण्डदमथयोर्यथा—

**धर्मो यमोपमापुण्यस्वभावाचारधन्वसु ।**
**सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि ॥३१९॥**

स दमेनेन्द्रियाणीव विजिग्ये रिपुभूपतीन् । दमने यथा—दमं मदकलादीनां वर्णयन्ति न वर्णिनः । दस्मस्तु हव्यवाहे स्याद्यजमाने मलिम्लुचे । दस्यत्यनेन दस्मः विलि भिलि इति मः । हव्यवाहोऽग्निः । यजमानः सत्री । मलिम्लुचश्चौरः धर्मो यमोपमापुण्यस्वभावाचारधन्वसु । सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि । धरति धर्मः । अर्त्तिरि (उ० ३३८) इति मः । स्वभावे पुंक्लीबः । अन्यत्र पुंसि वैजयन्ती तु धर्मो स्त्रीसुकृते साम्ये स्वभावे नानुसोमपे । न्यायाचारयमाशास्वित्याह । यमे यथा—धर्मः संचिन्त्य कर्माणि गतीर्भिन्नाः प्रयच्छति । उपमायां साम्ये यथा—विभिन्नशङ्खः कलुषीभवन्मुहुर्मदेन दन्तीव मनुष्यधर्मणः । पुण्ये यथा—धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनः प्रणुदां श्रुतीनाम् । स्वभावे यथा—विषयेषु विनाशधर्मिषु त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् । आचारे यथा—संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे । ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् । धन्वनि धनुषि यथा—स गुणेनापि धर्मेण मृगाणां मर्म विध्यते । सत्सङ्गे सज्जनसङ्गमे यथा—विनीतो धर्ममर्हति । अर्हति पञ्चदशे तीर्थकरे यथा – धर्मः प्रणतसौधर्मपतिप्रभृतिवासवः । अहिंसादौ यथा—न हिंस्यात्सर्वभूतानीत्येष धर्मः सनातनः । न्याये यथा—दशधर्मं न जानन्ति धृतराष्ट्रनिवोध तान् । मत्तः प्रमत्त उन्मत्तः शान्तः क्रुद्धो बुभुक्षितः । त्वरमाण(श्च)भीरुश्च लुब्धः कामी च ते दश । उपनिषदि यथा—एष (प्र० एक) त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकरिकः

**धर्मं दानादिके नेमस्त्वर्धे प्राकारगर्तयोः ।**
**अवधौ कैतवे काले, नेमिः कूपत्रिकाप्रधेः ॥३२०॥**
**तिनिशोऽरिष्टनेमिश्च, पद्म व्यूहे निधावहौ ।**
**संख्याब्जयोः पद्मभिभबिन्दौ ब्राह्मी तु भारती ॥३२१॥**

॥३१९॥ धर्मं दानादिके । दानादिकं पुण्यस्योपायो दानयागादिः । तत्र क्लीबे यथा–तानि धर्माणि प्रथमान्यासन् । नेमस्त्वर्धे प्राकारगर्तयोः । अवधौ कैतवे काले । नीयते नेमः । अर्तिरिस्तु (उ० ३३८) इति मः । अर्द्धे वाच्यलिङ्गः । तत्र यथा–नैमैर्नेमे नृपपरिहढै(वृद्धै)र्भूपतिलकः । नेमिः कूपत्रिकाप्रधेः । तिनिशोऽरिष्टनेमिश्च । नीयते नेमिः । नीसावृयुशृ (उ० ३८७) इति मिः । कूपत्रिकायां प्रधौ च स्त्रियाम् । तिनिशेऽरिष्टनेमौ च पुंसि । कूपत्रिका कूपस्योपरि रज्ज्वादि बन्धनार्थं त्र्यस्रं दारु । तत्र यथा–विभाव्यतेऽग्रे कूपोऽसौ नेमिचीत्कारसूचितः । प्रधिश्चक्रधारा तत्र यथा–नीचैर्गच्छत्युपरि च दशा चक्रनेमि-क्रमेण ॥३२०॥ तिनिशो वृक्षभेदः । अरिष्टनेमिर्द्वाविंशस्तीर्थंकरः। तत्र यथा–नेमिः कल्पतरुः सतामविकलं देयात्तदग्र्यंफलम् । पद्मो व्यूहे निधावहौ । संख्याब्जयोः । पद्यते पद्मः । अर्तिरि इति मः । संख्यायामब्जे च पुंक्लीबः । अन्यत्र पुंसि । व्यूहे यथा–पद्मेनैव च व्यूहेन निविशते सदा स्वयम् । निधिर्निधिभेदः। तत्र यथा–महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । अहिरहि-विशेषस्तत्र यथा–कर्कोटः कोटिकृत्वः प्रणमति पुरतस्तक्षके देहि चक्षुः । पद्मः सद्म प्रयातु । संख्याविशेषे यथा–पद्मसंख्याह या यस्य । अब्जे यथा – चन्द्रं गतापद्मगुणान्नभुङ्क्ते पद्माश्रिता चान्द्रमसी-मभिख्याम् । लक्ष्म्यामपि तत्र स्त्रियाम् । तत्र यथा–पद्मा

**शाकभेदः [1]पङ्कगडी हिञ्जिका सोमवल्लरी ।**
**ब्रह्मशक्तिर्भ्रमस्तु स्याद्भ्रमणे वारिनिर्गमे ।।३२२।।**
**भ्रान्तौ कुन्दाख्ययन्त्रे च, [2]भीमो घोरे वृकोदरे ।**
**हरेऽम्लवेतसे चाथ भीष्मो गाङ्गेयरुद्रयोः ।।३२३।।**

पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् । पद्ममिभबिन्दौ । गजस्य चत्वारिंशद्वर्षदेशीयस्य गात्रे शोणा बिन्दव उत्पद्यन्ते । तत्र पद्म शब्दो वर्तते । सर इव गजगात्रं पद्मपात्रं बभूव । ब्राह्मी तु भारती शाकभेदः पङ्कगडी हिञ्जिका सोमवल्लरी । ब्रह्मशक्तिः। ब्रह्मण इयं ब्राह्मी । तस्येदम् । ६।३।१६० । इत्यणि ब्रह्मणः । ७।४।५७। इत्यन्त्यस्वरादिलोपः । भारत्यां यथा–येषां त्वद्वद-नावलोकनविधौ न ब्राह्मि जिह्मं मनः । पङ्कगंडी हिञ्जिका सोमवल्लरी च । तिस्रोऽप्योषधयः । ब्रह्मशक्तिर्मातृभित् तत्र यथा–ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। भ्रमस्तु स्याद् भ्रमणे वारिनिर्गमे भ्रान्तौ कुन्दाख्ययन्त्रे च । भ्रमणं भ्रमत्यनेन वा भ्रमः । भ्रमणे वारिनिर्गमे च यथा–भ्रमागतै-रम्बुधिरम्बुराशिः ।।३२२।। भ्रान्तिरतस्मिंस्तद्ग्रहः । मूर्च्छा च । अतस्मिंस्तद्ग्रहे यथा–शीतांशुकोटिभ्रमं बिभ्राणैरुदपादिराहु भुवने भूयात् सुभिक्षोत्सवः । मुर्च्छायां मोहे स्त्रीपुंसः । तत्र यथा–यष्टीपरुषकं हन्ति रक्तपित्तानलभ्रमम् । कुन्दाख्ययन्त्रे यथा–आरोप्य चक्रभ्रममुष्णतेजाः। छत्रेपि मंखः । यथा–शुशुभे शारदो राजा सिताभ्रभ्रमसंगमात् । भीमो घोरे वृकोदरे । हरेऽम्लवेतसे च । बिभ्यत्यस्मादिति भीमः । भियः षोऽन्तश्च वा (उ० ३४४) इति किन्मः । घोरे भयानके वाच्यलिङ्गः ।

१ प्र० गण्डी । २ मु. मू० भाम क्रोधे रुचौ रवौ। भीमो० ।

**राक्षसे भीषणे *भौमोऽङ्गारके नरकासुरे ।**
**यमः कालयमजयोरहिंसादिषु पञ्चसु ॥३२४॥**
**संयमे यमने ध्वाङ्क्षे, यामौ प्रहरसंयमौ ।**
**रमः कान्ते रक्ताशोके, मन्मथे च रमा श्रियाम् ॥३२५॥**

तत्र यथा—भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् । वृकोदरे यथा—उत्तं सयिष्यति कचांस्तव देवि भीमः । हरे रुद्रे यथा—संध्याताण्डवडम्बरं विदधतो भीमस्य चण्डभ्रमे: । अम्लवेतसो वृक्षः । अथ भीष्मो गाङ्गेयरुद्रयोः । राक्षसे भीषणे । बिभ्यत्यस्मादिति भीष्मः । भियः षोन्तश्च वा (उ० ३४४) इति किन्मः । गाङ्गेये यथा—धुन्वन् धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः । रुद्रराक्षसयोर्यथा—श्रीभीष्मपादप्रणयी स भीष्मः॥३२३॥ भीषणे वाच्यलिङ्गः । तत्र यथा—भीष्मग्रीष्मर्तुसन्तापशून्यरथ्यान्तरस्थयोः । भोमोऽङ्गारके नरकासुरे । भूमेरपत्यं भौमः शिवाद्यण । अङ्गारके यथा—भौमदिनमभिदधत्यथवा । भृशमप्रशस्तमपि मङ्गलं जनाः । नरकासुरे यथा—त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् । यमः कालयमजयोरहिंसादिषु पञ्चसु संयमे यमने ध्वाङ्क्षे । यच्छति यमः । अच् यमनं वा न वा क्वपा ५।३।४८ । इत्यल् काले यथा—यमः स्वैरी वैरी तदपि न हितं कर्म विहितम् । यमजो यमलजातः । तत्र वाच्यलिङ्गः सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ । अहिंसादिषु यथा—अहिंसासूनृतास्तेयब्रह्माकिञ्चनता यमाः ॥३२४॥ संयमे यथा—नियमो यमश्च नियतं यतिं यथा—यमने यथा—कृत्वा प्राणयमं योगी । अत्र हि प्राणस्य वायोर्यमनं नियन्त्रणमित्यर्थः । ध्वाङ्क्षे

*भूमिः क्षितौ स्थानमात्रे । भौमो०।

**रश्मिघृणिप्रग्रहयो, रामः श्यामे हलायुधे ।**
**पशुभेदे सिते चारौ, राघवे रेणुकासुते ।।३२६।।**

काके यथा—यमोऽपि हन्यते घूकैः । यामौ प्रहरसंयमौ । याति यामः । अर्ति रि इति मः यम्यतेऽनेन वा । प्रहरे यथा—संक्षिप्येरन् क्षण इव कथं दीर्घयामास्त्रियामाः । संयमे यथा—यामः काममपाकरोति कलुषम् । रमः कान्ते रक्ताशोके मन्मथे च । रमयति रमते वा रमः । कान्तो भर्ता । त्रिष्वपि यथा—रमो रमयते मनः रमा श्रियाम् । यथा पार्वती परमेश्वरी । अत्र हि पार्वतीपः शम्भुः । रमेश्वरो विष्णुरित्यपि व्याख्यानम् ।।३२५।। रश्मिघृणिप्रग्रहयोः । अश्नुते रश्मिः । अशोरश्चादेः इति मिः । घृणिः किरणस्तत्र पुंसि । प्रग्रहो रज्जु सूत्र स्त्रियाम् । घृणौ यथा—रसात्मकस्योडुपतेश्च रश्मयः । प्रग्रहे यथा—सयत्नसूतायतरश्मिभुग्नग्रीवान्तसंसक्तयुगैः सुरङ्गैः । रामः श्यामे हलायुधे । पशुभेदे सिते चारौ राघवे रेणुकासुते । रमते रामः । वा ज्वलादि ५–१–६२ इति णः । श्यामे सिते चारौ च गुणे पुंसि । तद्वति वाच्यलिङ्गः । श्यामे यथा—रामेण निहतं दृष्ट्वा वने परशुना मृगम् । स्वकीयं निन्दति व्याधो विश्वकर्माणमर्जुनम् । अत्र हि रामेण श्यामेन परस्य अन्यस्य शुना सारमेयेण निहतं मृगं दृष्ट्वा स्वकीयमर्जुनं धवलं विश्वकर्माणं श्वानं व्याधो इत्यर्थः । विगतं श्वकर्मसारमेयकर्म यस्यासौ विश्वकर्मा तं विश्वकर्माणम् । हलायुधे यथा—ओष्टेन रामो रामौष्टबिम्बचुम्बनचञ्चुना । पशुभेदे शरभेदे यथा—रामसेविताप्यसीता । सिते शुभ्रे यथा—प्रकटितरामाम्भोदः कौशिकवान् सपदि लक्ष्मणानन्दी। सुखापनयनहेतोरयमवतीर्णः शरत्समयः । चारौ मनोज्ञे यथा—

**रामं तु वास्तुके कुष्ठे, रामा हिङ्गुलिनीस्त्रियोः ।**
**रुक्मं लोहे सुवर्णे च, रुमा स्याल्लवणाकरे ।।३२७।।**
**सुग्रीवपत्न्यां लक्ष्मीः, श्रीशोभासंपत्प्रियङ्गुषु ।**
**वमिर्वान्तेऽनले वामः, कामे सव्ये पयोधरे ।।३२८।।**

रामो निजगुणै रामः । राघवे यथा– रामेण प्रियजीवितेन नु कृतं प्रेम्णः प्रियेनोचितम् । रेणुकासुते भार्गवे यथा–अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददो । ।।३२६।। रामं तु वास्तुके कुष्ठे । वास्तुकं शाकविशेषः । कुष्ठम् ओषधभेदः । रामा हिङ्गुलिनीस्त्रियोः । हिङ्गुलिनो ओषधिभेदः । स्त्रियां यथा– सत्यं मनोरमा रामाः । रुक्मं लोहे सुवर्णे च । रोचति रुक्मम् । रुक्म ग्रीष्म (उ० ३४६) इनि साधुः । सुवर्णे यथा–अधिरुक्म-मन्दिरगवाक्षमुल्लसत्सहशो रराजमुरजि दिहक्षया । रुमा स्याल्ल-वणाकरे । सुग्रीवपत्न्याम् । रौति रुमा । विलिभिलि (उ० ३४०) शति कित् मः । लवणाकरे यथा–रुमाभूमौ सर्वं पतितमिह जायते लवणम् ।।३२७।। लक्ष्मीः श्रीशोभासंपत्प्रियङ्गुषु । लक्ष्यतेऽनया लक्ष्मीः । लक्षेर्मोन्तश्च (उ० ७१५) इति ईः । श्रियां यथा– शय्यामाजिङ्ग्यनीतं वपुरलसलसद्बाहुलक्ष्म्याः पुनातु । शोभायां यथा–मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । सम्पदि समृद्धौ यथा–लक्ष्मीं तृणाय मन्यन्ते तद्भरेण नमन्ति च । प्रियङ्गुर्लता । वमिर्वान्तिनले । वमनं वम्यते वा वमिः । पदि पठि (उ० ६०७) इति इः । वान्ते वमने स्त्रियाम् । अनले वह्नौ पुंसि द्वयोर्यथा– वमौ संजातायां भवति वमिना स्वेदकरणम् । वामः कामे सव्ये पयोधरे उमानाथे प्रतिकूले चारौ । वाति वामः । अर्ति रि इति मः । सव्ये प्रतिकूले चारौ च वाच्यलिङ्गः । कामे

**उमानाथे प्रतिकूले, चारौ वामा तु योषिति ।**
**वामी शृगाल्यां करभीरासभीवडवासु च ॥३२९॥**
**शमी द्रुभेदे वल्गुल्यां, शिम्ब्यां श्यामोऽम्बुदे शितौ ।**
**हरिते प्रयागवटे कोकिले वृद्धदारके ॥३३०॥**

उमानाथे च यथा—वामदेवेन वामो यं नामशेषो विनिर्ममे । सव्ये दक्षिणेतरे यथा—विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा। पयोधरे यथा—मृद्यन्ते निर्दयं वामाः । कामिनेव जिगीषुणा ॥३२८॥ प्रतिकूले यथा—वाम एव सुरतेष्वपि कामः। चारौ रम्ये यथा—किन्नाम वामनयना न समाचरन्ति । वामा तु योषिति । यथा—वामा वामविलोचना । वामी शृगाल्यां करभीरासभीवडवासु च। गौरादित्वाद् ङीः । शृगाल्यां करभ्यां वडवायां च यथा—तवामी वामीभिर्नृपतिलककीर्णाः परिसराः । रासभ्यां यथा—अथोष्ट्रवामी शतहरितार्थम् ॥३२९॥ शमी द्रुभेदे वल्गुल्यां शिम्ब्याम् । शाम्यति शमी गौरादित्वाद् ङीः । द्रुभेदे यथा—शमीमिवाभ्यन्तरलीन पावकाम् । शिम्बी बीजकोशः । तत्र यथा—कपिकच्छूशमीमिव । फलपूर्णा शाखाशिम्बीति मंखः । यथा—न्यग्रोधशम्य इव केन वृथा प्रणीताः श्याम्मोऽबुदेशितौ । हरिते प्रयागवटे कोकिले वृद्धदारके । श्यायतेश्यामः विलि भिलि (उ० ३४०) इति मः । शितौ कृष्णे हरिते नीले च गुणमात्रे पुंसि तद्वति वाच्यलिङ्गः । अम्बुदे यथा—श्यामश्यामलवालकोमलदलैरम्यते मालावली । शितौ यथा-नवजलधरश्यामाः पश्यन्दिशो भवतीं विना । हरिते यथा—कुवलयदलश्यामोऽप्यङ्गं दधत्परिधूसरम् । प्रयागवटे यथा—सोऽयं वटः श्याम इति प्रसिद्धः । कोकिले यथा—श्यामः शाम्यति नैव

**श्यामं सैन्धवे मरिचे, श्यामा सोमलतानिशोः ।**
**शारिवा*वल्गुनीगुन्द्रा-त्रिवृत्कृष्णाप्रियङ्गुषु ॥३३१॥**
**अप्रसूतस्त्रियां नील्यां, श्रामो मण्डपकालयोः ।**
**शुष्ममोजसि सूर्ये च, समं साध्वखिलं सदृक् ॥३३२॥**

श्यश्चमरवाद् । वृद्धादारक औषधम् ॥३३०॥ श्यामं सैन्धवे मरिचे। सैन्धवं लवणम् । मरिचमूषणम् । श्यामा सोमलतानिशोः । शारिवावल्गुनीगुन्द्रात्रिवृत्कृष्णाप्रियङ्गुषु । अप्रसूतस्त्रियां नील्याम् । सोमलता सोमवल्लरी । निशा रात्रिस्तत्र यथा–श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैः । शारिवा ओषधिः । वल्गुली पक्षिविशेषस्तत्र यथा–श्यामेव लम्बते प्लक्षे । गुन्द्रा मुस्ता । त्रिवृत् ओषधी । कृष्णाकृष्णजीरकम् । प्रियङ्गुः फलिनीलता । तत्र यथा–श्यामा स्वङ्गं चकितहरिणी प्रेक्षिते दृष्टिपातान् ॥३३१॥ अप्रसूतस्त्री अविज्ञाता स्त्री । तत्र यथा–तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी । नीली गुलिका । श्रामो मण्डपकालयोः । श्राम्यन्ति अत्रेति श्रामः । बाहुलकाद् वृद्धिः । शुष्ममोजसि सूर्ये च । शुष्यत्यनेन शुष्मम् । विलि भिलि (उ० ३४०) इति कित् मः । द्वयोर्यथा–क्षितिपतिः शुष्मेण शुष्माधिकः । समं साध्वखिलं सदृक् । समति समम् । वाच्यलिङ्गः । साधौ यथा–ब्राह्मीयं दौर्जनी संसत् वन्दनीया समेखला । अखिले समस्ते यथा–यातः समेषामुपजीव्यतां यः । सदृशे यथा–श्रिया समातां प्रतिमेन काचन । वर्षेऽपि । तत्र स्त्रियाम् । यथा–तेनाष्टौ परिगमिताः समाः कथंचिद् बालत्वादवितथसूनृतेन सूनोः ॥३३२॥ सीमा घाटे स्थितौ क्षेत्रे । सिनोति सीमा । सेरी

*प्र० वल्गुली० ।

**सीमाघाटे स्थितौ क्षेत्रे, सूक्ष्मोऽणौ सूक्ष्ममल्पके ।**
**अध्यात्मे कतके सोमस्त्वौषधी तद्रसेन्दुषु ।।३३३।।**
**दिव्यौषध्यां घनसारे समीरे पितृदैवते ।**
**वसुप्रभेदे सलिले, वानरे किन्नरेश्वरे ।।३३४।।**

---

च वेति मः (उ० ३४३) आघाटे अवधौ यथा–ग्रामो नास्ति कुतः सीमा। स्थितौ मर्यादायां यथा–सीमां नैव विलङ्घयन्ति सुजनाः कृच्छ्रेऽपि जाते क्वचित् । क्षेत्रे यथा–सीमाः पक्वफला विभान्ति परितः साधोर्यथा सत्क्रियाः । विषयकेशभूषणयोरपि मंखः । क्रमेण यथा–सीमां यदा याति दृशोः कृशाङ्गी । सीमा भूषितसीमन्ताः । सूक्ष्मोऽणौ । सूच्यते सूक्ष्मः । रुक्म ग्रीष्म (उ० ३४६) इति साधुः अणुः परमाणुः । यथा–सूक्ष्मो न लक्ष्यो दृशा । सूक्ष्ममल्पके । अध्यात्मे कतके । अल्पके तनुतरे वाच्यलिङ्गः । यथा–निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणा । अध्यात्मं अन्तरात्मविषयं रूपम् । तत्र यथा–सूक्ष्मत्वं वा तदपि सदसद्-व्यक्त्यभावादचिन्त्यम् । कतकं कतकवृक्षफलम् सोमस्त्वौषधी तद्रसेन्दुषु। दिव्यौषध्यां घनसारे समीरे पितृदैवते । वसुप्रभेदे सलिले वानरे किन्नरेश्वरे। सूयते सोमः । अर्तिरि (उ० ३३८) इति मः । एकादशस्वर्थेषु । ओषधी श्यामलता । तत्र यथा–याहि मुनय इह सोमरसं रसयन्ति संयमधनास्त्वमत्र कः। तद्रसः सोम-वल्लीरसः। तत्र यथा–याज्ञिकैः सोमपायिभिः । इन्द्रौ यथा–शिरसा धार्यमाणोपि सोमः सोमेन शम्भुना ।।३३३।। दिव्यौषधि वावचिका । घनसारः कर्पूरः। समीरो वायुः। पितैव दवतं पितृदैवतं पूर्वज इत्यर्थः। वसुप्रभेदो देवविशेषः । यदाह–धीरो ध्रुवश्च सोमश्च अहश्चैवानलोनलः। प्रत्यूषश्च प्रभावश्च वसवो-

**हिमं तुषारे शीते च, हिमश्चन्दनपादपे ।**
**होमिः सर्पिषि वह्नौ च, स्यादर्य्यः स्वामिवैश्ययोः ।।३३५।।**
**अर्थ्यं *शिलाजतुन्यर्थशालिनि न्यायविज्ञयोः ।**
**अन्योऽसदृशेतरयोरन्त्यस्त्वन्तभवेऽधमे ।।३३६।।**

ऽष्टौ प्रकीर्तिताः । सलिलं जलम् । वानरः कपिः । किन्नरेश्वरो धनदः ।।३३४।। हिमं तुषारे शीते च । हिनोति हिमम् । क्षुहिभ्यां वा (उ० ३४१) इति कित् मः । तुषारे पुंक्लीबः । शीते वाच्यलिङ्गः । तुषारे यथा–मार्गे शिलीभूतहिमेऽपि यत्र । शीते यथा–हिमांशुमाशु ग्रसते । हिमश्चन्दनपादपे । यथा–मलय एष हिमद्रुममुद्रितः । होमिः सर्पिषि वह्नौ च । हूयते होमिः । नीसा (उ० ६८७) इति बहुवचनात् मिः । स्त्रियाम् द्वयोर्यथा–जुहोमि होमौ स्वयमद्य होमिम् । अथ यान्ताः । स्यादर्य्यः स्वामिवैश्ययोः। अर्यतेऽर्य्यः । स्वामिवैश्येऽर्यः । ५–१–३३ इति साधुः । द्वयोर्यथा–ब्रह्मक्षत्रार्य्यशूद्राणामयं प्रासूत नन्दनम् ।।३३५।। अर्थ्यं शिलाजतुन्यर्थशालिनि न्यायविज्ञयोः । अर्थ्यतेऽर्थ्यम् अर्थे साधु वा । तत्र साधौ ७–१–१५ इति यः । अर्थादनपेतं वा । न्यायार्थादनपेते ७–१–१३ इति यः । शिलाजतुनि क्लीबेऽन्यत्र वाच्यलिङ्गः । शिलाजतु धातुभेदः । अर्थशालिनि न्याय्ये च यथा–वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे । विज्ञे विपश्चिति यथा–अर्थ्यानामर्थिकां वाचं वदन्त्यापद्गताऽपि भुवि । अन्योऽसदृशेतरयोः । अनिति अन्यः । स्थाच्छामा (उ० ३५७) इति यः । वाच्यलिङ्गः । असदृशेऽसाधारणे यथा–तन्वङ्ग्यास्तरुणिम्नि सर्पति बलादन्येव काचिद्गतिः । इतरस्मिन् यथा–अन्यापि किं सखि न भाजनमादृशानां वैरी भवेत् । यदि न वेपथुरन्तरायः ।

*संप्राप्यें

**अर्घ्यमर्घार्थमर्घार्हमास्यं मुखभवे मुखे ।**
**मुखान्तरास्या तु स्थित्यामार्य्यो सज्जनसौविदौ ॥३३७॥**
**आर्योमाच्छन्दसोरिज्या दाने सङ्गेऽध्वरेऽर्चने ।**
**इभ्यो धनवतोभ्या तु, करेण्वां सल्लकीतरौ ॥३३८॥**

अन्त्यस्त्वन्तभवेऽधमे । अन्त्ये भवोऽन्त्यः दिगादित्वाद्यः। वाच्यलिङ्गः अन्तभवे यथा–क्रियते कथमन्त्यमण्डनम् परलोकान्तरितस्य ते मया । अधमे यथा–अन्त्येषु जन्तुषु च यस्तमसावृतेषु विश्वस्यधातरि समः परमेश्वरेऽपि ॥३३६॥ अर्घ्यमर्घार्थमर्घार्हम् । अर्घाय इदम् अर्घ्यम् । पाद्यार्घ्ये । ७-१-२३ इति साधुः । अर्घमर्हति वा । दण्डादित्वाद् यः । वाच्यलिङ्गः । अर्घः पूजाविधिर्मूल्यं च । तदर्थम्–तदर्हं च अर्घार्थम् अर्घार्हं च । अर्घार्थे यथा–अर्घ्यं वारि समादाय । अर्घ्यो गौः । विक्रेतव्य इत्यर्थः । अर्घार्हे यथा-तमर्घ्यमर्घादिकयादिपुरुषः। अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते । आस्यं मुखभवे मुखे । मुखान्तः । आस्ये भवम् । दिगादित्वाद् यः । व्यञ्जनात्पञ्चमान्तस्थ १–३–४७ इति प्रकृति य लोपः । अस्यत्यनेन वा । शिक्यास्य (उ० ३६४) इति साधुः । मुखभवे यथा–आस्येन हास्यं दशानेन चक्रे । मुखे यथा–तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि । मुखान्तर्मुखमध्ये यथा–आस्यं विकास्य विकृतं विकृतोग्रदंष्ट्रम् । आस्या तु स्थित्याम् । आसनम् आस्या । आस्यटिव्रज्यजः क्यप् ५–३–९७ यथा उत्तिष्ठ धृष्ट झटितीह वृथा किमास्य । आर्यौ सज्जनसौविदौ । अर्यति आर्यः । ऋवर्ण व्यञ्जनाद् घ्यण् । सज्जने यथा–मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु । सौविदे यथा–अन्तःपुरं समर्याद-मार्यैरेव हि कार्यते । ज्येष्ठभ्रातर्यपि । यथा–उन्मीलत्ययमार्यदो-

**कल्यं प्रभाते मधुनि, सज्जे दक्षे निरामये ।**
**कल्या कल्याणवाची स्यात्कश्यं कशार्हमद्ययोः ॥३३९॥**
**अश्वमध्ये क्षयो गेहे, कल्पान्तेऽपचये रुजि ।**
**कन्या नार्य्यां कुमार्य्यां च राश्यौषधिविशेषयोः ॥३४०॥**

बलदलत्कोदण्डकोलाहलः ॥३३७॥ आर्योमाच्छन्दसोः । उमायां यथा—आर्यायै भारत्यै नमो नमोऽस्तु विष्टरश्रवसे । छन्दसि यथा-जघनचपलाप्यनार्या । इज्या दाने सङ्गेऽध्वरेऽर्चने यजीं देवपूजादौ यजनम् इज्या । आस्यटि ४–३–९७ इति क्यप् । सर्वेषु यथा—सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः । इभ्यो धनवति । इभमर्हति इभ्यः । दण्डादित्वाद् यः । इभे साधुर्वा । यथा महेभ्यः सभ्योऽसौ भवतु भवतो निर्णयपदम् । इभ्या तु करेण्वां सल्लकीतरौ द्वयोर्यथा—इभ्यामिभ्यो ध्यायति ॥३३८॥ कल्यं प्रभाते मधुनि सज्जे दक्षे निरामये । कल्यते कल्यम् स्थाच्छामा (उ० ३५७) इति यः । प्रभाते क्लीबे । मधुनि स्त्रीक्लीबः । अन्यत्र वाच्य-लिङ्गः । प्रभाते निरामये च यथा—कल्ये कल्यः कल्यवत्तं विधत्ते । मधुनि यथा – कल्यपालगृहं गत्वा । सज्जे दक्षे च यथा—काला—कारान्धकाराननपतितजगत्साध्वसध्वंसकल्याः कल्याणं वः क्रियासु । कल्या कल्याणवाची स्यात् । कल्याणी चासौ वाक् च कल्याणवाक् तस्याम् । यथा—कल्याणं कल्यया च क्रुर्वन्दिनो मेदिनिपतेः । कश्यं कशार्हमद्ययोः अश्वमध्ये । कशामर्हति कश्यः । दण्डादेर्यः । ६–४–१७८ कशदेशे साधु वा ॥३३९॥ अश्वमध्यम् अश्वमध्यप्रदेशः । त्रिष्वपि यथा—अवश्यं कश्यं यैः परिहृतमि-तस्तैर्न पतितम् । क्षयो गृहे (प्र० गेहे) कल्पान्तेऽपचये रुजि । क्षियन्ति निवसन्ति (निवसयन्ति) क्षयन्ति (श्रावति) विनश्यन्त्यत्रेति क्षयः ।

**कक्ष्या गृहप्रकोष्ठे स्यात्साद्दश्योद्योगकाञ्चिषु।**
**बृहतिकेभ्यनाड्योश्च, कार्यः हेतौ प्रयोजने ॥३४१॥**

क्षयणं क्षीयतेऽनेन वा। मृत्यवेपि मंखः। तत्र गेहे च यथा–पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः। कल्पान्ते यथा–क्षयकालनिराकुलः क्षती। अपचये रुजि च यथा–अयथाबलमारम्भो निदानं क्षयसंपदः। कन्या नार्य्यां कुमार्यां च राश्योषधिविशेषयोः। कनति दीव्यते कन्या। स्थाच्छा (उ० ३५७) इति यः। नार्यां यथा–विदेहकन्याकुचकुम्भकोटिकठोरतासाक्षिणिसायको यः। कुमार्यां यथा–सकृत्कन्याः प्रदीयन्ते। राशिविशेषे यथा–कन्यागत इति सविता नहि दुष्यति वचनमात्रेण। ओषधिविशेषः कुमारीनाम ॥३४०॥ कक्ष्या गृहप्रकोष्ठे स्यात्साद्दश्यो-(सदृशो)द्योगकाञ्चिषु। बृहतिकेभनाड्योश्च। शिक्यास्याढ्य (उ० ३६४) इति साधुः। कक्षायां भवा वा दिगादित्वाद् यः। गृहप्रकोष्ठे गृहमध्यप्रदेशे यथा–कक्ष्यान्तराण्यद्रिपतेर्विवेश। साद्दश्ये यथा–अम्भोजकक्ष्यामवगाहते मुखम्। उद्योगे उद्यमे यथा–परार्थबद्धकक्ष्याणां त्वादशामुद्भवः कुतः। काञ्च्यां स्त्रीणां मेखलायां यथा–कक्ष्यावबद्धसिचया किमियं न शेते। उपलक्षणात् पुंसां सा रसनेऽपि। यथा–परिधानाद् बहिः कक्ष्यानिबद्धा ह्यासुरी भवेत्। बृहतिकायां यथा–कक्ष्यापटस्तुहिनपक्षविपक्षभूतः। इभनाड्यां यथा–युधि परैः सहृदृढबद्धकक्ष्यया कलत्कणन्मधुपकुलोपगीतया। अदीयत द्विपघटया सवारिभिः। अकरोदरः स्वयमथ दानमक्षयम्। स्पर्धा प्रतिज्ञातुलास्वपि मंखः। स्पर्धाप्रतिज्ञयोर्यथा–सतुल्यकक्ष्यो रिपुणा धनंजयः। तुलायां यथा–वणिजः कृपणः कोऽन्यः कक्ष्या–प्रग्राहचारिणः। कार्यं हेतौ प्रयोजने। क्रियते कार्यम्। हेतुः

**कायः कदैवते मूर्तौ, सङ्घे लक्ष्यस्वभावयोः ।**
**कायं मनुष्यतीर्थे च, काव्या स्यात्पूतनाधियोः ।।३४२।।**
**काव्यं ग्रन्थे काव्यः शुक्रे, कांस्यं तैजसवाद्ययोः ।**
**पानपात्रे मानभेदे, क्रियाकरणचेष्टयोः ।।३४३।।**

प्रवृत्तिकारणम् । प्रयोजनं प्रवृत्तिसाध्यं फलम् । द्वयोर्यथा—त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरुयोगिनामपि ।।३४१।। कायः कदैवते मूर्तौ सङ्घे लक्ष्यस्वभावयोः । को ब्रह्मा देवताऽस्य कायः । कः सोमाट्ट्यण् ६-२-१०७ चीयते वा चिति देहो वा सोपसमाधाने कश्चादेरिति घञ् । केनाद्यते (प्र० केनाट्यते)वा कदैवते वाच्यलिङ्गः । तत्र यथा—कायं हविर्निर्वपतीह यज्ञा । मूर्तौ देहे यथा—कायः सन्निहितोपायः । सङ्घे यथा—जयाय केषां न सहायकायः । कायं मनुष्यतीर्थे च । मूलेऽङ्गुष्ठस्य स्याद्ब्रह्म तीर्थं कायं कनिष्ठयोः । काव्या स्यात् पूतनाधियोः । कूयते काव्या । शिक्यास्या (उ० ३६४) इति साधुः पूतना राक्षसीविशेषः । धीर्बुद्धिः । द्वयोर्यथा—वासुदेव इव क्षतकाव्यादरः ।।३४२।। काव्यं ग्रन्थे काव्यः शुक्रे । कवेर्भावः कर्म वा काव्यम् । राजादित्वाद्यण् । कवेरपत्यं काव्यः । कुर्वादेर्ञ्यः । ६-१-१०० द्वयोर्यथा—सर्वथा सुरसम्बद्धं काव्यं यो नाभिनन्दति । कांस्यं तैजसवाद्ययोः । पानपात्रे मानभेदे । कंसायेदं कंसीयम् । परिणामिनि तदर्थे ७-१-४४ इति ईयः । कंसीयस्य विकारः कांस्यम् । कंसीयाञ्ञ्यः ६-१-४१ इति ञ्यो यलुक् च । तैजसवाद्ययोर्यथा—श्रुतिपथगतेन सत्यं कांस्यं ध्वनिनेव सुजनचरितेन । पानपात्रे मानभेदे च यथा—कांस्यैर्घृतं दास्यति दास्यसी ते । क्रिया करणचेष्टयोः । जर्मोपाय चिकित्सासु

**कर्मोपायचिकित्सासु, निष्कृतौ सम्प्रधारणे ।**
**अर्चाप्रारम्भशिक्षासु, कुल्यं तु कुलजेऽस्थनि ।।३४४।।**

निष्कृतौ सम्प्रधारणे । अर्चाप्रारम्भशिक्षासु । करणं क्रियते । क्रियते ऽनया वा क्रिया । कृगः श च वा । ५–३–१०० । इति शः दशस्वर्थेषु । करणे निष्पादने यथा–व्रजन्ति विद्याधरसुन्दरीणा-मनङ्गलेखक्रिययोपयोगम् । चेष्टायां कायकृते व्यापारे यथा–स्तम्भे स्यान्निष्क्रियो जन्तुः प्रलये गतचेतनः ।।३४३।। कर्मणि वचनादिव्यापारे यथा – द्वन्द्वानि भावक्रियया विवव्रुः । उपाये यथा–सप्तसामादिकाः क्रियाः सामदानभेददण्डाः माया उपेक्षा इन्द्रजालञ्चेति । चिकित्सायां यथा–पुनर्ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा । निष्कृतौ प्रायश्चित्तादिना संशोधने यथा–महा-पातकिनां पुंसां भवेत्प्राणान्तिकी क्रिया । सम्प्रधारणे विचारे यथा–क्रियां विना लोऽभिजानाति कृत्यम् । अर्चायां पूजायां यथा–तां देवतापित्रतिथिक्रियार्थामन्वग् ययौ मध्यमलोकपालः। प्रारम्भे आदिकर्मणि यथा–मन्त्रमूलाक्रिया राज्ञाम् । शिक्षायां यथा–अवन्ध्ययत्नाश्च बभूवुरर्भके क्रिया हि वस्तूपहिता प्रसीदति । धात्वर्थाख्यातसंस्कारौर्द्ध्वदेहिकेष्वपि मंखः । धात्वर्थे यथा–क्रियार्थो धातुः आख्यातेत्यात्याद्यन्तपदे यथा – तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता । संस्कारे यथा–यथाक्रमं पुंसव-नादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः। और्द्ध्वदेहिके यथा–अतो न रोदितव्यं वै क्रिया कार्या प्रयत्नतः । कुल्यं तु कुलजेऽस्थनि सूर्पामिषाष्टद्रोणीषु । कुलस्यापत्यं कुल्यम् । यैय-कभावसमासे वा । ६–१–९७ । इति यः । कोलतीवाकुले रच वेति कित् यः । कुलजे वाच्यलिङ्गः । अस्थनि पुंक्लीबः ।

**सुर्पामिषाष्टद्रोणीषु, कुल्या सरिति सारणौ ।**
**कृत्यो विद्विषि कार्ये च, कृत्या स्याद्देवताक्रिया ।।३४५।।**
**गव्यं क्षीरादिके ज्यायां, रागवस्तुनि गोहिते ।**
**गव्या गोवृन्दगव्यूत्योर्गुह्यः कमठदम्भयोः ।।३४६।।**

शेषेषु क्लीबे । कुलजे यथा–न पुनरनुदिनं तुल्यकुल्येषु दीनः । अस्थनि यथा–कुल्याभरणभूषिता ।।३४४।। सूर्पं निष्पवनभाण्डम् । आमिषं मांसम् । अष्टद्रोणी द्रोणाष्टकम् । कुल्या सरिति सारणौ । सरिति नद्यां यथा–कुल्यातुल्यं प्रसरति सदा नेत्रयोरश्रु तस्याः । सारणौ नीरप्रणालिकायां यथा–इयमेभिसलवालैः । पदे पदे ग्रन्थिलासु कुल्यासु । कृत्यो विद्विषि कार्ये च । कृत्यते कृत्यः । ऋदुपान्त्य ५–१–४१ इति क्यप् । क्रियते वा । कृ वृषिमृजि शंसि । ५–१–४२ । इति क्यप् । विद्विट् शत्रुविशेषो यो धनादिना शत्रोर्भिद्यते । यत्कौटिल्यः । क्रुद्धलुब्धभीतावमानीताः परेषां कृत्याः । तत्र यथा–तान् कृत्यानवमन्यते यदि नृपस्य स्यात्कृतार्थश्रमः । कार्ये यथा–कच्चित्सौम्याध्यवसितमिदं बन्धुकृत्यं त्वया मे । छेद्येऽपि यथा–कृत्यं कुकृत्यं धिषणाशलाकया । कृत्या स्याद्देवताक्रिया । कृन्तति कृत्या । ऋशिजनि (उ० ३६१) इति कित् यः । करणं वा । कृगः श च वा । ५–३–१०० । इति क्यप् । देवतायां मारिनाम्न्यां यथा–तानि कृत्या हतानीव विनश्यन्ति क्षणादपि । क्रियायां यथा–सत्कृत्याभिर्व्रजति सुधियामेषकालो कलङ्कः ।।३४५।। गव्यं क्षीरादिके ज्यायां रागवस्तुनि गोहिते । गोरिदं गव्यम् । गोः स्वरे यः । ६–१–२७ । इति यः । गोभ्यो हितं वा युगादित्वाद् यः । गूयते वा । य एच्चातः। ५–१–२८ । इति यः क्षीरादिके गोहिते च वाच्यलिङ्गः ।

**गुह्यमुपस्थे रहस्ये, गृह्यं तु मलवर्त्मनि ।**
**गृह्योऽस्वैरिणि पक्ष्ये च, गृहासक्तमृगाण्डजे ।।३४७।।**
**गृह्या तु शाखानगरे, गेयौ गातव्यगायनौ ।**
**गोप्यौ दासेरगोप्तव्यौ, चयः प्राकारपीठभूः ।।३४८।।**

ज्यायां रागवस्तुनि च क्लीबे । ज्यायां स्त्रियामिति मंखः । क्षीरादिके यथा – गव्यकर्पूरकुङ्कुमैः । ज्यायां मौर्व्यां यथा– दुष्करा धनुषा व्याधैर्मृगव्या गव्यया विना । रागवस्तुनि गोरोचनादौ यथा–गव्येन नव्यं तिलकं चकार । गोहिते यथा– गव्यनाव्यजला नदी । गव्या गोवृन्दगव्यूत्योः । गवां समूहो- गव्या । पाशादेश्च ल्यः । ६–२–२५ । इति ल्यः । गोभ्यो हितो वा । गोविन्दे यथा–गव्योपसेव्यानि वनानि पश्यन् । गव्यूतिः क्रोशद्वयम् । गुह्यः कमठदम्भयोः । गुह्यते गुह्यः । कृ वृ षि । ५–१–४२ । इति क्यप् । द्वयोर्यथा–गृहे गुह्य इवाङ्गानि न गुह्येन तु योगवित् । गुह्यमुपस्थे रहस्ये । उपस्थो योन्यादिः । तत्र यथा – येषां गुणमयं जन्म परेषां गुह्यगुप्तये । रहस्यं गोप्यम् । तत्र यथा–स्त्रीषु गुह्यं न वक्तव्यं प्राणैः कण्ठगतैरपि । गृह्यन्तु मलवर्त्मनि । गृह्यते गृह्यम् । ऋषिजनि (उ० ३६१) इति बहुवचनात् कित् यः । मलवर्त्म बस्तिः । गृह्योऽस्वैरिणि पक्ष्ये च गृहासक्तमृगाण्डजे । गृह्यते गृह्यः । पदास्वैरि वाह्या ५–१–४४ । इति क्यप् । अस्वैरिपक्ष्ययोर्वाच्यलिङ्गः । अस्वै- रिणि यथा–स्वातन्त्र्यं त्वयि यन्त्रितं च करणग्रामैकगृह्या वयम् । पक्ष्यो वर्ग्यः । तत्र यथा–गुणगृह्या वचने विपश्चितः । गृहासक्तौ मृगान्डजश्चेति द्वावर्थौ । तयोर्यथा – गृह्यकेलिकलनाकुतूहलात् ।।३४७।। गृह्या तु शाखानगरे स्त्रियां । मंखस्तु शाखापुरे न ना ।

**समूहेऽप्यथ चव्या स्याच्चविकाशतपर्वयोः ।**
**चित्यं मृतकचैत्ये स्याच्चित्या मृतचितावपि ॥३४९॥**
**चैत्यं जिनौकस्तद्बिम्बं, चैत्यो जिनसभातरुः ।**
**उद्देशवृक्षश्चोद्यं तु, प्रेर्ये प्रश्नेऽद्भुतेऽपि च ॥३५०॥**

---

इत्याह । यथा–गृह्ये श्रीमदवन्ति चर्मनगरे ते भूमिदेवाः स्थिताः । गेयौ गातव्यागायनौ । गीयते गेयः गायति वा । भव्यगेय ५–१–७ । इति कर्तरि यः । वाच्यलिङ्गः । गातव्ये यथा–मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा । गायने यथा–साम्नां गेयैः पटुबहुजनैराश्रमः शोभतेऽसौ । गोप्यौ दासेरगोप्तव्यौ । गुप्यते गोप्यः । दासेरो दासीपुत्रः । तत्र यथा–आरोप्यते हि गोप्यानां स्कन्धे कार्यभरो जनैः । गोप्तव्ये वाच्यलिङ्गः । तत्र यथा–भोजनं व्रतमुत्सर्गं सप्तगोप्यान् विनिर्दिशेत् । चयः प्राकार-पीठभूः । समूहेऽपि । चीयते चयः । प्राकारपीठभूः प्रकारमूल-बन्धः । तत्र यथा–प्रकारश्चयहीनो निचितोपि हि निश्चितं पतति ॥३४८॥ समूहे यथा–चयस्त्विषामित्यवधारितं पुरा । संचयनेऽपि (विणनमिति रूढे) । अथ चव्या स्याच्चविकाशतपर्वयोः । चम्पते चव्या । शिक्ष्यास्या (उ० ३६४) इति साधुः । चविका कोलवल्लीनाम लता । यन्निघण्टु । चविकायां पुनश्चव्यं चवलं कोलवल्ल्यपि । तत्र स्त्रीक्लीबः । यथा–मुमूर्षोः किं तवाद्यापि चव्यचित्रकनागरैः । शतपर्वा वचा दुर्वा च । चित्यं मृतकचैत्ये स्यात् । चितायां साधु चित्यम् । यथा–चित्यं हि नित्यं बक-काकसंकुलम् । चित्या मृतचितावपि । चितैव चित्या । मर्तादिभ्यो यः । ७–२–१५९ । यथा–चित्यामारोप्य यान्त्यन्ये दग्ध्वाऽन्ये विमुखा जनाः। अग्निचयनेऽपि मंखः। यदाह-चित्या स्यादग्निचयनेन

**छायापङ्क्तौ प्रतिमायामर्कयोषित्यनातपे ।**
**उत्कोचे पालने कान्तौ, शोभायां च तमस्यपि ॥३५१॥**

वा । यथा–चित्यासंचयचातुर्यधुर्यायाजिकपुङ्गवाः ॥३४९॥ चैत्यं जिनौकस्तद्बिम्बम् । चीयते चैत्यम् । शिक्यास्या (उ० ३६४) इति साधुः । जिनोऽर्हन् बुद्धो वा तस्य ओक आयतनं तद् बिम्बं जिनबिम्बम् द्वयोर्यथा–चैत्यं वन्देत् स्वर्गकामः । चैत्यो जिनसभातरुः । उद्देशवृक्षः । जिनस्य तीर्थकृतः सभायां समवसरणकाले देवताजनितस्तरुरशोकाख्यः । तत्र यथा– वप्रत्रयं चारुचतुर्मुखाङ्गता चैत्यद्रुमोऽधोवदनाश्च कण्टकाः । उद्देशवृक्षे प्रसिद्धिहेतौ पादपे यथा–नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः । चोद्यं तु प्रेर्ये प्रश्नेऽद्भुतेऽपि च । चोद्यते चोद्यम् । प्रेर्ये प्रेरणीये वाच्यलिङ्गः। तत्र यथा–अधीयानोपलब्धार्थानचोद्यः स्यात्कथंचन । प्रश्नेऽद्भुते च यथा–निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्मजया । दिवसात्ययात्तदपि मुक्तमसौ चपलाजनं प्रति न चोद्यमदः ॥३५०॥ छायापङ्क्तौ प्रतिमायामर्कयोषित्यनातपे । उत्कोचे पालने कान्तौ शोभायां च तमस्यपि । छ्यति छाया । स्थाछामा (उ० ३५७) इति यः । पङ्क्तौ श्रेणौ यथा–गोपीकलमकेदारे शुकच्छायां नियच्छति । प्रतिमायां प्रतिबिम्बे यथा–ये छायास्वर्जलधेर्जलेषु । अर्के योषिति यथा– छायायां दिननाथस्य जातौ यमशनैश्चरौ । अनातपे आतपाभावे यथा–आमेखलं संचरतां घनानां छायामिपे सानुगतां निषेव्य । उत्कोचो लञ्चा । तत्र यथा–छायां नेच्छति नीतिज्ञः । पालने रक्षणे यथा – सम्वृत्तो यं तव यदि भुजच्छायया सम्प्रतीन्द्रो निर्विघ्नश्रीः । कान्तौ प्रभायां यथा–रत्नच्छाया व्यतिकर इव

**जयो जयन्ते विजये, जयोमा तत्सखी तिथिः ।**
**पथ्या जयन्त्यग्निमन्थे, जन्यो जामातृवत्सले ॥३५२॥**
**जनके जननीये च नवोढानुचरादिके ।**
**जन्यं कौलीने युध्यट्टे जन्या मातृसखीमुदोः ॥३५३॥**

प्रेक्ष्यमेतत्पुरस्तात् । शोभायां यथा–विच्छायीकृतविप्रयुक्तवनितावक्त्रेन्दवो बिन्दवः । तमसि यथा–छायया छादिता गुहा । गङ्गासंवाहन्यायेषु अपि मंखः । गङ्गा जाह्नवी । संवाहो येन केन प्रकारेण सेवकतोषणम् । गङ्गायां यथा – छायापथेनेव शरत्प्रसन्नमालाशमाविष्कृतचारुतारम् । संवाहे यथा–छायामात्रमवाप्येते न भवतः पुष्पं फलं वा कुतः । न्याये यथा – यः पुष्णाति पितृच्छायामाश्रित्य सकलाः प्रजाः ॥३५१॥ जयो जयन्ते विजये । जयति जयनं वा जयः । जयन्त इन्द्रसुतः । तत्र यथा–मघमेव जयप्रियः । विजये यथा–जयो वा मृत्युर्वा युधि भुजभृतां कः परिभवः । जयोमा तत्सरवी तिथिः । पथ्या जयन्त्यग्निमन्थः । उमायां यथा–लक्ष्मीं राजकुले जयां रणमुखे क्षेमंकरीमध्वनि । तस्या उमायां सखी । तत्सखी । तत्र यथा–गौरीव रेजे विजया जयाभ्याम् । तिथौ यथा–नन्दाभृगौ सोमसुते च भद्रा कुजे जया सूर्यसुते च रिक्ता । पथ्या हरीतकी जयन्ती जीवन्ती शाकः । अग्निमन्थोऽरणिः । जन्यो जामातृवत्सले । जनके जननीये च नवोढानुचरादिके । जनीं वहति जन्यः । हृद्य पद्य ७–१–११ इति साधुः । जायते वा । भव्यगेय ५–१–७ । इति साधुः । जन्यते वा कर्मणि घ्यण् । जायतेऽत्र वा ऋषिजनि (उ० ३६१) इति यः । जामातृवत्सले जामातृबन्धुवर्गे यथा–प्रत्यासन्नस्त्वरयति तरां जन्ययात्राप्रवेशः ॥३५२॥ जनके यथा–जन्येन तेनाजनि सुप्रतिष्ठः । जननीये

*त्रयीत्रिवेद्यां त्रितये, पुरन्ध्र्यां सुमतावपि ।
तार्क्ष्यस्तु स्यन्दने वाहे, गरुडे गरुडाग्रजे ॥३५४॥
अश्वकर्णाह्वयतरौ स्यात्तार्क्ष्यं तु रसाञ्जने ।
तिष्यः पुष्यवत्कलौ भे, तिष्या त्वामलकीतरौ ॥३५५॥

वाच्यलिङ्गः । तत्र यथा – शुश्राव घोषं न जनौघजन्यम् । नवोढानुचरादिके यथा–यातेति जन्यानवदत्कुमारी । जन्यं कौलीने युध्यट्टे । जनस्य जल्पो जन्यम् । हृद्यपद्य ७–१–११ । इति साधुः । कौलीने जनवादे पुंक्लीबः । तत्र यथा–तत्वोपलम्भेन विना न जन्यमात्रेण दूष्यं क्वचिदेव वस्तु । युधि यथा–तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत् । अट्टे हट्टे यथा–जन्येषु धन्या धनमर्जयन्ति । जन्या मातृसखीमुदोः । मातृसखी मातुर्वयस्या । मुद् हर्षः । द्वयोर्यथा–जन्या जयति जन्याम् ॥३५३॥ त्रयी त्रिवेद्यां त्रितये पुरन्ध्र्यां सुमतावपि । त्रयोऽवयवा यस्याः त्रयी । द्वित्रिभ्यामयड् वा । ७–१–१५२ । इति अयट् । त्रिवेद्यां वेदत्रये यथा–एतत्त्रयीमयं ज्योतिरादित्याख्यं निमज्जति । त्रितये स्त्रीक्लीबः । तत्र यथा–व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी । पुरन्ध्री स्त्री । शोभनामतिः सुमतिः । तार्क्ष्यस्तु स्यन्दने वाहे गरुडे गरुडाग्रजे । अश्वकर्णाह्वयतरौ (प्र० अश्वकर्णाह्वयतेतरौ)। तृक्ष् गतौ तृक्षति तार्क्ष्यः । शिक्यास्या (उ०३६४) इति साधुः । तृक्षस्यापत्यं वा । गर्गादेर्यञ् । ६–१–४२ । स्यन्दने वाहे गरुडे च यथा–स्वक्षं सुपत्रं कनकोज्ज्वलद्युतिं जवेन नागाञ्जितवन्तमुच्चकैः । आरुह्य तार्क्ष्यं नभसीव भूतले ययावनुद्घातसुखेन सोऽध्वना । गरुडाग्रजेऽरुणे यथा–तार्क्ष्योदये

*मु,म० स्याज्जन्युर्जन्तुमात्रे च पावके परमेष्ठिनि । त्रयी०

**द्रव्यं भव्ये धने क्ष्मादौ, जतुद्रुमविकारयोः ।**
**विनये भेषजे रीर्य्यां दस्युः प्रत्यर्थिचौरयोः ।।३५६।।**

तिष्ठति किं तमिस्रम् ।।३५४।। स्यात्तार्क्ष्यं तु रसाञ्जने । रसाञ्जनमौषधविशेषः । तिष्यः पुष्यवत् कलौ भे । त्वेषन्ति पुष्यन्ति च कार्याणि अस्मिन्निति तिष्यः पुष्यः । कुप्य भिद्योध्य ५–१–३९ इति साधुः । कलिरन्त्यं युगम् । भं नक्षत्रम् द्वयोर्यथा-तिष्योऽप्यनर्थकर इत्यति चित्रमेतत् । पुष्ययोगपरिपोषित-श्रियः । तिष्या त्वामलकीतरौ । आमललीतरुर्धात्रीवृक्षः ।।३५५।। द्रव्यं भव्ये धने(प्र० जने)क्ष्मादौ जतुद्रुमविकारयोः। विनये भेषजे रीर्य्याम् । द्रुतुल्यं द्रव्यम् । द्रोर्भव्ये । ७–१–११५ । इति यः । द्रोर्विकारो वा । पयोद्रोर्यः । द्रवति तांस्तान् पर्यायान् वा बाहुलकात् कर्तरि यः । भूयते वा(प्र० द्रूयते वा)। भव्यम् । अभिप्रेतार्थानां पात्रं योग्यमिति यावत् । तत्र यथा–न शास्त्र-मद्रव्येष्वर्थवत् । धने यथा–द्रव्यसंचयपरो नरोऽधमः । क्ष्मादौ यथा–पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणि । जतु लाक्षा । द्रुमविकारो निर्यासादिः । विनये शिक्षार्हे यथा–क्रिया हि द्रव्यं विनयति नाद्रव्यम् । भेषजे यथा–द्रव्यं पीत्वा तु न श्वपेत् । रीरी पित्तलं गुणाधारविशेष्य–परमाणुगो(गे)ष्वपि मंखः । गुणाधारे यथा–द्रव्याश्रयेष्वपि गुणेषु रराज कृष्णो वर्णः पृथक्सूत इवालिगणो गजस्य । विशेष्ये यथा–कस्यचिद् द्रव्यमेवार्थो द्रव्यं जातिश्च कस्यचित् । परमाणौ यथा–अद्रव्यमनेकद्रव्यञ्च द्रव्यं गमि अन्वेष्यम् । दस्युः प्रत्यर्थिचौरयोः । दस्यति दस्युः । यजिशुन्धि (उ० ८०१) इति युः । द्वयोर्यथा–दस्योरस्य कृपाण-

**दायो दाने यौतकादिधने सोल्लुण्ठभाषणे ।**
**विभक्तव्ये पितृद्रव्ये, दिव्यं वल्गुलवङ्गयोः ॥३५७॥**
**द्युभवे दिव्यामलक्यां, दूष्यं वाससि तद्गृहे ।**
**दूषणीये चाथ दैत्योऽसुरे दैत्या मुरौषधौ* ॥३५८॥**

पातविषयादाच्छिन्दतः प्रेयसी ॥३५६॥ दायो दाने यौतकादिधने सोल्लुण्ठभाषणे । विभक्तव्ये पितृद्रव्ये । दीयते दायः । चतुर्ष्वर्थेषु । दाने यथा–रहसि रमते प्रीत्या, दायं ददात्यनुवर्तते । यौतकं युवतयोर्वधूवरयोर्देयं तदादि धने यथा–प्रकृतौ या न वर्तेत न सा स्त्रीदायमर्हति । सोल्लुण्ठभाषणे यथा–विधा विधाय दायं दयितां मुमोच । विभक्तव्ये पितृद्रव्ये यथा–स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने । धनमात्रेऽपि । तत्र पुंक्लीबः । दिव्यं वल्गुलवङ्गयोः द्युभवे । दिविभवं दिव्यम् । द्युप्रागपाग । ६–३–८ । इति यः वल्गुनिद्युभवे च वाच्यलिङ्गः। तयोर्यथा–दिव्यस्त्रीणां विलसनभुवं पर्वतं पारियात्रम् । लवङ्गं देवकुसुमम् ॥३५७॥ दिव्यामलक्याम् । आमलकी धात्रीतरुः । तत्र स्त्रियाम् । दूष्यं वाससि तद्गृहे । दूषणीये च । दूष्यते दुष्यम् । दूषणीये वाच्यलिङ्गः । वाससि यथा–देवदूष्यं देवराजः स्कन्धदेशे न्यधात्प्रभोः । तस्य वाससो गृहं तद्गृहम् । तत्र यथा–दूष्यैरिव क्षितिभृतां द्विरदैरुदारतारावली विरचनैर्व्यरुच न्निवासाः । दूषणीये यथा–किमदूष्यं दुरात्मनाम् । इभमध्यबन्धव्यां रज्ज्वामपि मंखः । यथा–दूष्योपोद्वलितक्रमा अपि महावंशाश्रिताः सिन्धुराः । दैत्योऽसुरे । दितेरपत्यं दैत्यः । अनि दमि । ६–१–१५ । इति ञ्यः । यथा–इतः स दैत्यः

*प्र० सुरौषधौ

धन्यः पुण्ययुते धन्यामलक्यामुपमातरि ।
धान्यं तु व्रीहौ धन्याके धिष्ण्यं स्थानोडुवेश्मसु ॥३५९॥
बले धिष्ण्योऽग्नौ शुक्रे च नयः स्यान्नैगमादिषु ।
*नीतिद्यूतभिदोः पथ्यं, हितं पथ्या हरीतकी ॥३६०॥

प्राप्तश्रोर्नैत एवार्हति क्षयम । दैत्या मुरौषधौ । दैत्ये साधुर्दैत्यः ॥३५८॥ धन्यः पूण्ययुते । धनं लब्धा धन्यः। धनगणाल्लब्धरि। ७–१–९ । इति यः । वाच्यलिङ्गः । धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयम् । धन्यामलक्यामुपमातरि । उपमाता धात्री । धान्यं तु व्रीहौ धन्याके । धन्यते धान्यम् । घ्यण् । धीयते वा । धाग्राजि (उ० ३७९) इति न्यः । अत्र हि व्रीहिशब्दः सर्वसस्यवाची । तेन धान्यशब्देन सप्तदशापि सस्यान्युच्यन्ते । यदाह–व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः। अणवः प्रियङ्गुकोद्रवमपुष्टकाः शालिराढक्यः । किं च कलायकुलच्छीशणसप्तदशानि धान्यानि । धान्यकं कुस्तुम्बुरु । तत्र यथा–त्रिदोषशान्तये कार्यं विबुधैर्धान्यनागरम् । धिष्ण्यं स्थानोडुवेश्मसु । बले । धृष्णोति धिष्ण्यम् । शिक्यास्या (उ० ३६४) इति साधुः। स्थाने यथा–अमी वेदिं परितः क्लृप्तधिष्ण्या वैता नास्त्वामुपहूय पालयन्तु । उडौ नक्षत्रे यथा–धिष्ण्यानि भान्त्युष्णरुचेर्वियोगात् वेश्मगृहं बलं शक्तिः । तयोर्यथा–धिष्ण्यं स विष्णोर्ददृशे वितृष्णः ॥४५९॥ धिष्ण्योऽग्नौ शुक्रे च । अग्नौ अग्निविशेषे यथा – ऋत्विजस्तत्र सम्भूय स्वान् धिष्ण्यानुपतस्थिरे । शुक्रे दैत्याचार्ये यथा–गोष्ठीषु धिष्णधिषणाविव राजमानौ । नयः

*मु- मू० नीतिद्यूतभिदोर्नाटय लास्ये तौर्यत्रिकेऽपि च । नित्यं ध्रुवे तते, पथ्यं० ।

**पद्योऽन्त्यवर्णे स्यात्पद्यं श्लोके पद्या तु वर्त्मनि ।**
**प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः ॥३६१॥**
**प्रियो वृद्ध्यौषधे हृद्ये, पत्यौ पुण्यं तु सुन्दरे ।**
**सुकृते पावने धर्मे, पूज्यः श्वसुरवन्द्ययोः ॥३६२॥**

स्यान्नैगमादिषु। नीतिद्यूतभिदोः। नीयतेऽनेन नयनं वा नयः। नैगमादयो नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूतलक्षणाः सप्त। तत्र यथा–नयास्तव स्यात्पदलाञ्छना इमे। नीतौ यथा–दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः। द्यूतभेदे गमरूपे यथा–द्यूतेन यज्ञः कितवो विजिग्ये। पथ्यं हितम्। पथोऽनपेतं पथ्यम्। हृद्य पद्य ७।१।११। इति साधुः। वाच्यलिङ्गः। यथा–उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। ओषधभेदेऽपि यथा–पथ्यं ग्लाने मरिष्यत्यपि विपुलकृपः किं भिषक् रोरुधीति। पथ्या हरीतकी। पथ्यैव पथ्यमवधौ विधेयम्। आर्याभेदेऽपि यथा–आद्येषु त्रिषु पादो भवति भवति तु पथ्या। पद्योऽन्त्यवर्णे स्यात्। पादे भवः पद्यः। दिगादि ६।३।१२४। इति यः हिमहति २।३।९६ इति पदादेशः। अन्त्यो वर्णः शूद्रः। तत्र यथा–मद्यं न पद्यैरपि पेयमद्य। पद्यं श्लोके। श्लोको वृत्तबन्धः। तत्र यथा–गद्यपद्यमयी सापि चम्पूरित्यभिधीयते। पद्या तु वर्त्मनि। पादेभ्यो हिता पद्या। प्राण्यङ्गरथखल ७।१।३७। इति यः। पद्यां व्यधित वर्द्धकिः। प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः। प्रेयन्ते प्रेयते प्रायः। वयसि यथा–कुमारप्रायोऽयं नृपतिरिति मंस्थाः स्वहृदि मा। अनशने मृतौ च यथा–प्रायोपवेशनमतिर्नृपतिर्बभूव। बाहुल्ये यथा–गतप्रायारात्रिः कृशतनुशशी शीर्यत इव। तुल्ये वाच्यलिङ्गः

*बल्यं रेतोबलकृतोर्भयं भीतौ भयङ्करे ।
कुब्जकपुष्पे भव्यं तु फले योग्ये शुभेऽस्थनि ॥३६३॥
सत्ये भाविनि भव्यस्तु, कर्मरङ्गतरौ सति ।
भव्योमाकरिपिप्पल्योर्भाग्यं कर्म शुभाशुभम् ॥३६४॥

तत्र यथा-क्वायं कायः कृमिहततरुप्रायविच्छाय पाकः ॥३६१॥ प्रियो वृद्धचोषधे हृद्ये पत्यौ। प्रीणाति प्रियः। नाम्युपान्त्य ५।१।५४ इति कः। वृद्धचौषधं माङ्गल्य(मङ्गल)द्रव्यविशेषः। हृद्यं चारु। तत्र वाच्यलिङ्गः। पतिर्भर्ता। हृद्ये पत्यौ च यथा-न जाने सम्मुखायाते प्रियाणि वदति प्रिये। पुण्यं तु सुन्दरे। सुकृते पावने धर्मे। पुणति पुण्यम्। कृशिजनि (उ० ३६१) इति कित् यः। सुन्दरपावनयोर्वाच्यलिङ्गः। सुन्दरे यथा-लावण्यपुण्यं वपुः। सुकृतं शुभं कर्म। तत्र यथा-शेषैः पुण्यै-र्हृतमिव दिवः कान्तिमत्खण्डमेकम्। पावने यथा-पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य। धर्मे यथा-कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्। पूज्यः श्वशुरवन्द्ययोः। पूज्यते पूज्यः। वन्द्ये वाच्यलिङ्गः। श्वशुरे यथा-पूज्यागारे सति कतिपया वासतेयी(रात्रिः)रुषित्वा। वन्द्ये यथा-प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः। बल्यं रेतोबलकृतोः। बलमेव बल्यम्। मर्तादिभ्यो यः। ७।२।१५९। बले साधु वा। बलकृति वाच्यलिङ्गः। द्वयोर्यथा-बल्यं हि बल्यो विदधाति माषः। भयं भीतौ भयंकरे। कुब्जकपुष्पे। भीतिर्बिभेति अस्माद् वा भयं वर्षादयः। क्लीबे। २।४।९७। इत्यल्। त्रिष्वपि क्लीबे। भीतौ भयङ्करे च यथा-प्रेम पश्यति भयान्यपदेऽपि। भव्यं तु फले योग्ये शुभेऽस्थनि। सत्ये भाविनि। भवति भव्यम्।

*मु० मू० पेयं पातव्यपयसोः पेया श्राणाच्छमण्डयोः। बल्यं०

**मध्यं न्याय्येऽवलग्नेऽन्यमर्यो दैत्योष्ट्रवेसराः ।**
**मयुर्मृगाश्वमुखयोर्मन्युर्दैन्ये क्रतौ क्रुधि ॥३६५॥**

भव्यगेय ५।१।७। इति साधुः। फलास्थ्नोः क्लीबे। अन्यत्र वाच्यलिङ्गः। फले यथा–नव्यानि भव्यानि ददाति भव्यम् (हव्यम्)। योग्ये यथा–समाधिमत्यामुदपादि भव्या। शुभे कल्याणे यथा–भव्यं नव्यमिदं कुतः परिणतं(न सत्यमिदं कुतः परिणति) यद्दृश्यते त्वादृशः। अस्थनि यथा–भव्यं क्रव्यमिवेह खादतितरां क्रव्यादयं निर्दयम्। सत्यं तथ्यम्। भावि भविष्यत्। तयोर्यथा–अर्थोऽयमर्थोत्तरभव्य एव। भव्यस्तु कर्म्मरङ्गतरौ सति। कर्मरङ्ग-तरुः वृक्षभेदः। सति सत्पुरुषे यथा–श्राव्यं वक्ति सदा भव्यः। सति विद्यमाने इति मंखः। भव्योमाकरिपिप्पल्योः। भवे साधुर्भव्या। उमायां यथा–समाधिमत्यामुदपादि भव्या। अयं योग्यार्थोऽपि मंखेन व्याख्यातः। भाग्यं कर्म शुभाशुभम्। भज्यते भाग्यम्। बाहुलकात् घ्यण्। भाग एव वा मर्तादिभ्यो यः। ७।२।१५९। शुभमशुभं च पुराकृतं कर्म। तयोर्यथा–सुखं वा दुःखं वा भवति हि नृणां भाग्यविहितम् ॥३६४॥ मध्यं न्याय्यऽवलग्नेऽन्तः। मवति मध्यम्। शिकास्या (उ० ३६४) इति ये साधुः। न्याय्ये वाच्यलिङ्गः। अवलग्ने पुंक्लीबः। न्याय्ये यथा– मध्ये वर्त्मनि वर्तते न हि खलः सौजन्यवन्ध्यः कुधीः। अवलग्ने कायमध्यभागे, यथा–ननाम मध्योऽतिगुरुत्व-भाजा नितान्तमाक्रान्त इवाङ्गनानाम्। अन्तर्यथा–मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः। अनधिकन्यूनसंख्याभेदयोरपि। अनधिकन्यूने यथा–उदभूत्तारगम्भीरो मध्याह्ने पटहध्वनिः। संख्याभेदे यथा–मध्यं परार्ध्यमाहुर्यथोत्तरं दशगुणं तज्ज्ञाः।

**माल्यं मालाकुसुमयोः स्यान्माया शाम्बरी कृपा ।**
**दम्भो बुद्धिश्च मायस्तु पीताम्बरेम्बरेऽपि च ।।३६६।।**

मयो दैत्योष्ट्रवेसराः । मीनाति मयते वा मयः । त्रिषु यथा— दुःखेन बध्नन्ति निरामयं मयम् । मयुर्मृगाश्वमुखयोः । मिनोति मयुः । मि वहि (उ० ७२६) इति उः । पुंसि । अश्वमुखः किन्नरः। द्वयोर्यथा—मयोरयोग्या नगभूमिरेषा । मन्युर्दैन्ये(त्ये)क्रतौ (युधि)क्रुधि । मन्यते मन्युः। यजिशुन्धि(उ० ८०१)इति युः। पुंसि दैन्ये यथा—तीव्राभिषङ्गप्रभवेन मन्युना। क्रतौ यथा—न कश्चि-दन्यः शतमन्युतेजाः । क्रुधि कोपे यथा—मन्युना तेन मन्येऽहं वने वसति केशरी। ।।३६५।। माल्यं मालाकुसुमयोः । माला एव माल्यम् । भेषजादित्वाद् टयण् । ७।२।१६४ मल्यते वा घ्यण् । मालायां यथा माल्येन तां निर्वचनं जघान। कुसुमे यथा—द्वित्रैः पाणि सरोरुहं त्रिचतुरैर्धम्मिल्लमाल्यस्रजः । स्यान्माया शाम्बरी कृपा। दम्भो बुद्धिश्च । मीयतेऽनया माया । स्थाच्छामा (उ० ३५७)इति यः। शम्बराख्यदैत्यस्येयं शाम्बरी। इन्द्रजाल-मित्यर्थः। तत्र यथा—मायां मयोद्भाव्य परिक्षितोऽसि । कृपा अनुकम्पा। तत्र यथा मायां मयि कुरु प्रभो। दम्भश्छद्म तत्र यथा—कौटिल्ये पटवः पापा मायया बकवृत्तयः । बुद्धौ यथा— मायाविनममायं च कुतपस्थं तपस्विनम् । अविद्या बुद्धजननी वञ्चनाधिदेवतास्वपि । अविद्या बुद्धजनन्योर्यथा— मायाजन्मापि बुद्धस्त्रिजगति विदधे तीव्रमाया विनाशम् । वञ्चनाधिदेवतायां यथा—मायादेवी भ्रमयति सदा यन्त्रवज्जन्तु-चक्रम् । मायस्तु पीताम्बरेऽम्बरेऽपि च । मां लक्ष्मीमयते मायः। पीताम्बरो विष्णुः । अम्बरं वासः ।।३६६।। मूल्यं ।

**मूल्यं वस्ने वेतने च ययुर्यज्ञहये हये ।।**
**याम्याऽपाच्यां भरण्यां च, योग्यो योगार्हशक्तयोः ।।३६७।।**
**उपायिनि प्रवीणे च, योग्यमृद्धयाह्वयौषधे ।।**
**योग्यार्कयोषित्यश्यासे, रम्यश्चम्पकहृद्ययोः ।।३६८।।**

वस्ने वेतने च । मूलेन आनाम्यं मूल्यम् । हृद्यं पद्य ७।१।११ । इति साधुः । वस्नोऽवक्रयः । वेतनं भृतिः । वस्ने यथा—मूल्या-दौषधवत् कामः प्रभुत्वात् केवलः श्रमः । वेतने यथा—क्रुद्धे च तस्मै सा मूल्यमत्यल्पमुपकल्पयेत् । विनिमयधनयोरपि । विनिमयो यद् द्रव्यान्तराद् द्रव्यं प्राप्यते । तत्र यथा—येन पाषाणखण्डस्य मूल्यमल्पं वसुन्धरा । धने यथा—पश्चात् प्रयाति न हि कस्यचिदेव मूल्यम् । ययुर्यज्ञहये हये । याति ययुः । हनि या (उ०७३३) इति किर्द्धित्वं च । पुंसि । यज्ञहये अश्वमेधाश्वे यथा—राजन्यास्ते ययुमनुययुर्यायजूकेन मुक्तम् । हये अश्वमात्रे यथा—राजानो ययुभिर्ययुः । याम्याऽपाच्यां च । यमो-देवताऽस्या याम्या । अनिदमि ६।१।१५ इति ञ्यः । अपाच्यां दक्षिणस्यां दिशि यथा— यान्तु याम्यां दिशं प्रोष्ठपदासु तव शत्रवः । भरण्यां यथा—सूर्येण युक्ता न शुभाय याम्या । योग्यो योगार्हशक्तयोः । उपायिनि प्रवीणे च । योक्तुमर्हः शक्तो वा योग्यः । शक्तार्हे कृत्याश्च ५।४।३५ । इति घ्यण् । योग-मर्हति वा । दन्डादित्वाद् यः । योगाय शक्तो वा । योगकर्मभ्यां यो कञ्पाविति यः । चतुर्ष्वपि वाच्यलिङ्गः । योगार्हे उचिते यथा—कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयो-स्तृतीया । शक्ते यथा—योग्यः स योगी विषयान् विजेतुम् ।।३६७।। उपायिनि यथा—नगेऽपि योग्यो न कदापि योगी

**रम्या रात्रावथ रथ्यो रथांशे रथवोढरि ।**
**रथ्या तु रथसङ्घाते प्रतोल्यां पथि चत्वरे ॥३६९॥**
**रूप्यमाहतहेमादौ, रजते रूपवत्यपि ।**
**लयस्तूर्यत्रयीसाम्ये, संश्लेषणविलासयोः ॥३७०॥**

(दुःखी)। प्रवीणे यथा–सेवां कुर्वन्ति शम्भोर्भवमरुतरुणे योग्यताधानहेतोः । योग्यमृद्धयाह्वयौषधे । ऋद्धयाह्वयम् ऋद्धिनाम माङ्गल्यमौषधम् । योग्यार्कयोषित्यभ्यासे । अर्कयोषिति यथा–योग्या न भानोरपरस्य भोग्या। अभ्यासे यथा–इतरः प्रणिधानयोग्यया मरुतः पञ्चशरीरगोचरान्। रम्यश्चम्पकहृद्ययोः । रमयति रम्यः । भव्यगेय ५ । १ । ७ । इति कर्तरि साधुः । चम्पको वृक्षभेदः । हृद्ये वाच्यलिङ्गः। तत्र यथा–रम्याश्चन्द्रमरीचयः कुसुमिता रम्या वनान्तस्थली ॥३६८॥ रम्या रात्रौ । यथा–रम्या सुरम्या रमणी नराणाम् । अथ रथ्यो रथांशे रथवोढरि । रथस्यायमवयवो वोढा वा रथ्यः । रथात्सादेश्च वोढृ्ङ्गे । ६ । ३ । १७५ इति यः । वाच्यलिङ्गः । रथांशे यथा–रथ्यं हि चक्रं न कुलालयोग्यम्। रथवोढरि यथा–सूर्यस्य रथ्याः परितः स्फुरन्त्या। रथ्या तु रथसङ्घाते प्रतोल्यां पथि चत्वरे। रथानां समूहो रथ्या। पाशादेश्च ल्यः। ६ । २ । २५ । इति ल्यः । रथाय हिता वा । प्राण्यङ्गरथ ७ । १ । ३७ इति यः। रथसङ्घाते यथा–अश्वीयरथ्या गजता कुलेऽस्मिन् । प्रतोल्यां पथि चत्वरे च यथा–बलोर्मिभिस्तत्क्षणहीयमानरथ्या भुजाया वलयैरिवास्याः ॥३६९॥ रूप्यमाहतहेमादौ रजते रूपवत्यपि । आहतं प्रशस्तं वा रूपमस्यास्ति रूप्यम्। रूपात्प्रशस्ताहतात् । ७ । २ । ५४ । इति यः । रूपवति वाच्यलिङ्गः । दीनाराद्यं

**लभ्यं लब्धव्ये युक्ते च, विन्ध्यो व्याधाद्रिभेदयोः ।**
**विन्ध्या त्रुटौ लवल्यां च, वीर्यं तेजःप्रभावयोः ॥३७१॥**
**शुक्रे शक्तौ च वीक्ष्यं तु द्रष्टव्ये विस्मयेऽपि च ।**
**वीक्ष्यस्तु लासके वाहे वेश्यं तु गणिकागृहे ॥३७२॥**

निघातिकाताडनेन यद् हेमादिः आहन्यते तदाहतम् । आदिशब्दाद्रजतपरिग्रहः । तत्र यथा—मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् । रजते रजतमात्रे रूपवति यथा—रूप्यभित्तिषु संक्रान्तप्रतिबिम्बाः सुरस्त्रियः । लयस्तूर्यत्रयीसाम्ये संश्लेषणविलासयोः । लीयतेऽनेन लयनं वा लयः । लातेर्वा । लादिभ्यः कित् (उ० ३६७) इति अयः । तूर्यत्रयीसाम्ये यथा—स्मरसि लयविचित्रं वक्रवाद्यं विधाय । संश्लेषणे यथा—रसकलामलपल्लवलीलया । विलासे यथा — किसलयैः सलयैरिव पाणिभिः ॥३७०॥ लभ्यं लब्धव्ये युक्ते च । लभ्यते लभ्यम् । शकि तकि ५ । १ । २९ । इति यः । वाच्यलिङ्गः । द्वयोर्यथा—स्थापितो दशमो मूर्द्धा लभ्यांश इव रक्षसा । विन्ध्यो व्याधाद्रिभेदयोः । विधति विध्यति वा विन्ध्यः । शिक्या सा (उ० ३६४) इति साधुः । व्याघ्रे यथा—विव्याध श्वाविधं विन्ध्यः । अद्रिभेदे यथा—रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् । विन्ध्या त्रुटौ लवल्यां च । त्रुटिः क्षणद्वयम् । लवली वृक्षः । वीर्यं तेजःप्रभावयोः । शुक्रे शक्तौ च । वीरे साधु वीर्यम् । वीर्यंत इति वा । तेज उत्कटत्वम् । यदुरतः । अधिक्षेपोऽवमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् । तत्र यथा—वीर्यं च विद्वत्सु सुते मघोनः। प्रभावः द्रव्यमाहात्म्यम् । तत्र यथा—रसवीर्यविपाकतः ॥३७१॥ शुक्रं प्रधानधातुः । तत्र

**वेश्या तु पण्ययोषायां, शल्यः स्यान्मदनद्रुमे ।**
**नृपभेदे श्वाविधि च सीम्नि शस्त्रशलाकयोः ॥३७३॥**
**शय्या तल्पे शब्दगुम्फे, शून्यं बिन्दौ च निर्जने ।**
**शून्या तु नलिका शौर्यं चारभटयां बलेऽपि च ॥३७४॥**

यथा–शम्भोर्वीर्यमिवानलः । शक्तौ बले स्त्रीक्लीबः। तत्र यथा–नमोऽस्त्ववीर्यवीर्याय तस्मै कुसुमधन्वनि । वीक्ष्यं तु द्रष्टव्ये विस्मयेऽपि च । वीक्ष्यते वीक्ष्यम् । द्रष्टव्ये वाच्यलिङ्गः । द्वयोर्यथा–वीक्ष्यं निरीक्ष्य वामाक्षी । वीक्ष्यस्तु लासके वाहे । लासको नर्त्तकः । वाहोऽश्वः । वीक्ष्यो वलक्षद्युतिः । वेश्यं तु गणिकागृहे । वेशो वेश्यावाटः तत्र भवं वेश्यम् । दिगादित्वाद् यः । वेश्ये विशन्ति नावश्यं वश्यं येषां मनः सदा ॥३७२॥ वेश्या तु पण्ययौषायाम् । वेशेन शोभते वेश्या । कर्मवेशाद् यः ६ । ४ । १०३ । इति मतान्तरेण यः। यथा–वेश्यास्त्वत्तो नरपद-सुखान् पाप्य वर्षाग्रबिन्दून् । शल्यः स्यान्मदनद्रुमे । नृपभेदे श्वाविधि च सीम्नि शस्त्रशलाकयोः । शलति शल्यम् । स्थाच्छामा (उ० ३५७) इति यः षट्स्वर्थेषु सीम्नि शस्त्रे शलाकायां च पुंक्लीबः । अन्यत्र पुंसि । नृपभेदे यथा–शल्यो जेष्यति पाण्डवान् । श्वावित् मृगभेदः । तत्र यथा–सीमन्तोन्नयनं कार्यं शल्यपत्रेण-धीमता । सीम्नि यथा–शैलोपशल्यनिपतद्रथनेमिधारानिष्पिष्ट-निष्ठुरशिलातलचूर्णगर्भाः । शस्त्रे यथा–शल्यप्रोतं वीक्ष्य सकुम्भं-(म्भ)मुनिपुत्रम् । शलाकायां यथा–शल्यमपि स्खलदन्तः (प्र० सबलदन्तः) सोढुं शक्यते हलाहलदिग्धम् । अन्तर्व्रणेऽपि मंखः । भवति हृदयदाही शल्यतुल्यो विपाकः ॥३७३॥ शय्या तल्पे शब्दगुम्फे । शेरतेऽस्यामिति शय्या । समज । ५ । ३ । ९९

**सह्यमारोग्ये सोढव्ये, सह्योऽद्रौ सव्यं दक्षिणे ।**
**वामे च प्रतिकूले च, सत्यं तु शपथे कृते ।।३७५।।**

इति क्यप् । द्वयोर्यथा—रसेन शय्यां स्वयमभ्युपागता । कथा जनस्याभिनवा वधूरिव । शून्यं बिन्दौ च निर्जने । शुनि हितं शून्यम् । शुनो वश्चोदूत् । ७।१।३३। इति यः बिन्दौ यथा—शून्यहृते वा शून्ये किं भवति फलं पृथक् कथय । निर्जने वाच्यलिङ्गः । तत्र यथा—शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः । शून्या तु नलिका । नलिका वंशादिमयो । शौर्यं चारभट्यां बलेऽपि च । शूरस्य भावः शौर्यम् । चारभटो भयहेतावपि निर्भयमनस्कता । तत्र यथा—त्यागः सत्यं च शौर्यं च त्रय एते महागुणाः । बलं भुजादिगतं स्थाम । तत्र यथा—शौर्येण धुर्या हि वहन्ति भारम् ।।३७४।। सह्यमारोग्ये सोढव्ये । सह्यते सह्यम् । शकि तकि ५।१।२९। इति यः सोढव्ये वाच्यलिङ्गः । आरोग्ये यथा—सह्येन सह्यते भोज्यम् । सह्योऽद्रो । सोढव्येऽद्रौ च यथा—असह्यविक्रमः सह्यं दूरमुक्तमुदन्वता । सव्यं तु दक्षिणे । वामे च प्रतिकूले च । सुवति सव्यम् । स्थाच्छामा (उ० ३५७) इति यः । वाच्यलिङ्गः। दक्षिणे यथा—वामो बाहुर्मृडान्याः करकलितरणत्कङ्कणालीकरालो यस्मिन् सव्यश्च शम्भोर्भुजगवलयवान् सह्यमाकर्षणं तत् । वामे यथा—सव्यालम्बनमेतदत्र । भवतो निःस्नेहमुञ्चाम्यहम् । प्रतिकूले यथा—सव्ये दैवे दिव्यमेतन्न भव्यम् । सत्यं तु शपथे कृते । तथ्ये तद्वति । सत्सु साधु सत्यम् । अस्तीति वा । शिक्यास्था (उ० ३६४) इति साधुः तद्वति वाच्यलिङ्गः । शपथे यथा—

**तथ्ये तद्वति सत्यस्तु, लोकभित्संख्यमाहवे ।**
**संख्यैकादौ विचारे च सन्ध्या कालनदीभिदोः ।।३७६।।**
**चिन्तायां संश्रवे सीम्नि सन्धाने कुसुमान्तरे ।**
**साध्यो योगे साधनीये, गणदैवतभिद्यपि ।।३७७।।**

सत्येन श्रावयेद् विप्रम् । कृते, कृतयुगे ।।३७५।। तथ्ये च यथा– सत्ये सत्यव्रता नराः । तद्वति तथ्यवति यथा–सत्या हि मर्त्याः प्रभुभिर्दुरापाः । सत्यस्तु लोकभित् । लोकभिदि लोकविशेषे यथा–तपोलोकात्परं सत्यः । संख्यमाहवे । संख्यायते संख्यम् । स्थादित्वात् कः । पुंक्लीबः । यथा–संख्येऽपि खेऽपि च शिवाश्च सुरस्त्रियश्च । संख्यैकादौ विचारे च । संख्यानं संख्या । उपसर्गादात ५ । ३ । ११० । इत्यङ् एकादौ यथा–नाकारणरुपां संख्या । विचारे यथा–संख्यः सांख्यावतां मुख्यो नानेकान्तं प्रतिक्षिपेत् । सन्ध्या कालनदीभिदोः । चिन्तायां संश्रवे सीम्नि सन्धाने कुसुमान्तरे । सन्ध्यायते संध्यानं वा सन्ध्या । उपसर्गादातः ५ । ३ । ११० । इत्यङ् । सजति वा । सञ्जेर्ध च (उ० ३५९) इति यः । सप्तस्वर्थेषु ।।३७६।। संश्रवः प्रतिज्ञा । सर्वेषु यथा– सन्ध्यायाः सरितः सन्ध्यादेशे सन्ध्यां विधाय सः । सन्ध्याभिः कुरुते सान्ध्यं विधिं विधिवदग्रणीः । साध्यो योगे साधनीये गणदैवतभिद्यपि । साध्यते साध्यः । साधनीये वाच्यलिङ्गः । योगे यथा–सिद्धः साध्यः शुभः शुक्लो ब्रह्मा ऐन्द्रोऽथ वैधृतिः । साधनीये यथा–चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रिया । गणदैवतभेदो (भिदो) द्वादशसंख्याः साध्याः । देवगणा इति शैवागमे प्रसिद्धाः । तत्र प्रायेण पुंभूम्नि । यथा–साध्येभ्यः स्वाहा ।।३७७।। सायः शरेऽपराह्णे च । स्यति सायः ।

**सायः शरेऽपराह्णे च, स्थेयोऽक्षदृक्पुरोधसोः ।**
**सेव्यमुशीरे सेवार्हे, सैन्यं सैनिकसेनयोः ॥३७८॥**
**सौम्यः सोमात्मजेऽनुग्रे मनोज्ञे सोमदैवते ।**
**सौम्याः पुनर्मृगशिरः, शिरःस्थाः पञ्चतारकाः ॥३७९॥**

स्थाच्छामा (उ० ३५७) इति यः। अपराह्णे क्लीबे इति लिङ्गविदः। शरे यथा–स तस्य काये प्रजिघाय सायम्। अपराह्णे यथा–सायमण्डनसमुत्सुकाङ्गनो दूत्यकर्मसु रतः सखीजनः। स्थेयोऽक्षदृक्पुरोधसोः। तिष्ठन्त्यस्मिन्निति स्थेयः। बाहुलकादधिकरणेऽपि यः। अक्षं व्यवहारं पश्यत्यक्षदृक्। न्यायदर्शकः। पुरोधाः पुरोहितः। द्वयोर्यथा–स्थेयो विधेयेषु सदा प्रमाणम्। सेव्यमुशीरे सेवार्हे। सेव्यते सेव्यम्। उशीरं वीरणीमूलम्। सेवार्हे वाच्यलिङ्गः। तत्र यथा–सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्। सैन्यं सैनिकसेनयोः। सेनां समवैति सैन्यम्। सेनाया वा। ६।४।४८। इति ण्यः। सेनैव वा सैन्यम्। भेषजादित्वाद् ध्यण्। सैनिके वाच्यलिङ्गः। तत्र यथा–सैन्याः श्रियामनुपभोगनिरर्थकत्वमिथ्याप्रवादममृ सृ,जन् व(घ)ननिम्नगानाम्। सेनायां यथा– गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्। सौम्यः सोमात्मजेऽनुग्रे मनोज्ञे सोमदैवते। सोमो देवताऽस्य सौम्यः। कसोमाट्ट्यण्। ६।२।१०७। अनुग्रमनोज्ञयोस्तूपचारात् सोम एव वा सौम्यः। सोमात्मजे पुंसि। शेषेषु वाच्यलिङ्गः। सोमात्मजे यथा–शौरेः सौम्यसितावरी। अनुग्रमनोज्ञयोर्यथा – कश्चित् सौम्याध्यवसितमिदं बन्धुकृत्यं त्वया मे। सोमदेवते यथा-निर्वपेत हविः सौम्यम्। सौम्याः पुनर्मृगशिरः शिरःस्थाः पञ्चतारकाः। पञ्चतारकाः

**हार्यः कलिद्रौ हर्तव्ये हृद्यं धवलजीरके ।**
**हृत्प्रिये हृद्धिते हृज्जे हृद्या तु वृद्धिभेषजे ॥३८०॥**
**हृद्यस्तु वशकृन्मन्त्रेऽग्रं पुरः प्रथमेऽधिके ।**
**उपर्य्यालम्बने श्रेष्ठे परिमाणे पलस्य च ॥३८१॥**

तारका इल्वलाख्याः। सोमदैवतत्वात् मृगशिर एव सौम्यमित्यन्ये। यथा–सोमेन सौम्यं भृगुरेवती च ॥३७९॥ हार्यः कलिद्रौ हर्तव्ये। ह्रियते हार्यः। कलिद्रुर्बिभीतकः। हर्तव्ये वाच्यलिङ्गः। तत्र यथा–विमुच्य सा हारमहार्यनिश्चया। हृद्यं धवलजीरके हृत्प्रिये हृद्धिते हृज्जे। हृदयस्य प्रियं हृद्यम्। हृद्य पद्य ७।१।११। इति साधुः। हृदयाय हितं वा। प्राण्यङ्गरथ ७।१।३७। इति यः। हृदि भवं वा। दिगादित्वाद् यः। हृत्प्रिये हृद्धिते हृज्जे च वाच्यलिङ्गः। हृत्प्रिये हृद्धिते च यथा–निपीतो निःश्वासैरयममृतहृद्योऽधररसः। हृज्जे हृदयजाते यथा–हृद्योऽस्य शोकस्तु न निर्जगाम। हृद्या तु वृद्धिभेषजे। वृद्धि नाम्नि औषधे ॥३८०॥ हृद्यस्तु वशकृन्मन्त्रे। हृदयस्य बन्धनो हृद्यो वशीकरणमन्त्रः। तत्र यथा – हृद्यसाधनविधौ निबद्धधीः। अथ रान्ताः। अग्रं पुरः प्रथमेऽधिके। उपर्यालम्बने श्रेष्ठे परिमाणे पलस्य च। भिक्षाप्रकारे सङ्घाते प्रान्तेऽपि। अगत्यग्रम्। भी वृधि (उ० ३८७) इति रः। पुरः पुरस्तादर्थे यथा–अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुद्धतानि। प्रथमे यथा–उग्रे गतेन वसतिं परिगृह्य रम्यम्। अधिके यथा–साग्रेऽपि योजनशते पूर्वोत्पन्ना गदाम्बुदाः। उपर्यर्थे यथा–हर्म्याग्रसंरूढ-तृणाङ्कुरेषु तेजोविषह्यं रिपुमन्दिरेषु। आलम्बने यथा–लब्धाग्रोऽपि ममज्जाब्धौ। श्रेष्ठे वाच्यलिङ्गः। आविष्टलिङ्ग इत्यन्ये। तत्र

**भिक्षाप्रकारे सङ्घाते प्रान्तेऽप्यद्रिस्तु पर्वते ।**
**सूर्ये शाखिनि चाभ्रं तु त्रिदिवे गगनेऽम्बुदे ।।३८२।।**
**अस्त्रः शिरसिजे कोणे स्यादस्रं शोणितेऽश्रुणि ।**
**अस्त्रं चापे प्रहरणेऽप्यंह्रिः पादद्रुमूलयोः ।।३८३।।**

---

यथा–त्वमग्रं हि समग्रस्य राज्यस्यास्य महीपते। परिमाणे पलस्य चेति पललक्षणे परिमाणे इत्यर्थः ।।३८१।। भिक्षाप्रकारो भिक्षाभेदः। यत् स्मृतिः। ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम्। अग्रं चतुर्गुणं प्राहुर्हितकारं द्विजोत्तमाः। सङ्घाते यथा–ग्रन्थाग्रमस्य विज्ञेयं सहस्राणि दशैव तु। प्रान्ते यथा–कराग्रलग्नाऽभिनवाथ बाला। अद्रिस्तु पर्वते। सूर्ये शाखिनि च। अति अद्यते वा अद्रिः। तङ्कि वङ्कि (उ० ६९२) इति रिः। पुंसि। पर्वते यथा–तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी। सूर्ये यथा – अद्रिः सान्द्रकरौघनाशिततमः स्तोमोऽयमभ्युद्यतः। शाखिनि यथा–उत्खायाद्रीन्द्रुतमभिमुखं पर्वतांश्च क्षिपन्तः। अभ्रन्तु त्रिदिवे गगनेऽम्बुदे। अभ्रति अभ्रम् आप्नोति वा खुर क्षुर (उ० ३९६) इति साधुः। त्रिदिवे गगने च यथा–अभ्रात्किं निपतन्ति केऽपि गुणिनः स्वामिप्रसादोचिताः। अम्बुदे यथा–अभ्रस्तम्बविडम्बयौवनमिति प्रेम्णावगूढाः स्त्रियः ।।३८२।। अस्त्रः शिरसिजे कोणे। अस्यते अस्त्रः। भीवृद्धि (उ० ३८७) इति रः। शिरसिजः केशस्तत्र यथा–अस्त्रैर्विकीर्णैः परितोस्रमिश्रैः। कोणे यथा–अस्त्रं शृङ्गाटकं जगुः। स्यादस्रं शोणितेऽश्रुणि। शोणिते यथा–पौनःपुन्यादस्रगन्धेन मत्तो मृद्नन् कोपाल्लोकमायोधनोर्व्याम्। अश्रुणि यथा–अस्रैस्तावन्मृदुरुपचितैर्दृष्टिरालुप्यते मे। अस्त्रं चापे प्रहरणेऽपि। अस्यतेऽनेन अस्त्रम्। त्रट्। द्वयोर्यथा–

**अरो जिनेऽरं चक्राङ्गे शीघ्रशीघ्रगयोरपि ।**
**आरो रीरी शनिर्भौम आरा चर्मप्रभेदिनी ॥३८४॥**
**इराम्भोवाक्सुराभूमिष्विन्द्रः शक्रेऽन्तरात्मनि ।**
**आदित्ये योगभेदे च स्यादिन्द्रा तु फणिज्जके ॥३८५॥**

दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राण्यपि । अंह्रिः पादद्रुमूलयोः। अंहते अंह्रिः । तड्कि वड्कि (उ० ६९२) इति रिः । पुंसि । पादे यथा–संहरन्नंह्रिरंहः । द्रुमूले वृक्षजटायां यथा– पश्य पत्रविवरान्तश्चयैः पूजिताः शशिकरैरिवांह्रिषु ॥३८३॥ अरो जिने । इयर्त्ति अरः । जिनोऽष्टादशतीर्थकरः । तत्र यथा– नतामरनरः श्रीमानरः पातु जिनेश्वरः । अरं चक्राङ्गे शीघ्रशीघ्रगयोरपि । शीघ्रगे वाच्यलिङ्गः। चक्राङ्गे यथा–चक्रीचक्रारपङ्क्तम् । शीघ्रे द्रुते यथा–चक्रं दहतारं (प्र० द्विवारं) शीघ्रगे यथा–पथि गच्छन्नरोऽचरः । आरो रीरी शनिर्भौमः । अर्यतेऽसावित्यारः । घञ् । रीरी पित्तलभेदः । तत्र यथा–आरं कारयते तारम् । शनौ यथा–आरेण सारा कथिता चतुर्थी । भौमे यथा–रविमन्दारवारेषु यदि भद्रातिथिर्भवेत् । आरा चर्मप्रभेदिनी । अर्यतेऽनया आरा । भिदादित्वादङि साधुः । यथा– तीक्ष्णांशुः किरणैस्तीक्ष्णैराराभिरिव विध्यति ॥३८४॥ इराऽम्भोवाक्सुराभूमिषु । एति इरा । इण्धाग्भ्यां वा । (उ० ३८९) इति कित् रः । चतुर्षु-अर्थेषु । अन्नाप्सरोविशेषयोरपि मंखः । अम्भसि अन्ने च यथा–इरातृप्तिकरी नित्यं पितृणां परमा सुधा। वाचि भूमौ च यथा–सुवर्णघटनाचिता विबुधसङ्घसंसेविता भवत्पतितरामिरा भुवनमण्डनं यत्र मे । सुरायां यथा–इरेव स्वाद्यमानैव वेश्यामदविकासिनी । अप्सरोविशेषे यथा–इराना-

**उग्रः क्षत्रियतः शूद्रा सूनावुत्कटरुद्रयोः ।**
**उग्रावचाछिक्किकयोरुस्रा गवोपचित्रयोः ।।३८६।।**
**उस्रो मयूखे स्यादुष्ट्री मृद्भाण्डे करभस्त्रियाम् ।**
**ऐन्द्रिरिन्द्रसुते काकेऽण्योड्रा जनपदान्तरे ।।३८७।।**

---

माप्सराः पूर्वं समुद्रादुद्गताभवत् । इन्द्रः शक्रेऽन्तरात्मनि । आदित्ये योगभेदे च । इन्दति इन्द्रः । भी वृधि (उ० ३८७) इति रः । शक्रे यथा—तदिन्द्रसन्दिष्टमुपेन्द्रयद्वचः । अन्तरात्मनि यथा—इति हृतपरमार्थैरिन्द्रियैर्भ्रम्यमाणः स्वहितकरणधूर्त्तैः पञ्चभिर्वञ्चितोसि । अत्र हि इन्द्रस्य आत्मनश्चिन्हमित्यादिव्युत्पत्तौ इन्द्रियमिति साधुः । आदित्ये यथा—इन्द्रेण द्राविते ध्वान्ते । योगभेदे यथा—ब्रह्मा ऐन्द्रोऽथ वैधृतिः। अत्र हि इन्द्र एव ऐन्द्रः। स्यादिन्द्रा तु फणिज्जके । फणिज्जको मरुबकः । तत्र स्त्रीलिङ्गः ।।३८५।। उग्रः क्षत्रियतः शूद्रासूनावुत्कटरुद्रयोः । उच्यते उषति वा उग्रः । खुर क्षुर (उ० ३९६) इति साधुः । उत्कटे वाच्यलिङ्गः । क्षत्रियतः शूद्रासूनाविति यः क्षत्रियेण शूद्रायां जन्यते । उत्कटे यथा – उग्रे तपसि लीनानामिन्द्रियाणां न विश्वसेत्। रुद्रे यथा—चैतन्यमुग्रादिवदीक्षितेन। उग्रावचाछिक्किकयोः। द्वेऽपि ओषधी। उस्रा गवो(गव्यो)पचित्रयोः। वसत्युस्रा। ऋज्यजितञ्जि (उ० ३८८) इति कित् रः । बाहुलकात्षत्वाभावः। गौरनड्वाही । तत्र यथा—उस्रावा यदि वा मेषश्छागो वा यदि वा वशा । गवि पुंस्यपि मंखः । यदाह अस्रोऽशौगविद्वयोः। उपचित्रा ओषधीभेदः ।।३८६।। उस्रो मयूखे स्यात् । यथा—शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव । उष्ट्री मृद्भाण्डे करभस्त्रियाम् । उष्यते उषति वा उष्ट्रो । सूमूखन्युषिभ्यः कित्

**ओड्रो जने जपावृक्षे, करः प्रत्यायशुण्डयोः ।**
**रश्मौ वर्णोवले पाणौ क्षरो मेघे क्षरं जले ॥३८८॥**

**कद्रुः कनकपिङ्गे स्यात्कद्रूस्तु नागमातरि ॥**
**कारो बलौ वधे यत्ने, हिमाद्रौ निश्चये यतौ ॥३८९॥**

(उ० ४४९) इति त्रट् । मृद्भाण्डमलिञ्जरः । तत्र यथा–धूर्भङ्गसंक्षोभविदारितोष्ट्रिकागलन्मधुप्लावितदूरवर्त्मनि । करभस्त्रियां यथा – उष्ट्रीदुग्धं निरामयम् । पुंल्लिङ्गः करभेऽपि । ऐन्द्रिरिन्द्रसुते काकेऽपि । इन्द्रस्यापत्यम् ऐन्द्रिः। इन्द्रसुतो जयन्तः। तत्र यथा–ऐन्द्रिणापि यदुदस्ततन्द्रिणा सेव्यते सरभसं वृषभध्वजः। वाल्यर्जुनयोरपि मंखः। तयोरपि इन्द्रसुतत्वादत्र ग्रहणम्। वालिनि यथा–ऐन्द्रिस्तोयनिधीन् जगाम चतुरः कक्षे वहन् रावणम् । अर्जुने यथा–मुखप्रसादानुमितं तदैन्द्रेरनुग्रहं शम्भुकृतं विवेद । काके यथा–ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः । ओड्रा जनपदान्तरे । ओड्रो जने जपावृक्षे । ओणति ओड्रः । खुर क्षुर (उ० ३९६) इति साधुः। जनपदान्तरे पुंभूम्नि ॥३८७॥ तत्र यथा–ओड्रेषु पुंड्राणि भवन्ति भूम्ना । जनस्तडागादिखनकस्तत्र यथा–ओड्राः खनन्ति हि वहन्ति (प्र०वदन्ति) तदीयपत्न्यः । करः प्रत्यायशुण्डयोः । रश्मौ वर्षोपले पाणौ । कुर्वन्ति अनेन करोति कीर्य्यते वा करः । प्रत्यायो राजग्राह्यः । तत्र यथा–करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम् । शुण्डायां यथा–किं करोति करोत्येव करीरेऽपि करङ्करी । रश्मौ वर्षोपले पाणौ ज यथा–दशशत अरस्य रोधादेककरोब्दः प्रतिष्ठितो जयति । क्षरो मेघे–क्षरति क्षरः। क्षरं जले । जले पानीये क्लीबे तत्र मेघे च यथा–क्षरत्येष क्षरं क्षरः ॥३८८॥ कद्रुः कनक-

**कारा बन्धनशालायां, बन्धे दूत्यां प्रसेवके ।।**
**स्याद्धेमकारिकायां च क्षारः काचे रसे गुडे ।।३९०।।**
**भस्मनि धूर्तलवणे, कारिः शिल्पी क्रियाऽपि च ।।**
**कारुस्तु कारके शिल्पे, विश्वकर्मणि शिल्पिनि ।।३९१।।**

पिङ्गे स्यात् । कत् कुत्सितं द्रवति कद्रुः। हृरि पति (उ० ७४५) इति डद्रुः । कनकपिङ्गे गुणमात्रे पुंसि। तद्वति वाच्यलिङ्गः। तत्र यथा—उपद्रुतः कद्रुभिरेष वानरैः। कद्रूस्तु नागमातरि। बाह्वन्त-कद्रुकमण्डलोर्नाम्नि। २।४।७४। इति ऊञ्, यथा—मातः कद्रु यदि प्रसौति भवतीभूयः सुतानीदृशान्। कारो बलौ वधे यत्ने हिमाद्रौ निश्चये यतौ ।। कर एव कारः। क्रियते वा। बलिर्नृपग्राह्य-स्तत्र यथा—चिरात्कारं वारांनिधिरपि गृहीतस्तव भटैः ।।३८९।। कारा बन्धनशालायां बन्धे दूत्यां प्रसेवके। स्याद्धेमकारिकायां च। क्रियतेऽस्यां कारा। भिदादित्वादङि साधुः। बन्धनशालायां यथा—नराः संसारकारायाम्। बन्धे यथा—कारागृहे निर्जित-वासवेन लङ्केश्वरेणोषितमाप्रसादात्। दूत्यां यथा—वराकारा-कारा किमिह कुरुते प्रेम्णि गलिते। प्रसेवको वस्त्रादिमयं भाजनम्। तत्र यथा—सारं कारासु निक्षिप। हेमकारिका ओषधिः। क्षारः काचे रसे गुडे ।। भस्मनि धूर्तलवणे। क्षरति क्षारः ज्वलादित्वाद् णः। पञ्चस्वर्थेषु। धूर्त्तलवणम्—लवणभेदः। काचे भस्मनि च यथा—सत्यं क्षारमणिः क्षारस्तस्य चिन्तामणेः पुरः। शेषेषु यथा—कः क्षते क्षारनिक्षेपं विदधाति विचक्षणः। ।।३९०।। कारिः शिल्पी क्रियापि च। करोति करणं वा कारिः। कृशृकुटि (उ० ६१९) इति णिदिः। शिल्पिनि वाच्यलिङ्गः क्रियायां स्त्रीलिङ्गः। कारुस्तु कारके शिल्पे विश्व-

**कीरः शुके जनपदे, क्षीरं पानियदुग्धयोः ॥**
**क्षुरो गोक्षुरके कोकिलाक्षे छेदनवस्तुनि ॥३९२॥**
**क्षुद्रो दरिद्रे कृपणे, निकृष्टेऽल्पनृशंसयोः ।**
**क्षुद्रा व्याघ्रीनटीव्यङ्गाबृहतीसरघासु च ॥३९३॥**

कर्मणि शिल्पिनि। करोति क्रियते वा कारुः। कृवापाजि (उ० १) इति उण्। चतुष्वर्थेषु। कारकशिल्पिनोर्वाच्यलिङ्गः। अन्यत्र पुंसि। कारके यथा–राघवस्य ततः कार्यं कारुर्वानर-पुङ्गवः। विश्वकर्मशिल्पिनोर्यथा–अस्याः सुचारुर्मधुरेव कारुः। श्वासं वितेने मलयानिलेन। कीरः शुके जनपदे। कायति कायते वा कीरः। घसि वसि (उ० ४१९) इति किदीरः। शुके यथा–कीराधिराजविरहज्वरकातराङ्गी याता न लोचनपथं मम वल्लभा ते। जनपदः काश्मीराख्यः तत्र यथा–वीरः कीरपतिः स एष निखिलक्ष्मापालचूडामणिः। क्षीरं पानीयदुग्धयोः। घस्यते क्षीरम्। घसि वसि (उ० ४१९) इति किदीरः गमहन ४।२।४४ इति उपान्त्याकारलोपः दुग्धे पुंक्लीबः। पानीये यथा–यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति। दुग्धे यथा–इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्। क्षुरो गोक्षुरके कोकिलाक्षे छेदनवस्तुनि। क्षुरति क्षुरः। गोक्षुरककोकिलाक्षौ औषधभेदौ। छेदनवस्तुनि रोमादिछेदनोपकरणे यथा–एष गणः क्षुरकर्मणि शस्तः। काण्डेक्षावपि मंखः। तीक्ष्णे तूपमानाद्रूढः ॥३९२॥ क्षुद्रो दरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोः। क्षुणत्ति क्षुद्यते वा क्षुद्रः। ऋज्यजि (उ० ३८८) इति कित् रः। पञ्चस्वर्थेषु वाच्यलिङ्गः। दरिद्रे कृपणे च यथा–क्षुद्रो नैव ददाति किञ्चिदुचितं दद्यादथ स्वल्पकम्। निकृष्टे यथा–क्षुद्रेऽपि नूनं

**चाङ्गेरिकायां हिंस्रायां, मक्षिकामात्रवेश्ययोः ।**
**कुरुः स्यादोदने भूपभेदे श्रीकण्ठजाङ्गले ॥३९४॥**
**क्रूरा नृशंसघोरोष्णकठिनाः कृच्छ्रमंहसि ।**
**कष्टे सान्तपने क्षेत्रं भरतादौ भगाङ्गयोः ॥३९५॥**

शरणं प्रपन्ने । अल्पे यथा – गोलाङ्गूलविलोलपाणितुलिताः क्षुद्राः क्व ते क्ष्माभृतः । नृशंसः क्रूरस्तत्र यथा–आः क्षुद्रे पति दूति राक्षसपशुम् । क्षुद्रा व्याघ्रोनटीव्यङ्गाबृहतीसरघासु च । चाङ्गेरिकायां हिंस्रायां मक्षिकामात्रवेश्ययोः । व्याघ्रादिषु नवसु स्त्रियाम् । व्याघ्री कण्टकारिका तत्र यथा–क्षुद्रा मृता नागर-पुष्कराख्यैः कृतः कषायः । नटी नटस्त्री तत्र यथा–क्षुद्राभि-रुन्मुद्रितवृत्तग्रन्थे । व्यङ्गा अङ्गहीनास्त्री तत्र यथा– क्षुद्रापि रूपेण मदं बिभर्त्ति । बृहती क्षुद्रवार्त्ताकी सरघा मधुमक्षिका । तत्र यथा – क्षुद्राभिरक्षुद्रतराभिराकुलं विदश्यमानेन जनेन दुद्रुवे ॥३९३॥ चाङ्गेरिका हिंस्रा च ओषधिभेदौ । मक्षिका-मात्रं सर्वा अपि मक्षिकाः । वेश्या, शीलहीनोपलक्षणम् । तत्र यथा–धिक् ताः शुद्राः पृथुकुलगिरिग्रावदम्भोलितुल्याः । कुरुः स्यादोदने भूपभेदे श्रीकण्ठजाङ्गले । कीर्यते कुरुः । कृगृकृत उच्च (उ० ७३४) उः । पुंसि । भूपभेदे नृपभेदे यथा–त्वयि भक्तिमता न सत्कृतः कुरुराजा गुरुरेव वेदिपः । श्रीकण्ठजाङ्गलं तीर्थ-विशेषस्तत्र यथा–कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम् । क्रूरा नृशंसघोरोष्णकठिनाः । कृन्तति क्रूरः । कृतेः क्रू कृच्छौ च (उ० ३९५) इति रः । चतुर्षु अर्थेषु वाच्यलिङ्गः । नृशंसे कठिने च यथा–क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः । घोरे भयङ्करे यथा–संसारकारागृहक्रूरक्रोडनिवासिनो न सुलभा

**केदारे सिद्धभूपत्न्योः, क्रोष्ट्री क्षीरविदारिका ।**
**शृगालिका लाङ्गली च, क्षौद्रं तु मधुनीरयोः ॥३९६॥**

वार्त्तापि मोक्षं प्रति । उष्णे यथा—क्रूरैः करैरेष दुनोति भानुः। कृच्छ्रमंहसि । कष्टे सान्तपने। कृन्तति कृच्छ्रम् । कृतेः कृ कृच्छ्रौ च (उ० ३९५) इति रः। सान्तपने पुंक्लीबः। अन्यत्र क्लीबे। अंहसि पापे यथा—कृत्स्नानि कृच्छ्राणि रविर्लुनातु। कष्टे यथा—कृच्छ्रलब्धमपि लब्धवर्णभाक् तं दिदेश मुनये स लक्ष्मणम्। सान्तपनं व्रतविशेषः। यत् स्मृतिः। त्र्यहं परश्च त्र्यहं प्रातरस्त्रयहमद्यादयाचितम्। त्र्यहं परश्च नाश्नीयात्कृच्छ्रं सान्तापनं स्मृतम्। क्षेत्रं भरतादौ भगाङ्गयोः। केदारे सिद्धभूपत्न्योः। क्षयन्त्यस्मिन्नीति क्षेत्रम्। हु यामा (उ० ४५१) इति त्रः। भरतादौ यथा—इहैव भरतक्षेत्रे। आदि शब्दाद् ऐरावतादिपरिग्रहः। भगे योनौ यथा—रज्यन्ति जन्तवश्चित्रं क्षेत्रे मूत्रपथेऽप्यहो। अङ्गे यथा—त्रायध्वं योगिनः क्षेत्रम् ॥३९५॥ केदारे यथा—लूनः खलीकृतः क्षुण्णः शालीयैरिव मानवैः। आर्त्तास्तानेव पुष्णाति क्षेत्रजे विकृतिः कुतः। उपलक्षणं च केदारः। सस्य निष्पत्तिस्थानेऽपि। तत्र यथा—ऊषराणि च क्षेत्राणि दूरतः परिवर्जयेत्। सिद्धभुवि यथा—सिद्धाः क्षेत्रेषु दृश्यन्ते। पत्न्यां यथा—वृद्धस्तु व्याधितो वाराजामातृकुल्यबन्धु गुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत्। क्रोष्ट्री क्षीरविदारिका। शृगालिका लाङ्गली च। क्रोशति क्रोष्ट्री। क्रुशि कमि इति तुन। स्त्रियाम् २।४।१ इति तस्य तृजादेशे ङीः। विदारी ओषधिः। क्षीरेण युक्ता विदारी क्षीरविदारिका। शृगालिकायां यथा—क्रोष्टून् शिशून् क्रोष्ट्र्यपि याति हित्वा। लाङ्गली कलिकारिका ओषधिः।

खरो रक्षोऽन्तरे तीक्ष्णे दुःस्पर्शे रासभेऽपि च ॥
खरुः स्यादश्वहरयोर्दर्पदन्तसितेषु च ॥३९७॥
खुरः शफे कोलदले गरस्तूपविषे विषे ॥
रोगे गरं स्यात्करणे गात्रमङ्गशरीरयोः ॥३९८॥

क्षौद्रं तु मधुनीरयोः । क्षुद्राभिः कृतं क्षौद्रम् । नाम्नि मक्षिकादिभ्यः । ६।३।१९३। इत्यण् । क्षुद्यति वा । खुर क्षुर (उ० ३९६) इति साधुः । मधुनि यथा–तस्तार सरघाच्छन्नैः स-क्षौद्रपटलैरिव ॥३९६॥ खरो रक्षोऽन्तरे तीक्ष्णे दुःस्पर्शे रासभेऽपि च । खनति खरः । खुर क्षुर (उ० ३९६) इति साधुः । खमस्यास्तीति वा मध्वादित्वात् रः । चतुर्षु अर्थेषु । तीक्ष्णे दुःस्पर्शे च वाच्यलिङ्गः । रक्षोन्तरे यथा – संहारे खरदूषणत्रिशिरसामेषाव दृष्टा स्थितिः। तीक्ष्णे यथा–प्रेङ्खत्खड्गाग्रधाराखरनखरशिखोत्खातकुम्भी न कुम्भः । दुःस्पर्शे यथा–प्रेङ्खन्तः खे खरांशोः खचितदिनमुखास्ते मयूखाः सुखं वः। रासभे यथा–तावत्खरः प्रखरमुल्लमयाम्बभूव । खरुः स्यादश्वहरयोर्दर्पदन्तसितेषु च । खनति खरुः । खनो लुक् च (उ० ८०८) इति रुः । पञ्चस्वर्थेषु । सिते गुणे पुंसि । तद्वति वाच्यलिङ्गः। अन्यत्र पुंसि । अश्वे सिते च यथा–क्षुण्णं खुरैश्च खरुभिः खरुधोरणीभिः । दन्तो दशनः । तत्र यथा–दन्ते मुखखुरः खरुः ॥३९७॥ खुरः शफे कोलदले खुरत् छेदने । खुरति खुरः । शफे यथा–अजोनेय खुरक्षुण्णः पववैलाक्षेत्रसम्भवम् । कोलदलं औषधम् । गरस्तूपविषे विषे । रोगे । गिरति गरः। अ इत्यः । उपविषम् मारको द्रव्ययोगः । रोगो रोगविशेषः। त्रिष्वपि यथा–रक्षो यक्षोरगव्याघ्रव्यालानलगरादयः । नापकर्तुमलं तेषां यैर्धर्मः

**गजाग्रदेशेऽथ गिरिः पूज्येऽक्षिरुजि कन्दुके ।।**
**शैले गिरियके गीर्णावपि गुन्द्रस्तु तेजने ।।३९९।।**
**गुन्द्रा प्रियङ्गौ कैवर्तीमुस्तके भद्रमुस्तके ।।**
**गुरुर्महत्याङ्गिरसे, पित्रादौ धर्मदेशके ।।४००।।**

शरणं श्रितः। गरं स्यात्करणे। करणं बवादि। तत्र यथा—गरवाणिजविष्टिकरणैः। गात्रमङ्गशरीरयोः गजाग्रदेशे। गच्छत्यनेन गात्रम्। गमेरा च (उ० ४५३) इति त्रः। गजाग्रदेशे स्त्रीक्लीबः। अङ्गमवयवस्तत्र यथा—तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन। शरीरे यथा—अपरिचलितगात्राः कुर्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः ।।३९८।। गजस्य अग्रदेशोऽग्रजङ्घादिविभागस्तत्र यथा—आपस्कारा लूनगात्रस्य भूमिं निःसाधारं गच्छतो वाङ्मुखस्य लब्धायामं दन्तयोर्युग्ममेव त्वं (प्र० स्वं)नागस्य प्रापदुत्तम्भनत्वम्। अथ गिरिः पूज्येऽक्षिरुजि कन्दुके। शैले गिरियके गीर्णावपि। गृणाति गिरति गीर्यते वा गिरः। नाम्युपान्त्य ५।१।५४। इति किदिः। षट्स्वर्थेषु पूज्ये वाच्यलिङ्गः। अन्यत्र पुंसि। पूज्ये यथा—वृक्षागारेषु शेते गिरति मुनिर्गिरिर्ग्रासमात्रं पवित्रम्। अक्षिरुजि नयनरोगे यथा—गिरिणा दूषितं नेत्रम्। कन्दुको वस्त्रादिमयं क्रीडनकम्। गिरियको गिरिगुडः काष्ठादिमयं क्रीडनकम् तयोर्यथा—क्रीडन्ति गिरिभिरपि ये कष्टं तेषां नु भूधराक्रमणम्। शैले यथा—वहति गिरिरयं विलम्बि घण्टाद्वयपरिवारितवारणेन्द्रलीलाम्। गीर्णिरभ्यवहारः। गुन्द्रस्तु तेजने। गुद्यते गुन्द्रः। खुर क्षुर (उ० ३९६) इति साधुः। तेजनो मुञ्जः ।।३९९।।

प्रियङ्गौ कैवर्त्तीमुस्तके भद्रमुस्तके। त्रयोऽप्योषधिभेदाः।

**अलघौ दुर्जरे चापि, गृद्ध्रो गृध्नौ खगान्तरे ।**
**गोत्रं क्षेत्रेऽन्वये छत्रे, सम्भाव्यबोधवर्त्मनोः ॥४०१॥**

तेषु यथा – गुन्द्राप्ररोहकवलावयवावकीर्णम् । गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशके अलघौ दुर्जरे चापि । गृणाति गीर्यते वा गुरुः । कृग्र ऋत उर् च (उ० ७३४) इत्युः । षट्स्वर्थेषु । महत्यलघौ दुर्जरे च वाच्यलिङ्गः । महान् बृहत् गौरवार्हे वा । तत्र क्रमेण यथा–कृतगुरुतरहारच्छेदमालिङ्ग्यपत्यौ । यथा च । गुरुर्धरित्री क्रियतेतरां त्वया आङ्गिरसे बृहस्पतौ यथा–गुरुं नेत्र-सहस्रेण प्रेरयामास वासवः (प्र. वृत्रहा)। पित्रादौ यथा–गुरुः प्रगल्भेऽपि वयस्यतोऽस्याः । आदिशब्दात् सुता सम्बन्धविधिना भवति(प्र. भव)विश्वगुरोर्गुरुरित्यादौ । श्वशुरेऽपि । एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् । इत्यादावुपाध्यायेऽपि । गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दिलीपः । इत्यादौ संस्कारकेऽपि । गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोरित्या-दावाराध्येऽपि । धर्मदेशके यथा–सामायिकस्था धर्मोपदेशका गुरवो मताः ॥४००॥ अलघुर्भारयुक्तः, तत्र यथा–गौरवे तु सुवर्णस्य साक्षिणी जगतां त्रयी । अत्र हि गुरोर्भावो गौरवम् । यथा–वा सा कान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयम् । दुर्जरे यथा–गुरुः सूकरमांसानामाहारो हि भवेन्नृणाम् । गृध्रो गृध्नौ खगान्तरे । गृध्यति गृध्रः । ऋज्यजि (उ० ३८८) इति कित् रः । गृध्नौ लोभवति वाच्यलिङ्गः । तत्र यथा–गृध्रा हि गृध्यन्त्यपनीति वर्त्मना । खगान्तरे यथा–गृध्रपक्षपरिधूसरालकाः । गोत्रं क्षेत्रेऽन्वये छत्रे सम्भाव्यबोधवर्त्मनोः । वने नाम्नि च । गूयते गोत्रम् । हुयामा (उ० ४५१) इति त्रः । गाः किरणान्

**वने नाम्नि च गोत्रोऽद्रौ, गोत्रा भुवि गवाङ्गणे ।**
**गौरः श्वेतेऽरुणे पीते, विशुद्धे चन्द्रमस्यपि ॥४०२॥**
**विशदे गौरं तु श्वेतसर्षपे पद्मकेसरे ॥**
**गौर्युमानग्निकोर्वीषु प्रियङ्गौ वरुणस्त्रियाम् ॥४०३॥**

---

त्रायते इति वा। क्षेत्रे यथा–गोत्रं मणेरस्य स रोहणाद्रिः। अन्वयः कुलम्। तत्र यथा–सोऽयं गोत्रे सवितुरुदितो वारिधेर्यद्वदिन्दुः। छत्रम् आतपत्रम्। सम्भाव्यो बोधः सम्भाव्यबोधः। वर्त्म मार्गः ॥४०१॥ वनं काननम्। नाम अभिधा। तत्र यथा–मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा। गोत्रोऽद्रौ। गां पृथ्वीं त्रायते गोत्रः। यथा–रघोदवष्टम्भमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः। गोत्रा भुवि गवाङ्गणे। गास्त्रायते गोत्रा। गवां समूहो वा। गोरथवातात् ६।२।२४। इति त्रल्। भुवि यथा–गोत्रत्राससमाकुला मधुरिपुं प्राप्ता शरण्यं विभुम्। गवाङ्गणे गोसमूहे यथा–गोत्रात्राणमिषेण दर्शितबलः शौरिः स वस्त्रायताम्। गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि। विशदे। गूयते गौरः। खुर क्षुर (उ० ३९६) इति साधुः। चन्द्रमसि पुंल्लिङ्गः। शेषेषु गुणे पुंसि तद्वति वाच्यलिङ्गः। श्वेते यथा–कैलाशगौरं वृषमारुरुक्षोः। अरुणे यथा–ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान्। पीते यथा–त्वं रोचना गौरशरीरयष्टिः। विशुद्धे यथा–स्नानेन गौरं वपुः। चन्द्रमसि यथा–गौरश्चोरित(गौरश्चूरित)शर्वरीचर(वर)तमस्तोमो यमभ्युद्यतः ॥४०२॥ विशदे यथा–इतस्ततश्चन्द्रमरीचिगौरैः। गौरं तु श्वेतसर्षपे पद्मकेसरे। श्वेतसर्षपः सर्षपभेदः। पद्मकेसरं पद्मकिञ्जल्कः। तयोः क्लीबे। गौर्युमानग्निकोर्वीषु प्रियङ्गौ वरुणस्त्रियाम्। रजन्यां रोचनीनद्योः। गौरादित्वाद्ङ्यां गौरी।

**रजन्यां रोचनीनद्योर्घस्रो वासरहिंस्रयोः ।।**
**घोरो हरे दारुणे च चरः स्याज्जङ्गमे स्पशे ।।४०४।।**
**चले द्यूतप्रभेदे च चक्रं प्रहरणे गणे ।।**
**कुलालाद्युपकरणे राष्ट्रे सैन्यरथाङ्गयोः ।।४०५।।**

उमायां यथा—क्रीडाशैले यदि च विचरेत्पादचारेण गौरी । नग्निका अदृष्टरजाः कन्या तत्र यथा—गौरी श्रेष्ठा विवाहे स्यात् । उर्वी मही । प्रियङ्गु कङ्गुः। वरुणस्त्री वरुणभार्या ।।४०३।। रजनी हरिद्रा । रोचनी मनःशिला । नदी नदीविशेषः । घस्रो वासरहिंस्रयोः । घसति घस्रः । भीवृधि (उ० ३८७) इति रः । वासरो दिनम् । तत्र यथा—जगद्वि(द्वि)गमघस्र-घस्मरसहस्रभानुप्रभापरिक्वथितपिण्डितो लवणकूटमेवार्णवः । हिंस्रो घातकस्तत्र वाच्यलिङ्गः । घोरो हरे दारुणे च । हन्ति घोरः । कोर चोर (उ० ४३४) इति साधुः । घुरति वा । दारुणे वाच्यलिङ्गः । हरे यथा—घोरः पूरयतां मतम् । दारुणे यथा—अत्रामिषोपचितवल्गदमूकघूकपू(घू)त्कारघोरशिखरस्य तरोः प्ररोहः । चरः स्याज्जङ्गमे स्पशे चले द्यूतप्रभेदे च । चरति चरः । जङ्गमे चले च वाच्यलिङ्गः । जङ्गमे यथा – चराचराणां भूतानां कुक्षिराधारतां गतः। स्पशः प्रणिधिः । तत्र यथा—राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ।।४०४।। चले यथा—यात्रा चरेषु कर्तव्या । द्यूतप्रभेदे यथा—गमे नष्टे चरं कुर्यात् । चक्रं प्रहरणे गणे । कुलालाद्युपकरणे राष्ट्रे सैन्यरथाङ्गयोः । जलावर्त्तेच्छले । क्रियते चक्रम् । कृगो द्वे च । (उ० ७) इति अप्रत्ययो द्वित्वं च । पुंक्लीबः । प्रहरणे राष्ट्रे च यथा— हस्तस्थिताखण्डितचक्र शालिनः । गणे सङ्घे

**जलावर्त्ते छले चक्रः कोके चन्द्रोऽम्बुकाम्ययोः ॥**
**स्वर्णे सुधांशौ कर्पुरे कम्पिल्ये मेचकेऽपि च ॥४०६॥**
**चरुर्हव्यान्ने भाण्डे च चारो बन्धावसर्पयोः ॥**
**गतौ पियालवृक्षे च, चित्रं खे तिलकेऽद्भुते ॥४०७॥**

यथा—एतत्पूतनचक्रमक्रमकृतग्रासार्द्धमुक्तैर्वृकान् । कुलालोपकरणे यथा – प्रियसखि विपद्दण्डप्रान्तप्रपातपरम्परापरिचयचलच्चिन्ता चक्रे निधाय विधिः खलः। आदिशब्दात् दशस्तनासमं चक्रमित्यादौ तैलिकोपकरणेऽपि । तथा— आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रे च यत्नोल्लिखितो विभाति—इत्यादौ शिल्पिभाण्डेऽपि । सैन्ये यथा—परचक्रप्रमथनं सदा विजयवर्द्धनम् । रथाङ्गे यथा—रथस्यैकं चक्रं भुजगयमिताः सप्ततुरगाः ॥४०५॥ जलावर्त्ते यथा—चक्राणि निर्मूलजलाकुलितोदराणि । छले दम्भे यथा—विरूपाक्षोऽपि चक्रधरः । अत्र खलपक्षे चक्रं दम्भं धरतीति चक्रधरः । चक्रः कोके । कोके चक्रवाके यथा—चक्रावक्रितकन्धरास्तटभुवि प्रातर्भजन्ते श्रियम् । चन्द्रोऽम्बुकाम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ये मेचकेऽपि च । चन्दति चन्द्रः । भीवृधि इति रः । सप्तष्वर्थेषु । कर्पूरस्वर्णयोः पुंक्लीबः । अम्बुनि यथा—चन्द्रेण विद्रातितरां पिपासा । काम्ये प्रशस्ये यथा—स्वैरे सात्विकचन्द्र-संदिशततः किं ते प्रियं कुर्महे । स्वर्णे सुधांशौ च यथा नम-स्तुङ्गशरश्चुम्बिचन्द्रचामरचारवे । कर्पूरे यथा – नाभेरेकारवे-स्तिस्रोद्वेचन्द्रस्य कुरु प्रिये । कम्पिल्यम् औषधभेदः । मेचको मयूरपिच्छादिस्थं रेखावलयम् । तत्र यथा – पादुद्रुवत्सपदि चन्द्रकचान् द्रुमाग्रात(प्र० न) । अत्र चन्द्रक एव चन्द्रकस्तद्वान् मयूरः ॥४०६॥ चरुर्हव्यान्ने भाण्डे च । चर्यते भक्ष्यतेऽसौ

**आलेख्ये कर्बुरे चित्रा त्वाखुपर्णीसुभद्रयोः ॥**
**गोडुम्बाप्सरसोर्दन्त्यां, नक्षत्रोरगभेदयोः ॥४०८॥**

चरन्ति अस्माद् दैवपितृभूतानीति वा चरुः। भि वहि (उ० ७२६) इति उः। पुंसि। हव्यान्ने यथा—हेमपात्रीकृतं दोर्भ्यामाददानः पयश्चरुम्। भाण्डे यथा—उत्पलकाञ्चिकचरुः वात्मनः पार्श्वदाहकः। चारो बन्धावसर्पयोः। गतौ पियालवृक्षे च। चर्यतेऽनेन चारः। चर एव वा प्रज्ञादित्वादण्। चरणं वा घञ्। बध्यतेऽस्मिन् बन्धः बन्धनशाला तत्र यथा—संसारचारान्तर कांदिशीकः। अवसर्पे हेरिके यथा—क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः। गतौ यथा – चकोरहर्षीयति चारचौरो वियोगिनी वीक्षितनाथ-वर्त्मा। पियालवृक्षे यथा—चारवश्चारफलिकाः। चित्रं खे तिलकेऽद्भुते। आलेख्ये कर्बुरे। चीयते चित्रम्। चि मिदि उ० ४५४) इति कित् त्रः। कर्बुरे गुणे पुंसि। तद्वति वाच्यलिङ्गः। खे आकाशे आलेख्ये च यथा – चित्रेण जायते चित्रम्। तिलके यथा—चित्रचित्रितललाटपट्टिका। अद्भुते यथा-किमत्र चित्रं यदि कामसूर्भूः ॥४०७॥ कर्बुरे यथा—भात्यलं करणरश्मिरञ्जितं चित्रवर्णमिव शक्रकार्मुकम्। चित्रं चकार पदमर्द्धपुलालयेने-त्यादौ कर्बुरो(प्र. कर्बुरत्वो)पचाराद् नानाप्रकारेऽपि। चित्रा त्वाखुपर्णीसुभद्रयोः। गोडुम्बाप्सरसोर्दन्त्यां नक्षत्रोरगभेदयोः। आखुपर्णी ओषधिः। सुभद्रायाम् अर्जुनपत्न्यां यथा—चित्रं चित्रा-हरणचतुरे फाल्गुने स्नेहयोगात् क्षान्ति चक्रे भुवनविजयी सोऽपि कालेयकारिः। गोडुम्बा इन्द्रवारुणी। अप्सरा अप्सरोभेदः। दन्ती ओषधिः। नक्षत्रभेदे यथा—हिमनिर्मुक्तयोर्योगे चित्राचन्द्र-

**चीरं वाससि चूडायां, गोस्तने सीसपत्रके ।**
**चीरो कच्छाटिकाझिल्ल्योश्चुक्रस्त्वम्लेऽम्लवेतसे* ।।४०९।।**

**वृक्षाम्ले चुक्री चाङ्गेर्यां, चैत्रो मासाद्रिभेदयोः ।**
**चैत्रं मृतकचैत्ये च, चौरो दस्युसुगन्धयोः ।।४१०।।**

मसोरिव । उरगभेदः सर्पभेदः ।।४०८।। चीरं वाससि चूडायां गोस्तने सीसपत्रके । चीयते चीरम् । चि जि (उ० ३९२) इति रो दीर्घत्वं च । वाससि यथा – ते त्र्यहादूर्ध्वमाख्याय चेलुश्चीरपरिग्रहाः । चूडा शिखा । गोस्तनो हारभेदः। सीसपत्रकं सीसकम् । चीरी कच्छाटिकाझिल्ल्योः । चीरी गौरादित्वाद् ङीः। कच्छाटिका लम्बमानः परिधानपश्चादञ्चलः । झिल्लीकीट-प्रायः प्राणिभेदः। तत्र यथा—चारुश्चीरीरव इव पुरः श्रूयते कोऽयमुच्चैः । चुक्रस्त्वम्लेऽम्लवेतसे । वृक्षाम्ले । चकतेऽनेन चुक्रम् । चकि रमि विकसेरुच्चास्य (उ० ३९३) इति रः । पुंक्लीबः । अम्लरसे यथा— चुक्रो रस इवोद्रिक्तपित्तहेतुतया मतः। तद्योगात्काञ्जिकादावपि । अम्लवेतसो वृक्षविशेषः ।।४०९।। वृक्षाम्लं वेषवारविशेषः । चुक्री चाङ्गेर्याम् । गौरादित्वाद् ङीः । चाङ्गेरी औषधिः । चैत्रो मासाद्रिभेदयोः । चैत्री पौर्णमासी अस्य चैत्रः। साऽस्य पौर्णमासी । ६ । २ । ९८ । इत्यण् । चीयते वा । खुर क्षुर (उ० ३९६) इति साधुः। मासे यथा—मालती विमुखश्चैत्रो विकासी पुष्पसम्पदाम् । चैत्रं मृतकचैत्ये च । मृतकचैत्यं यद्दग्धस्य निखातस्य वा उपरि स्तम्भादि क्रियते । चौरो दस्युसुगन्धयोः। चोरयति चोरः। वाच्यलिङ्गः। दस्यौ यथा—प्राप्तः सीमन्तिनीनां मधुसमयसुहृन्मानचोरः समीरः । सुगन्धं सुरभि ।।४१०।।

*प्र० त्वम्ब्लेऽम्ब्लवेतसे ।। वृक्षाम्ब्ले० ।

**छत्रं स्यादातपत्राणे, छत्रा मधुरिकौषधौ ।**
**धान्यके च शिलीन्ध्रे च, छिद्रं विवररन्ध्रवत् ॥४११॥**
**गर्ते दोषे जारस्तूपपत्तौ जायौषधीभिदि ।**
**जीरस्त्वजाज्यां खड्गे च, टारो लङ्गतुरङ्गयोः ॥४१२॥**

छत्रं स्यादातपत्राणे । छाद्यतेऽनेन छत्रम् । त्रट् । छदेरिस्मन्त्रट्क्वौ । ४ । २ । ३३ । इति ह्रस्वः । त्रिलिङ्गः । यथा–रजो विश्रामयन् राज्ञां छत्रशून्येषु मूर्धसु । छत्रा मधुरिकौषधौ । धान्यके च शिलिन्ध्रे च । छादयति छत्रा । हु माया (उ० ४५१) इति त्रे बाहुलकात् ह्रस्वः । मधुरिका गुल्मभेदो मिन्तिकाख्यः । धान्यकं कुस्तुम्बुरुः शिलिन्ध्रं भूमिस्फोटम् । छिद्रं विवररन्ध्रवत् । गर्ते दोषे । छिनत्ति छिद्यते वा छिद्रम् । ऋज्यजि (उ० ३८८) इति कित् रः । विव्रियते विवरम् । अल् । रध्यते रन्ध्रम् । खुर क्षुर इति साधुः । यथा विवररन्ध्रशब्दौ गर्तदोषयोर्वर्त्तेते तथा छिद्रशब्दोऽपीत्यर्थः । विवरशब्दस्त्र्यक्षरोऽपि लाघवार्थमिहोपात्तः । छिद्रशब्दो द्वयोर्यथा–भुजङ्गमा इव परिच्छिद्रान्वेषिणः ॥४११॥ विवरशब्दो गर्त्ते यथा–पातालप्रतिमल्लगल्लविवर-प्रक्षिप्तसप्तार्णवम् । दोषे यथा–अप्राप्तविवरः शक्रः स्वल्पोऽपि हि दुरासदः । रन्ध्रशब्दो गर्त्ते यथा–निविशते रन्ध्रमन्धो गिरीणाम् । दोषे यथा–सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम् । तरुच्छिद्रप्रोतान् विसमितिकरी संकलयति । नीर(रा)ङ्गी विवरार्पितं कुलवधू लीला कटाक्षं नुमः । नीरन्ध्रद्रुमशिशिरां भुवं भजन्तो इत्यादौ गर्तोपचारादन्तरालेऽपि । जारस्तूपपत्तौ । जीर्यतेऽनेन जारः । न्यायावाया ५ । ३ । १३४ । इति साधुः । यथा– अहल्याया जारः सुरपतिरभूत् । जायौषधीभिदि । गौरा-

तन्त्रं सिद्धान्ते राष्ट्रे च, परच्छन्दप्रधानयोः ।।
अगदे कुटुम्बकृत्ये तन्तुवाने परिच्छदे ।।४१३।।
श्रुतिशाखान्तरे शास्त्रे, करणे द्व्यर्थसाधके ।।
इति कर्तव्यता तन्त्वोस्तन्त्री स्याद्वल्लकी गुणे ।।४१४।।

दित्वाद् ङ्यां जारी यथा–नृपशिखिसहजनजारी हस्तगो अश्रुकन्या । जीरस्त्वजा(य्यां)ज्यां खड्गे च । जयति जीरः। चिजि (उ० ३९२) इति रो दीर्घत्वं च । अजाज्यां पुंल्कीबः । टारो लङ्गतुरङ्गयोः टीकते टारः । द्वारशृङ्गारेत्यारे साधुः । लङ्गः षड्जः (प्र० षिङ्गः) द्वयोर्यथा उदारैः परितुष्यन्ति टारैः शृङ्गारिणो नृपाः ।।४१२।। तत्रं सिद्धान्ते राष्ट्रे च परच्छन्दप्रधानयोः । अगदे कुटुम्बकृत्ये तन्तुवाने परिच्छदे । श्रुतिशाखान्तरे शास्त्रे करणे द्व्यर्थ साधके । इति कर्तव्यतातन्त्वोः तन्यते तन्त्रम् । हु यामा (उ० ४५१) इति त्रः तन्त्र्यते वा । चतुर्दशष्वर्थेषु सिद्धान्ते यथा–चतुष्पीठीमिदं तन्त्रम् । राष्ट्रं राष्ट्रचिन्ता तत्र यथा–शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः । परच्छन्दे परायत्ते यथा–स्मरशबरतन्त्रं जगदहो । प्रधाने यथा–अतन्त्रं संसारो भवति विदिते तत्वविभवे । अगदे भेषजे यथा–मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम् । कुटुम्बं परिवारस्तस्य कृत्यं धारणम् । कुटुम्बकृत्यम् । तन्तुवानं तन्तुवायोपकरणम्। तत्र यथा–तन्त्रादचिरोद्धृतस्तन्त्रकः। पटः । परिच्छदः सैन्यादिरूपः । तत्र यथा–भोज त्वत्तन्त्रमात्रप्रसरभरभयव्यग्रकुलो राजलोकः ।।४१३।। श्रुतेर्वेदस्य शाखान्तरं शाखाभेदः। शास्त्रे यथा–द्वित्रान् स्वतंत्रसमयानुगतान् विशेषानुक्त्वाऽवगच्छति जगज्जितमेव मूढः। करणं निधुवनम् । द्व्यर्थसाधकः

**अमृतायां च नद्ध्यां च, सिरायां वपुषोऽपि च ॥**
**तरिर्दशायां बेडायां, वस्त्रादीनां च पेटके ॥४१५॥**
**तन्द्री निद्रा प्रमीला च, तारो निर्मलमौक्तिके ॥**
**मुक्ताशुद्धावुच्चनादे, नक्षत्रनेत्रमध्ययोः ॥४१६॥**

श्लेषः। यदाह–साधारणं भवेत् तन्त्रम्। यथा श्वेतो धावति इत्यादि। तत्र यथा–तन्त्रोक्तिभिः सूचितगूढभावा वेश्या हठादेव विमोहयन्ति। इति कर्तव्यतायां यथा–कुर्वन्ति किं कृतधियोऽपि हि तन्त्रमूढाः। तन्तौ यथा–तन्त्रं प्रसारयति पश्यत तन्तुवायः। तन्त्री स्याद् वल्लकीगुणे अमृतायां च नद्ध्यां च सिरायां वपुषोऽपि च। चतुर्ष्वर्थेषु स्त्रियाम्। गौरादित्वाद्ङीः। तस्त् तन्द्रि तन्त्रि (उ० ७११) इति ईप्रत्यये तन्त्रीरिति ईकारान्तोऽपि। वल्लकी गुणे यथा–तन्त्री माद्रां नयनसलिलैः सारयित्वा कथंचित्। अमृता गुडूची। नध्री वद्ध्री। वपुषः सिरायां नाड्यां यथा–तन्त्र्यः खड्गप्रहारैर्धगितिगलद्रक्तधाराप्रतानाः। तरिर्दशायां बेडायां (नौकायां) वस्त्रादीनां च पेटके। तरति तीर्यतेऽनया वा तरिः। स्वरेभ्य इः (उ० ६०६) इतोऽत्क्यर्थात् ४।४।३२। इति वा ङ्यां तरीति ईप्रत्ययान्तोऽपि। दशाऽवस्था। बेडायां नावि यथा–तरीषु तत्रत्यमफल्गु भाण्डं सांयात्रिकानां वपतोऽभ्यनन्दत्। वस्त्रादीनां पेटके स्थानविशेषे ॥४१५॥ तन्द्री निद्रा प्रमीला च। तन्द्रिः सौत्रः। तन्द्र्यतेऽनया तन्द्रिः। पदि पठि (उ० ६०७) इति इः। ङ्यां तन्द्री। ईप्रत्ययान्तोऽपि। निद्रा स्वापः। प्रमीला इन्द्रियस्त्यानता आलस्यमिति यावत्। द्वयोर्यथा–ऐन्द्रिणाऽपि यदुदस्ततन्द्रिणा सेव्यते सरभसंवृषध्वजः। तारो निर्मलमौक्तिके। मुक्ता-

**तारं रूप्ये तारा बुद्धदेव्यां सुरगुरुस्त्रियाम् ।**
**सुग्रीवपत्न्यां ताम्रं तु, शुल्वे शुल्वनिभेऽपि च ॥४१७॥**
**तीव्रं कटूष्णात्यर्थेषु, तीव्रा तु कटुरोहिणी ।**
**गण्डदूर्वा सुरी तीरो, वङ्गे तीरं पुनस्तटे ॥४१८॥**

शुद्धावुच्चनादे नक्षत्रनेत्रमध्ययोः। तारयति तारः। नक्षत्रनेत्रमध्ययोः स्त्रीपुंसः। गौडस्तु मुक्ताशुद्धौ पुमांस्तारो ननारूक्षादिमध्ययोरित्याह। निर्मलमौक्तिके यथा—दूष्यैरिव क्षितिभृतां द्विरदैरुदारतारावलीविरचनैर्व्यरुचन्निवासाः। मुक्ताशुद्धौ यथा—रणच्चरणभूषणस्तरलतारहारच्छदः। उच्चनादे यथा—रुतमथ कृकवाकोस्तारमाकर्ण्य काले। नक्षत्रे यथा—एष चन्द्रसुखि(मुखि)-योगतारया युज्यते तरलबिम्बया शशी। नेत्रमध्ये यथा अधिकविकसदन्तर्विस्मयस्मेरतारैः। उद्भटेऽपि मंखः। तत्र वाच्यलिङ्गः। यथा—तारप्रहारशकलीकृतगात्रयष्टिः ॥४१६॥ तारं रूप्ये। यथा—भस्त्राभूषास्य जुषस्तारक्रियया विलुप्ततारस्य। तारा बुद्धदेव्यां सुरगुरुस्त्रियाम्। सुग्रीवपत्न्याम्। बुद्धदेव्यां यथा—तारादेवी दिशतु कुशलं कल्पवल्लीव भावः। सुरगुरुस्त्रियां यथा—जहार चन्द्रमास्ताराम्। सुग्रीवपत्न्यां यथा—असौ मरुच्चुम्बितचारुकेशरः प्रसन्नताराधिपमण्डलाग्रणीः। वियुक्तरामातुरदृष्टिदीक्षितो वसन्तकालो हनुमानिवागतः। ताम्रं तु शुल्वे शुल्वनिभेऽपि च। ताम्यति ताम्रम्। वि जि—इति रो दीर्घत्वं च। शुल्वे यथा—ताम्रमम्लेन शुद्ध्यति। शुल्वनिभोऽरुणः। तत्र वाच्यलिङ्गः। यथा—उदेति सविता ताम्रस्ताम्र एवास्तमेति च ॥४१७॥ तीव्रं कटूष्णात्यर्थेषु। तीवति तीव्रम्। खुर क्षुर (उ० ३९६) इति साधुः। वाच्यलिङ्गः। कटौ यथा—तीव्रं

**तोत्रं वेणुके प्रतोदे, दरः स्याद्भयगर्तयोः ।**
**दरी तु कन्दरे दस्रः, खरो दस्रौ रवेः सुतौ ॥४१९॥**
**द्वारं निर्गमेऽभ्युपाये, धरः कूर्माधिपे गुरौ ।**
**कर्पासतूलेऽथ धरा मेदो भूमिजरायुषु ॥४२०॥**

---

वातहरं प्राहुः । उष्णे यथा–तीव्रांशुभिन्नमिव शार्वरमन्धकारम् । अत्यर्थे यथा–तीव्राभिषङ्गप्रभवेन वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् । तीव्रा तु कटुरोहिणी । गण्डदूर्वा सुरी । त्रयोऽप्योषधिभेदाः । तीरो वङ्गे । तीर्यते तीरः । वङ्गं त्रपु । तीरं पुनस्तटे । यथा–तीरात्तीरमुपैति रौति करुणम् ॥४१८॥ तोत्रं वेणुके प्रतोदे । तुद्यतेऽनेन तोत्रम् । नीदांव् ५।२।८८। इति ष्ट्रन् । वेणुकं हस्त्यारिका । तत्र यथा – महामात्रस्तोत्रैस्तुदति समदं दुष्टकरिणम् । प्रतोदः प्रा(प्रयो)जनं तत्र यथा–तमः पिपिक्षोररुणस्य दीव्यत्तोत्रागिरो नो गणयन्ति धुर्याः। दरः स्याद्भयगर्तयोः। दीर्यतेऽनेनऽसौ वा दरः। भये पुंक्लीबः। गर्ते त्रिलिङ्गः। भये यथा–अमर्षशून्येन जनस्य जन्तुना न जातहार्देन च विद्विषादरः। गर्त्ते यथा–स्थाने समीकृतदरे कण्टकादिविशोधिते। दरी तु कन्दरे। गौरादित्वाद् ङीः। कन्दरो गिरिगुहा। यथा–दरीगृहद्वारिविलम्बिबिम्बाः। ईषदर्थे तु दरेत्यव्ययम् देश्यपदं वा। यथा–दरदलितहरिद्रा पिञ्जराण्यङ्गकानि। दस्रः खरः। दस्यति दस्रः। भीवृधि(उ० ३८७) इति रः। खरो रासभः। दस्रौ रवेः सुतौ। रवेः सुतौ स्ववैंद्यौ तत्र द्विवचनान्तः। यथा–अनुसस्रतुस्तमथदस्रयोः सुतौ ॥४१९॥ द्वारं निर्गमेऽभ्युपाये। द्वारयति द्वारम्। उभ्यते वा। द्वारशृङ्गार (उ० ४११) इति साधुः। निर्गमे यथा–हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्। अभ्युपाये यथा–शृङ्गान्तरं द्वार-

**धारो जलधरासारवर्षणे स्यादृणेऽपि च ।**
**धारोत्कर्षे खड्गाद्यग्रे सैन्याग्रे वाजिनां गतौ ॥४२१॥**
**जलादिपाते सन्तत्यां, धात्री भुव्युपमातरि ॥**
**आमलक्यां जनन्यां च, धीरो ज्ञे धैर्यसंयुते ॥४२२॥**

---

मिवार्थसिद्धेः। धरः कूर्माधिपे गिरौ । कार्पासे तूले । कर्पास-तूले । धरति धरः। कूर्माधिपे महाकमठे यथा–ध्रुवं दध्रे धरोधराम् । गिरौ यथा–धरस्य प्रोद्धर्ता त्वमिति न तु सर्वत्र जगति प्रतीतः। कर्पासतूलम् तन्तुकारणम् । अथ धरामेदोभूमि-जरायुषु । मेदश्चतुर्थो धातुः। भूम्यां यथा–धराधरेन्द्रं व्रतती-ततीरिव । जरायुर्गर्भवेष्टनम् ॥४२०॥ धारो जलधरासारवर्षणे स्यादृणेऽपि च । ध्रियते धारः। जलधरासारवर्षणे यथा–धाराधरे वर्षति वारिधारैः। ऋणे यथा–पितुः स्फारं धारं क्षिपति नृपतिः शात्रववधात् । धारोत्कर्षे खड्गाद्यग्रे सैन्याग्रे वाजिनां गतौ। जलादिपाते संतत्याम् । ध्रियतेऽनया धारा भिदादित्वात् साधुः । दधाति वा । इण् धाग्भ्यां वा (उ० ३८७) इति रः। उत्कर्षे यथा–धाराधिरूढो रसः । खड्गाद्यग्रे खड्गस्यादि-शब्दात् चक्रादीनामपि । अग्रेऽश्रौ यथा–धारातीर्थे धरणिपतयः कल्मषं क्षालयन्ति । सैन्याग्रे यथा–धाराद्वयं परिगताः सुभटा नटन्ति। वाजिनां गतौ गतिविशेषे धौरितकादौ यथा-अव्याकुलं प्रकृत-मुत्तरकर्मधेयधाराः प्रसाधयितुमव्यतिकीर्णरूपाः ॥४२१॥ जला-दिपाते यथा–अयमपि पटुर्धारासारो न बाणपरम्परा । सन्तत्या-मनवच्छिन्नसन्ताने यथा – धारावाहिषु बोधेषु कोऽधिकार्थः प्रकाशते। धात्री भुव्युपमातरि । आमलक्यां जनन्यां च। दधाति धात्री तृजन्ताद् ङीः । धयन्ति एनां धीयते वा धात्रीति

**स्वैरे धीरं तु घुसृणे, नरो मर्त्येऽच्युतेऽर्जुने ॥**
**नरं तु रामकर्पूरे, नक्रं नासाग्रदारुणोः ॥४२३॥**
**नक्रो यादसि नीव्रं तु, वलीकवननेमिषु ॥**
**चन्द्रे च रेवतीभे च, नेत्रं वस्त्रे मंथोगुणे ॥४२४॥**

साधुः । भुवि यथा—योगी पिता स जनको जननी च धात्री । उपमातरि यथा—कुमाराः कृतसंस्कारास्ते धात्रीस्तनपायिनः । आमलक्यां यथा—पञ्चरसं धात्रीफलम् । जनन्यां यथा—धात्रीस्तन्यनिपानवर्द्धितवपुः । धीरो ज्ञे धैर्यसंयुते स्वैरे । दधाति धीयते वा धीरः । इण् धाग्भ्यां वा (उ० ३८९) इति कित् रः । वाच्यलिङ्गः । त्रिष्वपि यथा—निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम् । पाणिनीयमिवालोकि धीरैस्तत्समराजिरम् । धीरं तु धुसृणे । घुसृणे कुङ्कुमे यथा—निजगुणगरिमख्यातिमतः को धीरस्य विदेशः । अत्र श्लेषोक्त्या धीरशब्दः कुङ्कुमेऽपि । नरो मर्त्येऽच्युतेऽर्जुने । नृणाति नरः । मर्त्ये यथा—नरः संसाराङ्गे विशति यमधानीयमनिकाम् । अच्युते यथा—नरं नमस्कृत्य जगन्नमस्कृतम् । अर्जुने यथा—किन्नरः किं कुबेरः। नरं तु रामकर्पूरे। रामकर्पूरं कर्पूरभेदः। नक्रं नासाग्रदारुणोः। न क्रामति नक्रम् । नञः क्रमि गमि (उ० ४) इति डिदप्रत्ययः। नखादित्वाद् नञोऽद् न भवति। नासायां यथा—साच्छिन्नकर्णनक्रापुर एतेषाममङ्गलं जाताः । दारुणोऽग्रमाधारभूतमग्रदारु ॥४२३॥ नक्रो यादसि। यथा—कल्पान्तकालपवनोद्धतनक्र चक्रं को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् । नीव्रं(नीध्रं) तु वलीकवननेमिषु । चन्द्रे च रेवतीभे च । नीयते नीव्रम् । खुरक्षुर (उ० ३९६) इति साधुः पञ्चस्वर्थेषु । वलीके पटलान्तरे यथा—गृहाणि नीव्रैरिव यत्र

**मूलाक्षिनेतृषु परो दूरान्यश्रेष्ठशत्रुषु ॥**
**परन्तु केवले पत्रं, यानं पक्षश्छदश्छुरी ॥४२५॥**

रेजुः। वनं काननम्। नेमिश्चक्रधारा। चन्द्रः शशाङ्कः। रेवतीभं रेवतीनामनक्षत्रम्। नेत्रं वस्त्रे मन्थोगुणे मूलाक्षिनेतृषु। नीयतेऽनेन नेत्रम्। नीदाव् ५।२।८८। इति त्रट्। नयतीति वा त्रडिति त्रट्। पञ्चस्वर्थेषु। नेतरि वाच्यलिङ्गः। अन्यत्र पुंक्लीबः। वस्त्रे वस्त्रविशेषे यथा—कञ्चुकमण्डनेषु नेत्रविकर्तनानि। मन्थो मन्थानकस्य गुणे आकर्षणरज्जौ यथा—मन्थामन्दरभूधरः फणिपतिर्नेत्रं नवं वासुकिः ॥४२४॥ मूले दर्भादिपादे यथा—नेत्रोत्पाटनं मुनीनाम्। अक्षणि नयने यथा—नेत्रे दूरमनञ्जने। नेता नायकः। परो दूरान्यश्रेष्ठशत्रुषु। पिपर्ति परः। वाच्यलिङ्गः। दूरे यथा—यस्मिन् स्वादुनि चर्विते सति रतिः पारं परं प्राप्नुयात्। अन्यस्मिन् यथा—त्रिभुवनमिदं बिभ्रत्येके परे तु रसातलम्। श्रेष्ठे यथा—स हि देवः परं ज्योतिस्तमः पारेप्रतिष्ठितम्। शत्रौ यथा—परैरपर्य्याप्तितवीर्यसम्पदामपराभवोऽप्युत्सव एव मानिनाम्। आत्मपृथक् पूर्वान्ययुक्तष्वपि मंखः। आत्मनः पृथक्त्वे यथा—आत्मनः प्रतिकूलानि परेषां न समाचरेत्। पूर्वस्मादन्यस्मिन् यथा—बाल्यात्परं साथ वयः प्रपेदे। स्वमते तु अन्यत्वोपचारात्तयोरपि ग्रहणम्। युक्ते यथा—परं पवित्रं परमं पुरातनम्। परं तु केवले। यथा—ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम्। केवले परमव्ययमित्यन्ये। पत्रं यानं पक्षश्छदश्छुरी। पतन्त्यनेन पत्रम्। नीदाव् ५।२।८८। इति त्रट्। चतुर्ष्वर्थेषु। यानच्छदयोः पुंक्लीबः। यानं वाहनम्। पक्षः पत्रं तयोर्यथा—स्वक्षं सुपत्रं कनकोज्वलद्-

**पारं प्रान्ते परतटे, पारी पूरपरागयोः ॥**
**पात्र्यां कर्करिकायां च, पादबंधे च हस्तिनः ॥४२६॥**
**पात्रं तु कूलयोर्मध्ये, पर्णे नृपतिमन्त्रिणि ॥**
**योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि ॥४२७॥**

द्युतिम् । छदे पर्णे यथा–पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । छुरी कृपाणिका तत्र यथा–जैत्रं पत्रं नर्त्तयत्यत्र वीरः । विवक्षितप्रतिज्ञाक्षराधारे भूर्जादावपि दृश्यते यथा–दत्ते पत्रं कुवलयततेरायतं चक्षुरस्याः ॥४२५॥ पारं प्रान्ते परतटे । पारयति पारम् । पुंक्लीबः । द्वयोर्यथा–प्राप्तुं पारमपारस्य पारावारस्य पार्यते । स्त्रीणां प्रकृतिवक्राणां दुश्चरित्रस्य नो पुनः । पारी पूरपरागयोः । पात्र्यां कर्करिकायां च पादबन्धे च हस्तिनः । गौरादित्वाद् ङीः । पूरपरागयोर्यथा– कर्पूरपारी परिधूसराङ्गः । पात्र्यां यथा– प्रीत्या नियुक्तान् लिहतीः स्तनन्धयान् विगृह्य पारीमुभयेन जानुनोः । कर्करिका गलन्तिका । तत्र यथा–इह हि कनकपारी शीधु गन्धैकबन्धुः । हस्तिनः पादबन्धे यथा–अपारपारी परिरुद्धगात्रः । पात्रं तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि । योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्त्तरि । पाति पात्रम् । त्रट् (उ० ४४६) इति त्रट् । पीयतेऽनेन वा । निदाव् ५।२।८८ इति त्रट् । पत्रमेव वा पात्रम् । प्रज्ञाद्यण् । सप्तस्वर्थेषु । कूलमध्ये भाजने च त्रिलिङ्गः । अन्यत्र क्लीबे । कूलयोर्मध्ये यथा सत्पात्रोपचिताऽपि जाड्यमतुलं धत्ते कथं सा नदी । पर्णे यथा–पात्रैरेव भवेत्तरोरपि यतश्छायापि निश्छिद्रकैः । नृपतिमन्त्रिणि यथा–पात्रे स्थिता नरपतेरिह राज्यचिन्ता । योग्ये यथा–पात्राऽपात्र-

**पुरं शरीरे नगरे गृहपाटलिपुत्रयोः ॥**
**पुरस्तु गुग्गुलौ पुण्ड्रः कृमौ दैत्येक्षुभेदयोः ॥४२८॥**
**वासन्त्यां तिलके पुण्डरीके पुण्ड्रास्तु नीवृति ॥**
**पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोः ॥४२९॥**

विवेचनं न यदभूत्सर्वस्वदानेष्वपि । भाजने यथा–धिग् दैवं लोचने स्वच्छे पात्रं कज्जलभस्मनः । यज्ञभाण्डे स्रुवादौ यथा–ऋत्विजो विहितपात्रसंग्रहा यज्ञरङ्गभुवि चेरु रंहसा (रञ्जसा) । नाट्यानुकर्तरि यथा–आवश्यको विरोध्यर्थः स्वल्पपात्रः स निर्गमः ॥४२७॥ पुरं शरीरे नगरे गृहपाटलिपुत्रयोः । पुरति पुरम् । नगरे त्रिलिङ्गः । शरीरनगरयोर्यथा– पुरुषः पुरं प्रविशति स्म पञ्चभिः सममिन्द्रियैरिव नरेन्द्रसूनुभिः । गृहे यथा–पुराणि यस्यां सवराङ्गनानि । पाटलिपुत्रे यथा–पुराधिनाथः पुर एष नन्दः । पुरस्तु गुग्गुलौ । गुग्गुलुर्महिषाक्षः । पुण्ड्रः कृमौ दैत्येक्षुभेदयोः । वासन्त्यां तिलके पुण्डरीके । पुणति पुण्डते वा पुण्ड्रः । खुर क्षुर (उ० ३९६) इति साधुः । कृमि कीटः । दैत्योऽसुरः । इक्षुभेदे यथा–सा क्षेत्रभूः पुण्ड्रविपाकपिङ्गा ॥४२८॥ वासन्ती अतिमुक्तकः । तिलके यथा–रुद्राङ्कुशस्त्रिपुण्ड्रं च वेषो भृङ्गरिटेरयम् । पृष्टे पुण्ड्रा अर्थकरा इत्यादौ तु अश्वविषयेषु श्वेतबिन्दुषु तिलकोपचारात् । पुण्ड्रशब्दः पुण्डरिके यथा–पुण्ड्रैः सरोमण्डितम् । पुण्ड्रास्तु नीवृति । नीवृति देशे पुंभूम्नि । यथा–पौण्ड्रीणां गण्डलक्ष्मीं हसति शशधरः प्रौढिमाप्तः प्रदोषे । पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोः। पृणाति पुरुः पृकाहृषि (उ० ७२९) इति किदुः । चतुर्ष्वर्थेषु । प्रचुरे वाच्यलिङ्गः । अन्यत्र पुंसि । नृपभेदे यथा–कः पौरवे वसुमतीं

**पूरः स्यादम्भसो वृद्धौ, व्रणसंशुद्धिखाद्ययोः ।**
**पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च ॥४३०॥**
**पौरं कत्तृणे पुरजे, बभ्रुः पिङ्गाग्निशूलिषु ॥**
**मुनौ विशाले नकुले, विष्णौ भद्रं तु मङ्गले ॥४३१॥**

शासति शासितरि दुर्विनीतानामित्यपादि ॥४२९॥ पूरः स्यादम्भसो वृद्धौ व्रणसंशुद्धिखाद्ययोः। पूर्यतेऽनेन पूरः। अम्भसो वृद्धौ यथा–तदयं समुपैति पार्थिवः पयसां पूर इवानिवारितः। व्रणसंशुद्धिः आयुर्वेदप्रसिद्धा। खाद्यविशेषे यथा–पूरैरभ्यर्च्यपूर्देवीम्। पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च। पूर्यतेऽनेन पोत्रम्। हलक्रोडास्ये पुवः। ५।२।८९। इति त्रट्। सूकरस्य मुखाग्रे यथा–यस्या एव शिशोः स्थिता विपदि भूः सा पुत्रिणी पोत्रिणी। अत्र पोत्रमस्यास्तीति पोत्रिणी सूकरी ॥४३०॥ पौरं कत्तृणे पुरजे। पुरे भवं पौरम्। कत्तृणं रौहिषा(का)ख्या तृणजातिः। पुरजं पुरभवम्। तत्र वाच्यलिङ्गः। यथा–पुरन्द्रश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिन्द्यमानः। बभ्रुः पिङ्गाग्निशूलिषु। मुनौ विशालेनकुले विष्णौ। बिभर्ति बभ्रुः। हृनिया (उ० ७३३) इति किदुर्द्वित्वं च। पिङ्गे गुणे पुंसि तद्वति विशाले च वाच्यलिङ्गः। अन्यत्र पुंसि। पिङ्गे यथा–धूमधूम्रो वसागन्धिर्ज्वालाबभ्रुशिरोरुहः। अग्निशूलिनोर्यथा–संहारकारी जगतोऽपि बभ्रुः। मुनौ यथा–बाभ्रव्यो भ्रमवर्जितः। अत्र हि बभ्रोरपत्यं बाभ्रव्यः। विशाले यथा–रक्षसां सुभ्रुवो भांति पिङ्गैर्बभ्रुनि(भि)रीक्षणैः। नकुले यथा–अहिरेष बभ्रुपुरतो मार्गं निरुध्य स्थितः। विष्णौ यथा–विश्वंभरां बभ्रुरिमां बभार। भद्रं तु मङ्गले। मुस्तकश्रेष्ठयोः साधौ काञ्चने करणा-

मुस्तकश्रेष्ठयोः साधौ, काञ्चने करणान्तरे ॥
भद्रो रामचरे हस्तिजातौ मेरुकदम्बके ॥४३२॥
गवि शम्भौ भद्रा विष्टौ, नभः सरिति कट्फले ॥
कृष्णानन्तारास्नासु च भरोऽतिशयभारयोः ॥४३३॥
भरुर्भर्तृकनकयोर्भारो दशशतीद्वये ।
पलानां वीवधे चापि, भीरुर्योषिति कातरे ॥४३४॥

न्तरे । भन्दते भद्रम् । भन्देर्वा (उ० ३९१) इति रो न लोपश्च ॥४३१॥ साधुश्रेष्ठयोर्वाच्यलिङ्गः । मङ्गले यथा–हसन्वो भद्राणि द्रढयतु मृडानोपरिवृढः । मुस्तकः कन्दविशेषः । श्रेष्ठः प्रशस्यतमः । साधुः सज्जनः । तयोर्यथा–क्षेमं भद्रकलिन्दशैलतनया तीरे लतावेश्मनाम् । काञ्चने यथा–उन्निद्रभद्रनलिनोपमवक्त्रचंद्रा । करणांतरं वृत्त(नृत्त)विषयो विन्यासविशेषः । भद्रो रामचरे हस्तिजातौ मेरुकदम्बके । गवि शम्भौ । रामस्य चरो रामचरः । हस्ति जातौ यथा–भद्रात्मनो दुरधिरोहतनोर्विशाल(प्र० रोहितनोविशाला)वंशोन्नते मेरुकदम्बके इति मेरुसमीपवर्तिन एकस्य कदम्बस्य भद्रेति नाम लोके प्रसिद्धम् ॥४३२॥ गौर्वृषविशेषो यस्य मुखे श्वेतस्तिलकः । तत्र यथा–यदनुग्रहतो याति बलीवर्दोऽपि भद्रताम् । शम्भौ यथा–भद्रो भद्राणि पुष्णाति । भद्रा विष्टौ, नभः सरिति कट्फले । कृष्णानन्ता रास्नासु च । विष्टौ यथा–शुक्लाष्टम्यां दिवा भद्रा । नभः सरित् गङ्गा । कट्फलम् औषधम् । कृष्णा पिप्पली । अनन्ता दूर्वा । रास्ना एलापर्णी । भरोऽतिशयभारयोः भृञ् भरणे इत्यस्य युवर्णेत्यलि भरः । अतिशये यथा–भूरिभारभराक्रांतः । भारे यथा – उत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥४३३॥ भरुर्भर्तृकनकयोः । बिभर्त्ति भ्रियते वा भरुः ।

**भूरि स्वर्णे प्रचुरे च, मन्त्रो देवादिसाधने ॥**
**वेदांशे गुप्तवादे च, मरुः पर्वतदेशयोः ॥४३५॥**

भृमृतृत्सरि (उ० ७१६) इत्युः । पुंसि । भर्ता स्वामी । भारो दशशतोद्वये । पलानां वीवधे चापि । भ्रियते भारः । पलानां दशशतोद्वये यथा—हेम्नो भार शतानि वा मदमुचां वृन्दानि वा दन्तिनाम् । वीवधे यथा—हृतेऽपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः । भीरुर्योषिति कातरे । बिभेतीत्येवंशीला भीरुः । भियो रुरुकलुकम् ५।२।७६। इति रुः । योषिति स्त्रीभेदे स व्यसनायां स्त्रियाम् । स्त्रीलिङ्गः। कातरे वाच्यलिङ्गः। योषिति क्रियावचनत्वादूङ् न भवति यथा—असूर्यंपश्यरूपा त्वं किमभीरुररार्यसे । यदि जातिवचनत्वं मन्यते तदा भवत्येव ऊङ् । यथा—हन्तैकस्थं क्वचिदपि न ते भीरुसादृश्यमस्ति । अत्र ऊङि सति आमन्त्रे ह्रस्वत्वम् । कातरे यथा—अर्द्धाङ्गुलपरीणाह जिह्वाग्राया स भीरवः ॥४३४॥ भूरि स्वर्णे प्रचुरे च । भवति भूरि । भूस्तच्छसि (उ० ६९३) इति कित् रिः। स्वर्णे क्लीबे । प्रचुरे वाच्यलिङ्गः । स्वर्णे यथा—भूरिभूषितशरीरयष्टिभिः । प्रचुरे यथा—भूरिभूषणरवैराघोषयत्यम्बरम् । मन्त्रो देवादिसाधने । वेदांशे गुप्तवादे च । मन्त्र्यतेऽनेन मन्त्रणं वा मन्त्रः। देवादयः साध्यन्तेऽनेन देवादिसाधनं महाबीजादि । तत्र यथा—मन्त्रं तन्त्रमथ प्रयुज्य हरतश्चेतोत्पलानां श्रियम् । वेदस्य मन्त्र ब्राह्मणात्मकस्यांशो वेदांशः । तत्र यथा—तत्र मन्त्रपवितं हविः क्रतौ । गुप्तवादो रहसि कर्तव्यावधारणम् । तत्र यथा—मन्त्रो योघ इवाधीरः सर्वाङ्गैः कल्पितैरपि । मरुः पर्वतदेशयोः । म्रियतेऽस्मिन् तृष्णयेति मरुः । भृमृतृत्सरि (उ० ७१६) इत्युः।

**मारोऽनङ्गे मृतौ विघ्ने, मारी चण्डयां जनक्षये ॥**
**मात्रं त्ववधृतौ स्वार्थे, कात्स्न्र्ये मात्रापरिच्छदे ॥४३६॥**
**अक्षरावयवे द्रव्ये, मानेऽल्पे कर्णभवणे ॥**
**काले वृत्ते च मित्रं तु, सख्यौ मित्रे दिवाकरे ॥४३७॥**

पुंसि । पर्वते यथा—उत्पद्यतेऽमरमरौ मृतोऽपि व्रतमध्यगः। देशे यथा—किमिक्षोर्दोषोऽयं न पुनरगुणाया मरुभुवः ॥४३५॥ मारोऽनङ्गे मृतौ विघ्ने । मारयति मरणम् म्रियतेऽनेन वा मारः । अनङ्गे यथा—सुदुर्वारो मारः प्रसरति जरा यौवनहरा । मृतिविघ्नयोर्यथा—मारो हि शाम्यति महेशतवप्रसादात् । मारी चण्डयां जनक्षये । मारयति मारिः । स्वरेभ्य इः (उ० ६०६) ङ्यां मारी । जनक्षये यथा— सम्भवन्ति न यन्नाथ मारयो भुवनारयः । मात्रं त्ववधृतौ स्वार्थे कात्स्न्र्ये (प्र० कात्स्न्र्ये) मीयतेऽनेन मात्रम् । हु यामा (उ० ४५१) इति त्रः । अवधृतावधारणे यथा—परिगततटभूमिः स्नानमात्रोच्छिताभिः । स्वार्थे यथा—दीर्घिका कमलोन्मेषो यावन्मात्रेण साध्यते । कात्स्न्र्ये यथा—दीयतां विप्रमात्राय । मात्रा परिच्छदे अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे । काले वृत्ते च । परिच्छदे यथा—महामात्रैस्त्रासत्रुटितरिपुवर्गः प्रतिदिनम् ॥४३६॥ अक्षरं स्वरव्यञ्जनसमुदायः । तस्यावयवः । तत्र अल्पे च यथा—मात्रयाप्यधिकं कश्चिन्न सहन्ते जिगीषवः । इतीव त्वं धरानाथ धारानाथमपाकृथाः । द्रव्ये यथा—मात्रां गृहीत्वा कुरु तीर्थयात्राम् । माने यथा—का मात्रा मम विक्रमत्रयपदं दत्तं गृहीतं मया । कर्णभूषणे यथा—श्रोत्रेषु मात्रां दधते सुगात्र्यः । काले सूक्ष्मे कालविशेषे यथा—एकमात्रो भवेद्ध्रस्वः । वृत्ते छन्दसि यथा—

**यात्रोत्सवे गतौ वृत्तौ, राष्ट्रमुत्पातनीवृतोः ।।**
**रुरुर्दैत्ये मृगे रेत्रं, *पीयूषपटवासयोः ।।४३८।।**
**रेतः सूतकयोरोध्रो लोध्रे रोध्रमघागसोः ।।**
**रौद्रो भीष्मे रसे तीव्रे, रौद्री गौर्यां बरो वृतौ ।।४३९।।**

मात्रावर्णविभेदेन यदुक्तं लौकिकं द्विधा । मित्रं तु सख्यौ । मेद्यति मित्रम् । चिमिदि (उ० ४५४) इति कित् त्रः। क्लीबे यथा—एकं मित्रं भूपतिर्वा यतिर्वा । मित्रो दिवाकरे। सम्पूर्णविभवश्चन्द्रो न मित्रमनुगच्छति ।।४३७।। यात्रोत्सवे गतौ वृत्तौ । यान्त्यस्यां यानं वा यात्रा । हु यामा इति त्रः । उत्सवे यथा—यात्रा हि चैत्रत्रिदशेश्वराणाम् । गतौ प्रयाणे यथा—यात्रानेहसि यत्र दिग्विजयिनः । वृत्तौ वर्तनोपाये यथा—शरीरयात्राऽपि न तेन सूत्रिता । व्यवहारेऽपि वर्तनोपायत्वाद् वृत्तिरेव। तत्र यथा—लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता । राष्ट्रमुत्पातनीवृतोः । राजते राष्ट्रम् । त्रट् (उ० ४४६) इति त्रट् । पुंक्लीबः । उत्पाते यथा—वाच्यं तस्य न किञ्चनापि विबुधैर्यो नैव राष्ट्राकुलः। नीवृति देशे यथा—बुद्धिर्बुद्धिमतोत्सृष्टा । हन्ति राष्ट्रं स राजकम् । रुरुर्दैत्ये मृगे । रौति रुरुः । रुपूभ्याम् कित् (उ० ८०७) इति रुः । पुंसि । दैत्ये राक्षसे यथा—रुरात्र रुरुवद्रौद्रो रिपुस्तव नराधिप । मृगे मृगविशेषे यथा—शृङ्गं रुरुस्त्यजति मित्रमिवाकृतज्ञः । रेत्रं पीयूषपटवासयोः। रेतः सूतकयोः। रिणाति रीयते वा रेत्रम् । त्रट् (उ० ४४६) इति त्रट्। चतुर्षु—अर्थेषु । पीयूषममृतं नव प्रसूतधेनुक्षीरम् वा । पटवासः। पिष्टातकः ।।४३८।। रेतः शुक्रम्। सूतकः पारदः। रोध्रो लोध्रे । रुणद्धि रुध्यते वा रोध्रः।

*प्र० प्रेयूष। प्र० प्रीयूषममृतमित्यर्थ ।

**विटे जामातरि श्रेष्ठे, देवतादेरभीप्सिते ।**
**वरं तु घुसृणे किञ्चिदिष्टे वरी शतावरी ॥४४०॥**
**वक्रं पुटभेदे वक्रः, कुटिले क्रूरभूमयोः ॥**
**वक्त्रमास्ये छन्दसि च, वप्रः प्राकाररोधसोः ॥४४१॥**

भी वृद्धि (उ० ३८७) इति रः। लोध्रे वृक्षविशेषे यथा–रोध्रद्रुमं सानुमतः प्रफुल्लम्। रोध्रमघागसोः। अघं पापम्। आगोऽपराधः। रौद्रो भीष्मे रसे तीव्रे। रुद्रो देवताऽस्य रौद्रः। भीष्मतीव्रयोर्वाच्यलिङ्गः। सर्वेषु यथा–रौद्रो दक्षविमर्दने च हि सकृन्नग्नः प्रशान्तश्चिरात्। रौद्रीगौर्याम्। अणन्येयेकण् २।४।२०। इति ङीः। वरो वृतौ। विटे जामातरि श्रेष्ठे देवतादेरभीप्सिते। वरणं व्रियते वा वरः। युवर्ण ५।३।२८। इति अल्। श्रेष्ठे पुंक्लीबः। अन्ये वाच्यलिङ्गमाहुः। वृतौ यथा–स्वयम्वरं साधुममंस्त बाला ॥४३९॥ विटः षिङ्गः। यामातरि यथा–वधू वरं सङ्गमयां बभूव। श्रेष्ठे देवतादेः सकाशाद् अभीप्सिते च यथा–समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः। वरन्तु घुसृणे किञ्चिदिष्टे। घुसृणे कुङ्कुमे यथा–वरतिलकविचित्रं भालदेशं वहन्ती। किञ्चिदिष्टे मनागिष्टे यथा–याच्ञा मोघावरमधिगुणे नाधमे लब्धकामा। अत्र वरमिति शब्दः क्लीबे आविष्ट लिङ्गः। अव्ययमित्यन्ये। वरी शतावरी। गौरादित्वाद् ङीः। शतावरी ओषधिभेदः ॥४४०॥ वक्रं पुटभेदे। वञ्चति वक्रम्। ऋज्यजि (उ० ३८८) इति कित् रः। न्यङ्क्वादित्वात्कत्वम्। पुटभेदो जलावर्तः। तत्र यथा–वक्रेषु नक्राः परिक्रमन्ते। वक्रः कुटिले क्रूरभूमयोः। कुटिलक्रूरयोर्वाच्यलिङ्गः। तयोर्यथा–विधौ वक्रे मूर्ध्नि स्थित-

**क्षेत्रे ताते चये रेणौ, वज्रं कुलिशहीरयोः ।।**
**बालके वज्रात्वमृता, वध्रः सीसवरत्रयोः ।।४४२।।**

वति वयं के पुनरमी । भौमे मङ्गले यथा—अशुभाः स्युस्त्रिकोणस्था मन्दवक्रदिवाकराः । वक्त्रमास्ये छन्दसि च । उच्यतेऽनेन वक्त्रम् । हु यामा (उ० ४५१) इति त्रः । आस्ये मुखे पुंक्लीबः । तत्र यथा—तद्वक्त्रं यदि मुद्रिता शशिकथा । छन्दसि यथा—नाद्यास्नौ योऽम्बुधेर्वक्त्रम् । वप्रः प्राकाररोधसोः । क्षेत्रे ताते चये रेणौ । उप्यतेस्मिन् वपति वा वप्रः । भीवृधि इति रः । षट्स्वर्थेषु पुंक्लीबः। पर्वतसानावपि । तत्र प्राकारे च यथा—वप्रेण पर्यन्तचरोडुचक्रः । सुमेरु वप्रोऽन्वहमन्वकारि । रोधस्तटं तत्र यथा – वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।।४४१।। क्षेत्रे केदारे यथा—वप्रेषु यस्मिन् हरिणाश्चरन्ति । ताते पितरि यथा—वृद्धे वप्रे गृहपरिसरस्थायिनि प्रायशो वा । मृत्युं प्राप्ते जयति न भवेत्कार्यनिष्पत्तिदोषः । चयः प्राकारपीठभूः । रेणुः पांशुः । स्वर्णसीसकयोरपि मंखः । यथा—वप्रप्रोतं श्रवणयुगलं दोलयन्नेष मूर्खो विश्वं क्रीडाशकुनिसदृशं मन्यते ग्रामवासी । वज्रं कुलिशहीरयोः । बालके । वजति वज्रम् । भीवृधि (उ० ३८७) इति रः । पुंक्लीबः । कुलिशे यथा—जडी कृतस्त्र्यंबकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः। हीरो मणिवेधकं रत्नं तत्र यथा—मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः । सामान्यरत्नेऽपि । विरलविकीर्णवज्रशकला सकलामिह विदधाति धौतकलधौतमही । बालकं ह्रीवेरं तडित्यपि । वनस्पतिं वज्र इवावभज्य । वज्रा त्वमृता । अमृता गुडूची । वध्रः सीसवरत्रयोः । वर्द्धते वध्रः । भीवृधि

**व्यग्रो व्यापृताकुलयोर्वारः सूर्यादिवासरे ।।**
**महेश्वरावसरयोर्वृन्दे कुब्जाख्यपादपे ।।४४३।।**
**वारं तु मदिरापात्रे, वारि ह्रीवेरनीरयोः ।।**
**वारिर्घट्यां सरस्वत्यां *गजबन्धनभुव्यपि ।।४४४।।**

इति रः। सीसे नागे पुंक्लीबः। वरत्रा चर्मरज्जुः। तत्र स्त्रीपुंसः। तत्र यथा—दर्पोदयोल्लसितफेनजलानुसारसंलक्ष्य पल्ययन वर्ध्रपदास्तुरङ्गाः ।।४४२।। व्यग्रो व्यापृताकुलयोः। विविधं विगतं वा अग्रमस्य व्यग्रः। वाच्यलिङ्गः। व्यापृते यथा—वैवाहिकैः कौतुकसान्निधानैर्गृहेण हव्यग्रपुरन्ध्रिवर्गः। आकुले यथा—आरभतेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च। वारः सूर्यादिवासरे। महेश्वरावसरयोर्वृन्दे कुब्जाख्यपादपे। कारयति वारः। व्रियते वा बाहुलकाद् घञ्। अवसरे वृन्दे च पुंक्लीबः। सूर्यादिवासरे यथा—अक्षौरेणापि कर्तव्यं वारयोर्बुध-सोमयोः। महेश्वरः शम्भुः। अवसरे यथा—अवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः। वृन्दे यथा—रिपुनरपतिवारं वारयत्येष वी(धी)रः। क्रियाभ्यावृत्तावपि। यथा—वारं वारं तिरयति दृशा वुद्गतो बाष्पपूरः ।।४४३।। वारं तु मदिरापात्रे। मदिरापात्रं चषकः। वारि ह्रीवेरनीरयोः। वारयति वारि। स्वरेभ्य इः। (उ० ६०६) क्लीबे। ह्रीवेरं बालकम्। नीरं पानीयम्। तत्र यथा—अर्हस्येनं शमयितुमलं वारिधारासहस्रैः। वारिर्घटयां सरस्वत्यां गजबन्धनभुव्यपि। त्रिषु स्त्रियाम्। घटी जलोदञ्चनी। सरस्वती नदीभेदः। गजबन्धनभूः हस्तिबन्ध-गर्ता तत्र यथा—स्वयंदेवो लक्ष्मीस्तनविषमवारी गजपतिः

*वारो घटीभवन्धिनी।

**व्याघ्रः करञ्जे शार्दूले, रक्तैरण्डतरावपि ।।**
**श्रेष्ठे तूत्तरपदस्थः स्याद् व्याघ्री कण्टकारिका ।।४४५।।**
**वीरो जिने भटे श्रेष्ठे, वीरं शृङ्ग्यां नतेऽपि च ।।**
**वीरा गम्भारिकारम्भातामलक्येलवालुषु ।।४४६।।**
**मदिराक्षीरकाकोलीगोष्ठोदुम्बरिकासु च ।**
**पतिपुत्रवतीक्षीरविदारीदुग्धिकास्वपि ।।४४७।।**
**वृत्रो मेघे रिपौ ध्वान्ते दानवे वासवे गिरौ ।**
**वेरं घुसृणवृन्ताकशरीरेषु शरं जले ।।४४८।।**

।।४४४।। व्याघ्रः करञ्जे शार्दूले रक्तैरण्डतरावपि । श्रेष्ठे तूत्तरपदस्थः व्याघ्रः विविधमाजिघ्रति व्याघ्रः । व्याघ्रा घ्रेति डः ५–१–५७।। करञ्जो वृक्षः । शार्दूले यथा–व्याघ्रेन भीरभिमुखोत्पतिता गुहाभ्यः । श्रेष्ठे तूत्तरपदस्थ इति । उत्तरपदस्थितो व्याघ्रशब्दः । श्रेष्ठे प्रधाने यथा–न शक्यः पुरुषव्याघ्रः शीघ्रं वारयितुं रणे । स्याद् व्याघ्री कण्टकारिका । कण्टकारिका ओषधिः ।।४४५।। वीरो जिने भटे श्रेष्ठे विशेषेण ईरयति प्रेरयति वीरः । वीरयते वा अजति वा । ऋज्यजि (उ० ३८८) इति कितिरे वीभावः । जिनो जिनविशेषश्चतुर्विशस्तीर्थंकरः । तत्र यथा–करुणा भराञ्चितपुटा वीरस्य वो दृष्टयः । भटे यथा–वीराः स्वदेहान् पतितानपश्यन् । श्रेष्ठे यथा–अयं विशेषो भुवनैकवीर । वीरं शृङ्ग्यां नतेऽपि च । शृङ्गी विषौषधिः । नतस्तगरवृक्षः । वीरा गम्भारिकारम्भातामलक्येलवालुषु । मदिराक्षीरकाकोलीगोष्ठोदुम्बरिकासु च । पतिपुत्रवतीक्षीरविदारीदुग्धिका(प्र० दुग्धिका)स्वपि । दशस्वर्थेषु। रम्भा कदली ।।४४६।। मदिरा सुरा । पतिपुत्रवती भर्तृसुतयुतास्त्री । शेषा ओषधयः ।।४४७।। वृत्रो मेघे रिपौ

**शरः पुनर्दधिसारे काण्डतेजनयोरपि ।।**
**शक्रोऽर्जुने तराविन्द्रे, कुटजे शास्त्रमायुधे ।।४४९।।**
**लोहे शस्त्री छुरिकायां शद्रिर्जिष्णौ तडित्वति ।।**
**शरुः कोपे शरे वज्रे शारः शबलवातयोः ।।४५०।।**

ध्वान्ते दानवे वासवे गिरौ। वर्तते वृत्रः। ऋज्यजि इति कित् रः। मेघे रिपौ वासवे गिरौ च यथा—वृत्रेण मित्रायितम्। ध्वान्ते दानवे च यथा—हरिरिव हरिदश्वः साधु वृत्रं हिनस्ति। बेरं घुसृणवृन्ताकशरीरेषु। बेति बेरम्। भी वृधि इति बहुवचनाद्र.। शरीरे पुंक्लीबः। घुसृणं कुङ्कमम्। वृन्ताकं शाकभेदः शरीरे यथा—कुबेरगुप्तां दिशमुष्णरश्मौ। अत्र हि कुत्सितं बेरं शरीरमस्य कुबेरो धनदः। शरं जले। शीर्यते शृणाति वा शरम्। यथा—शरैरिव शरैर्हन्ति पाथोदः पथिकाङ्गनाः ।।४४८।। शरः पुनर्दधिसारे काण्डतेजनयोरपि। दधिसारे काण्डे च पुंक्लीबः। दधिसारे यथा—दध्नो वास(प्र० वा शं)गुडः शरः। काण्डे बाणे यथा – त्वद्दन्ताङ्कितवालिकक्षरुधिरक्लिन्नाग्रपुङ्खं शरम्। तेजनो मुञ्जः। तत्र यथा—आराध्यैनं शरवणभुवं देवमुल्लङ्घिताध्वा। शक्रोऽर्जुने तराविन्द्रे कुटजे। शक्नोति शक्रः। भी वृधि (उ० ३८७) इति रः। अर्जुनतरुः ककुभः। इन्द्रे यथा—पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः। कुटजो गिरिमल्लिका। शस्त्रमायुधे लोहे। शस्यतेऽनेन शस्त्रम्। नीदाव् ५।२।८८। इति त्रट्। आयुधे स्त्रीक्लीबे तत्र यथा—शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ।।४४९।। लोहे यथा—अशस्त्रपूतं निर्व्याजं पुरुषाङ्गोपकल्पितम्। शस्त्री छुरिकायां। टित्वाद् ङीः। यथा—शस्त्री श्यामैरंशुभिराशु

**द्यूतस्य चोपकरणे शास्त्रं ग्रन्थनिदेशयोः ।।**
**शारिः कुञ्जरपर्याणे शकुनौ द्यूतसाधने ।।४५१।।**
**शिग्रुः शोभाञ्जने शाके, शीघ्रं चक्राङ्गतूर्णयोः ।।**
**उशीरे शुक्रस्तु शुक्ले, ज्येष्ठमासेऽग्निकाव्ययोः ।।४५२।।**

हृतमम्भः । शद्रिर्जिष्णौ तडित्वति । शीयते शद्रिः । तङ्कि वङ्कि (उ० ६९२) इति रिः । जिष्णौ जयनशीले वाच्यलिङ्गः। तडित्वति मेघे पुंसि । शरुः कोपे शरो शरे वज्रे । शृणाति शरुः । भृ मृ तृत्सरि इति उः पुंसि । शारः श लवातयोः द्यूतस्य चोपकरणे । शीर्यते शारः । श्रो वा युवर्णनिवृते ५।३।२०। इति घञ् । शबले वर्णे पुंसि तद्वति वाच्यलिङ्गः। तत्र यथा – पक्ष्मोत्क्षेपादुपरि विलसत्कृष्णशारप्रभाणाम् । वाते यथा – अश्रान्तशारविशरारुविशीर्णपर्णाः ।।४५०।। द्यूतोपकरणे स्त्री पुंसलिङ्गः यथा–उत्खातप्रतिरोपितैर्नृपतिभिः शारैरिव क्रीडितम् । शास्त्रं ग्रन्थनिदेशयोः । शास्तुर्धर्म्यं शास्त्रम् । ऋन्नरादेरण् । ६।४।५१। इत्यण् । शिष्यतेऽनेन वा । त्रट् । (उ० ४४६) इति त्रट् । ग्रन्थे यथा–विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः । निदेशे यथा–अखण्डं स्वगुरोः शास्त्रं द्वित्रैरेव प्रतन्यते । शारिः कुञ्जरपर्याणे शकुनौ द्यूतसाधने । शृणाति शीर्यते वा शारिः । कृ शृ कुटि कृ पृ कटि (उ० ५८९) इति णिदिः । स्त्रियाम् । कुञ्जरपर्याणे यथा– शारिभिः शुशुभिरे महागजाः । शकुनौ पक्षिभेदे यथा–पृच्छन्तीं वा मधुरवचनां शारिकां पञ्जरस्थाम् । अत्र शारिरेव शारिका । द्यूतसाधने यथा–शारिव्यग्रकराः प्रहारविधुरा धूर्ता नटन्त्याकुलाः ।।४५१।। शिग्रुः शोभाञ्जने शाके । शिनोति शिग्रुः ।

**शुक्रं तु रेतोऽक्षिरुजोः, शुभ्रं दीप्तेऽभ्रके सिते ॥**
**शूरश्चारभटे सूर्ये, सरौ दध्यप्रसायकौ ॥४५३॥**

शिग्रु गेरुनमेर्वादयः (उ० ८११) इति साधुः। पुंक्लीबः। शोभाञ्जनो वृक्षभेदः। शाकं पत्रमूलफलादिदशविधं व्यञ्जनम्। शीघ्रं चक्राङ्गतूर्णयोः। उशीरे। श्यायते शीघ्रम्। खुर क्षुर (उ० ३९६) इति साधुः। चक्राङ्गं रथावयवस्याङ्गम्। तूर्णे वाच्यलिङ्गः। तत्र यथा–विदधतु घृणयः शीघ्रमंहो विघातम्। उशीरं वीरणीमूलम्। शुक्रस्तु शुक्ले ज्येष्ठमासेऽग्निकाव्योः। शोचति शुक्रः। ऋज्यजि इति कित् रः। न्यङ्क्वादित्वात् कत्वम्। शुक्ले गुणे पुंसि तद्वति वाच्यलिङ्गः। ज्येष्ठे मासेऽग्नौ च पुंक्लीबः। तयोर्यथा–शुक्रस्य किं चित्रमिदं त्रिलोकी यदक्रमेणाकृततीव्रतापाम्। काव्ये भार्गवे यथा–कामः पुरः शुक्रमिव प्रयाणे ॥४५२॥ शुक्रं तु रेतोऽक्षिरुजोः। रेतसि यथा–पुमान् पुंसोऽधिके शुक्रे स्त्री भवेदधिके स्त्रियः। अक्षिरुजि यथा–शुक्रं नाशयति क्षणात्। शुभ्रं दिप्तेऽभ्रके सिते। शोभते शुभ्रम्। ऋज्यजि इति कित्रः। सिते गुणे पुंसि। तद्वति दीप्ते च वाच्यलिङ्गः। अभ्रके क्लीबे। दीप्ते भासुरे यथा–लावण्यशुभ्रमुखकान्तितया तया यः। अभ्रके यथा–शुभ्रं सूतेन जारयेत्। सिते शुक्ले यथा–कृतोपवीतं हिमशुभ्र-मुच्चकैः। शूरश्चारभटे सूर्ये। शूरयते शूरः। शवति वा चिजिशुसि (उ० ३९२) इति रः दीर्घत्वं च। चारभटे वाच्यलिङ्गः। तत्र यथा–वलानि शूराणि घनाश्च कञ्चुकाः। सूर्ये यथा–शूरः क्रूरतमः सपत्नसमरक्रोधादिवालोहितः। सरो दध्यग्रसायकौ। सरति सरः। द्वयोर्यथा–सन्निपाते हि वीराणां

**स्वरः शब्देऽचि षड्जादौ सत्त्रमाच्छादने क्रतौ ।।**
**सदादाने वने दम्भे स्वरुः स्याद्यूपखण्डके ।।४५४।।**
**अध्वरे कुलिशे बाणे सारो मज्जास्थिरांशयोः ।।**
**बले श्रेष्ठे च सारन्तु द्रविणन्याय्यवारिषु ।।४५५।।**

मृत्योरग्रेसराः सराः ।।४५३।। स्वरः शब्देऽचि षड्जादौ । स्वरति स्वरः । स्वयं राजते वा । शब्दे यथा–स्वरेण तस्याममृतश्रुतेव प्रजल्पितायामभिजातवाचि । अजिति अकारादीनां चतुर्दशानां वर्णानां पाणिनीया संज्ञा । तत्र यथा–एक स्वरं चित्रमुदाहरन्ति । षड्जादौ यथा–सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः । उदात्तादावपि मंखः । यथा–निहन्त्यरीनेकपदे य उदात्तः स्वरानिव । सत्त्रमाच्छादने क्रतौ । सदादाने वने दम्भे (प्र. वापि) । सीदन्त्यस्मिन् सत्रम् । हु यामा (उ० ४५१) इति त्रः । पञ्चस्वर्थेषु । धनेऽपि मंखः । धनाच्छादनयोर्यथा–आपद्गतानुद्धर सत्त्रवृष्ट्या । क्रतौ यज्ञे यथा–हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः (प्र. प्रचेतसा)। सदादाने यथा–विप्रैः सूचितनक्षत्रैः सत्रागारेषु भुज्यते । वनेऽरण्ये यथा–सत्रेषु य(प्र.व)स्त्रासविहीनबुद्धिर्ध्यायेद्विभुं संसृतिभीतचेताः । दम्भे कपटे यथा–सत्त्रायन्ते सत्रिणश्चेत् किमेभिज्ञानैर्ध्यानैः सत्क्रियाभिर्व्रतैश्च । स्वरुः स्याद्यूपखण्डके । अध्वरे कुलिशे बाणे । स्वरति स्वरुः । भृ मृ तृत्सरि (उ० ७१६) इति उः । चतुर्ष्वर्थेषु । पुंसि । यूपखण्डकं छुरिकाप्रायं दारुमयं लम्बमानं यत्क्रियते । सर्वेषु यथा–स्वरौ स्वरौचित्यनिधेर्विडौजा दृष्टिं निधत्ते विततामिमर्षः ।।४५४।। सारो मज्जास्थिरांशयोः बले श्रेष्ठे च । सरति कालान्तरं सारः । सर्त्तः स्थिर ५।३।१७। इति घञ् । सार-

**स्फारस्तु स्फरकादीनां, बुद्बुदे विपुलेऽपि च ॥**
**स्थिरो मोक्षे निश्चले च, स्थिरा भूः शालपर्ण्यपि ॥४५६॥**

यति वा अच् । चतुर्ष्वर्थेषु । श्रेष्ठे वाच्यलिङ्गः । मज्जनि यथा—कौस्तुभाख्यमपांसारं बिभ्रतं बृहतोरसा । यच्छ्रुतिः । अपां वा एष मज्जायद्रत्नानीति । स्थिरांशे स्थिरेऽवयवे यथा—श्रीखण्डसारेण चकार देवम् । बले यथा—यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्री धरणक्षमं च । श्रेष्ठे यथा—परोपकरणं कायादसारात्सारमुद्धरेत् । सारं तु द्रविणन्याय्यवारिषु । द्रविणे यथा—ग्रामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् । न्याय्ये यथा—रे चित्त वित्तलवलुब्धतया त्वया किं बंभ्रम्यते जगति नैव हि सारमेतत् । वारिणि यथा—अन्तःसारं घनतुलयितुं नानिलः शिक्ष्यति त्वाम् ॥४५५॥ स्फारस्तु स्फरकादीनां बुद्बुदे विपुलेऽपि च । स्फारयते(स्फायते)(स्फोयते) स्फारः । भी वृधि (उ० ३८७) इति रः । य्वोः प्वय् व्यञ्जने लुगिति य लुक् । विपुले गुणे पुंसि । तद्वति वाच्यलिङ्गः। स्फरकादीनां बुद्बुदो बुद्बुदाकारः पित्तलादिमयोऽलङ्कारः । विपुले यथा—अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयः । स्थिरो मोक्षे निश्चले च । तिष्ठति स्थिरः । शुषी षि (उ० ४१६) इति किदिरः । निश्चले वाच्यलिङ्गः । मोक्षे यथा—स्थिरं व्रतस्थः पदमश्नुवीत । निश्चले स्थास्नौ यथा—पृथ्वि स्थिरी(भ्र. रा)भव भुजङ्गम धारयैनाम् । स्थिरा भूः शालपर्ण्यपि । भुवि यथा—यत्र स्थिरापि स्थितिमेति न क्षणं का तत्र वार्ता किल तूलराशिषु । शालपर्णी ओषधिः । दृढेऽपि मंखः । यथा—अहो स्थिरः कोऽपि तवेप्सितो युवा ॥४५६॥

**सिप्रः स्वेदे सिप्रा नद्यां सिरा नाड्यम्बुवाहिनी ।।**
**सिरस्तु पिप्पलीमूलं सीरः स्यादंशुमालिनि ।।४५७।।**
**लाङ्गलेऽथ सुरो देवे, सुरा चषकमद्ययोः ।।**
**सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः ।।४५८।।**

सिप्रः स्वेदे । सर्पति सिप्रः । खुर क्षुर (उ० ३९६) इति साधुः । स्वेदो धर्मः । सिप्रा नद्याम् । यथा–सिप्रावातः प्रियतम इव प्रार्थना चाटुकारः । सिरा नाड्यम्बुवाहिनी । सिनोति सिरा । ऋज्यजि (उ० ३८८) इति कित् रः । नाड्यां धमन्यां यथा–सिरामुखैः स्पदन्त एव रक्तम् । अम्बुवाहिनी जलस्रोतः । तत्र यथा–इन्दुदृषदां भिन्दानमम्भः सिराः । सिरस्तु पिप्पलीमूलम् । पिप्पलीमूलम् ओषधिभेदः । सीरः स्यादंशुमालिनि । लाङ्गले । सनोति सीरः । चिजि (उ० ३९२) इति रो दीर्घश्च । अंशुमालिनि यथा–सीरः कीरमुखच्छविः ।।४५७।। लाङ्गले पुंक्लीबस्तत्र यथा–सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालम् । अथ सुरो देवे । सुरति सुरः । सुष्ठु राजते वा । सुनोति वा । ऋज्यजि (उ० ३८८) इति कित् रः। यथा–दिशामधीशान्‌ चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे । सुरा चषकमद्ययोः। चषकं मद्यपानभाण्डम् । मद्ये यथा–पीतभूरि सुरयाऽपि।न मेदे । सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः । सूचनात् सूत्रम् । पुत्रादयः (उ० ४५५) इति साधुः । सुवति वा । सू मूखनि (उ० ४४९) इति कित् रः । सूत्र्यते वा । पुक्लीबः । सूचनाकारिग्रन्थे व्यवस्थायां च यथा – अनुसूत्रपदन्यासासद्वृत्तिः सन्निबन्धना । तन्तौ यथा–तुद्यत्कञ्चुकजालकैरनुदिनं निःसूत्रमस्मद्गृहम् ।।४५८।। स्वैरो मन्दे

**स्वैरो मन्दे स्वतन्त्रे च, हरो रासभरुद्रयोः ।**
**वैश्वानरेऽप्यथ हरिर्दिवाकरसमीरयोः ॥४५९॥**

**यमवासवसिंहांशुशशाङ्ककपिवाजिषु ॥**
**पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्रशुकाहिषु ॥४६०॥**

स्वतन्त्रे च। स्वईरोऽस्य स्वरः। स्वैरस्वैर्यक्षौहिण्याम् । १।२।१५। इति ऐत्वम् । वाच्यलिङ्गः । द्वयोर्यथा—स्वैरं समाचक्रुषिरे भूवि वेल्लनाय । हरो रासभरुद्रयोः । वैश्वानरेऽपि । हरति हरः । रुद्रे यथा—हरस्तु किञ्चित्परिवृत्तधैर्य्यः । शेषयोर्यथा—भस्मभिः कश्मलो हरः । अथ हरिर्दिवाकरसमीरयोः । यमवासवसिंहांशुशशाङ्ककपिवाजिषु । पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्रशुकाहिषु । लोकान्तरे च । हरति हरिः । स्वरेभ्य इः (उ० ६०६) षोडशस्वर्थेषु । पिङ्गवर्णहरिद्वर्णयोः गुणयोः पुंसि । तद्वति वाच्यलिङ्गः । सर्वेषु यथा—यस्य व्याहरतो हरिं शुकमपि स्वस्वाभिधानभ्रमाच्चन्द्रेन्द्रानिलपन्नगार्यमयमैराज्ञाविधौ स्पर्धितम् । हर्यक्षस्य हरीशितुर्हरिगते हर्य्यङ्गहर्या कृतेः साहाय्याद्धरिमान् हरिर्हरिमिवास्थत्तं हरौ रावणम् । अस्य व्याख्या । यस्य रावणस्य कोरं प्रति हरिमिति जल्पतश्चन्द्रादिभिः स्वनामभ्रमादादेशविधौ ममाज्ञा दीयतां ममाज्ञा दीयतामिति अहमहमिका व्यधायि । तं लङ्केशं हरिमिव भेकमिव हरौ लोकान्तरे हरिरूपेन्द्रो राम नामा हरिमान् अंशुमान् आस्थत् अक्षिपत् । हरीशितुः कपीश्वरस्य सुग्रीवस्य हर्यक्षस्य हरि(द्)वर्णलोचनस्य हरिगतेर्वाजिगणनस्य हैर्यङ्ग(हर्यङ्ग)हर्याकृतेः पिङ्गाङ्गसिंहाकारस्य सहायकादित्यर्थः ॥४५९—६०॥ हारस्तु मुक्तादामनि संयुगे । ह्रियते हारः । मुक्तादामनि स्त्रीपुंसः । तत्र यथा—

**लोकान्तरे च हारस्तु मुक्तादामनि संयुगे ।।**
**हिस्रः स्याद्घातुके हिस्रा मांसी काकादनी वसा ।।४६१।।**
**हीरो वज्रे हरे सर्पे हीरा पिपीलिकाश्रियोः ।**
**होरा तु लग्ने राश्यर्द्धे शास्त्ररेखाप्रभेदयोः ।।४६२।।**
**अलिः सुरापुष्पलिहोरम्लो रसेऽम्लवेतसे ।।**
**अम्ली चाङ्गेर्यामालं स्यादनर्थहरितालयोः ।।४६३।।**

हाराय गुणिने स्थानं न दत्तमिति लज्जया । संयुगं सङ्ग्रामः । हिस्रः स्याद्घातुके । हिंसनशीलो हिंस्रः । स्म्यजस । ५।२।७९ इति रः । वाच्यलिङ्गः । सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन । हिंस्रा मांसी काकादनी वसा । मांसी गन्धद्रव्यम् । काकादनी कृष्णला (भाषा-चणोठी) वसा भेदः । ।।४६१।। हीरो वज्रे हरे सर्पे । हिनोति हीरः । खुर क्षुर (उ० ३९६) इति साधुः । त्रिष्वपि यथा—देयान्मन्दाकिनीतीरे हीरो हीराङ्गदः श्रियम् । हीरा पिपीलिकाश्रियोः । पिपीलिका कोटिका । श्रीर्लक्ष्मीः । होरा तु लग्ने राश्यर्द्धे शास्त्ररेखाप्रभेदयोः। हरति होरा । कोरचोर (उ० ४३४) इति साधुः । चतुर्ष्वर्थेषु । लग्ने यथा—युवतिजननयनकान्तं जनयति होरागतः शुक्रः । राश्यर्द्धं लग्नार्द्धम् । तत्र यथा—होरे विषमेऽर्केन्द्वोः समराशौ चन्द्रतीक्ष्णांश्वोः । शास्त्ररेखाप्रभेदयोर्यथा—होरां मुनिकिशोराय व्याचख्यौ स विचक्षणः ।।४६२।। अथ लान्ताः । अलिः सुरापुष्पलिहोः । अलति अल्यते वा अलिः । कृश् कुटि इति इः । सुरायां स्त्रियाम् । पुष्पलिहि भ्रमरे स्त्रीपुंसस्तत्र यथा—अलिरेति वनात्कमलम् । अम्लो रसेऽम्लवेतसे । अमति अम्लः । शोमाश्या शक्यस्याम्यिोल् (उ० ४६२) । रसे यथा—

**आलिः सख्यावलीसेत्वनर्थेषु विशदाशये ।।**
**आलुर्गलन्तिकायां स्यादालु भेलककन्दयोः ।।४६४।।**
**इलोर्वी वाग् बुधस्त्री गौः कलं त्वजीर्णरेतसोः ।।**
**अव्यक्तमधुरध्वाने कला स्यात्कालशिल्पयोः ।।४६५।।**

---

कद्वम्लोष्णरताः शरद् दधिभुजो हेमन्तनिद्रालसाः । अम्लवेतसो वृक्षः। अम्ली चाङ्गेर्याम् । गौरादित्वाद् ङीः। चाङ्गेरी औषधिः। आलं स्यादनर्थहरितालयोः । अल्यते आलम् । अनर्थो यथा-सोप्यालमालप्य चचाल वालः । हरितालं धातुभेदः ।।४६३।। आलिः सख्यावलीसेत्वनर्थेषु विशदाशये । अलति अल्यते वा आलिः । कृशृ कुटि इति णिदिः । पञ्चस्वर्थेषु स्त्रियाम् । सख्यां यथा-निवार्यतामालि किमप्ययं बटुः । आवल्यां श्रेण्यां यथा-करकलितक(र)णत्कङ्कणालीकरालः (प्र० करकलितकङ्कणं कणालीकरालः) (प्र. कलकलितरणत्कङ्कणाली करालः)। सेतौ जलादिमर्यादायां यथा-तस्मिन्नालिप्रदेशे जलधरपटलैः प्रापि-(प्य)ते तामवस्थाम् । अनर्थे यथा-मिथ्यालीविषयस्त्वया प्रियतमे कोपादहं किं कृतः । विशद आशयः स्थानम् । अभिप्रायो वा। वृश्चिकेऽपि मंखः । तत्र पुंसि । यथा- ते वृकविषमालि विषं मूषिक(मूषकः) विषमपहरन्त्यशेषेण । आलुर्गलन्तिकायां स्यात् । इयर्त्ति आलुः । ऋतृशृ (उ० ७२७) इति णित् उः लत्वं च रस्य । स्त्रियाम् । यद् गौडः-आलुर्गलन्तिकायां स्त्रीक्लीबे मूले च भेलके । यथा-भवति भुवनं भव्यं द्वारे शयालुभिरालुभिः। आलु भेलककन्दयोः । क्लीबे । भेलक उडुपः। कन्दः कन्दविशेषः ।।४६४।। इलोर्वीवाग् बुधस्त्री गौः । इलति इला । चतुर्ष्वर्थेषु । उर्व्यां यथा-अस्यां राजन् न जलधिपरि-

**कलने मूलरैवृद्धौ षोडशांशे विधोरपि ॥**
**कलिर्बिभीतके शूरे, विवादेऽन्त्ययुगे युधि ॥४६६॥**

खामेखलायामिलायाम् । वाचि गवि च यथा–इला सा धन्या स्याद्भगवति शिवे या प्रणिहिता । बुधस्त्रियां यथा–चन्द्राद्बुधः समभवद्भगवान् नरेन्द्रमाद्यं पुरुरवसमैलमसावसूत । अत्र इलाया अपत्यम् ऐलः । शिवाद्यण् । कलं त्वजीर्णरेतसोः । अव्यक्त-मधुरध्वने । कलयति कलम् । अजीर्णो जरारहितः । अव्यक्तो मधुरो ध्वानो (प्र. ध्वनौ) यस्य(त्र) अव्यक्तमधुरध्वानः (प्र. ध्वनः) । तयोर्वाच्यलिङ्गः । अव्यक्तमधुरध्वनिमात्रे पुंसि । अजीर्णे यथा – स दृढैरङ्गसन्धानै(सुदृढैरङ्गरंध्वानै)र्वृद्धोऽपि कलः किल । रेतः शुक्रं तत्र यथा–खलेन निष्कलश्चक्रे बालोऽयं राजयक्ष्मणा । अव्यक्तमधुरध्वाने यथा–स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिताम् । मनोहरेऽपि मंखः । तत्र तु वाच्यलिङ्गः । यथा – तुषारसंघातशिलाखुराग्रैः समुल्लिखन् दर्पकलः ककुद्मान् । कला स्यात्कालशिल्पयोः । कलने मूलरै-वृद्धौ षोडशांशे विधोरपि । कल्यतेऽनया कलनं वा कला । भीषि भूषि ५।३।१०९ इति बहुवचनात्साधुः । कालः काल-विशेषः । यदाह–अष्टादश निमेषाः स्युः काष्ठास्त्रिंशत्तु ताः कलाः । तत्र यथा–लीलागृहे प्रतिकलं किल किञ्चितेषु ॥४६५॥ शिल्पे विज्ञानकौशले विधोः षोडशांशे च यथा–कला समग्रेण गृहानमुञ्चता मनस्विनीरुत्कयितुं पटीयसा । विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेन्दुना । कलने संख्याने यथा–न शक्यात्र कलाकर्त्तुमपि कल्पशतैर्यदि । मूलरैवृद्धौ मूलधनवृद्धौ यथा–तत्कलारहितं धनम् । अंशमात्रे

**कालः पुनः कृष्णवर्णे महाकालकृतान्तयोः ।।**
**मरणानेहसोः काली कालिकाक्षीरकीटयोः ।।४६७।।**

तालगुरौ निवृत्यादौ । छले शक्तावपि च मंखः । अंशमात्रे यथा–चेतः कालकलामपि प्रकुरुते नावस्थितिं तां विना । तालगुरौ यथा–त्रिकलश्चावपुटो मतो बुधैः । निवृत्यादौ शैवागमप्रसिद्धे शक्तिपञ्चके यथा – कलाभिर्भुवनैर्वापि तत्त्वैर्वापि विशेषतः । छले कूटे यथा–अन्यतो नय मुहूर्त्तमाननं चन्द्र एष सरले कलामयः । शक्तौ पदार्थात्मविशेषे यथा–वन्देमहि च तां वाचममृतामात्मनः कलाम् । कलिर्बिभीतके शूरे विवादेऽन्त्ययुगे युधि । कल्यते कलिः । पदि पठि (उ० ६०७) इति इः । पञ्चस्वर्थेषु पुंसि । बिभीतके यथा–निष्पन्दस्य कले सूत्रस्थानदानाद्बिभीतकः। कलिद्रुमः परं नासीदासीत्कल्पद्रुमोऽपि सः। शूरो विक्रान्तः। विवादे यथा–भग्नो मानकलिः सहासरभसव्यावृत्तकण्ठग्रहम् । अन्त्ययुगे यथा–कलिः कालः स एकोस्तु कृतं कृतयुगादिभिः। युधि यथा–धनवानन्यतः कलिम् ।।४६६।। कालः पुनः कृष्णवर्णे महाकालकृतान्तयोः । मरणानेहसोः । कालयति कालः। कृष्णवर्णे गुणे पुंसि तद्वति वाच्यलिङ्गः । तत्र यथा–कालिन्दीजलकालकालियकुलक्रीडाविनाशैषिणा । महाकाले रुद्रे यथा–कालः क्रीडति कालकूटकवलैर्व्यालावलीभूषणः । कृतान्ते यथा–कालः काल्या सह बहुकलः क्रीडति प्राणिशारैः । मरणे यथा–मन्दाकिनीतीरकुटीरकेषु चकार कालं नलभूमिपालः । अनेहसि यथा–विलम्बितफलैः कालं स निनाय मनोरथैः । काली कालिकाक्षीर(प्र. क्षार)कीटयोः । मातृभेदोमयोर्नव्यमेघपरिवादयोः । गौरादित्वाद् ङीः । कालिका योगिनी तत्र

**मातृभेदोमयोर्नव्यमेघौघपरिवादयोः ॥**
**काला कृष्णत्रिवृन्नील्योर्जिङ्ग्यां कीलोऽग्नितेजसि ॥४६८॥**
**कफणिस्तम्भयोः शङ्कौ, कीला रताहृतावपि ॥**
**कुलं कुल्यगणे गेहे, देहे जनपदेऽन्वये ॥४६९॥**

---

यथा—कोपादुदस्थात्किल तत्र काली। क्षीरकीटः कीटविशेषः ॥४६७॥ मातृभेदे यथा—तासां च पश्चात् कनकप्रभाणां काली कपालाभरणा चकाशे। उमायां यथा — कालीत्याशङ्कमानः स्फुरदधरपुटः शूलपाणिः किलाभूत्। नव्यमेघौघः कादम्बिनी। परिवादोऽपवादः। काला कृष्णत्रिवृन्नील्योर्जिङ्ग्यां। कृष्णत्रिवृत् कृष्णत्रिपुटा। नीली गुलिका। जिङ्गी मञ्जिष्टा। कीलोऽग्नितेजसि। कफणिस्तम्भयोः शङ्कौ। कीलयति कील्यते वा कीलः। स्त्रीपुंसः। अग्नितेजसि अग्निज्वालायां यथा—कीलावकीढभुवनत्रितयस्य तस्य को नाम कल्पशिखिनः प्रतिमानमेति ॥४६८॥ कफणौ कूर्परे य ा—कीलोपघातात्कथयन्ति मल्लाः। स्तम्भे यथा—उत्खाय दर्पचलितेन सहैव रज्जवा कीलं प्रयत्नपरमानवदुर्ग्रहेण। शङ्कौ यथा—जन्म तस्य किल कर्णयोर्गतं वज्रकील इव दुःसहोऽभवत्। कीला रताहृतावपि। रताहृतिः सुरतप्रहणनम्। यद् वात्स्यायनः कीला उरसि कर्त्तरी शिरसि वि(ब)द्धा कपोलयोः। कुलं कुल्यगणे गेहे देहे जनपदेऽन्वये। कोलति कुलम्। पञ्चस्वर्थेषु। कुल्याः सजातीयास्तेषां गणे यथा—छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्य तु। गेहे यथा— त्रयमूर्द्धमुखं नेयं यशोदेवकुलं कुलम्। देहे यथा—याः शक्तयः शरीरस्य ताः प्रोक्ताः कुलदेवताः। जनपदे यथा—यस्मिन् लाटकुले कुलीनचरिताः प्रायः पुमांसः सदा। अन्वये यथा—कुले प्रसूतिः प्रथमस्य वेधसः

**कूलं तटे सैन्यपृष्ठे, तडागस्तूपयोरपि ॥**
**कोलो भेलक उत्सङ्गेऽङ्कपाल्यां चित्रके किरौ ॥४७०॥**
**कोलं तु बदरे कोला पिपल्ल्यां चव्यभेषजे ॥**
**खलं कल्के भुवि स्थाने क्रूरे कर्णे जपेऽधमे ॥४७१॥**

॥४६९॥ कूलं तटे सैन्यपृष्ठे तडागस्तूपयोरपि । कूलति कूलम् । चतुर्ष्वर्थेषु । तटे यथा–स्वयमेव पतिष्यन्ति कूलजाता इव द्रुमाः । सैन्यपृष्ठे यथा–कूलस्थयोधसंघाता युद्धवेला विभाति सा । तडागं सरः । स्तूपो मृदादिकूटः । कोलो भेलक उत्सङ्गेऽङ्कपाल्यां चित्रके किरौ । कोलति कोलः कायतेर्वा । ग्रह्यादिभ्यः कित् (उ० ४९४) इति ओलः । भेलके प्लवे यथा – एककोलकलिताखिलभाण्डः । उत्सङ्गेऽङ्के यथा–कोले कुलिन्दस्य पुलिन्दबाला । अङ्कपाली परीरम्भः । चित्रकम् औषधभेदः । किरौ सूकरे यथा-कोलाकृतिः पातु स माधवो वः । ॥४७०॥ कोलं तु बदरे । बदर्याः फलं बदरम् । कोला पिप्पल्यां चव्यभेषजे । पिप्पली कणा । खलं कल्के भुवि स्थाने क्रूरे कर्णे जपेऽधमे । खलति खलम् । खनति वा । मृजि खनि (उ० ४७२) इति डिदलः । कल्के कर्णे जपे च पुंक्लीबः । भुवि क्लीबे । स्थाने त्रिलिङ्गः । क्रूराधमयोर्वाच्यलिङ्गः । कल्कः कृष्टस्नेहं द्रव्यम् । भूर्युद्धाद्यर्थं शष्पाद्यपनयनेन संस्कृता-भूमिः । स्थानं धान्यनिष्पवनक्षेत्रम् । क्रूरो निस्त्रिंशः । कर्णेजपः सूचकः । अधमः पामरः । कल्कक्रूरकर्णेजपेषु यथा–व्रजति विरसत्वमितरः सत्यं परिमलितसुन्दराः सन्तः । यान्ति तिलाः खलभावं स्नेहः पयसो विकारेऽपि । भुवि यथा–खलप्रविष्टा-विव ताम्रचूडौ । स्थानेऽधमे च यथा–स क्षेत्रतो यत्र फलं

**खल्लो निम्ने वस्त्रभेदे, चर्मचातकपक्षिणोः ॥**
**खल्ली तु हस्तपादावमर्दनाह्वयरुज्यपि ॥४७२॥**
**गलः कण्ठे सर्जरसे गोलः स्यात्सर्ववर्तुले ॥**
**गोला पत्राञ्जने गोदावर्य्यां सख्यामलिञ्जरे ॥४७३॥**
**मण्डले च कुनट्यां च, बालक्रीडनकाष्ठके ॥**
**चिल्लः खगे सचुल्लश्च, पिल्लवत् क्लिन्नलोचने ॥४७४॥**

गृहित्वा निक्षिप्यते क्षोदयितुं खलेषु ॥४७१॥ खल्लो निम्ने वस्त्रभेदे चर्मचातकपक्षिणोः। खलति खल्लः। शामाश्या (उ० ४६२) इति बहुवचनात् लः। 'निम्ने वाच्यलिङ्गः। चतुर्षु–अपि यथा–खल्लैर्हि भिल्ला गमयन्ति कालम्। खल्ली तु हस्तपादावमर्दनाह्वयरुज्यपि। गौरादित्वाद् ङीः। यथा–भल्लीभिरिव खल्लीभिस्तुद्यमानस्तु वेल्लति ॥४७२॥ गलः कण्ठे सर्जरसे। गलति गलः। कण्ठे यथा–शोकपिहितगलरुद्धगिरस्तरसागताश्रुजलकेवलोत्तराः। सर्जरसो धातुभेदः। गोलः स्यात्सर्ववर्तुले। गुड्यते गोलः। गायते वा। ग्रह्यादभ्यः कित् (उ० ४९४) इत्योलः। यथा–इदं भासां भर्तुर्हृतकनकगोल–प्र(ति)कृतिः। गोला पत्राञ्जने गोदावर्यां सख्यामलिञ्जरे। मण्डले च कुनट्यां च बालक्रीडनकाष्ठके। स्त्रीक्लीबः। यद्गौडः। पत्राञ्जने कुनट्यां च गोदावर्य्यां च मण्डले। सखीमणिकयोर्गोला गोलं लक्ष्यानुसारतः। पत्राञ्जनं भेषजभेदः। गोदावर्य्यां नद्यां यथा–गोला कूले बहुलबकुले कूलिकां वालुकाभिः। सखी वयस्या। अलिञ्जरो मणिकः ॥४७३॥ मण्डलं समूहः। कुनटी मनःशिला। बालक्रीडनकाष्ठं येन शिशवः क्रीडन्ति। चिल्लः खगे। चिल्लशैथिल्ये च अचि चिल्लः। खगः शकुनिस्तत्र

**क्लिन्नाक्षिण चुल्ली तूद्धाने चेलं गर्हितवस्त्रयोः ॥**
**छलं छद्मस्खलितयोः छल्ली सन्तानवीरुधोः ॥४७५॥**

यथा–पयसि प्राविशन् मत्स्योऽहरच्चिल्ली तथामिषम् । अत्र जातिवाचित्वाद् ङीः । सचुल्लश्च पिल्लवत् क्लिन्नलोचने क्लीन्नाक्षिण । स इति चिल्लशब्दश्चुल्लशब्दश्च पिल्लवत् इति पिल्लशब्दश्च त्रयोऽपि क्लिन्नलोचने पुरुषे ॥४७४॥ क्लिन्ने चाक्षिण वर्त्तन्ते । क्लिन्नं चक्षुः । चिल्लं चुल्लं पिल्लम् । क्लिन्नाल्लश्चक्षुषि चिल् पिल चुल् चास्य ७।१।१३०। इति साधवः । चिल्लाद्यक्षियोगात् पुरुषोऽपि चिल्लः चुल्लः पिल्लः। तत्र तु वाच्यलिङ्गः । तत्र यथा–द्रुहिणसुतो भवतामुदश्चुचिल्लः। स मन्त्रिणं चार्द्धक(वार्द्धक)चुल्लमेव मुक्तोपपिल्लस्तमुवाच यावत् । क्लिन्नेऽक्षिण यथा–चुल्ले फुल्ले च दातव्या वर्त्तिरेषा सुनिर्मला । चुल्ली तूद्धाने । उद्धानम् अश्मन्तकः। यथा–वेपन्ते कपयो भृशं कृशतरं गोजाविकं ग्लायति श्वा चुल्ली कुहरोदरं क्षणमधिक्षिप्तोऽपि नैवोज्झति । चेलं गर्हितवस्त्रयोः। चेलति चेलम् । गर्हिते वाच्यलिङ्गः। तत्र यथा–ताभिर्ब्राह्मणचेलीभिर्हृते चारित्रपादपे । विच्छायमभवद्राष्ट्रम् । वस्त्रे यथा–चेलाञ्चले चलति चञ्चललोचनायाः। छलं छद्मस्खलितयोः । छ्यति छलम् । छोऽङ्गादिर्वा (उ० ४७१) इति किदलः। छद्मनि यथा–न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव । स्खलितं परस्य वदतोऽर्थ विकल्पोपपादनेन वचनविघातः। यथा – नवकंबलोऽयं माणवकः कुतोऽस्य नवकंबलाः। तत्र यथा–वस्तुनिरूपणनिपुणं वचनैश्छलमुखरकल्पितैः किमिह कन्यागत इति सविता न हि दुष्यति वचनमात्रेण । मतिभ्रंशादिकं वा । तत्र यथा–दैवो यस्य छलान्वेषी ।

**वल्कले पुष्पभेदे च जलं गोकलले जडे ॥**
**ह्रीवेरेऽम्बुनि जालं तु, गवाक्षे क्षारके गणे ॥४७६॥**
**दम्भानाययोश्च जालो नीपे जाली पटोलिका ॥**
**झला पुत्र्यामातपोर्मौ, झिल्ली तूद्वर्तनांशके ॥४७७॥**

छल्ली सन्तानवीरुधोः। वल्कले पुष्पभेदे च । छादयति छल्ली । भिल्लाच्छभल्ल (उ० ४६४) इति निपात्यते । सन्तानं सन्ततिः। वीरुतलता गुल्मभेदः ॥४७५॥ वल्कलं त्वक् । पुष्पभेदः । कुसुमान्तरम् । चतुर्ष्वर्थेषु । वल्कले यथा—छल्लीछन्ना भान्ति पल्लीषु भिल्ल्यः। जलं गोकलले जडे । ह्रीवेरेऽम्बुनि । जलति जलम् । चतुर्ष्वर्थेषु । जडे वाच्यलिङ्गः। गोः कललं शुक्रशोणितयोरीषद्यूनः(प्र. द्व्युतः,रीषद्यक्त,)परिणामो गर्भप्रथमावस्थेति यावत् । जडे मूर्खे । अम्बुनि तोये च यथा—दानं ददत्यपि जलैः सहसाधिरूढे को विद्यमानगतिरासितुमुत्सहेत । ह्रीवेरं बालकम् । जालं तु गवाक्षे क्षारके गणे । दम्भानाययोश्च । जलति जालम् । ज्वलादित्वाद् णः । गवाक्षगणानायेषु स्त्रीक्लीबः । गवाक्षे यथा—पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान् । क्षारकं कुड्मलं तत्समूहो वा तत्र यथा—विश्रान्तः सन् व्रज नवनदीतीरजातानि सिञ्चन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि । गणे समूहे यथा—पश्यन्ति शान्तमलसान्द्रतरांशुजालम् ॥४७६॥ दम्भे छद्मनि । आनाये मत्स्यबन्धने च यथा जालावलम्बेन हि धीवरोऽपि प्राणातिवाहं कुरुते जलेभ्यः। धूर्तकृत्येऽपि मंखः । यथा—शङ्का स्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैर्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति । जालो नीपे । नीपः कदम्बः । जाली पटोलिका । पटोलिका कोशातकी ।

**वर्त्यातपरुचोश्चीर्य्यां, तलं ज्याघातवारणे ।।**
**तलश्चपेटे तालद्रौ, स्वभावाधरयोः त्सरौ ।।४७८।।**
**तल्लो जलाधारभेदे, तल्ली तु वरुणस्त्रियाम् ।।**
**तालः कालक्रियामाने, हस्तमानद्रुभेदयोः ।।४७९।।**

झला पुत्र्यामातपोर्मौ । झलति झला । भिल्लाच्छभल्ल (उ० ४६४) इति साधुः । पुत्री दुहिता । आतपोर्मिः आतपवीचिः * झल-कायामपि । झिल्ली तूद्वर्तनांशके वर्त्यातपरुचोश्चीर्यामि । झमति झिल्ली । भिल्लाच्छभल्ल इति साधुः । उद्वर्तनांशक उद्वर्तना-वयवः ।।४७७।। वर्त्तिर्दशा । आतपेन उष्णत्वेन युक्ता रुक् आतपरुक् । चीरी पक्षिभेदः । तलं ज्याघातवारणे । तलति तलम् । ज्याघातवारणं प्रकोष्ठे प्रत्यञ्चाघातरक्षार्थं वर्ध्रपट्टः। तत्र यथा—न्यासीकृताच्छमणिखण्डतलायमानम् । तलश्चपेटे तालद्रौ स्वभावाधरयोः त्सरौ । स्वभावाधरयोः पुंक्लीबः। अन्यत्र पुंसि । मंखस्तु तलं गोधास्वरूपाधःपृष्ठेष्वस्त्रीपुमान् द्रुभित् । चपेटे चाबितस्तौ चेत्याह । चपेटा विस्तृताङ्गुलिः पाणिस्तत्र यथा—तलप्रहारेण तिरस्क्रियेत कथं तु मत्तो द्विरदोनुयातः । तालद्रुः तालनामावृक्षः तत्र यथा—तलस्य सुचिरात्फलं फलति तत्किमे-तावता भवेयुरजरामरास्तद्रुपयोगिनः केचन । स्वभावे स्वरूपेऽ-धरेऽधोभागे च यथा—विदांकुर्वन्तु महतस्तलं विद्विषदम्भसः । त्सरुः खड्गादिमुष्टिः। तताङ्गुष्ठमध्यमपाणौ वितस्तिमात्रे पृष्ठेऽपि । पृष्ठे क्लीबस्तत्र यथा—महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ।।४७८।। तल्लो जलाधारभेदे । तल्लाति तल्लः । यथा – अनिलश्चलयन् मल्लीसल्लकल्लोललासकः । तल्ली तु वरुण(प्र. तरुण)स्त्रियाम् । गौरादित्वाद् ङीः। वरुणस्त्री

**करास्फोटे करतले, हरिताले त्सरावपि ॥**
**तुला माने पलशते सादृश्ये राशिभाण्डयोः ॥४८०॥**
**गृहाणां दारुबन्धाय पीठ्यां तूलं तु खे पिचौ ॥**
**ब्रह्मदारुण्यथ दलं, शस्त्रीच्छदेऽर्द्धपर्णयोः ॥४८१॥**

वरुणभार्या । तालः कालक्रियामाने हस्तमानद्रुभेदयोः । करास्फोटे करतले हरिताले त्सरावपि । तालयति तालः। सप्तस्वर्थेषु । कालस्य क्रियया आवापनिष्क्रामादिक(का)या मानं परिच्छेदकं चच्चत्पुटादि तत्र यथा–गतमनुगतवीणैरेकतां वेणुनादैः कलमविकलतालं गायनैर्बोधहेतोः। हस्तस्य मानम् अङ्गुष्ठमध्यमाङ्गुलिकृतः परिच्छेदः। तत्र यथा–पञ्चतालमितां रज्जुं पञ्चाङ्गी तत्र कल्पयेत् । द्रुभेदे वृक्षभेदे यथा–यस्तैकबाणाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः । करास्फोटे करतले च यथा–तालः सिञ्जद्वलयसुभगैः नर्त्तितः कान्तया मे । हरिताले धातुभेदे यथा–ताम्रं तालेन लेपयेत् । त्सरुः खड्गादिमुष्टिः । गृहादिरक्षणाय लोहादिमययन्त्रेऽपि । तुला माने पलशते सादृश्ये राशिभाण्डयोः । गृहाणां दारुबन्धाय पीठ्याम् । तोल्यतेऽनया तोलनं वा तुला । भिदादित्वात् साधुः। माने उन्मानविशेषे यथा–बार्द्धुष्यं भ्रूणहत्यां च तुलया सह तोलयेत् । पलशते यथा–कालागुरुतुलाधूपधूमध्यामलजालके । सादृश्ये यथा–चिरोञ्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा । राशौ यथा–जयति तुलामधिरूढो भास्वानपि जलदपटलानि । भाण्डे जलोदञ्चनोपकरणे यथा–प्राप्यते स्वादुपोतस्थैस्तुलया तोलितं जलम् ॥४८०॥ गृहाणां दारुबन्धाय दारुस्थापनाय पीठ्या पट्टे यथा–बृहत्तुलैरप्यतुलैर्वितानमालावनद्धैरपि चावि-

**उत्सेधवद्वस्तुनि च, नलो राज्ञि कपौ नडे ॥**
**पितृदेवे नलं तु स्यात्पद्मे नली मनःशिला ॥४८२॥**

तानैः। सदृशधटयोरपि मंखः। सादृश्ये यथा– त्वमेव ते तुलानाथ त्वमेव च तव प्रभुः। धटे दिव्यविशेषे यथा– इतीव भानुः स विवृद्धतापस्तुलां विशुद्धयर्थमुपारुरोह। तूलं तु खे पिचौ। ब्रह्मदारुणि। तूलनिष्कर्षे। तूल्यते तूलम्। पिचौ पुंक्लीबः। खं व्योम। पिचौ यथा–तृणं लघु ततस्तूलं तस्मादपि हि याचकः। ब्रह्मदारु वृक्षविशेषः। यन्निघण्टुः। तूलं तूदं ब्रह्मदारु ब्रह्मण्यं ब्रह्मकाष्ठकम्। अथ दलं शस्त्रीच्छदेऽर्द्धपर्णयोः। उत्सेधवद्वस्तुनि च। दलति दलम्। शस्त्रीच्छदे शस्त्रीप्रत्याकारे यथा–दलविलगतशस्त्री सर्पिणी किं भयाय। अर्द्धशब्देनात्र खण्डं समभागश्चोच्यते। तत्र खण्डे यथा–किं ते नैव सह स्वयं न दलशो यातास्थ भो भोगिनः। समभागे यथा–पदयुत-(तः)पदवर्गदलम्। पर्णे पत्रे पुंक्लीबः। तत्र यथा–शाकं कथं-चिदुचितैः पिचुमन्दपत्रैरास्यान्तरालगतमाम्र(त्र)दलं म्रदीयः ॥४८१॥ उत्सेधवत् सोच्छ्रायं वस्तु उत्सेधवद्वस्तु। तत्र यथा–लेपेन कर्णं सदलं चकार। सुगन्धिपत्रोपादानहेतो(त्वो)रपि मंखः। सुगन्धि पत्रं सुरभिद्रव्यविशेषः। तत्र यथा–गोरोचनादल-शिलातललेपिताङ्गं नारीनरेन्द्रनरवश्यकरं वदन्ति। उपादान-हेतुरुपादानकारणम्। प्रासादाद्यर्थं पाषाणादीत्यर्थः। तत्र यथा–लोकरूढयासैन्येऽपि दृश्यते। गजाश्वप्रायामणाक्षिदलं नो रक्षणक्षमं स्मरावस्कन्दपातेभ्यस्तवाधरदलं विना। नलो राज्ञि कपौ नडे। पितृदेवे। नलति नलः। नडे पुंक्लीबः। राज्ञि यथा–नलस्येदं हृद्यं किमपि चरितं धीरललितम्। कपौ वानर-

**नालं काण्डे मृणाले च, नाली शाककलम्बके ।।**
**नीलो वर्णे मणौ शैले, निधिवानरभेदयोः ।।४८३।।**

विशेषे यथा—स्फारं नेत्रानलेन प्रसभनियमितोऽश्वापमीनध्वजेन । नडोऽन्तः शुषिरस्तृणविशेषस्तत्र यथा—नीरन्ध्राः पुनरालिखन्तु जठरच्छेदानलगन्थयः। पितृदेवः पितृरूपदेवता । नलं तु स्यात्पद्मे। यथा—नलिनीक्षतसेतुबन्धनो जलसंघात इवासिविद्रुतः। अत्र हि नलानि पद्मानि विद्यन्ते यस्यां सा नलिनी । नली मनःशिला गौरादित्वाद् ङीः । मनःशिला धातुभेदः ।।४८२।। नालं काण्डे मृणाले च । नलति नालम् । ज्वलादित्वाद् णः। मृणाले त्रिलिङ्गः। काण्डं दूर्वादीनां गण्डिका तत्र यथा—दूर्वा नलेन बालानाम् । मृणाले यथा—यद्गात्राणि दरिद्रति प्रतिदिनं दूनाब्जिनी नालवत् । प्राण्यङ्गे जलनिर्गमयोरपि । तयोस्तु पुंसि । प्राण्यङ्गे गले यथा—अलिकुलनीलं नालं यो धत्ते सोऽवताद् गणेशो वः। जलनिर्गमे यथा—नालेन कूप इव पूरित एष सद्यः। नाली शाककलम्बके । शाककलम्बको लशुनम् । नीलो वर्णे मणौ शैले निधिवानरभेदयोः। नीलवर्णे नीलति नीलः। वर्णे पुंक्लीबः। तद्वति वाच्यलिङ्गः। वर्णे यथा—द्रव्याश्रयेष्वपि गुणेषु रराज नीलो वर्णः पृथग्गत इवालिगणो गजस्य । मणौ मणिविशेषे यथा—नीलकुट्टिमतले जलभ्रमादुत्थितान्तवसना व्रजन्त्यमी । शैले यथा—विदेहक्षेत्रमुद्दिष्टं मध्ये निषधनीलयोः। निधौ निधिभेदे यथा—मुकुन्दकुन्दनीलाश्च चर्चास्य निधयो नव। वानरभेदे यथा—पाषाणादपि यत्तरन्ति तरसा तोये तदत्यद्भुतम् । माहात्म्यं विधिना विनिर्मितमिदं नीलस्य

**नील्योषध्यां लाञ्छने च पलमुन्मानमांसयोः ।।**
**पल्लिस्तु ग्रामके कुडयां पालिर्यूकाश्रिपङ्क्तिषु ।।४८४।।**
**जातश्मश्रुस्त्रियां प्रान्ते सेतौ कल्पितभोजने ।।**
**प्रशंसाकर्णलतयोरुत्सङ्गे प्रस्थचिन्हयोः ।।४८५।।**

---

जानीमहे ।।४८३।। नील्योषध्यां लाञ्छने च । ओषध्यां नीलात्प्राण्योषध्योः। २।४।२७। इति लाञ्छने "क्ताच्च नाम्नि वा" २।४।२८। इति ङीः। औषध्यां यथा—शष्पीश्यामैरंशुभिराशुद्रुतमम्भश्छायामच्छामृच्छति नीली सलिलस्य । लाञ्छनं लक्ष्मविशेषः। पलमुन्मानमांसयोः। पलति पलम् । पुंक्लीबः। उन्माने यथा—खण्डस्य षोडशपलानि शशिप्रभस्य । मांसे यथा—पतिः पलभुजामाज्ञापयत्येष वाम् । पल्लिस्तु ग्रामके कुडयाम् । पल्लगतौ पदि पठि (उ० ६०७) इति हः स्त्रियां ह्रस्वः। ग्रामो ग्रामकस्तत्र यथा—तत्पल्लीपतिपुत्रि कुञ्जर कुलम् । कुडयां(टयां) यथा—पल्लीं पर्णमयीं प्रविश्य कृतिभिर्नीतं वयः कैश्चन । गृहगोधिकायामपि यथा—पल्लीरुतं ब्रह्मणि राज्यहेतुः। पालिर्यूकाश्रिपङ्क्तिषु । जातश्मश्रुस्त्रियां प्रान्ते सेतौ कल्पितभोजने । प्रशंसाकर्णलतयोरुत्सङ्गे प्रस्थचिन्हयोः । पलति पालिः कृशृ कुटि—इति णिदिः। द्वादशस्वर्थेषु स्त्रियाम् । यूका क्षुद्रजन्तुः। अश्रिः कोणो धारा वा । तत्र कोणे यथा—पालीलीनतनोर्जराधवलितं मूर्धानमालोक्य मे । धारायां यथा—पालीषु मत्तगजदन्त विदारितासु । पङ्क्तौ यथा—पालीवं चम्पकानां परिमलविचलत्पद्मदश्रेणिभाजाम् ।।४८४।। जातस्मश्रु स्त्रियाम् । यथा—पालिर्न पालयति जातु चिरात् स्वकान्तम् । प्रान्ते यथा—पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीं कपालीम् । सेतु

**पिलुः पुष्पे द्रुमे काण्डे परमाणौ मतङ्गजे ॥**
**तालास्थिखण्डेऽथ पुलः पुलके विपुलेऽपि च ॥४८६॥**
**फलं हेतुकृते जातीफले फलकसस्ययोः ।**
**त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः ॥४८७॥**

प्रशंसायां यथा – समुल्लसद्दृष्टिसुधातरङ्गिणी प्रभाप्रवाहस्य बहिः प्रसर्पतः। बद्धेव रोद्धुं किल पुष्पधन्वना कपोलपाली रुरुचे मृगीदृशः। कल्पितभोजने यथा– पालीं प्राप्य कृतार्थतां वहसि चेदाद्यून किं दूयसे। कर्णतालायां यथा–नेत्राणि चुम्बत विहस्य च कर्णपालीम्। उत्सङ्गे यथा–अविरलविगलन्मदजल-कपोलपालीनिलीनमधुपकुलः। प्रस्थे पर्वतैकदेशे यथा–प्रालेय-पालीषु हिमाचलस्य। चिन्हे यथा–कपोतपालीषु निकेतनानाम्। अत्र हि कपोताः पालिश्चिन्हं यासां ताः कपोतपाल्यः ॥४८५॥ पीलुः पुष्पे द्रुमे काण्डे परमाणौ मतङ्गजे। तालास्थिखण्डे। पीयते पीलुः। पीङः कित् (उ० ८२१) इति लुः। षट्स्वर्थेषु पुंसि। पुष्पे द्रुमे च यथा–दत्वा पीलुशमीकरीरकवलान्। काण्डं शरः। परमाणुः पुद्गलः। मतङ्गजे यथा–कुञ्जान्तः पतयालुपीलुकलभैराभाति विन्ध्यस्थली। तालस्य तालफलस्य अस्थिमध्यभूतं बीजं तस्य खण्डं तालास्थिखण्डम्। अथ पुलः पुलके विपुलेऽपि च। पुलमहत्वे। पोलति पुलः। पुलके रोमाञ्चे यथा-विपुलपुलकरालं कायमालोक्य बाला। विपुले विस्ती-र्णे वाच्यलिङ्गः। तत्र यथा–पुलपुलिननिलीनं क्रीडति क्रोडयूथम्। फलं हेतुकृते जातीफले फलकसस्ययोः। त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः। फलति फलम्। हेतुकृते पुंक्लीबः। शेषेषु क्लीबे। हेतुना कारणेन कृते जनिते यथा–क्लेशः फलेन

**फली फलिन्यां फालं तु वाससि फल उत्प्लुतौ ।**
**कुशिके च बलं रूपे, स्थामनि स्थौल्यसैन्ययोः ।।४८८।।**
**बोले बलस्तु बलिनि, काके दैत्ये हलायुधे ।**
**बला त्वौषधिभेदे, स्याद्बलिर्दैत्योपहारयोः ।।४८९।।**

हि पुनर्नवतां विधत्ते । यत्पुष्पादिभ्य उत्पद्यते फलं तदपि हेतुकृतं यथा– न लोकं प्रीणाति स्वफलनिवहैः स्वादुमृदुभिः । जातिफलकक्कोले सुगन्धिद्रव्यविशेषौ । फलके खेटके शस्त्राग्रे च यथा–फलैर्निरुद्धानि फलान्यभूवन् । सस्ये यथा–स क्षेत्रतो यत्र फलं गृहीत्वा निक्षिप्यते क्षोदयितुं खलेषु । त्रिफला ओषधभेदः। व्युष्टिर्नियमादिफलं तत्र यथा – फलोदयान्ताय तपःसमाधये । लाभे यथा–लभ्यं किमेभ्यः फलम् ।।४८७।। फली फलिन्यां । फलिनी प्रियङ्गुः । फालं तु वाससि । फलत्यनेन फालः । फलति वा ज्वलादित्वाद् णः । यथा–कौसुम्भफालं परिवीयबाला । फले उत्प्लुतौ । कुशिके च । यथा–फालेन लङ्घयामास हनूमानेष सागरम् । कुशिको लोहमयः । तत्र यथा–हारान्तःस्थितपद्म-रागमिषतः फालं दधौ शुद्धये । बलं रूपे स्थामनि स्थौल्यसैन्ययोः। बोले । बलति बलम् । स्थाम्नि पुंक्लीबः । रूपे यथा–स्थाम्ना बलेन च समः पुरुषोत्तमस्य । स्थामनि यथा–बलाबलेपाद-धुनाऽपि पूर्ववत् । स्थौल्ये यथा–मृदु मृदितमृणाली दुर्बलान्यङ्गकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता । सैन्ये यथा–षड्विधं बलमाधाय प्रतस्थे दिग्जिगीषया ।।४८८।। बोलो गन्धरसः । बलस्तु बलिनि काके दैत्ये हलायुधे । बलिनि वाच्यलिङ्गः । तत्र यथा – समय एव करोति बलाबलम् । काके यथा – बलावलीभिर्मलिनी क्रियन्ते । दैत्ये यथा–बलनिसूदनमर्थपतिं

**करे चामरदण्डे च, गृहदारूदरांशयोः ।**
**त्वक्सङ्कोचे गन्धके च, बालोऽज्ञोऽश्वेभपुच्छयोः ।।४९०।।**

च तम्। हलायुधे यथा—बलोऽवलोकयामास मातङ्गमिव केशरी। बला त्वौषधिभेदे स्यात्। बला तैलेनाङ्गं मलिनयति बालोऽयमबलः। बलिर्दैत्योपहारयोः। करे चामरदण्डे च गृहदारूदरांशयोः। त्वक् सङ्कोचे गन्धके च बलति बलते वा बलिः। पदि पाठि (उ० ६०७) इति इः। दैत्ये चामरदण्डे करे गन्धके च पुंसि। उपहारे त्वक्संकोचे उदरावयवे च स्त्रीपुंसः गृहदारुणि स्त्रियाम्। अत्र ओष्ठ्यादिकृतो दन्तोष्ठ्यादि कृतो वा विशेषो नाश्रियते बवयोरैक्यात्। दैत्ये यथा—वदसि बलिवधूभिः स्मेरनेत्रोत्पलाभिः। उपहारे पूजोपकरणे यथा—कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीयाम् ।।४८९।। करे राजग्राह्ये यथा—स ताभ्यो बलिमग्रहीत्। चामरदण्डे यथा—रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः। गृहदारुणि यथा-यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः अत्र हि न भात्यावल्यो गृहदारुविशेषा यस्यांन्ता नमद्वलीकाः। उदरांशे यथा—मध्ये न सा वेदिविलग्नमध्यावलित्रयं चारु बभार बाला। त्वक्संकोचे यथा—वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः। गन्धकः कुष्टारिः। बालोऽज्ञेऽश्वेभपुच्छयोः। शिशौ ह्रीवेरकचयोः। वलति बालः ज्वलादित्वाण्णः। वल्यते वा घञ्। अज्ञे शिशौ च वाच्यलिङ्गः। ह्रीवेरकचयोः पुंक्लीबः। अज्ञे यथा—द्राघिम्लामुषिताः कियच्चिरमहो तालेन बाला वयम्। शिशौ यथा—बालं विहाय जलसंस्थितमिन्दुबिम्बमन्यः क इच्छति जनः सहसा ग्रहीतुम्। अश्वपुच्छे इभपुच्छे च यथा—गजाश्वं राजते

शिशौ ह्रीवेरकचयोर्बाला तु त्रुटियोषितोः ॥
बाली भूषान्तरे मेधौ, बिल उच्चःश्रवोहये ॥४९१॥
बिलं रन्ध्रे गुहायां च, भल्लो भल्लूकबाणयोः ॥
भल्ली भल्लातके भालं, स्याल्ललाटे महस्यपि ॥४९२॥
भेलः प्लवे मुनिभेदे, भीरौ बुद्धिविवर्जिते ॥
मल्लः कपाले बलिनि, मत्स्ये पात्रे मलस्त्वघे ॥४९३॥

वालैः ॥४९०॥ ह्रीवेरे यथा—भृङ्गो हि चुम्बति न बालकजालकानि। अत्र हि वाल एव वालकः। कचे केशे यथा—तं केशपाशं प्रसमीक्ष्य कुर्युर्बाल(वाल)प्रियत्वं शिथिलं चमर्यः। बाला तु त्रुटियोषितोः। त्रुटिः कालविशेषः। योषिति यथा—गाढोत्कंठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये तुहिनमथितां पद्मिनीं वाऽन्यरूपाम्। बाली भूषान्तरे मेधौ। गौरादित्वाद् ङीः। भूषान्तरं कर्णभूषणम्। तत्र यथा—संस्थाप्यं ते श्रुतिषु सततं बालिकावा(का)लिकाभिः। मेधौ खलमध्यगते बन्धनकीले यथा—चलयति खलवालीमौक्षकं क्षिप्यमाणम्। बिल उच्चैःश्रवोहये विलति विलः उच्चैःश्रवोहय इन्द्राश्वः ॥४९१॥ बिलं रन्ध्रे गुहायां च। रन्ध्रे यथा—बिलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्। गुहायां यथा—यत्राश्वा बिलयोनयः। भल्लो भल्लूकबाणयोः। भल्लिपरिभाषणादौ अचि भल्लः। भल्लूक ऋक्षः। बाणे बाणविशेषे पुंस्त्रीलिङ्गः। तत्र यथा—सीतायल्लकभल्लशल्पिततनुः स्वस्थो न लङ्केश्वरः। यथा वा—भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा। भल्ली भल्लातके। भल्लातको वृक्षभेदः। भालं स्याल्ललाटे महस्यपि। भल्यते भालम्। भां दिप्तिं लाति वा। ललाटे पुंक्लीबः। तत्र यथा—बाले ललामलेखेयं भाले भल्लीव राजते। महस्तेजः ॥४९२॥ भेलः प्लवे मुनिभेदे भीरौ

**किट्टे कदर्ये विष्टायां, मालं तु कपटे वने ॥**
**मालो जने स्यान्माला तु, पङ्क्तौ पुष्पादिदामनि ॥४९४॥**

बुद्धिविवर्जिते । बिभेत्यस्मात् बिभेति वा भेलः। "भीवृधि" (उ० ३८७) इति रे ऋफिडादित्वात् लत्वे भेलः। भीरौ बुद्धिविवर्जिते च वाच्यलिङ्गः। प्लवे उडुपे यथा–नीलस्य शैलोऽपि बभूव भेलः। मुनिभेदश्चिकित्साग्रन्थकारः। भीरौ बुद्धि-विवर्जिते च यथा–भवन्ति भेलाः खलु वार्द्धके नराः। मल्लः कपाले बलिनि मत्स्ये पात्रे । मल्लते मल्लः। बलिनि वाच्यलिङ्गः। कपालं शिरोऽस्थि । बलिनि यथा–दृष्टं चाणूरमल्लेन । मत्स्यो मत्स्यविशेषः। पात्रे भाजने यथा–मल्लेषु तलकल्लोलैर्दीपालोकः प्रगल्भते । मलस्त्वघे । किट्टे कदर्ये विष्टायां । मलते धारयति मलः। मृज्यते वा "मृजिखन्याहनिभ्यो डित्" (उ० ४७२) इत्यलः। कदर्ये वाच्यलिङ्गः। अन्यत्र पुंक्लीबः। अघं पापं, तत्र यथा–निर्मलं मम मनोऽद्य गाहते लाघवं ननु तव विलोकनात् ॥४९३॥ किट्टं वसादि । यत्स्मृतिः वसा-शुक्रमसृक्मज्जामूत्रंविट्कर्णविट्नखाः। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः(मदाः) । किट्टं कलङ्क इत्यन्ये । कदर्ये कृपणे यथा–मलैर्न शक्यते दातुं खलेभ्योऽपि खलोऽपि हि । विष्टायां यथा–अयज्ञियतृणच्छन्ना भूमिर्मलविसर्जने । अशुद्धौ कालिम्नि च मखः। अशुद्धौ मनोवाक्कायविषयायां यथा–त्रिमलक्षालिनो ग्रन्थाः सन्ति तत्पारगा अपि । कालिम्नि यथा–क्षपातमस्काण्डमलीमसं नभः। मालं तु कपटे वने । मल्यते मालम् मीयते वा । "शामाश्या" (उ० ४६२) इति लः। कपटं छद्म । वनं वन-विशेषः। क्षेत्रविशेषेऽपि यथा–सद्यः सीरोत्कर्षणसुरभिक्षेत्रमारुह्य

**मालुः स्त्रियां पत्रवल्ल्यां, मूलं पार्श्वाद्ययोरुडौ ।।**
**निकुञ्जशिफयोर्मेला* त्वञ्जने मेलकेऽपि च ।।४९५।।**
**मौलिः किरीटे धम्मिल्ले चूडाकङ्केल्लिमूर्द्धसु ।।**
**लीला केलिर्विलासश्च, शृङ्गारभावजा क्रिया ।।४९६।।**

मालम् । मालो जने स्याद् । जनो जनविशेषः। माला तु पङ्क्तौ पुष्पादिदामनि । पङ्क्तौ यथा–बाले मालेयमुच्चैर्न भवति गमने व्यापिनी नीरदानाम् । पुष्पादिदामनि यथा–भूरेणुदिग्धान् नवपारिजातमालारजोवासितबाहुमध्याः ।।४९४।। मालुः स्त्रियां पत्रवल्ल्यां । म्रियतेऽनया मालुः। ऋ द श इति णिदिः लत्वं च रस्य । स्त्रीलिङ्गः। स्त्री स्त्रीविशेषः। पत्रवल्ली मालुधानी । मूलं पार्श्वाद्ययोरुडौ । निकुञ्जशिफयोः। मूलति मूलम् मूयते वा "शुकशीमूभ्यः कित्" (उ० ४६३) इति लः । पञ्चस्वर्थेषु पुंक्लीबः। पार्श्वमन्तिकं तत्र यथा–तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति । आद्ये यथा–त्रैलोक्यभुवनारम्भमूलस्तम्भाय शम्भवे । उडौ नक्षत्रविशेषे यथा–मूलार्कः श्रूयते शास्त्रे सर्वकल्याणकारणम् । निकुञ्जे तरुगहने यथा–गोलाङ्गूलैर्मूलमाकीर्णमेतत् । शिफा जटा तत्र यथा–तरुमूलान्यनुनिहितं जलमाविर्भवति पल्लवाग्रेषु । मेला त्वंजने मेलकेऽपि च । मेल्यतेऽनया मिलनं वा मेला । "भीषि भूषि" ५।३।१०९। इति बहुवचनादङ् । अञ्जनं मषी तत्र यथा–यदि पत्रायते व्योममेलानंदायतेऽर्णवः। ब्रह्मायते लिपिकरस्तथाप्यन्तः कुतो गिराम् । अत्र मेला मषी तस्यानन्दाभाजनम् । मेलकः सङ्गमस्तत्र यथा–मेलां महेला कुरुते न हेलया ।।४९५।। मौलिः किरीटे धम्मिल्ले

*शिफेयोः स्वीये शिलायां च वशीकृतौ । प्रतिष्ठायामथो मेला०

**लोलश्चले सतृष्णे च लोला तु रसनाश्रियोः ॥**

**वल्ली स्यादजमोदायां लतायां कुसुमान्तरे ॥४९७॥**

---

चूडाकङ्केल्लिमूर्द्धसु । मूयते मौलिः। "धूमूभ्यांलिक् लिणौ" । (उ० ७०१) इति लिण् । कङ्केल्लौ पुंसि । शेषेषु स्त्रीपुंसिः। किरीटे यथा–नृपमौलिमरीचिवर्णकैरथ यस्यांह्रियुगं विलुप्यते । धम्मिलः संयताः केशाः। तत्र यथा–ऋतुषु तेन विसर्जितमौलिना । चूडा(चूला)शिखा तत्र यथा–जयन्ति बाणासुरमौलिलालिताः। कङ्केल्लिरशोकः। मूर्द्धनि यथा–आनन्दमन्थरपुरन्दरमुक्तमाल्यं मौलौ हठेन निहितं महिषासुरस्य । लीलाकेलिर्विलासश्च शृङ्गारभावजाक्रिया । लीयतेऽस्यां लीला । "भिल्लाच्छभल्ल" (उ० ४६४) इति साधुः। केलिः क्रीडा तत्र यथा–लीलाकमलपत्राणि गणयामास पार्वती । विलासः स्थानादीनां वैशिष्ट्यम् । तत्र यथा–नव निधुवनलीलाः कौतुकेनाभिवीक्ष्य । शृङ्गारभावजा शृङ्गारप्रसवा । क्रिया परिस्पन्दः। तत्र यथा– लीलावतीनां सहजा विकारास्त एव मूढस्य हृदि स्फुरन्ति । प्रियस्यानुकृतिर्लीलेति भरतः ॥४९६॥ लोलश्चले सतृष्णे च । लोलति लोलः। वाच्यलिङ्गः। चले यथा–चारु लोलवलयेन करेण । सतृष्णे यथा–निशान्तनारी परिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः। लोला तु रसनाश्रियोः। द्वयोर्यथा–यत्सत्यं कृतिनामकृत्यकरणे लोलाऽपि दोलायते । वल्ली स्यादजमोदायां लतायां कुसुमान्तरे । वल्लते वल्लिः। "पदि पठि" (उ० ६०७) इति इः। ङ्यां वल्ली । अजमोदा औषधम् । लतायां यथा–इयं मल्लीवल्लीपुलकमुकुलाङ्का भुजलता ।

**व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः ॥**
**वेला बुधस्त्रियां काले, सीमनीश्वरभोजने ॥४९८॥**
**अक्लिष्टमरणेऽम्भोधेस्तीरनीरविकारयोः ॥**
**शालो हाले मत्स्यभेदे, शालीकस्तत्प्रदेशयोः ॥४९९॥**

कुसुमान्तरं कुसुमविशेषः ॥४९७॥ व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः । विविधम् आलम् अनर्थोऽस्माद् व्यालः। विशेषेण आसमन्तात् अडति लाति वा । पञ्चस्वर्थेषु दुष्टगजे यथा– व्यालद्विपा यं त्रिभिरुन्मदिष्णवः। कथञ्चिदारादपथेन निन्यिरे । सर्पे यथा–जयन्ति धवलव्यालाः शम्भोर्जूटावलम्बिनः। शठे वाच्यलिङ्गः। तत्र यथा–व्यालैर्विप्लावितं जगत् । श्वापदश्चित्र-कादिः। सिंहः शार्दूलः। तयोर्यथा–यद्व्यालव्रणितसुहृत्प्रमोदग्धं सौजन्याद्विहितवतीगतव्यथं माम् । वेला बुधस्त्रियां काले सीमनीश्वरभोजने । अक्लिष्टमरणेऽम्भोधेस्तीरनीरविकारयोः । कतिचिद्दिनानि पुरुषः कतिचित्स्त्रीति वा इला । वेला बुधस्त्री यस्याः पुत्रः पुरुरवाः। अन्यत्र वेलति वेला । काले यथा– सन्ध्यावन्दनवेलायां ग्लानोऽहमिति जल्पति । सीमनि मर्यादायां यथा–यादवाम्भोनिधीन् । रुन्द्धे वेलेव भवतः क्षमा । ईश्वरभो-जने यथा–बालाविक्ता इव क्ष्मापा वेलायामस्य भुञ्जते ॥४९८॥ अक्लिष्टमरणं सुखमृत्युः । अम्भोधेस्तीरे यथा–वेलाशैलाङ्क-भाजो भुजगयुवतयस्त्वद्गुणानुद्गृणन्ति । अम्भोधेर्नीरविका-रोऽम्भसां वृद्धिस्तत्र यथा – अयो वेलाहेलातुलितकुलशैले जलनिधौ । शालो हाले मत्स्यभेदे । शालते शालः श्यति वा "शामाश्या" (उ० ४६२) इति लः। हालः सातवाहननृपः तत्र यथा–जज्ञे शालमहीपालः प्रतिष्ठानपुरे पुरा । मत्स्यभेदो

**स्कन्धशाखायां शालिस्तु गन्धोतौ कलमादिषु ।।**
**शालुः कषायद्रव्ये स्याच्चोरकाख्यौषधेऽपि च ।।५००।।**
**शिलमुञ्छः शिलाद्वाराऽधोदारु कुनटी दृषत् ।।**
**शिली गण्डूपदी शीलं साधुवृत्तस्वभावयोः ।।५०१।।**

मत्स्यविशेषः। शालोकस्तत्प्रदेशयोः। स्कन्धशाखायाम् । ओको गृहम् । तत्र यथा–निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः। तस्य ओकसः प्रदेश एकदेशः। तत्र यथा–गृहैर्विशालेरपि भूरिशालैः ।।४९९।। स्कन्धशाखायां यथा–तमालशालासु विधाय दोलाम् । शालस्तु गन्धोतौ(प्र. गन्धौतौ) कलमादिषु । शलति शालिः। "कमि वमि" (उ० ६१८) इति णिदिः। पुंसि । गन्धोतुर्गन्धमार्जारः पुष्पलाख्यः। कलमादिषु यथा–नमिताः फलभारेण नमिताः शालिमञ्जरीः। शालुः कषायद्रव्ये स्याच्चोरकाख्यौषधेऽपि च । शृणाति रोगान् शालुः। "ॠ तृ शृ" (उ० ७२७) इति णिदुर्लत्वं चरस्य । पुंसि । हिंस्रेऽपि ।।५००।। शिलमुञ्छः। शिलत् उञ्छे । "नाम्युपान्त्य" ५।१।५४। इति के शिलम् । उञ्छो धान्यकणोच्चयः। तत्र यथा–शिलैर्नु किं नास्ति सखे फलैर्वा वृत्तिर्यदुत्ताम्यसि सेवया त्वम् । शिला द्वाराऽधोदारु कुनटी दृषत् । द्वाराऽधोदारुणि यथा–पूजां विधायाथ शिलाप्रदेशे । कुनटी मनःशिला । दृषदि यथा–शिलाशयान्तामनिकेतवासिनीम् । बर्षोपलेऽपि मंखः । व्यासृजत्स शिलावृष्टिम् । शिली गण्डूपदी । गण्डूपदी जलजन्तुविशेषः। यथा – शिलीकलकलैः कलां कलयते वलात्पल्वलम् । शीलं साधुवृत्तस्वभावयोः । शील समाधौ शीलण् उपधारणे वा । शील्यते शीलम्, शेते वा "शुक् शी" (उ० ४६३) इति कित्

**शुक्लं रूप्ये शुक्लो योगे श्वेते शूलं रुगस्त्रयोः ॥**
**योगे शूला तु पण्यस्त्री वधहेतुश्च कीलकः ॥५०२॥**
**शैलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके ॥**
**सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि ॥५०३॥**

लः। साधुवृत्ते यथा—तथा हि ते शैलमुदारदर्शने तपस्विनामप्युपदेश्यतां गतम्। स्वभावे यथा—वामशीलाहि जन्तवः ॥५०१॥ शुक्लं रूप्ये। शुक् गतौ शोकति शुक्लम्। "शुकशीमूभ्यः कित्" (उ० ४६३) इति लः। रूप्यं रजतम्। तत्र यथा—काञ्चनाम्भोज किञ्जल्कैः शुक्लभित्तिर्विराजते। शुक्लो योगे श्वेते। श्वेते गुणे पुंसि। तद्वति वाच्यलिङ्गः। योगे यथा—सिद्धः साध्यः शुभः शुक्लः। श्वेते यथा—शुक्लां शुक्रोपरचितानि निरन्तराभिः। शूलं रुगस्त्रयोः। योगे। शूलरुजायाम् अचि शूलं पुंक्लीबः। रुचि रोगे अस्त्रे च यथा—शूलीजातः कदशनवशाद्भैक्षयोगात् कपाली वस्त्राभावाद्विगतवसनः स्नानदौस्थ्याज्जटावान्। योगे यथा—धृतिः शूल तथैव च। शूला तु पण्यस्त्री वधहेतुश्च कीलकः। पण्यस्त्रियां यथा—वित्तं हि मूलतो याति शूलायां लोलचेतसः। वधहेतौ कीलके यथा—शूलाप्रोतो मलिम्लुचः। मखस्तु अस्त्रीशूलं रुगायुधम्। तच्छिखात्रधकं काष्ठमिति किलकेऽपि पुंक्लीबमाह। यथा—उपेक्ष्यते साधुजनेन वैदिकीश्मशानशूलस्य न यूपसत्क्रिया ॥५०२॥ शैलो भूभृति। शिलानामयं शैलः। यथा—यं सर्वशैलाः परिकल्प्य वत्सम्। शैलं तु शैलेये तार्क्ष्यशैलके। शैलेयं शिलाजतु। तार्क्ष्यशैलकं दारुहरिद्राक्वाथोत्थं तुच्छ रसाञ्जनम्। गण्डेऽपि तत्र तु पुंक्लीबः। सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि। सल् गतौ सल्यते सालः सर्जतरौ

**स्थालं भाजनभेदे स्यात्स्थाली तु पाटलोखयोः ।।**
**स्थूलः पीने जडे हालः सातवाहनपार्थिवे ।।५०४।।**
**हाला सुरायां हेला तु स्यादवज्ञाविलासयोः ।।**
**हेलिरालिङ्गने सूर्येऽप्यविर्मूषिककम्बले ।।५०५।।**

---

पुंक्लीबः। तत्र वृक्षमात्रे च यथा–सालप्रांशुर्महाभुजः। प्राकारे यथा–यत्सालमुत्तुङ्गतया विजेतुं दूरादुदस्थीयत सागरस्य। सर्जतरौ तालव्यादिरपि ।।५०३।। स्थालं भाजनभेदे स्यात्। स्थल् स्थाने। स्थलति स्थालम्। "वा ज्वलादि" ५।१।६२। इति णः। तिष्ठतेर्वा "स्थो वा" इति अलः। स्त्रीक्लीबः भाजनभेदे भोजनपात्रविशेषे यथा–आहाराय प्रेतराजस्य रोप्यस्थालानीव स्थापितानि स्म भान्ति। स्थाली तु पाटलोखयोः। पाटला पुष्पतरुः। उखा पाकभाण्डम्। तत्र यथा–स्थाली विपक्वैस्ते वह्नौ निवारैर्जुहुवुर्धृतैः। स्थूलः पीने जडे। स्थूलणि परिवृंहणे स्थूलयते स्थूलः। वाच्यलिङ्गः। द्वयोर्यथा–बहुस्पृशापि स्थलेन स्थीयते बहिरश्मवत्। हालः सातवाहनपार्थिवे। हलति हालः। ज्वलादित्वाण्णः। यथा–दिवंगते हालवसुन्धरापतौ। हाला सुरायां। यथा–हित्वा हालामभिमतरसां रेवती लोचनाङ्काम्। हेला तु स्यादवज्ञाविलासयोः। हेडृङ् अनादरे। हेडनं हेला। हिलत् हाकरणे इत्यस्य हेलयतीति वा। अवज्ञायां यथा–हेलोल्लङ्घितवाहिनीपतिरिति श्लाघाचलत्कन्धरः। विलासे यथा–अकृत्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम्। हेलिरालिङ्गने सूर्य्येऽपि। हेलयति हेलिः "स्वरेभ्य इः' (उ० ६०६) पुंसि। द्वयोर्यथा–हेलिं परमहेलानां यः करोति नराधमः। हेलिनेव तमःस्तोमः स पापेन विहन्यते। अथ वान्ताः। अविर्मूषिककम्बले मेषे रवौ

**मेषे रवौ पर्वते च स्यादूर्ध्वं तु समुच्छ्रिते ।।**
**उपर्युन्नतयोः कण्वो मुनौ कण्वं तु कल्मषे ।।५०६।।**
**क्षवः क्षुते राजिकायां कविः काव्यस्य कर्तरि ।।**
**विचक्षणे दैत्यगुरौ स्यात्कवी तु खलीनके ।।५०७।।**

पर्वते च स्यात् । अवति अविः। "पदि पठि" (उ० ६०७) इति इः। पुंसि । मूषिककम्बलो मूषिकरोमनिष्पन्नः प्रावरणविशेषः ।।५०५।। मेषे यथा–अवीनादौ कृत्वा भवति तुरगो यावदवधिः पशुर्धन्यस्तावत् प्रतिवसति यो जीवति सुखम् । रवौ पर्वते च यथा – अविखत्युदयाविविभावितप्रचररोचिरुपाचरितस्तुतिः । वैजयन्ती तु अविर्भूपुष्पवत्योः स्त्री वायुप्राकारभास्सुनेति पञ्च-स्वर्थान्तरेष्वाह । उद्ध्र्वं समुच्छ्रिते । उपर्युन्नतयोः। ऊर्द्धते ऊद्ध्वम् । "उर्देर्ध च" (उ० ५०७) इति वः। वाच्यलिङ्गः। समुच्छ्रीते यथा–प्रलम्बितभुजद्वन्द्वमूद्ध्वंस्थस्यासितस्य वा । उपर्यर्थे यथा–ऊद्ध्र्वं गतं यस्य न चानुबन्धाद् यशःपरिच्छेत्तुमियत्तयालम् । उन्नते यथा–ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे । कण्वो मुनौ । कणति कण्वः। "लटि खटि" (उ० ५०५) इति वः। यथा–शृण्वन्ति कण्वस्य वचांसि धन्याः। कण्वं तु कल्मषे यथा–क्षिण्वन्ति कण्वं गुरुपादरेणवः ।।५०६।। क्षवः क्षुते राजिकायाम् । क्षवणम् क्षौ(क्षो)त्यनेन वा क्षवः। क्षुते नासिकाशब्दे काशे वा यथा–क्षवरव इव कर्णकटुर्हृदयोद्वेगं करोति यत्र सताम् । राजिका राजसर्षपः । कविः काव्यस्य कर्तरि । विच-क्षणे दैत्यगुरौ स्यात् । कवति(ते) कविः। "स्वरेभ्य इः" (उ० ६०६) काव्यकर्तरि विचक्षणे च वाच्यलिङ्गः। तयोर्यथा–जानाति हि पुनः सम्यक् कविरेव कवेः श्रमम् । दैत्यगुरौ

**किण्वं पापे सुराबीजे क्लीबोऽपौरुषषण्ढयोः ।।**
**खर्वह्रस्वौ न्यग्वामनौ ग्रीवे शिरोधितत्सिरे ।।५०८।।**
**छविस्तु रुचि शोभायां जवः स्याद् वेगवेगिनोः ।।**
**जवौड्रपुष्पे जिह्वा तु वाचि ज्वालारसज्ञयोः ।।५०९।।**

यथा–रुद्रो नग्नः कविः काणः शनिः पङ्गुः शशी क्षयी । कवी तु खलीनके "इतोऽक्त्यर्थात्" २।४।३२। इति ङीः। यथा–कवी नवीनैस्तुरगैः सुदुःसहा ।।५०७।। किण्वं पापे सुराबीजे । किणः सौत्रः। किण्यते किण्वम् । "निघृषि" (उ० ५११) इति कित् वः । सुराया बीजम् माषदलन्यादि । द्वयोर्यथा–क्रिणन्ति किण्वं द्रविणैर्नराधमाः। *क्लीबोऽपौरुषषण्ढयोः। क्लीवते क्लीबः।* अपौरुषे वाच्यलिङ्गः। षण्ढे पुंक्लीबः। अपौरुषो यः पौरुषवर्जितः। तत्र यथा–क्लीबे धैर्यं मद्यपे तत्वचिन्ता । षण्ढे नपुंसके यथा–गते मृते प्रव्रजिते क्लीबे च पतिते पतौ । दैन्ययुक्तेऽपि मंखः । विपद्यपि न यः क्लैव्यमाश्रयेत् सततं नरः। खर्वह्रस्वौ न्यग्वामनौ । खर्वति खर्वः। ह्रसति ह्रस्वः। "लटि खटि" (उ० ५०५) इति वः। वाच्यलिङ्गौ । अनेकार्थं प्रस्तावाद् द्वावपि द्व्यर्थौ । द्वयोर्यथा–अखर्वपर्वगर्त्तासु विच्छिन्नो यस्य वारिभिः। न दीर्घोऽष्टा न ह्रस्वोऽष्टा नौष्ठस्थूला इहि स्त्रियः। ग्रीवे शिरोधितत्सिरे। गिरति ग्रीवा । 'प्रह्लाह्व" (उ० ५१४) इति साधुः। शिरोधिः कन्धरा तस्याः सिरा धमनी तत्सिरा । शिरोधौ यथा–परिशिथिलितकर्णग्रीवमालिङ्गिताक्षः(मामीलिताक्षः) । तत्सिरायां यथा–खड्गाघातत्रुटद्ग्रीवैर्वीरकुञ्जरैः ।।५०८।। छविस्तु रुचि शोभायाम् । छ्यति छविः। "छवि छिवि" (उ० ७०६) इति साधुः। स्त्रियाम् । रुचि दीप्तौ यथा–सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ।

**जीवः स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि ।।**
**जीवितेऽपि च जीवा तु वचायां धनुषो गुणे ।।५१०।।**
**शिञ्जिते क्षितिजीवन्त्योर्वृत्तौ तत्वं परात्मनि ।।**
**वाद्यभेदे स्वरूपे च द्रवो विद्रवनर्मणोः ।।५११।।**

शोभाया यथा–यद् दंष्ट्रा चन्द्रखण्डे भूलाञ्छनच्छविर्बरा । जवः स्याद् वेगवेगिनोः। जवनं जवति वा जवः। वेगे यथा–एकः पलायत जवेन कृतार्त्तनादः। वेगिनि वाच्यलिङ्गः। तत्र यथा–विजिग्ये राजकं राजा जवैर्यवनवाजिभिः। जवौड्पुष्पे। जपति जपा । "जपादीनां पो वः" २।३।१०५। इति वत्वे जपा। यथा–गतवत्यराजत जवा कुसुमस्तव कचुतौ दिनकरेऽवनतिः । जिह्वा तु वाचि ज्वालारसज्ञयोः । लेढि अनया जिह्वा "लिहेर्जिह च" (उ० ५१३) इति वः। वाचि रसज्ञायां च यथा–परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः। अत्र फणिपक्षे द्विजिह्वे रसज्ञे खलपक्षे द्विजिह्वे वाचौ यस्य स द्विजिह्वः। ज्वाला हिरण्यादिका तत्र यथा–भवति हिरण्या कनका रक्ता कृष्णा च(व)सुप्रभा चान्या । अतिरक्ता बहुरूपेति । सप्त सप्तार्चिषो जिह्वाः ।।५०९।। जीवः स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि । जीवितेपि च । जीवति जीवनं वा जीवः। त्रिदशाचार्ये गुरौ यथा–द्विपञ्चसप्तनवगो जीवः सर्वशुभावहः। द्रुमभेदो वृक्ष-विशेषः। शरीरिणि देहिनि यथा–जीवति स जीवलोके यस्य गृहाद्यान्ति नार्थिनो विमुखाः। जीविते त्रिलिङ्गः। तत्र यथा–वक्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः। जीवा तु वचायां धनुषो गुणे। शिञ्जिते क्षितिजीवन्त्योर्वृत्तौ । जीवत्यनया जीवा। भिदादित्वादङ् । वचा उग्रगन्धा । धनुषो गुणे यथा–जीवाकृष्टिं स चक्रे मृधभुवि धनुषः शत्रुरासीद्गतासुः ।।५१०।। शिञ्जितं नूपुरशब्दः। क्षितिः पृथिवी । जीवन्ती मधुस्रवा । वृत्तिर्जीविका ।

**प्रद्रावे रसगत्योश्च द्वन्द्वः से द्वन्द्वमाहवे ॥**
**रहस्ये मिथुने युग्मे दवदावौ वनानले ॥५१२॥**

तत्त्वं परात्मनि। वाद्यभेदे स्वरूपे च। तस्य भावस्तत्वं तन्यते वा। "प्रह्वाह्वा" (उ० ५१४) इति साधुः। परात्मनि यथा—ज्ञाततत्वस्य लोकोऽयं जडोन्मत्तपिशाचवत्। वाद्यभेदे यथा—विलम्बितं द्रुतं मध्यमोघस्तत्वं घनं क्रमात्। स्वरूपे यथा—सरस्वत्यास्तत्वं कविसहृदयाख्यं विजयते। द्रवो विद्रवनर्मणोः। प्रद्रावे रसगत्योश्च। द्रवत्यनेन द्रवणं वा द्रवः। पञ्चस्वर्थेषु। विद्रवे पलायने यथा—द्रवं द्रविडराजोऽपि शिश्रिये त्वद्भयाद् द्रुतम्। निर्मणि क्रीडायां प्रद्रावे प्रस्रवणे च यथा—जात्येन चन्द्रमणिनेव महीधरस्य संचार्यते द्रवमयो मनसो विकारः ॥५११॥ रसे यथा—अमृतद्रवैर्विदधदब्जदृशामेव मार्गमौषधिपतिः स्वकरैः। गतिर्गमनमात्रम्। द्वन्द्वः से। वन्द्यते द्वन्द्वः। "प्रह्वाह्व" (उ० ५१४) इति साधुः। स इति समासस्य संज्ञा। तत्र यथा—द्विगुरपि सद्वन्द्वोऽहं गृहे च मे सततमव्ययीभावः। द्वन्द्वमाहवे। रहस्ये मिथुने युग्मे। द्वौ द्वाविति द्वन्द्वम्। "रहस्य मर्यादोक्ति" ७।४।८३। इति साधुः। वन्द्यते इति वा। आहवे सङ्ग्रामे यथा—देवासुरद्वन्द्वविधायिनो मुनेः। रहस्ये यथा—द्वन्द्वं न रात्रौ नृपमन्त्रणीयम्। मिथुनं स्त्रीपुंसयोर्युग्मम्। तत्र यथा—द्वन्द्वानि भावं क्रियया विवव्रुः। युग्मे युगलमात्रे यथा—हरचरणसरोजद्वन्द्वमुद्राङ्कमौलेः। गौडस्तु रहस्ये कलहे द्वन्द्वः क्लीबे मिथुनयुग्मयोरित्याह। दवदावौ वनानले दवानले, वने। दुनोति दवः। दावः। ज्वलादित्वाण्णः। वनानले यथा—तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः। दावो नदीतीरसमुच्छ्रितोऽयं तोयं पिपासन्नवरोहतीव।

**वने दर्वी फणातद्ध्र्वोर्दार्वी स्याद्देवदारुणि ।।**
**हरिद्राद्वितये चापि दिवं खे त्रिदिवे दिने ।।५१३।।**
**देवं हृषीके देवस्तु नृपतौ तोयदे सुरे ।।**
**देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि ।।५१४।।**

वने यथा—वाधेतोल्काक्षयितचमरीवालभारो दवाग्निः। अधिज्य धन्वा विचचार दावम् । दर्वी फणान्तद्ध्र्वोः। दृणाति दर्विः । "दृ पृ वृभ्यो विः" (उ० ७०४) ङ्यां दर्वी । फणायां यथा—पृथुदर्विभृतस्ततः फणीन्द्रा विषमाशीभिरनारतं वमन्तः। तद्धु-(द्रू)दारुहस्तः। तत्र यथा—नानाप्रकाररसमध्यगताऽपि दर्वी स्वादं रसस्य सुचिरादपि नैव वेत्ति । दार्वी स्याद्देवदारुणि । हरि-द्राद्वितये चापि । दृणाति दार्वी । "कृवापाजि" (उ० १) इति उण् । गौरादित्वाद्ङीः। देवदारुर्वृक्षभेदः। हरिद्राद्वितयं हरिद्रा दारुहरिद्रा च । दिवं खे त्रिदिवे दिने । दीव्यन्ति अत्र दिवम् । स्थादित्वात् कः। खे आकाशे त्रिदिवे स्वर्गे च यथा—न केवलं सद्मनि मागधीपतेः पथि व्यजृंभन्त दिवौकसामपि । दिने दिवसे यथा—दिवेश्वरं स त्रिदिवेशवन्द्यम् । प्रायेण वृत्तिविष-येऽस्य प्रयोगः ।।५१३।। देवं हृषीके । दीव्यति देवम् । लिहादित्वादच् । हृषीकमिन्द्रियम् । देवस्तु नृपतौ तोयदे सुरे । नृपतौ यथा—देव त्वद्गुणकीर्तनेन सुखयत्याखण्डलं नारदः। तोयदे यथा—देवे वर्षति कर्षकैर्विकसितं धाराकदम्बैरिव । सुरे यथा—देवासुरैरमृतमम्बुनिधिर्ममन्थे । देवी कृताभिषेकायां तेज-नीस्पृक्कयोरपि । गौरादित्वाद्ङीः। कृताभिषेकायां यथा—देवी-भावं गमिता परिवारपदं कथं भजत्येषा । तेजनी मूर्वानाम

**धवो धूर्त्ते नरे पत्यौ द्रुभेदेऽथ ध्रुवो वटे ।।**
**वसुयोगभिदोरातौ* शङ्कावुत्तानपादजे ।।५१५।।**
**स्थिरे नित्ये निश्चिते च ध्रुवं खेऽजस्रतर्कयोः ।**
**ध्रुवा मूर्वाशालपर्ण्योः स्रग्भेदे गीतिभिद्यपि ।।५१६।।**

लता । स्पृक्का गन्धद्रव्यविशेषः ।।५१४।। धवो धूर्त्ते नरे पत्यौ द्रुभेदे । धुनोति धवः। धूर्त्तो वञ्चकः। नरो मनुष्यः। पत्यौ भर्तरि यथा– भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहम् । द्रुभेदे वृक्षविशेषे यथा–धवलकुचसमेतं यौवनं वा वनं वा । अथ ध्रुवो वटे । वसु योगभिदोरातौ । शङ्कावुत्तानपादजे स्थिरे नित्ये निश्चिते च । ध्रुवति ध्रुवः। 'तुदादिभ्यः कः' (उ० ५) इति किदः। स्थिरनित्ययोर्वाच्यलिङ्गः। निश्चिते पुंसि । क्लीबे इत्यन्ये । वटो न्यग्रोधः। वसुभित् देवविशेषः। योगभिदि यथा–गण्डो वृद्धिर्ध्रुवश्चैव । आतिः। शरारिः। शङ्कौ स्थाणौ यथा–द्वादशाङ्गुलमाने तु पाशं निक्षिप्य वै ध्रुवे । उत्तानपादजो मुनिविशेषः । तत्र यथा–स्फुटतरमुपरिष्टादल्पमूर्त्तेर्ध्रुवस्य स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत् ।।५१५।। स्थिरे निश्चले यथा–कदाभवन्महाकाव्यं व्योमेवेक्षे ध्रुवस्थिति । नित्ये शाश्वते यथा–ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदम् । निश्चिते यथा–जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । ध्रुवं खेऽजस्रतर्कयोः। खे आकाशे यथा–ध्रुवं ध्रुवन्ति ग्रहमण्डलास्पदम् । अजस्रे यथा–ध्रुवं दत्ते वित्तं द्विजपरिवृढेभ्यः क्षितिधवः। तर्के वितर्के यथा–ध्रुवं गुरून् मार्गरुधः करीन्द्रानुल्लङ्घ्य गन्तुं तुरगास्तदीषुः। ध्रुवा मूर्वाशालपर्ण्योः स्रग्भेदे गीतिभिद्यपि । मूर्वा ओषधिः। शालपर्णी

*भिदोः शम्भौ शङ्कावुत्तानपादजे ।

**नवो नव्ये स्तुतौ नीवी स्त्रीकटीवस्त्रबन्धने ॥**
**मूलद्रव्ये परिपणे प्लवः प्लक्षे प्लुतौ कपौ ॥५१७॥**
**शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः ।**
**क्रमनिम्नमहीभागे कुलके जलवायसे ॥५१८॥**

लताभेदः। स्रजोभेदः स्रग्भेदः। यदाहुः—ध्रुवा तु सर्वसञ्ज्ञार्थं यस्यामाज्यं निधीयते। गीतिभेदे यथा—ध्रुवा हि नाम नाट्यस्य प्रथमे प्राणाः ॥५१६॥ नवो नव्ये स्तुतौ। नूयते नवनं वा नवः। नव्ये वाच्यलिङ्गस्तत्र यथा— नवानधोऽधोबृहतः पयोधरान्। स्तुतिः स्तवनम्। नीवी स्त्रीकटीवस्त्रबन्धने। मूलद्रव्ये परिपणे। नीयते नीविः। कृ हृ सृ इति डित् विः। ङ्यां नीवी। स्त्रियाः कटीवस्त्रस्य परिधानस्य बन्धनं बन्धनग्रन्थिः। यत्कात्यः नीविराग्रन्थनं नार्या जघनस्थस्य वाससः। तत्र यथा—नीवीबन्धोच्छ्वसनशिथिलं यत्र यक्षाङ्गनानाम्। मूलद्रव्यं वणिजादीनां मूलधनम्। तत्र यथा— मानात्स्नेहो न हीनश्चेत्सखि सन्तोष एव सः। नीवी न नीता निधनममार्गोल्लाभ एव सः। परिपणः आडम्बरः। कारायामपि मंखः। यथा—बहुगुणशतपरिचयनीमोहकरी लोष्टशृङ्खलाकलिता। कामोऽस्यां प्रतिबद्धो नीवीह्येषा किमाश्चर्यम्। प्लवः प्लक्षे प्लुतौ कपौ। शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः। क्रमनिम्नमहीभागे कुलके जलवायसे। जलान्तरे। प्लवते प्लवनं वा प्लवः। द्वादस्वर्थेषु पुंसि। प्लक्षो वृक्षभेदः। प्लुतौ गतिविशेषे कपौ च यथा—प्लवाः प्लवैर्विक्लवयन्ति शाखाम् ॥५१७॥ शब्दे म्लेच्छजातौ च यथा—रटन्ति राटीं कटुभिः प्लवैः प्लवाः। भेलके उडुपे यथा—यत्र स्त्री यत्र कितवो यत्र बालो तु शासिता। नद्यामश्मप्लवेनेव सहतेनैव मज्जति।

**जलान्तरे प्लवं गन्धतृणे मुस्तकभिद्यपि ।**
**पक्वं परिणते नाशाभिमुखे पार्श्वमन्तिके ॥५१९॥**
**कक्षाधोऽवयवे वक्रोपायपर्शुसमूहयोः ।**
**प्राध्वं दूरपथे प्रह्वे, बन्धे पूर्वं तु पूर्वजे ॥५२०॥**

कारण्डवः पक्षिभेदस्तत्र भेके जलवायसे च यथा—प्लवमानप्लवव्याप्ता कुल्या यत्र सुशीतला । क्रमनिम्नमहीभागे यथा—प्रागुत्तरप्लवे देशे लोमशे फलवर्जिते । अग्निचित्यां प्रकुर्वाणः प्राग्वंशं तत्र कल्पयेत् । कुलकः कुलप्रधानः ॥५१८॥ जलान्तरम् । विशिष्टं पूरयुक्तं जलमम्बुधिरित्यर्थः । यदाह अम्बुवृद्धौ पूरःप्लवोऽपि च । तत्र यथा—सानन्दबाष्पप्लवाः। प्लवं गन्धतृणे मुस्तकभिद्यपि । गन्धतृणं गन्धप्रधानं तृणम् । मुस्तकभित् कैवर्तीमुस्तकः। पक्वं परिणते नाशाभिमुखे । पच्यते स्म पक्वम् । "क्षै शुषि" ४।२।७८। इति कस्य वा देशः। वाच्यलिङ्गः। परिणते यथा—तन्वी श्यामा शिखरदशना पक्वनिम्बाधरोष्ठो । नाशाभिमुखे पातोन्मुखे यथा—पक्वस्य बुद्धिं किल पातहेतुं सृजन्ति देवा अपि किं विचित्रम् । पार्श्वमन्तिके । कक्षाधोऽवयवे वक्रोपायपर्शुसमूहयोः। स्पृशति स्पृश्यते वा पार्श्वम् । स्पृशेश्वः परे च इति श्वः। पर्शूनां समूहो वा । "पश्वाड्वण्" ६।२।२०।कक्षाधोऽवयवे पुंक्लीबः। अन्तिके यथा—विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ॥५१९॥ कक्षाधोऽवयवे यथा—पार्श्वाभ्यां स प्रहाराभ्यां स व्रणेनाधरेण च । दूति सङ्ग्रामयौग्यासि न योग्या दूतकर्मणि । वक्रोऽनृजुरुपायो लंचादिः । तत्र यथा—पार्श्वेन अन्वेष्टा पार्श्वः। पर्शुसमूहे यथा—सभग्नपार्श्वो निशितासिधातैः। प्राध्वं दूरपथे

**प्रागग्रे श्रुतिभेदे च भवः सत्ताप्तिजन्मसु ।।**
**रुद्रे श्रेयसि संसारे, भावोऽभिप्रायवस्तुनोः ।।५२१।।**

प्रह्वे बन्धे । प्रगतमध्वानम् प्राध्वम् । "उपसर्गादध्वनः" ७।३।७९। इति अत् समासान्तः। दूरपथे यथा–प्राध्वं गता अपि मधौ पथिकाः समीयुः। प्रह्वे प्रवहणे वाच्यलिङ्गः। तत्र यथा – त्वद्बोधप्राध्वबुद्धेस्त्वद्दृष्टिनिश्चेष्टचक्षुषः। त्वत्कथोत्सुककर्णस्य कदा कालो ममैष्यति । बन्धे यथा–प्राध्वं कृत्वा तुरगयुगलस्यैष सूतः प्रयाति । बन्धे प्राध्वमिति मान्तमव्ययमपि । यथा–प्राध्वंकृत्य रथेष्वश्वान् । पूर्वं तु पूर्वजे । प्रागग्रे श्रुतिभेदे च । पूर्वति पूर्वं पृणाति वा । "नि घृषि" (उ० ५११) इति कित् वः। प्राक्पूर्वजयोर्वाच्यलिङ्गः। पूर्वजे आदिपुरुषे यथा–पूर्वैः किलायं परिवर्द्धितो नः ।।५२०।। प्रागिति दिग्देशः कालो वा। तत्र दिशि यथा–वल्लभीकृतपूर्वाशः पूर्वाशातिलको रविः। देशे यथा–पूर्वापरौ तोयनिधीव गाह्यः । काले यथा–यदा फलं पूर्वतपः समाधिना न तावता लभ्यममंस्त मानिनी । अग्रे प्रथमतोऽर्थे पुंक्लीबः। तत्र यथा–पूर्वं त्वद्गुणबद्धमेव हृदयं बन्धं पुनर्नार्हति । श्रुतिभेदे आगमविशेषे यथा–सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तसंपदः। तवैव ताः पूर्वमहार्णवोद्धृता जगत्प्रमाणं जिनवाक्यविप्रुषः। भवः सत्ताप्तिजन्मसु । रुद्रे श्रेयसि संसारे । भवनं भवति भवत्यस्मिन् वा भवः। औणादिको अप्रत्ययः। सत्तायामाप्तौ च यथा–विभवभवभवेनाहं यवस्ते युवानः। जन्मनि यथा–भवो हि लोकाऽभ्युदयाय तादृशाम् । रुद्रे यथा–तावत्स वह्निर्भवनेत्रजन्मा । श्रेयसि यथा–भवतु भवाय भवानी । संसारे यथा–भवच्छिद-

**स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु ।।**
**चेष्टायोन्योर्बुधे जन्तौ शृङ्गारादेश्च कारणे ।।५२२।।**

स्त्र्यम्बकपादपांसवः। भावोऽभिप्रायवस्तुनोः। स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु । चेष्टायोन्योर्बुधे जन्तौ शृङ्गारादेश्च कारणे । शब्दप्रवृत्तिहेतौ च । भवति भावः। "वा ज्वलादि" ५।१।६२ इति णः। भवनं वा भवतोऽस्मादभिधानप्रत्ययाविति वा । पञ्चदशस्वर्थेषु । अभिप्रायस्वभावात्मयोनिशब्दप्रवृत्तिहेतुषु पुंक्लीबः। शेषेषु पुंसि । अभिप्राये यथा—अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये । वस्तुनि यथा—जगति जयिनस्ते ते भावा न वेन्दुकलादयः ।।५२१।। स्वभावे यथा—भावानुरक्तवनितासुरतैः शपेयम् । जन्मनि यथा—उपकाराय हिमवतां भावो विधिना प्रतिज्ञातः। सत्तायां यथा—नासतो विद्यते भावो नाभावो विद्यते सतः। आत्मनि यथा—यतो बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिदं कथं जनम् । अत्र हि सर्वगतस्त्वं ममाप्यात्मा त्वं तत्रस्थिताहमित्यर्थमाहुः। क्रियायां धात्वर्थे यथा—धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते । लीलायां यथा—हावैर्भावविलासैश्च हरन्ति वरयोषितः। विभूतावैश्वर्ये यथा—शत्रोर्भावोऽपि हि श्रेयान् न मित्रस्य तु दुर्गतिः। अन्धकारोऽपि हि वरं न ज्योत्स्ना तुहिनाहिता । चेष्टायां कायकृते व्यापारे यथा—सर्वभावेन संसारः शुभेनाप्यशुभेन वा । बन्धनायैव साधूनां मुग्धानां तोषणाय च । योनावुत्पत्तिस्थाने यथा—को भावः खलचित्तानां जलानां विद्युतां तथा । अपूर्व एष सन्तानो न विधेः(विधिः) सृष्टिगोचरः। बुधेनाद्योक्त्या विदुषि यथा—सौगतजरत्परिव्राजिकायाः कामन्दक्या भूमिं भाव एव वेत्ति । जन्तौ यथा—भावा

शब्दप्रवृत्तिहेतौ च रेवा मन्मथयोषिति ॥
नील्यां मेकलकन्यायां लवः कालभिदिच्छिदि ॥५२३॥
विलासे रामजे लेशे*, लट्वा पक्षिकुसुम्भयोः ॥
लघ्वी ह्रस्वाविवक्षायां, प्रभेदे स्यन्दनस्य च ॥५२४॥

---

भवन्ति भवतो भवतो विरक्ताः। शृङ्गारादेः कारणे (प्र. श्रृङ्गारादिकारणे) यथा–स्थायिनो(स्वामिनो)ऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ॥५२२॥ शब्दप्रवृत्तिहेतौ यथा–द्विजातिभावादुपपन्नचापलः। तात्पर्योदयसुरतसम्वेगेष्वपि भंखः। तात्पर्ये यथा–हितं स्वपरयोः कार्यमहितं न(ना) चरेत्क्वचित् । शास्त्राणामिति भावं हि प्रवदन्ति मनीषिणः। उदये यथा–भावः पुण्यकृतां तेषां सर्वसन्तोषकृन्मतः। सुरतसम्वेगे यथा–हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः। कथय सुकृती कोऽयं मुग्धे त्वयाऽद्य विलोक्यते । रेवा मन्मथयोषिति । नील्यां मेकलकन्यायाम् । रेवृङ् गतौ । रेवते रेवा मन्मथयोषित् रतिः। नीली ओषधिः। मेकलकन्या नर्मदा । तत्र यथा–रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् । लवः कालभिदिच्छिदि । विलासे रामजे लेशे । लुनाति लवनं वा लवः। कालभित् कालभेदः। यदाह–अष्टादशनिमेषाः स्युः काष्ठा काष्ठाद्वयं लवः। तत्र यथा–लुप्ता पुनरावृत्तिस्तस्य लवस्यापि यो व्यतिक्रान्तः। छिदिच्छेदे लवने यथा–नखाग्रलवसम्प्राप्तसौभाग्यफलसम्पदः कान्त(कन्ता)कुचक्षेत्रभुवो बत चेतो विकुर्वते ॥५२३॥ विलासे यथा–बालालवेनैव मनो हरन्ति । रामजे रामपुत्रे यथा–मयाप्तं रामत्वं कुशलवसुता नत्वधिगता। लेशे यथा–साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने।

लेशे यथा–साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने।

**विश्वा: सुरेषु विश्वन्तु, शुण्ठ्यां भुवनकृत्स्नयो: ।।**
**विश्वा विषायां शिवं तु, मोक्षे क्षेमे सुखे जले ।।५२५।।**
**शिवो योगान्तरे वेदे, गुग्गुलौ वालुके हरे ।।**
**पुण्डरीकद्रुमे कीले शिवा झाटामलोमयो: ।।५२६।।**

लट्वा पक्षिकुसुम्भयो:। लटति लट्वा "लटि खटि" (उ० ५०५) इवि व:। पक्षिभेदे यथा–लट्वाप्रदक्षिणा श्रेष्ठा। कुसुम्भे यथा–लट्वापुष्पस्तव कितत‍ं भालपृष्ठं वहन्ती। लघ्वी ह्रस्वाविवक्षायां प्रभेदे स्यन्दनस्य च। लघुशब्दात् "स्वरादुतो गुणादखरो:" २।४।३५। इतिङ्याम्। लघ्वी ह्रस्वा या विवक्षा तस्यां यथा–आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्। स्यन्दनप्रभेदे यथा–क्षिप्तावरोधाङ्गनमुत्पथेन गां विलङ्घ्य लघ्वीं करभौ च भञ्जतु:(बभञ्जतु:)। विश्वा: सुरेषु। विशन्ति विश्वा: (विशति विश्व:)। "निघृषि" (उ० ५११) इति किद् व:। सुरादेवविशेषा: पुंभूम्नि। यदाहु: साध्यास्त्रयोदश प्रोक्ता विश्वे देवाश्चतुर्दश। अत्र विश्वे इति छान्दसत्वात्संज्ञायामपि जस इ:। विश्वन्तु शुण्ठ्यां भुवनकृत्स्नयो:। शुण्ठ्यां नगरे स्त्रीक्लीब:। भुवने क्लीबे कृष्णे वाच्यलिङ्ग:। भुवने यथा–सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव। कृत्स्ने यथा–विश्वं जगद्विशति शक्तिभिरेक ईश:। विश्वा विषायाम्। विषा ओषधिभेद:। शिवं तु मोक्षे क्षेमे सुखे जले। शेरतेऽस्मिन्ननेन वा शिवम्। "शीङापो ह्रस्वश्च वा" (उ० ५०६) इति व:। मोक्षे क्षेमे सुखे च यथा–विभ्रद्ब्रह्मशिर: शिवाय जगतामेणाङ्कचूडामणि:। क्षेमवत्यपि मंख:। यथा–शिवास्ते सन्तु पन्थान:। अशिवै: शिवारुतैरिति। जलमम्बु ।।५२५।। शिवो योगान्तरे वेदे गुग्गुलौ वालुके हरे। पुण्डरीकद्रुमे कीले।

**फेरौ शम्यां पथ्याधात्र्योः शिविर्भुर्जे नृपान्तरे ॥**
**शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ ॥५२७॥**
**सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः ॥**
**पिशाचादावात्मभावे बले प्राणेषु जन्तुषु ॥५२८॥**

योगान्तरे यथा–वरीयान् परिघः शिवः। वेदः श्रुतिः। गुग्गुलुर्महिषाक्षः। वालुकमोबधिः। हरे यथा–स वः पातु शिवः शश्वद् यत्प्रपञ्चमहोदधौ। उत्पद्यन्ते विपद्यन्ते ब्रह्माद्या बुद्बुदा इव। पुण्डरीकद्रुमो द्रुमविशेषः। कीले यथा–शिवप्रबद्धाः शिशवस्तुरङ्गाः। शिवा झाटामलोमयोः। फेरौ शम्यां पथ्याधात्र्योः। षट्स्वर्थेषु स्त्रियाम्। झाटामला ओषधिः। उमा गौरी तत्र यथा–सा शिवा वः शिवाय ॥५२६॥ फेरुः क्रोष्टा क्रोष्ट्री च तत्र यथा–अशिवैः शिवारुतैः। शमी वृक्षः। पथ्या हरीतकी। धात्री आमलकी। शिविर्भूर्जे नृपान्तरे। शेतेऽस्मिन्नसौ वा शिविः। "छवि छिवि" (उ० ७०६) इति साधुः। पुंसि। भूर्जो द्रुमः। नृपान्तरे यथा–सदस्यङ्ग देव्याः शिविनृपतिवशार्णवभुवः। याप्ययानेऽपि। तत्र तु स्त्रियाम्। यथा–तत्तद्विरागमुदितं शिबिकाधरस्थाः साक्षाद्विदुः स्म न मनागपि यानधुर्याः। शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ। शलति शुल्वम्। "शल्यतेरुच्चातः" (उ० ३१९) इति वः। ताम्रे यथा–शुल्वं भवति काञ्चनम्। यज्ञकर्म यज्ञक्रिया। आचारश्चरित्रम्। जलसन्निधिः जलसमीपम् ॥५२७॥ सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः। पिशाचादावात्मभावे बले प्राणेषु जन्तुषु। सीदन्त्यस्मिन् सत्वम्। "प्रह्वाह्वा" (उ० ५१४) इति साधुः। सतो भाव इति वा। गुणे पिशाचादौ बले जन्तुषु च पुक्लीबः। द्रव्यं पारिभाषिकम्

**सान्त्वं सामनि दाक्षिण्ये, स्रुवा मूर्वा स्रुवः स्रुचि ॥**
**हवस्तु सप्ततन्तौ स्यान्निदेशाह्वानयोरपि ॥५२९॥**

विशेष्याख्यम् । यदाहुः वस्तूपलक्षणम् यत्र सर्वनाम प्रयुज्यते द्रव्यमित्युच्यते सोऽर्थोऽभेद्यत्वेन विवक्षितः। तत्र यथा–सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । गुणे प्रकृतिगुणे यथा– रजोजुषे जन्मनि सत्ववृत्तये स्थितौ प्रजानां प्रलये तमः स्पृशे। चित्ते यथा–शुद्धसत्त्वस्य सर्वं हि क्षिप्रमेव विशुध्यति । व्यवसायोऽतिशयवद् वीर्यमवष्टम्भ इति यावत् । तत्र यथा– क्रियासिद्धिः सत्वे वसति महतां नोपकरणे । स्वभावे यथा– सत्वान्तः स्फुरता यवा कृतगुणाध्यारोपतुच्छाय वा । पिशाचादौ यथा–सत्वेनाधिष्ठितः केन केन तेऽपहृतामतिः। यस्मादेकपदे सर्वं वृत्तं तव तिरोहितम् । आत्मभावे विद्यमानतायां यथा– सत्त्वस्योभयवादिमानसलसद्दृष्टान्तवन्ध्यात्मनः। बले स्थाम्नि यथा–स्वभुजसत्ववशाज्जगती जितस्तव विसृष्टधनस्य च । प्राणेषु इन्द्रियादिषु दशविधेषु जन्तुषु जीवेषु च यथा-सत्वानि निन्ये नितरां महान्त्यपि व्यथां द्वयेषामपि मेदिनीभृताम् ॥५२८॥ सान्त्वं सामनि दाक्षिण्ये । सांत्व्यतेऽनेन सान्त्वम् । सामनि यथा–शत्रौ सान्त्वमपक्रिया । दाक्षिण्ये यथा–सान्त्ववान् शीलसम्पन्नः। स्रुवा मूर्वा । स्रवति स्रुवा । "निघृषि" (उ० ५११) इति किद् वः। मूर्वा ज्याहेतुः तृणविशेषः। स्रुवः स्रुचि । यथा–स्रुवैर्द्विजा जुह्वति हव्यमग्नौ । हवस्तु सप्ततन्तौ स्यान्निदेशाह्वानयोरपि । हूयते हवः। ह्वानं वा । "भावेऽनुपसर्गात्" ५।३।४२। इति अल् वाशब्दस्योत्वं च । सप्ततन्तौ अध्वरे यथा–अश्वप्रचारसद्योगाद्रेजुर्वीरा महाहवे । निदेश आज्ञा । आह्वानम् आकारणम् ।

**अंशुः सूत्रादि सूक्ष्मांसे, किरणे चण्डदीधितौ ॥**
**आशा ककुभि तृष्णायामाशुस्तु व्रीहिशीघ्रयोः ॥५३०॥**
**ईशः स्वामिनि रुद्रे च, स्यादीशा हलदण्डके ॥**
**काशस्तृणे रोगभेदे कीशः कपौ दिगम्बरे ॥५३१॥**

---

तयोर्यथा – परस्परहवाभीतैस्त्वदीयहवबृत्तिभिः। नाहमित्याह वाचं को नरेन्द्रा हवसत्क्षणे ॥५२९॥ अथ शान्ताः। अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ। अश्नुते अंशुः। "अशेरान्नोऽन्तश्च" (उ० ७१९) इति उः। पुंसि। सूत्रादि सूक्ष्मांशे यथा–अंशवस्तन्तुहेतवः। किरणे यथा–हिमांशुमाशुग्रसते तन्म्रदिम्नः स्फुटं फलम्। चण्डदीधितौ यथा– एषाब्जिनीषद्यदवाग्निराह सुदुग्निशावृत्तमिवेतदंशोः। आशा ककुभि तृष्णायाम्। आ अश्नुते अचि आशा अश्यतेऽनया(आश्यत्यनया)वा। "उपसर्गादातः" ५।३।११०। इति अङ्। द्वयोर्यथा–आदित्येन द्विजेनैव दक्षिणाशावलम्बिना। न केवलमनेनात्मादिवसोऽपि लघूकृतः। आशुस्तु व्रीहिशीघ्रयोः। अश्नुते आशुः। "कृवापाजि" (उ० १) इति उण्। व्रीहौ पुंसि। शीघ्रं शीघ्रगामिनि। वाच्यलिङ्गः। व्रीहौ यथा–आशून्‌ जहावानिशमाशु शुक्षणौ। शीघ्रे यथा–तिग्मांशुराशुराशांतान्। शैघ्र्येऽपि। तत्र तु क्लीबे ॥५३०॥ ईशः स्वामिनि रुद्रे च स्यात्। ईष्टे ईशः। स्वामिनि वाच्यलिङ्गः। तत्र यथा–तमीशकामरूपाणामत्याखण्डलविक्रमम्। रुद्रे यथा–मातरं कल्पयंत्वेनामीशो हि जगतः पिता। ईशा हलदण्डके। हलीशां नेशते वेश्यास्त्यक्तं लब्धां भुजङ्गतः। काशस्तृणे रोगभेदे। काशते काशनं वा काशः। तृणे पुंक्लीबः। तत्र यथा–वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसंकाशकाशाः। रोग-

**कुशो रामसुते दर्भे पापिष्ठे योक्त्रमत्तयोः ।।**
**कुशी लोहविकारे स्यात्कुशा वल्गा कुशं जले ।।५३२।।**
**केशः शिरसिजे पाशपाणौ ह्रीवेरदैत्ययोः ।।**
**क्लेशो रागादौ दुःखे च, कोशः कोष इवाण्डके ।।५३३।।**

भेदे यथा—वर्जयेत् काशवांश्चौर्यम् । कीशः कपौ दिगम्बरे । कायति कीशः। "ति निश" (उ० ५३७) इति साधुः। द्वयोर्यथा—कीशः कस्य न हास्याय ।।५३१।। कुशो रामसुते दर्भे पापिष्ठे योक्त्रमत्तयोः। कुश्यति कुशः। कंश्यति कौशले इति वा। "क्वचित्" इति डः। कौते वा "को वा" इति कित् शः। दर्भे पुंक्लीबः। पापिष्ठमत्तयोर्वाच्यलिङ्गः। रामसुते दर्भे च यथा – सतौ कुशलवोत्सृष्टगर्भक्लेदौ तदाख्यया। कविः कुशलवावेव चकार किल नामतः। पापिष्ठः पातकी । योक्त्रं योत्रम् । मत्तः क्षीवः। कुशी लोहविकारे स्यात् । "भाजगोण" २।४।३०। इति ङ्यां कुशी । यथा—कुशीलतैव यत्तेषां चिराय न सहिष्यते । कुशा वल्गा । वल्गा अश्वमुखरज्जुः। यथा—कुशासक्तकरास्तत्र परलोकजिगीषवः। अश्वप्रचारसद्योगा रेजुर्वीरा महाहवे । कुशं जले यथा—कुशेशया ताम्ररुचा करेण । एतच्छब्दविषय एवास्य प्रायेण प्रयोगः। यथा—कौमोदकी शब्दविषय एव । विष्णुवाचिनः कुमोदकशब्दस्य ।।५३२।। केशः शिरसिजे पाशपाणौ ह्रीवेरदैत्ययोः। क्लिश्यते इति केशः। "क्लिशः के च" (उ० ५३०) इति शः। केशते इति वा "क्वचित्" इति डः। कस्येशो वा चतुर्ष्वर्थेषु । शिरसिजे यथा—मयि जीवति यत्तातः केशग्रहमवाप्तवान् । पाशपाणौ प्रचेतसि यथा—केशो न वेशान्तशतैरपि रज्यते ।

**कुड्मले चषके दिव्येऽर्थचये योनिशिम्बयोः ।।**
**जातिकोशेऽसिपिधाने, दर्शः सूर्येन्दुसङ्गमे ।।५३४।।**

ह्रीवेरं वालकम् । दैत्यो दानवविशेषः। क्लेशो रागादौ दुःखे च। क्लिश्यतेऽनेन क्लेशनं वा क्लेशः। रागादयोऽविद्याऽस्मिता द्वेषाभिनिवेशाः। तत्र यथा–मैत्र्यादिचित्रपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः। दुःखे यथा–क्लेशः फले न हि पुनर्नवतां विधत्ते । कोशः कोष इवाण्डके । कुड्मले चषके दिव्येऽर्थचये योनिशिम्बयोः। जातीकोशेऽसिपिधाने । कुश्यति कोशः। कूयतेर्वा । "कोर्वा" इति शः। कुष्यते कोषः। कोष इवेति, कोशशब्दः कोषशब्दश्च नवस्वर्थेषु वर्तते इत्यर्थः। चषके पुंसि । असिपिधाने शिवायां च त्रिलिङ्गौ । अन्यत्र पुंक्लीबो । अण्डके यथा– एतच्चराचरं विश्वं ब्रह्मकोशविनिर्गतम् । ।।५३३।। कुड्मले मुकुलेऽर्थे चये द्रव्यसंचये च यथा–नालस्यप्रसरो जडेष्वपि कृता वासस्य कोशे रुचिः। चषके यथा–कोशेन वेश्याहि पिबन्ति कस्यं । दिव्ये शपथे यथा–कक्षानिक्षिप्तलोप्त्रस्य कोशपानमिदं तव । योनिरुत्पत्तिस्थानम् । तत्र यथा–कस्य न स्याद् रतिः कोशे । शिवायां यथा–कोशैर्व्रतत्यः प्रतिभान्ति कानने । जातीकोशो जातिफलम् । असिपिधाने यथा–दृढतरनिबद्धमुष्टेः कोशनिषण्यस्य सहजमलिनस्य । अर्थसंचयगृहे पद्मकर्णिकायां मांसखण्डिकायाश्च मंखः। अर्थसंचयगृहे यथा–यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ । तस्माद्द्विजेभ्यो दत्त्वार्धमर्द्धं कोशे प्रवेशयेत् । पद्मकर्णिकायां यथा–कृत्वापि कोशपानं भ्रमरयुवा पुरत एव कमलिन्याः। मांसखण्डिकायां यथा–पिशाचविघसान् कोशान् सास्थीन् कवलयन्त्यहो । शिवाशिवाराव-

**पक्षान्तेऽष्टौ दर्शने च दंशो वर्मणि चर्मणि ॥**
**दोषे वनमक्षिकायां खण्डने भुजगक्षते ॥५३५॥**
**दशा वर्त्ताव्यवस्थायां, दशास्तु वसनाञ्चले ॥**
**नाशः पलायने मृत्यौ, परिध्वस्तावदर्शने ॥५३६॥**

भरैर्विक्रुतावासयत्पलम् । दर्शः सूर्येन्दुसङ्गमे । पक्षान्तेऽष्टौ दर्शने च । दृश्यते युगपत् सूर्याचन्द्रमसावत्रेति दर्शनम् वा दर्शः ॥५३४॥ पक्षान्तेष्टिः कृष्णपक्षान्तयागः। तत्र सूर्येन्दुसङ्गमे यथा–दर्शे दर्शेन यजते पूर्णे पूर्णेन वै द्विजः। दर्शनम् आलोकनम् । दंशो व(च)र्मणि च(म)र्मषि । दोषे वनमक्षिकायां खण्डने भुजगक्षते । दशति दशनं वा दंशः। वनमक्षिकायां स्त्रीपुंसः। वर्मणि चर्मणि च यथा–विद्धः सदंशेऽङ्गकृतेऽपि दंशे । दोषे यथा–परदंशं न शंसन्ति सन्तः प्राणात्ययेऽपि च । वनमक्षिकायां यथा–आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च । खण्डने यथा–दशनदंशविकासिरदच्छदा । भुजगक्षते यथा–दंशेषु दंदशूकानामादध्याज्जलसेवनम् ॥५३५॥ दशा वर्त्ताव्यवस्थायां । दश्यते दशा स्थादित्वात् कः। द्वयोर्यथा–निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् । आसीदासन्ननिर्वाणप्रदीपार्चिरिवोषसि । दशास्तु वसनाञ्चले । स्त्रीपुंसः। प्रायेण बहुवचनान्तः। यथा–ते सान्द्रीभूय सद्यः क्रमविशददशाशादशाली विशालम् । शश्वत्सम्पादयन्तो वरममलमलं मङ्गलं वो दिशन्तु । नाशः पलायने मृत्यौ परिध्वस्तावदर्शने । नशनं नाशः। पलायने यथा–शत्रावतिबले प्राज्ञो नाशमित्य(मेवा)व धारयेत् । मृत्यौ यथा–अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् । परिध्वस्तौ यथा–अर्थनाशं मनस्तापं गृहे दुश्चरितानि च । अद-

**निशा हरिद्रयो रात्रौ, पशुश्छागे मृगादिषु ।।**
**प्रमथेऽपि च पाशस्तु, मृगपक्ष्यादिबन्धने ।।५३७।।**
**कर्णान्ते शोभनार्थः स्यात्कचान्ते निकरार्थकः ।।**
**छात्राद्यन्ते च निन्दार्थः पेशी मांस्यसिकोशयोः ।।५३८।।**

---

र्शने यथा–सूर्यस्य नाशे कमलैर्निमीलितम् ।।५३६।। निशा हरिद्रयो रात्रौ। निश्यति निशा। "उपसर्गादातोडोऽश्य:" ५।१।५६। इति डः। नेशन्त्स्यामिति वा स्थादित्वात् कः। हरिद्रयोरिति हरिद्रा दारुहरिद्रा च। रात्रौ यथा–तथा गृहीतं शशिना निशामुखम्। पशुश्छागे मृगादिषु। प्रमथेऽपि च। स्पशिः सौत्रः स्पशति पशुः। "स्पशि भ्रस्जेः स्लुक् च" (उ० ७३१) इति उः। पुंसि। छागे यथा–व्रजन्ति तामाशुगतिं यशस्विनो रणाश्च मेधे पशुतामुपागताः। मृगादौ यथा–विषाणदंष्ट्रा नखकोटिपाटनैः परेषु युद्धं पशवः प्रयुञ्जते। प्रमथेऽपिचेत्यत्र जातावेकवचनम्। तेन सर्वेऽपि गणा उच्यन्ते। तत्र यथा–पतिः पशूनामपरिग्रहोऽभूत्। पाशस्तु मृगपक्ष्यादिबन्धने। कर्णान्ते शोभनार्थः स्यात्कचान्ते निकरार्थकः। छात्राद्यन्ते च निन्दार्थः। पाति पाशः। "पादावम्यमि" (उ० ५२७) इति शः। पाशनं वा। मृगपक्ष्यादिबन्धने पुंक्लीबः। तत्र यथा–छित्वापाशमपास्य कूटरचनां भङ्क्त्वा बलाद् वागुराम् ।।५३७।। कर्णान्ते शोभनार्थ इति कर्णवाचिशब्दात् परत उत्तरपदस्थः पाशशब्दः प्रशंसायां वर्तते। यथा–पार्श्वतः कर्णपाशेन सर्वतो बन्धनं हिंसा। कचान्ते निकरार्थो यथा–तं केशपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिथिलं चमर्यः। छात्राद्यन्ते निन्दार्थो यथा–तं छात्रपाशं स मुनिः शशाप। पेशी मांस्यसिकोशयोः।

**मण्डभेदे पलपिण्डे, सुपक्वकणिकेऽपि च ।।**
**भूस्पृग् वैश्ये मानवे च, राशिर्मेषादिपुञ्जयोः ।।५३९।।**
**वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः ।।**
**वशानार्य्यां वन्ध्यगव्यां, हस्तिन्यां दुहितर्यपि ।।५४०।।**

मण्डभेदे पलपिण्डे सुपक्वकणिकेऽपि च। पिंशति पेशिः। "किलि पिलि" (उ० ६०८) इति इः। ङ्यां पेशी। पञ्च-स्वर्थेषु। मांसिर्गन्धद्रव्यविशेषः। आसिकोशः प्रत्याकारः ।।५३८।। मण्डभेदो मस्तु। पलपिण्डो मांसपिण्डस्तत्र यथा–मांस-पेशीं परित्यज्य ग्रहीतुं मत्स्यमिच्छसि। सुपक्वा कणिका यत्र स पक्वान्नविशेषः पूरिकाख्यः। भूस्पृग् वैश्ये मानवे च। भुवं स्पृशति भूस्पृग्। वैश्यस्तृतीयो वर्णः। मानवो मर्त्यः। राशिर्मे-षादिपुञ्जयोः। अश्नुते राशिः। "अशोरश्चादिः" (उ० ६८८) इति णिदिः। पुंसि। मेषादौ यथा–राशीनामुदयो लग्नम्। पुञ्जे यथा-अम्भश्च्युतः कोमलरत्नराशीनपांनिधिर्फेनपिनद्धभासः।।५३९।। वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः। वष्टि कामयते वशः। वशनं वा "युवर्ण" ५।३।२८। इति अल्। वनति वा। "कृ वृ भूवनिभ्यः कित्" (उ० ५२८) इति शः। जनो लोकः स्पृहा इच्छा तत्र यथा–दुर्जने स्ववशवर्त्तिनि कः स्यान्मत्सरः परिचयोऽथ दृढो वा। आयत्ते वाच्यलिङ्गस्तत्र यथा–यदीच्छसि वशीकर्तुमक्लेशेन जगत्त्रयम्। आयत्तत्वे यथा–सर्वः कार्यवशा-ज्जनोऽभिरमते। प्रभुत्वे यथा–वसूनि वाञ्छन्न वशी न मन्युना। अत्र हि वशः प्रभुत्वमस्यातीति वशी। वशा नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि। नार्यां यथा–वशाभिः स वशं नीतः। वन्ध्यगव्यां यथा–अकार्यसिद्धये नेयान्यङ्गतां विगुणान्यपि।

**वंशः सङ्घेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च ।।**
**वेशो वेश्यागृहे गेहे, नेपथ्ये च शशः पशौ ।।५४१।।**
**बोले लोध्रे नृभेदे च, स्पशो हेरिकयुद्धयोः ।।**
**स्पर्शो वर्गाक्षरे दाने, स्पर्शने स्पर्शके रुजि ।।५४२।।**

भवत्येव हि कुत्रापि यागे सद्दक्षिणा वशा । विघातायैव सा बुद्धिर्मूर्खस्याजवशा यथेत्यादौ वन्ध्यत्वोपचारात् गोरन्यत्रापि। हस्तिन्यां यथा—वशास्पर्शसुखास्वादप्रसारितः करः करी । दुहिता पुत्री तत्र यथा—वशाभिरपि वश्याभिः क्रियते पितुरुन्नतिः। वेश्यायामपि मंखः। यथा—सायं वशावेश्मसु दीपवत्सु स्वास्तीर्णतल्पेषु ससौरभेषु । साकूतसंगीतकसंकुलेषु संचेरिरे कामिजनाः प्रहर्षैः ।।५४०।। वंशः संधेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च। वमति वंशः। "पादावमि" (उ० ५२७) इति शः। सङ्घे समूहेऽन्वये वेणौ च यथा—स राजवंशो विजितारिवंशो वंशोत्थमुक्तोऽभितदामभूषः। पृष्ठावयवे यथा – वंशनाड़ीमतिक्रम्य त्रिसन्धित्रिकमुच्यते । आदिशब्दात् खड्गाद्यवयवेऽपि । यथा—सद्वंशवृत्तं सहजं च तैक्ष्ण्यं तेजोऽसहत्वं सततं परस्य । तुल्यस्त्वया भूमिप चन्द्रहासो निस्त्रिंशता तु व्यतिरिच्यतेऽस्य । वेशो वेश्यागृहे गेहे नेपथ्ये च । विशन्ति—अस्मिन् अनेन वा वेशः। वेश्यागृहे यथा-वेशवाटे भ्रमञ्जूटटङ्कोट्टङ्कितपट्टिकः। वाचाटष्टिट्टिभाकारो विटचेष्टैर्विचेष्टते । गेहे सामान्यगृहे यथा—वेशप्रवेशोऽशोभिमुखेन शुक्रे(के) । नेपथ्ये यथा—स एव वेशः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे । मूर्द्धन्योपान्त्यमप्यमुं केचिदाहुः । शशः पशौ । बोले लोध्रे नृभेदे च । शशति शशः। पशौ यथा—उद्या(द्य)न्तमुद्धृ(द्रु)तमनोकहजालमध्यादन्यः शशं गुणमनल्पमवन्नवाप ।।५४१।। बोलो गन्धरसः।

**अक्षो रथस्यावयवे, व्यवहारे बिभीतके ॥**
**प्रासके शकटे कर्षे, ज्ञाने चात्मनि रावणौ ॥५४३॥**

लोध्रो वृक्षः। नृभेदः कामशास्त्रोक्तलक्षणस्तत्र यथा–शशो वृषोऽश्व इति लिङ्गतो नायकभेदाः। स्पशो हेरिकयुद्धयोः। स्पशिः सौत्रः। स्पशति स्पशः। द्वयोर्यथा–शब्दविद्येव नो भाति राजनीतिरपस्पशा। सङ्ग्रामे स्वप्राणनिर्पेक्षो व्यालं हस्तिनं योधयति यः स तीक्ष्णाख्यः पुरुषस्तत्रापि। स्पर्शो वर्गाक्षरे(वर्गान्तरे) दाने स्पर्शने स्पर्शके रुजि। स्पृशति स्पर्शः। "पदरुज" ५।३।१६। इति घञ्। स्पर्शनं वा। वर्गाक्षरे यथा–स्पृष्टं करणं स्पर्शानाम्। दाने यथा–गोसहस्रस्य च स्पर्शः प्रायश्चित्तं परं स्मृतम्। अत्र ण्यन्तादल्। दाने हि ण्यन्तो दृश्यते यथा–गाः कोटिशः स्पर्शयता घटोध्नीः। तथा हि ग्रहीता स्पृशति दाता स्पर्शयतीति। स्पर्शने यथा–चिरात्सुतस्पर्शरसज्ञतां ययौ। स्पर्शकः स्पृष्टा। रुजि रोगविशेषे यथा–स्पर्शे धूमं प्रयोजयेत् ॥५४२॥ अथ षान्ताः। अक्षो रथस्यावयवे व्यवहारे बिभीतके। प्रासके शकटे कर्षे ज्ञाने चात्मनि रावणौ। अक्षति अक्षः। अश्नुते वा। "मा वा वद्यमि" (उ० ५६४) इति सः। रथावयवे यथा–अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः। व्यवहारो आयव्ययादिन्यायः। तत्र यथा–राजाध्यक्षः। बिभीतके यथा–अक्षेषु रक्षांसि यतो वसन्ति। प्रासके यथा–इत्थं नेयौ रजनिदिवसौ दोलयन् द्वाविवाक्षौ। शकटे यथा–हस्तिभिस्तुरगै रक्षैः संबाधेऽस्मिन् रणाङ्गणे। कर्षे यथा अक्षः षोडशमाषकः। ज्ञाने आत्मनि च यथा–अक्षेण दक्षो बुबुधेऽक्षरूपम्। रावणौ रावणसुते यथा–धनुर्धरकलादक्षो यदक्षो हतः। द्यूतबीजयोरपि मंखः।

**अक्षं सौवर्चले तुत्थे हृषीके स्यादुषा निशि ॥**
**बाणपुत्र्यां च ऋक्षस्तु स्यान्नक्षत्राच्छभल्लयोः ॥५४४॥**
**महीधरविशेषे च शोणके क्षतवेधने ॥**
**ऋषिर्वेदे मुनौ कर्षः कर्षणे मानभिद्यपि ॥५४५॥**
**कक्षो वीरुधि दोर्मूले कच्छे शुष्कवने तृणे ।**
**पापे कक्षा रिवभरज्जौ काञ्च्यां गेहप्रकोष्ठके ॥५४६॥**

---

द्यूते द्यूतमात्रे यथा–अक्षेण हारितं राज्यं पूर्वैः सक्षत्रियैरपि । बीजे पद्मादि फले यथा – कृतोऽक्षसूत्रप्रणयी तया करः। विभान्तमच्छस्फटिकाक्षमालयेत्यादौ तु उपचारात् ॥५४३॥ अक्षं सौवर्चले तुत्थे हृषीके स्यात् । सौवर्चलं कृष्णलवणम् । तुत्थं मयूरग्रीवम् । हृषीकम् इन्द्रियं तत्र यथा–जिताक्षस्य तृणं नारी निःस्पृहस्य तृणं नृपः । उषा निशि । बाणपुत्र्यां च । उषति उषा । द्वयोर्यथा–करैः स्पृशत्युषामिन्दुरनिरुद्ध इवाधिकम् । ऋक्षस्तु स्यान्नक्षत्राच्छभल्लयोः । महीधरविशेषे च शोणके क्षतवेधने । ऋज्यते ऋक्षः । "ऋजि रिषि" (उ० ५६७) इति कित् सः । नक्षत्रे पुंक्लीबः । नक्षत्राच्छभल्ल्योर्यथा– ऋक्षाणां भूरिधाम्नां श्रितमधिपतिना प्रस्फुरद्भीमतारम् ॥५४४॥ महीधरविशेषे यथा–विन्ध्यश्च पारियात्रश्च माल्यवानृक्षपर्वतः। शोणकोऽरलुवृक्षः । क्षतवे धनः क्षतच्छिद्रः । ऋषिर्वेदे मुनौ । ऋषति ऋषिः । "नाम्युपान्त्य" (उ० ६०९) इति किदिः पुंसि । वेदे यथा–राजानमभिषिञ्चेयुरार्षैर्मन्त्रैर्द्विजोत्तमाः । अत्र ऋषेर्वेदस्येमे आर्षा मन्त्राः । मुनौ यथा–रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः सम्वलिता विरेजिरे । कर्षः कर्षणे मानभिद्यपि । कर्षणं कृषति वा कर्षः । मानभेदे पुंक्लीबः । तत्र यथा–षोडषमाषो निगद्यते कर्षः ॥५४५॥ कक्षो वीरुधि दोर्मूले

**भित्तौ साम्ये रथभागेऽन्तरीयपश्चिमाञ्चले ।**
**उद्ग्राहिण्यां च कर्षूस्तु तुषाग्नौ कृषिकुल्ययोः ॥५४७॥**

कच्छे शुष्कवने तृणे पापे । कर्षति कक्षः । "मा वावद्यमि" (उ० ५६४) इति सः । दोर्मुले स्त्रीपुंसः । वीरुधि यथा–नास्ति कक्षो निरोषधिः । दोर्मूले यथा–स यस्य दशकन्धरं कृतवतोऽपि कक्षान्तरे । कच्छोऽनूपप्रायः । तत्र यथा–कक्षं विवक्षति गजः सलिलं पिपासुः । शुष्कवने यथा–आसीत्र्यक्षविपक्षकक्षदहनः । तृणे यथा–प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् । पापे यथा–कक्षायते प्रेयसि यः प्रपन्ने तं हन्त धिक्कापुरुषं वदन्ति । कक्षा त्विभरज्जौ काञ्च्यां गेहप्रकोष्ठके । भित्तौ साम्ये रथभागेऽन्तरीयपश्चिमाञ्चले । उद्ग्राहिण्यां च । इभरज्जौ यथा–सान्द्रत्वल्कास्तल्पताश्लिष्टकक्षा माङ्गी शोभामाप्नुवन्तश्चतुर्थीम् । काञ्च्यां रसनायां यथा–कक्षां समाक्रष्टुमथाचकाङ्क्षुः । गेहप्रकोष्ठको गृहभूमिभागः । तत्र यथा–सप्त कक्षा अतिक्रम्य ॥५४६॥ भित्तौ यथा–कक्षालग्ना शतपदी ग्रहीतुं न हि शक्यते । साम्ये यथा–पक्षीन्द्रकक्षां किमुपैति कक्षी । रथभागे यथा–दृढकक्षैः परोलक्षैः रथैः क्षुण्णक्ष्मातलः । अन्तरीयं निवसनं तस्य पश्चिमाञ्चले यथा–प्रलम्बकक्षाः खलु दाक्षिणात्याः । उद्ग्राहण्यां यथा-कतिकक्षा विवक्षसे । प्रतिज्ञायामपि मंखः । यथा–दृढकक्षस्तु विवदेद्यत्प्रमेयान्न हीयते । कर्षूस्तु तुषाग्नौ कृषिकुल्ययोः । कृष्यते कर्षणं कर्षति वा कर्षः । "कृषि चमि" (उ० ८२९) इति ऊः । तुषाग्नौ पुंसि । शेषयोः स्त्रियाम् । तुषाग्नौ करीषानले यथा–उद्दीप्य कर्षूं जुहुयात् य इच्छेद् ब्रह्मवर्चसम् । कृषौ यथा–कर्षूं कुर्वन्ति ये काले । कुल्या

**घोषः कांस्ये स्वने गोपघोषकाभीरपल्लिषु ।**
**घोषा तु शतपुष्पायां चोक्षः सुन्दरगीतयोः ।।५४८।।**
**शुचौ झषस्तु मकरे वने मीने झषा पुनः ।**
**नागवलायां तुषस्तु धान्यत्वचि बिभीतके ।।५४९।।**
**दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ ।**
**द्रुमे दक्षा तु मेदिन्यां ध्वाङ्क्षः काके बकेऽर्थिनि ।।५५०।।**

नदी सारणिर्वा नद्यां यथा—भगीरथी कर्षति देवकर्षूम्(गङ्गाम्)। सारणौ यथा-कर्षूभिरासेवितवृक्षकाणां क्रीडान्तराले मुनिकन्यकानाम् ।।५४७।। घोषः कांस्ये स्वने गोपघोषकाभीरपल्लिषु । घोषति घोषणं घोषन्ति अस्मिन्वा घोषः। पञ्चसु अर्थेषु। कांस्ये यथा—मुखा-मुखे निक्षिपघोषपत्रम्। स्वने यथा—शुश्राव घोषं न जनौधजन्यम्। गोपे आभीरपल्लौ च यथा—हैयङ्गवीनमादाय घोषवृद्धानुपागतान्। घोषको भाषकः। तत्र वाच्यलिङ्गः। घोषा तु शतपुष्पायां। शतपुष्पा ओषधिः। चोक्षः सुन्दरगीतयोः। शुचौ। चायते चोक्षः। "लाक्षा द्राक्षा" (उ० ५९७) इति साधुः। सुन्दरे शुचौ च वाच्यलिङ्गः। तयोर्यथा—रजकक्षालितक्षोमे चोक्ष-दन्तांशुरब्रबीत्। गीतं चोक्षशाटकरागः। तत्र यथा-प्रेक्षणीये विलासिन्या चोक्षरागहृतं मनः ।।५४८।। झषस्तु मकरे वने मीने। झषति झषः। मकरे मीने च यथा—स्त्रीमुद्रां झषके तनस्य महतीं सर्वार्थसंपत्करीम्। वने यथा—उज्झन्ति शीर्णं हि झषं विहङ्गाः। झषा पुनः। नागवलायां। नागवला ओषधिः। तुषस्तु धान्यत्वचि बिभीतके। तुष्यत्यनेन तुषः। "स्थादिभ्यः कः" ५।३।८२। इति कः। धान्यत्वचि यथा—तुषैरपि गरित्यक्ता न प्ररोहन्ति तण्डुलाः। बिभीतको वृक्षः। दोषेऽपि मंखः। भ्राम्यत्येष स कोऽपि निस्तुषगुणो दृष्टावशिष्टो जनः ।।५४९।। दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ।

**गृहे ध्वाङ्क्षी तु कक्कोल्यां न्यक्षः कात्स्न्यंनिकृष्टयोः ।**
**जामदग्न्येऽपि पक्षस्तु मासार्धे ग्रहसाध्ययोः ।।५५१।।**

द्रुमे । दक्षते दक्षः । पटौ वाच्यलिङ्गः । प्रजापतौ यथा—दक्षस्य कन्या भव पूर्वपत्नी । रुद्रवृषभश्शम्भोरनड्वान् । पटुश्चतुरः। तत्र कुक्कुटे च यथा—गौतमाह्वानमिषतः कामिनो बोधयत्यलम् । प्रभाते ताम्रचूडोऽत्र दक्षोऽसौ हि किमद्भुतम् । द्रुमो द्रुमविशेषः। दक्षा तु मेदिन्यां । मेदिनी पृथ्वी । ध्वाङ्क्षः काके बकेऽर्थिनि । गृहे । ध्वाङ्क्षति ध्वाङ्क्षते वा ध्वाङ्क्षः । काके यथा—ध्वाङ्क्षविरावी न पिको निवसन्नपि बलिभुजां भुवने । बके यथा—स्तब्धग्रीवो मौनी निश्चलपिहितार्द्धलोचनः शश्वत् । सजले जनो य आस्ते स किल ध्वाङ्क्षव्रती प्रोक्तः । अर्थी तर्कुको भिक्षुको वा । तत्र वाच्यलिङ्गः । तत्र यथा— क्षितितले ध्वाङ्क्षो जनो लक्षशः ।।५५०।। गृहं तु गृहविशेषः । यद् व्याडिः—ध्वजो धूमश्च सिंहश्च श्वा वृषश्च खरो गजः । ध्वाङ्क्षोऽष्टमश्च प्राच्याद्या ईशानान्ताः क्रमादमी । ध्वाङ्क्षी तु कक्कोल्यां । गौरादित्वाद् ङीः । कक्कोली ओषधिभेदः । न्यक्षः कात्स्न्यंनिकृष्टयोः । जामदग्न्येऽपि । न्यक्षति नियतान्यक्षराण्यस्येति वा न्यक्षः । निकृष्टे वाच्यलिङ्गः । कात्स्न्ये निकृष्टे च यथा—आसीन्न्यक्षविपक्षकक्षदहनः । जामदग्न्ये भार्गवे यथा—न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादयम् । पक्षस्तु मासार्धे-ग्रहसाध्ययोः । चुल्लीरन्ध्रे बले पार्श्वे वर्गे केशात्परश्चये । पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जरे । पच्यते पक्षः । "मा वा वदि" इति सः । त्रयोदशस्वर्थेषु । मासार्द्धे यथा—मासि मासि समाज्योत्स्नापक्षयोरुभयोरपि । ग्रहे यथा—अपक्षपातेन परीक्षमा-

**चुल्लीरन्ध्रे बले पार्श्वे वर्गे केशात्परश्चये ।**
**पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जरे ।।५५२।।**
**प्लक्षो द्वीपे गर्दभाण्डेऽश्वत्थे जटिनि पक्षके ।।**
**प्रेक्षाधीरीक्षणं नृत्तं प्रैषः प्रेषणपीडने ।।५५३।।**

णाद्वयं द्वयस्या प्रतीमं प्रतीमः । साध्ये यथा–साध्यधर्मविशिष्टो धर्मी पक्षः ।।५५१।। चुल्लीरन्ध्रे यथा–पक्षे क्षिप्त्वाशु शुक्षणिम्। बलें सैन्ये पिच्छे गरुति च यथा–चलितदुर्बलपक्षपरिग्रहः । पार्श्वं गृहपार्श्वद्वारम् । तत्र यथा–पक्षद्वारेण निर्गतः । वर्गे सजातीयगणे यथा–स्वपक्षक्षयकारकः । केशात्परश्चये समूहे यथा–न केशपक्षः क्षपितोऽपि रेणुना विपक्षनामग्रहलब्धमोहया । विरोधे यथा – विपक्षमखलीकृत्य प्रतिष्ठा खलु दुर्लभा । देहाङ्गे यथा – वामेन पक्षेण न दक्षिणेन न वाग् न चोत्तानमनातुरोऽपि । वियोगयोगात्परमोऽपि धीरो वज्रावपातादिव दुःखमाप्ते(स्ते) । सहाये यथा–सपक्षारुजवः शुद्धाः सफला गुणसेविनः । राजकुञ्जरे यथा–आरुह्यपक्षं क्षपितारिपक्षः ।।५५२।। प्लक्षो द्वीपे गर्दभाण्डेऽश्वत्थे जटिनि पक्षके । प्लोषति प्लक्षः । "प्लुषेः प्लष् च" (उ० ५६६) इति सः । पञ्चस्वर्थेषु । द्वीपे यथा–जम्बूद्वीपः सर्वमध्ये ततश्च प्लक्षो नाम्ना शाल्मलोतः क्रमोतः । गर्दभाण्डो वृक्षः । अश्वस्थः पिप्पलः । जटी पर्कटी तत्र यथा–प्लक्षप्ररोह इव सौधतलं बिभेद । पक्षकः पक्षद्वारम् । प्रेक्षा धीरीक्षणं नृत्तम् । प्रेक्षणं प्रेक्ष्यतेऽसावनया वा प्रेक्षा । धियां बुद्धौ यथा–प्रेक्षावन्तो विवक्षन्ते न क्षीणं न निरर्थकम् । ईक्षणे यथा–सततप्रेक्षया ज्ञाता सुसाध्या सामया सखे । प्रयत्नमात्राः संसाध्यास्तादृश्यः कथिता

**पौषो मासप्रभेदे स्यात्पौषं तु महयुद्धयोः ॥**
**भिक्षा सेवाप्रार्थनयोर्भृतौ भिक्षितवस्तुनि ॥५५४॥**
**माषो माने धान्यभेदे मूर्खे त्वग्दोषभिद्यपि ॥**
**मिषं व्याजे स्पर्द्धने च मेषो राश्यन्तरे हुडौ ॥५५५॥**

बुधैः । नृत्ये यथा–प्रेक्षा क्षणे वर्तते । प्रैषः प्रेषणपीडने । प्रेषणं प्रैषः । "प्रस्यै प्रैष्य" १।२।१४। इति एत्वम् । प्रेषणे यथा–प्रैषप्रौढा इह प्रैष्याः । प्रौहप्रौढिं न कुर्वते । पीडनं मर्दनम् । क्लेशोन्मानयोरपि ॥५५३॥ पौषो मासप्रभेदे स्यात् । पौषी पौर्णमासी अस्य पौषः । "साऽस्य पौर्णमासी" ६।२।९८। इति अण् । यथा–यदु(द्रू)क्तं पौषमाघयोः । पौषं तु महयुद्धयोः । पुष्ये भवं पौषम् । "भर्तुसन्ध्यादेरणि" ६।३।८९। तिष्यपुष्ययोर्भाणि । २।४।९०। इति य लुक् । मह उत्सवः। युद्धं सङ्ग्रामः। भिक्षा सेवाप्रार्थनयोर्भृतौ भिक्षितवस्तुनि । भिक्षणं भिक्ष्यते वा भिक्षा । "क्तेट" ५।३।१०६। इति अः । सेवायां यथा–भिक्षामाचरतः क्षयं परिगतः सर्वो गुणानां गणः । प्रार्थनायां यथा–भिक्षा सक्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे । भृतौ वेतने यथा–ऋत्विग्भ्यो न हि निर्वेदे भिक्षा देया कदाचन । नान्तर्वेद्यनियुक्तेभ्यो यथा–श्राद्धं त्वया चिता । अत्र हि प्रार्थना नास्ति । भिक्षितवस्तुनि यथा–भिक्षाभोजी तद्गृहे रुक्षगात्रः। ॥५५४॥ माषो माने धान्यभेदे मूर्खे त्वग्दोषभिद्यपि । मीयतेऽनेन माषः। "वृ कृ तृ मीङ् माभ्यः षः" (उ० ५४०) इति षः। माने धान्यभेदे च पुंक्लीबः । माने यथा–माषो दशार्द्धगुञ्जः । धान्यभेदे यथा – तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा । मूर्खो बालिशः । तत्र वाच्यलिङ्गः । त्वग्दोषभिदि यथा–माषकल्माष-

मोक्षो निःश्रेयसे वृक्षविशेषे मोचने मृतौ ।।
यक्षः श्रीदे गुह्यके च रक्षा रक्षणभस्मनोः ।।५५६।।
रूक्षोऽस्निग्धपरुषयोर्लक्षं व्यजशरव्ययोः ।।
संख्यायामपि वर्षस्तु समाद्विपांशवृष्टिषु ।।५५७।।

विग्रहः। मिषं व्याजे स्पर्द्धने च । मिषत्यनेन मिषम् । स्थादित्वात्कः। व्याजे यथा-हारान्तःस्थितपद्मरागमिषतः फालं दधौ शुद्धये । स्पर्द्धनं संघर्षः । मेषो राश्यन्तरे हुडौ । मिषति मेषः । लिहाद्यच् । मीयते वा । "वृ कृ तृ मीङ्" (उ० ५४०) इति षः । हुडौ पुंक्लीबः । राश्यन्तरे यथा-मेषोद्वृषमुपारूढाः । हुडौ यथा-यदपसरति मेषः कारणं तत्प्रहर्तुम् ।।५५५।। मोक्षो निःश्रेयसे वृक्षविशेषे मोचने मृतौ । मोक्षणं मोक्ष्यते वा मोक्षः । मुञ्चति वा । "मा वा वद्यमि" (उ० ५६४) इति सः । निःश्रेयसे यथा-उपेयुषो मोक्षपथं मनस्विनः । वृक्षविशेषो मुष्ककनामा तरुः। मोचने यथा-स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षम् । मृतौ यथा-मोक्षं गतोऽश्वः सहसैव कक्षे । यक्षः श्रीदे गुह्यके च । इज्यते यक्षः। मा वा वदि (५६४) इति सः। श्रीदे यथा-अथ वैश्रवणीयेऽत्र बलिं यक्षाय कल्पयेत् । गुह्यके यथा-यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु । रक्षा रक्षणभस्मनोः । रक्षणं रक्ष्यतेऽनया वा रक्षा । रक्षणे यथा-रक्षाहेतोर्नवशशिभृता वासवीनां चमूनाम् । भस्मनि यथा-होमाग्नि रक्षातिलकं चकार ।।५५६।। रूक्षोऽस्निग्धपरुषयोः । रूक्षयति रूक्षः । गुणे पुंसि । तद्वति वाच्यलिङ्गः । अस्निग्धो नीरसः । प्रेमवर्जितो वा । नीरसे यथा-भिक्षुभिर्लक्षितं क्षेत्रं रूक्षभैक्षबुभुक्षुभिः । प्रेमवर्जितपरुषयोर्यथा-इत्युक्तवन्तं जनकात्मजायां निता-

**वर्षवरेऽपि वर्षा तु प्रावृष्यथ विषं जले ।।**

**क्ष्वेडे विषा त्वतिविषा वृषो गव्याखुधर्मयोः ।।५५८।।**

न्तरूक्षाभिनिवेशमीशम् । लक्षं व्याजशरव्योः । संख्यायामपि । लक्ष्येतऽनेन लक्षम् । व्याजे पुंक्लीबः । शरव्ये क्लीबः । संख्यायां स्त्री क्लीबः । व्याजे यथा–सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् । रोमाञ्चलक्षेण स गात्रयष्टिं भित्वा निरक्रामदरालकेश्याः । शरव्यं वेध्यम् । संख्या दशसहस्रीलक्षणा । तयोर्यथा–लब्धलक्षा विपक्षेषु विलक्षास्त्वयि मार्गणाः । वर्षस्तु समा द्वीपांशवृष्टिषु । वर्षवरेऽपि । वृष्यते वर्षति वर्षणं वा वर्षः। वृणोति वा । "वृ कृ तृ" (उ० ५४०) इति षः वर्षवरे पुंसि । शेषेषु पुंक्लीबः। समायां वत्सारे यथा–जीवेद्वर्षशतं कोऽत्र यः फलान्यस्य पश्यति । द्वीपांशे यथा–एतदूढगुरुभारभारतं वर्षमद्य मम वर्तते वशे । वृष्टौ यथा–रसन्नरोदीद्मृशमम्बुन्तु वर्ष व्याजेन यस्याबहिरम्बुवाहः ।।५५७।। वर्षवरः षण्ढः । तत्र वर्षशब्दो भीमसेनो भीमवत् । वर्षा तु प्रावृषि वर्षन्ति मेघा आस्विति वर्षाः । स्त्रियां भूम्नि च । यथा–पङ्कभाजोऽपि हर्षाय वर्षाः । सस्याभिलाषिणाम् । अथ विषं जले । क्ष्वेडे । वेत्रेष्टि विषं पुंक्लीबः । द्वयोर्यथा–मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् । विषा त्वतिविषा अतिविषा ओषधिः । वृषो गव्याखुधर्मयोः । पुंराशिभेदयोः शृङ्ग्यां वासके शुक्लेऽपि च । श्रेष्ठे स्यादुत्तरस्थश्च । वर्षति वृषः । गवि यथा–असंपदस्तस्य वृषेण गच्छतः । आखौ मूषिके यथा–निर्जन्तौ वृषदंश एष कुरुते मूकः स्थितोऽप्यत्र किम् । धर्मे राशिभेदे च यथा–दिवसपतेरपि दिवसाः प्रयान्ति वृद्धिं वृषं चरतः ।।५५८।।

पुंराशिभेदयोः शृङ्ग्यां वासके शुक्लेऽपि च ॥
श्रेष्ठे स्यादुत्तरस्थश्च वृषी तु व्रतिविष्टरे ॥५५९॥
वृषा पुनः कपिकच्छ्वां शुषिः शुषिरशोषयोः ।
शेषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च ॥५६०॥

पुंभेदे यथा—शशो वृषोऽश्व इति लिङ्गतो नायकभेदाः । शृङ्गी ओषधिः वासक आटरूषकः शुक्लः शुक्राधिकः । तत्र यथा—त्यागी वृषः सुभग इत्यपि लब्धशब्दः । उत्तरस्थ इति उत्तरपदस्थः वृषशब्दः । श्रेष्ठे यथा—कविवृषनिषेव्यो विजयते । दानवेऽपि यथा—कृतगोपवधूरतेर्घ्नतो वृषमुग्रे नरकेऽपि सम्प्रति । प्रतिपत्तिरधः कृतैनसो जनताभिस्तव साधु वर्ण्यते । वृषी तु व्रतिविष्टरे । बुवन्तः सीदन्त्यस्यां वृषी । पृषोदरादित्वात् । यथा—वृषीष्वेवोच्चगादैः स्थितम् ॥५५९॥ वृषा पुनः कपिकच्छ्वाम् । कपिकच्छूर्लताभेदः। शुषिः शुषिरशोषयोः । शुष्यति शोषणम् शुषिः । "नाम्युपान्त्य" ५।१।५४। इति किदिः । स्त्रियाम् । शुशिरे छिद्रे यथा—वंशादिकं तु शुषिरम् अत्र हि शुषिश्छिद्रं विद्यतेऽस्येति मध्वादित्वाद् रः । शोषे यथा—वि(वे)शंतः शुषिशोकार्ताः सूकराः शश्वसुर्घनम् । अवग्रहदहत्सस्यामहान्त इव कर्षकाः । बलेऽपि मंखः । यथा—भ्रश्यच्छुशिनिरुत्साहमयासीत् तत्र तद्बलम् । शेषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च । शिनष्टि शिष्यते वा शेषः । शिष् हिंसायामित्यस्य वा भावे । श्लिष्यति वा । "श्लिषेः शे च" (उ० ५४३) इति षः । उपयुक्तेतरे पुंक्लीबः । अनन्ते नागराजे यथा—व्यादिश्यते भूधरतामवेक्ष्य कृष्णेनदेहोद्वहनाय शेषः । वधे यथा— न मेषशेषः शिवतातिशेषः । सीरिणि बलभद्रे

**शेषा निर्माल्यदाने स्याच्छोषः शोषणयक्ष्मणोः ।**
***अर्चिर्मयूखशिखयोरदोऽत्र च परत्र च ॥५६१॥**
**आगः स्यादेनोवदघे मन्तावाशीर्हितैषणे ।**
**उरगस्य च दंष्ट्रायामुषः संध्याप्रभातयोः ॥५६२॥**

यथा—निशम्य ताः शेषगवीरभिधातुमधोक्षजः। उपयुक्तेतरे यथा—मन्दाकिन्याः पयः शेषं दिग्वारण दिग्धारिण)मदाविलम् ॥५६०॥ शेषा निर्माल्यदाने स्यात्। यथा—तथेति शेषामिव भर्त्तुराज्ञा-*मादाय मूर्द्ध्ना मदनः प्रतस्थे । शोषः शोषणयक्ष्मणोः । शोषणं* शुष्यत्यनेन वा शोषः। शोषणे यथा—शफरी ह्रदशोषविक्लवा प्रथमा वृष्टिरिवान्वकम्पत । यक्ष्मणि क्षयरोगे यथा—अत्यन्त-सुरतश्लेषः शोषदोषाय कामिनाम् । अथ सान्ताः। अर्चिर्मयूख-शिखयोः। अर्च्यतेऽनयाऽर्चिः। "रुच्यर्चि" (उ० ९८९) इति इस्। स्त्रीक्लीबः। मयूखे यथा—प्रशमादर्चिषामेतदनुद्गीर्णमुरा युधम्। शिखा ज्वाला तत्र यथा—शृणु येन स कर्मणा गतः शलभत्वं हर लोचनार्चिषाम्। अदोऽत्र च परत्र च। अद्यते दृशा मनसा च तदित्यदः। "अदेरन्ध च वा" (उ० ९६३) इति अस्। वाच्यलिङ्गः। अत्र एतदर्थे यथा—चपलाजनं प्रति न चोद्यमदः परत्र। परस्मिन् विप्रकृष्टेऽर्थे यथा—इदमपचितं ध्वान्तं दूरादद: प्रविजृम्भते सपदि कनकक्षोदव्यूहप्रवाहनिभं नभः। अत्रेदमिति सन्निकृष्टं ध्वान्तं परामृश्य तदपेक्षया विप्रकृष्टे नभसि वर्तते। आमुष्मिकार्थसंसिद्ध्यै बद्धकक्षा हि साधवः। इत्यादौ सन्निकृष्टेह लोकापेक्षया विप्रकृष्टे परलोकेऽपि परत्र द्वारेण वर्तते। अनुपदेशेऽपि। तथा च—अनुग्रहानुपदेशेऽन्तरदः ३।१।५। इत्युक्तम् ॥५६१॥ आगः स्यादेनोवदघे मन्तौ।

*स्कन्धे त्रिभागे स्यादसिः खड्गे नदीभिदि। अर्चि०।

**उरो वक्षसि मुख्ये स्यादोजो दीप्तिप्रकाशयोः ।**
**अवष्टम्भे बले धातुतेजस्योकस्तु सद्मनि ॥५६३॥**

अगत्यनेन आगः। वस्त्यगिभ्यां णित् (उ० ९७०) इत्यस्। एति एनः। अर्तीण्भ्यां नस् (उ० ९७९) एनोवदिति आगः शब्दः एनः शब्दश्चेत्यर्थः। द्वावपि क्लीबे। अघे पापे यथा–अभ्यर्णमागस्कृतमस्पृशद्भिः। अह्लायाह्लामिनोसौव्यपनयतुतरामेनसामासनानि। मन्तौ अपराधे यथा–निशान्तनारीपरिधानधूननस्फुटागसाप्यूरुषलोलचक्षुषः। एनांसि मिथ्येव निवेद्य नीतः। स वैमनस्यंपि शुनैः प्रभुर्नः। आशीर्हितैषणे। उरगस्य च दंष्ट्रायाम्। आशासनमाशीः। आशंसति हिनस्ति वा। पृषोदरादित्वात्। स्त्रियाम्। हितैषणे हिताशंसायां यथा–अमोघाः प्रतिगृह्णन्तावर्थानुपदमाशिषः। उरगदंष्ट्रायां यथा–आशीस्तालुगता दंष्ट्रा यया विद्धो न जीवति। आशीविष इत्यत्र पृषोदरादित्वात् सलोपः। आशिशब्दाद्ङ्याम्। आशीति ईकारान्त इत्यन्ये। उषः संध्याप्रभातयोः। उषति उषः। "मिथि रञ्ज्युषि" (उ० ९७१) इति किदस्। संध्यायां स्त्रीक्लीबः। प्रभाते क्लीबः संध्यायां यथा–उषसि यासि न कान्तगृहं यदि। प्रभाते यथा–उषसि सर इव प्रफुल्लपद्मम् ॥५६२॥ उरो वक्षसि मुख्ये स्यात्। अर्यते उरः। "अर्तेरुराशौ च" (उ० ९६७) इत्यस्। क्लीबे वक्षसि यथा–उरसि निहितस्तारो हारः कृता जघने घने। मुख्ये प्रधाने यथा–तान् सर्वान् वरिवस्यति त्रिभुवने मर्त्योरसान्येव ते। अत्र हि मर्त्यानामुरांसि मर्त्योरसानि। "उरसोऽग्रे" ७।३।११४। इति समासान्तः। ओजो दीप्तिप्रकाशयोः। अवष्टम्भे बले धातुतेजसि। ओषति ओजः। "उषेर्ज च"

**ओकास्त्वाश्रयमात्रे स्यात्कंसस्तैजसमानयोः ।**
**पानपात्रे दैत्यभेदे कासूः शक्त्यायुधे रुजि ॥५६४॥**
**बुद्धौ विकलवाचि स्यात्गुत्सः स्तम्बगुलुञ्छयोः ।**
**हारभेदे ग्रन्थिपर्णे गोसो बोलविभातयोः ॥५६५॥**

(उ० ९५९) इत्यस् । पञ्चस्वर्थेषु क्लीबे दीप्तौ कान्तौ यथा—रूपं तदोजस्वितदेववीर्यम् । प्रकाश आलोकः । तत्र बले च यथा—अधितिष्ठति विश्वमोजसा स विवस्वानिव मेदिनीपतिः । अवष्टम्भे यथा—रूद्रौजसा तु प्रहृतं त्वयास्याम् । धातूनां रसादीनां तेजस्तत्र यथा—रोगार्ता हि निरोजसः । ओकस्तु सद्मनि । उच्यत्योकः । "उच्यञ्चेः कच" (उ० ९६५) इति अस् । क्लीबे यथा—तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ॥५६३॥ ओकास्त्वाश्रयमात्रे स्यात् । आश्रयमात्रे वर्तमान ओकः शब्दः पुंक्लीबः । तत्र यथा—निवेशयामासिथ हेलयोद्धृतं फणाभृतां छादनमेकमोकसः । कंसस्तैजसमानयोः । पानपात्रे दैत्यभेदे । काम्यते कामयते वा कंसः । "मावा वदि" (उ० ५६४) इति सः । दैत्यभेदे पुंसि । अन्यत्र पुंक्लीबः । तैजसं कांस्यधातुः । तत्र यथा—कंसेषु हंसः परमो न भुङ्क्ते । मानं हिरण्यमानविशेषः । पानपात्रे यथा—पीयूषकंसस्त्रिदिवौकसां शशी । दैत्यभेदे यथा—करोति कंसादिमहीभृतां वधाज्जनोमृगाणामिव यत्तव स्तवम् । कासूः शक्त्यायुधे रुजि । बुद्धौ विकलवाचि स्यात् । कसति कासूः। "कसिपद्यर्त्यादिभ्यो णित्" (उ० ८३५) इति ऊः । चतुर्षु अर्थेषु । विकलवाचि वाच्यलिङ्गः। अन्यत्र स्त्रियाम् । शक्तिनाम्नि आयुधे यथा—कासूभिरेवाशु रिपून्निराशुः । रुक् रोगभेदः ॥५६४॥ बुद्धौ यथा—कासूः कस्यापि

**चास इक्षुपक्षिभेदोश्छन्दः पद्येच्छयोः श्रुतौ ।**
**ज्यायान् वृद्धे प्रशस्ये च ज्योतिर्वह्निदिनेशयोः ॥५६६॥**

कीदृशी। विकलवाक् वाग्विकलः। विकलावागित्यन्ये। गुत्सः स्तम्बगुलुञ्छयोः। हारभेदे ग्रन्थिपर्णे। गुध्यते गुत्सः। "गुधि गृधेस्त च" (उ० ५६८) इति कित् सः। चतुर्षु अर्थेषु। स्तम्बे गुलुञ्छे च यथा–वत्सो जिघत्सति बलादपि शालिगुत्सम्। हारभेदो द्वात्रिंचल्लताहारः। ग्रन्थिपर्णं सुगन्धितृणविशेषः। गोसो बोलविभातयोः। गांस्यति गोसः। बोलो गन्धरसः। विभाते यथा–गोसेनासेविता विद्या न भुक्तं मध्यवासरे ॥५६५॥ चास इक्षुपक्षिभेदोः। चष् हिंसायाम्। चष्यते चासः। घञि पृषोदरादित्वात् सत्वम्। द्वयोर्यथा – दृष्टश्चासः शुभावासः। छन्दः पद्येच्छयोः श्रुतौ। छादयति छन्दः। "छदि बहिभ्यां छन्दोधौ च" (उ० ९५४) इत्यस्। क्लीबे। पद्यं गायत्र्यादि बन्धः। तत्र यथा–इहच्छन्दो मात्रश्रुतिरचितदुःशिक्षितधियः। इच्छायां यथा–मूर्खं छन्दोऽनुवृत्या च। इच्छायामकारान्तोऽपि। श्रुतौ वेदे यथा – छान्दसाश्चर्चयन्ति यत्। ज्यायान् वृद्धे प्रशस्ये च। अतिशयेन वृद्धः प्रशस्यो वा ज्यायान्। "गुणाङ्गाद्" ७।३।९। इति ईयसौ ज्यायानिति साधुः। वाच्यलिङ्गः। वृद्धे यथा–ज्यायान् दाशरथिर्बभञ्ज रहितज्याया-समैशं धनुः। प्रशस्ये यथा–ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता। ज्योतिर्वह्निदिनेशयोः। प्रकाशे दृशि नक्षत्रे। द्योतते ज्योतिः। "द्युतेरादेश्च जः" (उ० ९९१) इति इस्। पञ्चस्वर्थेषु क्लीबे। गौडस्तु भद्योतदृष्टिषु क्लीबे भास्करवह्न्योर्नेत्याह। वह्नौ यथा–धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः। दिनेशे

**प्रकाशे दृशि नक्षत्रे तपः कृच्छ्रादिकर्मणि ।**
**धर्मे लोकप्रभेदे च तपाः शिशिरमाघयोः ॥५६७॥**

**तमो राहौ गुणे पापे ध्वान्ते तरो जवे बले ।**
**त्रासो भये मणिदोषे तेजस्त्विड्रेतसोर्बले ॥५६८॥**

---

यथा–ज्योतिर्द्योतितविष्टपं विजयते राजीव संजीवकम् ॥५६६॥ प्रकाशस्तेजः। तत्र यथा–कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने। दृगत्र कनीनिका मध्यम् यन्मयः। तारानेत्र त्रिभागः स्याज्ज्योतिस्तत्यं च मांशकम्। नक्षत्रे यथा–ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्। तपः कृच्छ्रादि कर्मणि। धर्मे लोकप्रभेदे च। तप्यते तपः। "अस्" (उ० ९५२) इति अस्। क्लीबे। कृच्छ्रं सान्तपनम् आदिशब्दात् चांद्रायणादिव्रतम्। तत्र यथा–तपः क्व वत्से क्व च तावकं वपुः। धर्मे यथा–विनाप्यस्मदलंभूष्णरिज्यायै तपसः सुतः। लोकप्रभेदो जनो लोकाद् द्वितीयः। तपाः शिशिरमाघयोः। शिशिरे पुंसि। माघे पुंक्लीबः। शिशिरे यथा–ग्रीष्मे पञ्चाग्नितपसा तपस्यम्भोऽन्तरश्रिता। त्वया सायुज्यमाप्येत पार्वत्यत्र निदर्शनम्। माघे यथा–महतामपि चेतांसि लोभो मोहश्च नाशयेत्। तपास्तपस्यश्च यथा–सरसां कमलान्यहो ॥५६७॥ तमो राहौ गुणे पापे ध्वान्ते। ताम्यन्ति अनेन तमः। "अस्" (उ० ९५२) इति अस्। राहौ पुंक्लीबः। अन्यत्र क्लीबे। राहौ यथा–जग्रसे तमसेवेन्दुः। गुणे यथा–रजोजुषे जन्मनि सत्ववृद्धये स्थितौ प्रजानां प्रलये तमःस्पृशे। पापे यथा––कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसा सरयूतटाः। ध्वान्ते यथा–क्षपातमस्काण्डमलीमसं नभः। शोकेऽपि मंखः। यथा–अथान्धकारमाशानां शशामा

**नवनीते प्रभावेऽग्नौ दासो धीवरभृत्ययोः ।**
**वृषले दानपात्रे च दासी झिण्टयपि चेट्यपि ।।५६९।।**

श्यानसन्तति । न तु खण्डेन्दुचूडस्य प्रियाविरहजं तमः । तरो जवे बले । तरत्यनेन तरः। "अस्" (उ० ९५२) इति अस् । क्लीबे द्वयोर्यथा–कैलासनाथं तरसा जिगीषुः । त्रासो भये मणिदोषे । त्रसनं त्रस्यत्यस्माद्वा त्रासः । भये यथा–चक्षुर्यदीयमपहृत्य जनस्य चेतस्त्रासादिव श्रवणकन्दरदुर्गमेति । मणिदोषे यथा–अत्रासामणयो धार्याः । तेजस्त्विट्रेतसोर्बले । नवनीते प्रभावेऽग्नौ । तेजयति तेजः । "अस्" (उ० ९५२) इति अस् । क्लीबे । त्विषि दीप्तौ यथा–तत्तेजः प्रथमोद्भवं भ्रमकरं शौरं चिरं पातु वः । रेतसि शुक्रे यथा–अत्यादित्यं हुतवहमुखे संभृतं तद्धितेजः। बले यथा–तेजसां हिन वयः समीक्ष्यते ।।५६८।। नवनीते यथा–धेनुः स्तोकपयस्काऽपि सतेजस्का प्रशस्यते । प्रभावे प्रतापे यथा–इतस्ततो रूढतृणाङ्कुरेषु तेजो विषह्यं रिपुमन्दिरेषु । अग्नौ यथा–तेजसः सपदि राशिरुच्छ्रितः प्रादुरास किल वाहिनीमुखे । असहनत्वेऽपि मंखः । यद्भरतः–अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् । तत्र यथा–तेजः क्षमावानैकान्तः कालज्ञस्य महीपतेः। दासो धीवरभृत्ययोः। वृषले दानपात्रे च । दास्यतेऽस्मै दासः । धीवरे यथा–अपिपोतकृतावासैर्दासैराशा विजज्ञिरे । भृत्ये यथा–अद्यप्रभृत्यनवताङ्गि तवास्मि दासः । वृषले शूद्रे यथा–किं रे दास तपस्यसि । दानपात्रे यथा – ददौ दासाय वासांसि नृवर्यः सूर्यपर्वणि । दासी झिण्ट्यपि चेद्यपि (चेट्यपि) गौरादित्वाद्ङीः । झिण्टी वृक्षभेदः । चेद्यां यथा–निःशेषागार-

**धनुः शरासने राशौ पियालद्रौ धनुर्धरे ।**
**नभो व्योम्नि नभा घ्राणे बिसतन्तौ पतद्ग्रहे ।।५७०।।**
**प्रावृषि श्रावणे नासा घोणा द्वारोर्ध्वदारुणोः ।**
**पयः क्षीरे च नीरे च प्रसूरश्वा जनन्यपि ।।५७१।।**

कर्मश्रमशिथिलतनुः कुम्भदासी तथाऽत्र ।।५६९।। धनुः शरासने राशौ पियालद्रौ धनुर्धरे । धनति धनुः। "रुद्यर्त्ति" (उ० ९९७) इति उस् । शरासने पुंक्लीबः । अन्यत्र पुंसि । शरासने राशौ च यथा–धनुस्त्यागं करोत्यस्मिन्नर्कवक्तासरोत्सवे । पियालद्रुः राजादनः। धनुर्धरे यथा–धनुर्धनुष्पाणिरयं दुरापः । नभो व्योम्नि। नभ्यति नभः। "अस्" (उ० ९५२) इति अस् । क्लीबे यथा–ऋते रवेः क्षालयितुं क्षमेत कः। क्षपातमस्काण्डमलीमसं नभः । नभा घ्राणे विसतन्तौ पतद्ग्रहे । प्रावृषि श्रावणे । पञ्चस्वर्थेषु पुंसि । घ्राणं नासिका । विसतन्तुर्मृणालसूत्रम् । पतद्ग्रहः पालम् ।।५७०।। प्रावृषि यथा–प्रत्यासन्ने नभसि दयिता जीविता लम्बनार्थी(र्थं)। श्रावणे यथा–अहह पान्थ न जीवति ते प्रिया । नभसि मासि न यासि गृहं यदि । नासा घोणा द्वारोर्द्धदारुणोः। णासृङ् शब्दे नासते नासा । घोणा नासिका तत्र यथा–नासा विरोकपवनोल्ललितं तनीयो रोमोश्चतामिव रजः पृथिव्याः । द्वारशाखाया ऊद्ध्र्वे उपरि दारु द्वारोद्ध्र्वदारु । स्तम्भादीनामुपरिस्थं दारु इत्यन्ये । तत्र यथा–नासा निवेशित सिता सित रक्त पीतबिम्बा विशन्ति वसतीर्विहितातिथेयाः । पयः क्षीरे च नीरे च । पीयते पयः । पाहाक्भ्यां पयह्यौ च (उ० ९५३) इति अस् । क्लीबे । द्वयोर्यथा–यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां

**बर्हिः कुशेऽग्नौ भासस्तु भासि गृद्ध्रशकुन्तयोः ।**
**महस्तेजस्युत्सवे च मिसिर्मास्यजमोदयोः ॥५७२॥**
**शतपुष्पामधुर्योश्च मृत्सा वासी सुमृत्तिका ।**
**रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे ॥५७३॥**

---

रसज्ञः । प्रसूरश्वा जनन्यपि । प्रसूते प्रसूः । स्त्रियाम् । अश्वेति सगर्भा वडवा तस्यां यथा—न प्रसूर्वाहिनी या स्यात् । जनन्यां यथा—भिन्नप्रसूषु पुत्रेषु तथैकपितृकेषु च ॥५७१॥ बर्हिः कुशेऽग्नौ । बृंहति बर्हिः । वंहि वृंहेर्नलुक् च (उ० ९९०) इति इस् । कुशे पुंक्लीबः । अग्नौ पुंसि । कुशे दर्भे यथा—नियमविधिजलानां बर्हिषां चोपनेत्री । अग्नौ यथा—बर्हिर्मुखास्तर्हि लिहन्तु हव्यम् । अत्र हि बर्हिरग्निर्मुखं येषां ते बर्हिर्मुखा देवाः। भासस्तु भासि गृद्ध्रशकुन्तयोः । भासते भासः । भासि दीप्तौ यथा—भासैर्भासितदिग्मुखोऽयमुदितो देवः स्वयं भास्करः। गृद्ध्रो दूरदृक् । शकुन्तः पक्षिभेदः। महस्तेजस्युत्सवे च । मह्यते महः । "अस्" (उ० ९५२) इति अस् । क्लीबे । तेजसि यथा—अस्मिश्चन्द्रमसि प्रसन्नमहसि । उत्सवे यथा—सुसितवसनालंकारायां कदाचन कौमुदी महसि सुदृशि स्वैरं यान्त्यागतोऽस्तमभूद्विधुः । मिसिर्मास्यजमोदयोः । शतपुष्पामधुर्योश्च । मिश मशरोषे च । मिश्यते मिसिः । "नाम्युपान्त्य" (उ० ६०९) इति किदिः। पृषोदरादित्वाद् दन्त्यः सकारः। स्त्रियाम् । चतस्रोऽप्योषधयः ॥५७२॥ मृत्सा वासी सुमृत्तिका । मृदंस्यति मृत्सा प्रशस्तामृदेव वा । "सस्नौ प्रशस्ते" ७।२।१७२ इति स्वार्थे सः । वासी तक्षोपकरणम् । सुमृत्तिकायां यथा—निःशल्ये संस्कृते तत्र

**चोले रागे देहधातौ तिक्तादौ पारदेऽपि च ।**
**रसा तु रसनापाठासल्लकीक्षितिकङ्गुषु ।।५७४।।**
**रहो गुह्ये रते तत्वे रजो रेणुपरागयोः ।**
**स्त्रीपुष्पे गुणभेदे च रासः क्रीडासु गोदुहाम् ।।५७५।।**

---

मृत्सारचितवेदिकः। रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे। चोले रागे देहधातौ तिक्तादौ पारदेऽपि च। रसनं रस्यते वा रसः। एकादशस्वर्थेषु। वीर्ये शृङ्गारादौ विषे रागे तिक्तादौ च पुंक्लीबः। शेषेषु पुंसि। स्वादे यथा—स्कन्दस्य मातुः पयसां रसज्ञः। जले यथा—सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः। वीर्ये यथा—यथौषधिरसाः सर्वे मधुन्याहितशक्तयः। शृङ्गारादौ यथा—इत्थं सर्वरसात्मकः पशुपतिर्भूयात्सतां भूतये। विषे यथा—तीक्ष्णरसदान् भिक्षुकांश्च रिपौ प्रयुञ्जीत। द्रवे यथा—चातुर्जातकसंस्कृतोऽनुशनकैरिक्षो रसः पीयताम् ।।५७३।। चोलो गन्धरसस्तत्र सत्यभामायां भामाशब्दवदेकदेशेन रसशब्दः। रागोऽनुरक्तिस्तत्र यथा—रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव। देहधातौ यथा—रसासृक्मांसमेदोऽस्थि-मज्जाशुक्राणि धातवः। तिक्तादयस्तिक्तस्वाद्वम्ललवणोष्णकषायाः। तत्र यथा—षट्रसाः किल वैद्येषु भरतेऽष्टौ नवापि वा। पारदे यथा—रसोपविद्धा इव लोहधातवः। चर्वणेऽपि मंखः। यथा—आनन्दसान्द्रो रसः। रसा तु रसनापाठासल्लकीक्षिति-कङ्गुषु। पञ्चस्वर्थेषु स्त्रियाम्। रसना जिह्वा तत्र यथा—रसया रसयन्त्वमी। पाठा ओषधिभेदः सल्लकी वृक्षभेदः। क्षितौ पृथिव्यां यथा—फणावतस्त्रासयितुं रसाया मूलं विवक्षन्निव पन्नगारिः। कङ्गुर्धान्यभेदः ।।५७४।। रहो गुह्ये रते तत्वे। रहति

**भाषा शृङ्खलके वत्सा उरस्तुग्वर्षतर्णकाः।**
**वयस्तारुण्यबाल्यादौ खगे वर्चस्तु तेजसि ।।५७६।।**

रहः। अस् क्लीबे। गुह्यमत्रैकान्तम्। तत्र यथा–रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः। रते यथा–एवमालि निगृहीत साध्वसं शंकरो रहसि सेव्यतामिति। तत्त्वे यथा–को वा शंसति शिष्येभ्यः स्वगुरोर्विरहे रहः। अयमव्ययमपि। रजो रेणुपरागयोः। स्त्रीपुष्पे गुणभेदे च। रञ्जति रजः। "मिथिरञ्ज्युषि" (उ० ९७१) इति किदस्। क्लीबे। रेणौ यथा–रजोभिः स्यन्दनोद्धूतैरस्पृष्टालकवेष्टनौ। परागः पुष्परेणुस्तत्र यथा–भूरेणुदिग्वान् नवपारिजातमालारजोवासितबाहुमध्याः। स्त्रीपुष्पे यथा–अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः। गुणभेदे यथा–रजो जुषे जन्मनि। रज इत्यकारान्तोऽपि। रासः क्रीडासु गोदुहाम्। भाषाशृङ्खलके। रासृङ् शब्दे रासनं रासः। गोदुहां गोपालानां क्रीडा। यदाह–अनेकनर्त्तकीयोज्यं चित्रतालतयान्वितम्। आचतुः षष्ठि युगलाद्रासकं मसृणोद्धते। तत्र यथा–गोपीरासकवासितैकहृदयो गोष्ठे हरिः क्रीडति ।।५७५।। भाषाणां मागध्यादीनामेकान्तरितो न्यासः शृङ्खला कारत्वाच्छृङ्खलकम्। वत्सा उरस्तुग्वर्षतर्णकाः। वदति उद्यते वा वत्सः। "मावावद्यमि" (उ० ५६४) इति सः। उरसि पुंक्लीबः। अन्यत्र पुंसि। उरसि यथा–श्रीवत्सः कच्छवासी स भवतु भवतां खेदविच्छेदहेतुः। अत्र हि श्रीर्वत्से वक्षसि यस्य स श्रीवत्सो हरिः। तुक् अपत्यम्। तत्र यथा–वत्सेन रामभद्रेण ममादेशं विधित्सता। तुगित्युपलक्षणम्। तेन लघुभ्रात्रादावपि। यथा–मद्दोर्दण्डभराक्रान्तं वत्सलक्ष्मण लक्ष्यः। वर्षे वत्सरे यथा–

**गूथे रूपे वसुस्त्वग्नौ देवभेदे नृपे रुचि ॥**
**योक्त्रे शुष्के वसु स्वादौ रत्ने वृद्ध्यौषधे धने ॥५७७॥**

कालो हि वत्साद्यतिवाहनेन प्रश्नावितो दिव्यरसं प्रसूते। तर्णके यथा – यं सर्वशैलाः परिकल्प्य वत्सम् वयस्तारुण्य-बाल्यादौ खगे। वेत्ति वयः। "अस्" (उ० ९५२) इति अस्। क्लीबे। तारुण्ये यथा–गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्। बाल्यादौ यथा–आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्। पक्षिणि यथा–रुतानि शृण्वन् वयसांगणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम्। वर्चस्तु तेजसि। गूथे रूपे। वर्चते वर्चः। "अस्" (उ० ९५२) इत्यस्। तेजसि यथा–वर्चांसि चर्चयतु सोऽर्चित-पादपद्मः। ॥५७६॥ गूथे यथा–रसासृग्मांसभेदोऽस्थिमज्जाशुक्रा-न्नवर्चसाम्। रूपे यथा–यन्मदीयाः प्रजास्तत्र हेतुस्त्वद्ब्रह्मवर्चसाम्। वसुस्त्वग्नौ देवभेदे नृपे रुचि(रुचौ)। योक्त्रे शुष्के। वसन्त्यत्र वसुः। "भृमृतृत्सरि" (उ० ७१६) इति उः। पुंसि। शुष्के पुंस्यजयः। क्लीबे गौडः। अग्नौ देवभेदे च यथा–वसूपमातस्य वसूनि मेदिनी। नृपे राजविशेषे यथा–असत्यवचनात् प्राप नरकं वसुभूपतिः। रुचि दीप्तौ यथा – निरकासयद्र-विमपेतवसुं वियदालयादपरदिग्गणिका। योक्त्रे यथा–व्यवस्थां हरितां कुर्वन् वसुभिर्विततैः शुभाम्। प्रातस्तूनोऽरुणो देवो भास्वान् पातु स सारथिः। शुष्कम् आस्पानम्। देवमात्रेऽपि मंखः। यथा–रक्षाहेतोर्नव शशिभृता वासवीनां चमूनाम्। अत्र हि वासवस्येमा इति ईयप्राप्तेरयं शब्दोऽनुचितः स्यादिति वसूनां देवानामिमा इति व्याख्येयम्। वसु स्वादौ रत्ने वृद्ध्यौषधे धने। स्वादौ वाच्यलिङ्गः। रत्नादिषु क्लीबे। स्वादु

**वपुः शस्ताकृतौ देहे व्यासो मुनिप्रपञ्चयोः ।।**
**वासो वेश्मन्यवस्थाने वासा स्यादाटरूषके ।।५७८।।**
**विद्वान् ज्ञात्मविदोः प्राज्ञे वेधा धातृज्ञविष्णुषु ।।**
**शंसा वचसि वाञ्छायां शिरो मूर्द्धप्रधानयोः ।।५७९।।**

मधुरम् । रत्ने यथा—मन्दभाग्या न पश्यन्ति रत्नगर्भावसुन्धराम् । अत्र हि वसूनि रत्नानि धारयति वसुन्धरा । वृद्धिनाम औषधं वृद्धयौषधम् । धने यथा—भुजसमाहितदिग्वसुना कृताः। ।।५७७।। वपुः शस्ता कृतौ देहे । उप्यते वपुः "ह्यर्ति" (उ० ९९७)पति उस् । क्लीबे । शस्ताकृतौ शुभे आकारे यथा—वपुरेव तवाचष्टे भगवन् वीतरागताम् । देहे यथा—बभूव तस्याश्चतुरश्रशोभि वपुर्विभक्तं नवयौवनेन । व्यासो मुनिप्रपञ्चयोः । व्यासयति व्यस्यते वा व्यासः । मुनौ यथा—व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव । प्रपञ्चे यथा—प्रौढिर्व्याससमासौ च वासो वेश्मन्यवस्थाने । वसन्त्यत्र वसनं वा वासः । वेश्मनि यथा—दृश्यते कतिपयैः किल वासैस्तादृशमखिलमहो नगरं तत् । अवस्थाने यथा—एको वासः पत्तने वा वने वा । रतगृहेऽपि मंखः । यथा—शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः । वासा स्यादाटरूषके । वाति वासा । "मावावदि" (उ० ५६४) इति सः । स्त्रियाम् । आटरूषक औषधविशेषः ।।५७८।। विद्वान् ज्ञात्मविदोः प्राज्ञे । वेत्ति विद्वान् । "वा वेत्तेः क्वसुः" ५।२।३२। इति क्वसुः । वाच्यलिङ्गः । जानाति ज्ञो ज्ञाता । तत्र यथा—महिम्नः पारन्ते परमविदुषः । आत्मविदि यथा—विद्वान् दारसखः परं परिणतो नीवारमुष्टिंपचः । प्राज्ञे यथा—विद्वान् सर्वत्र पूज्यते । वेधा धातृज्ञविष्णुषु ।

**सेनाग्रभागे श्रेयस्तु मङ्गले धर्मशस्तयोः ।**
**सहो बले ज्योतिषि च सहा हेमन्तमासयोः ॥५८०॥**

विधति वेधाः । "अस्" (उ० ९५२) इति अस् । पुंसि । धाता विधाता तत्र यथा–सत्यं सुन्दरि वेधस्त्रिजगतीसारं त्वमेकाकृतिः । ज्ञो विद्वान् तत्र यथा–वराया वाचो यः प्रथित इह वेधाः कविवृषा । विष्णौ यथा – शेषशय्यासुखासीनं वेधसं ददृशुः सुराः । शंसा वचसि वाञ्छायाम् । शंसनं शंसा । "शंसि प्रत्ययात्" ५ । ३ । १०५ । इति अः । वचसि उक्तौ यथा – अनन्तशक्तेस्तव देव सा स्यादशक्तिजानाम सहस्रशंसा । वाञ्छायां यथा–शंसा सहस्रसङ्कीर्णे महेश मम मानसे । शिरो मूर्द्धप्रधानयोः । सेनाऽग्रभागे । शीर्यते शृणोति वा शिरः। "मिथि रञ्जि" (उ० ९७१) इति किदस् । क्लीबे । मूर्द्धनि यथा–बभार दुःखेन भृशानतं शिरः । प्रधाने यथा–कारस्कर शिरोभूतशूतः पूतदिगम्बरः ॥५७९॥ सेनाया अग्रभागोऽग्रप्रदेशविशेषः । तत्र यथा–आक्रम्याजेरग्निमस्कन्धमुच्चोरास्थायाथोवीतशङ्कं शिरश्च । हेला लोलावर्त्मगत्वातिमर्त्यं द्यामारोहन् मानभाजः सुखेन । श्रेयस्तु मङ्गले धर्मशस्तयोः । अतिशयेन प्रशस्यं श्रेयः । 'गुणाङ्गात्' । ७।३।९। इति ईयसौ । प्रशस्य श्रः । ७।४।३४। इति श्रादेशः । शस्ते प्रशस्ते वाच्यलिङ्गः । अन्यत्र क्लीबे । मङ्गले यथा–श्रेयांसि वो दिशतु वृत्तमृगेन्द्रजायः । धर्मे पुण्ये यथा–कथाऽपि खलु पापानामलमश्रेयसे यतः । शस्ते यथा–मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामिति । सहो बले ज्योतिषि च । सहते सहः । "अस्" (उ० ९५२) इति अस् । क्लीबे । बले यथा–कस्ते सहांसि

**स्रोतः प्रवाहेन्द्रिययोर्हंसोऽर्के मत्सरे च्युते ।**
**खगाश्वयोगिमन्त्रादिभेदेषु परमात्मनि ॥५८१॥**

सहते सह तेन तरस्विना। युक्तस्यैकेनेत्यादि । ज्योतिषि दीप्तौ यथा—कः सहेत रवेः सहः । सहा हेमन्तमासयोः। हेमन्ते ऋतौ मासे मार्गशीर्षे च यथा—न सहसा सहसाकृतवेपथुः ॥५८०॥ स्रोतः प्रवाहेन्द्रिययोः । स्रवति स्रोतः । "स्रुरीभ्यां तस्" (उ० ९७८) इति तस् । क्लीबे । प्रवाहे यथा—संसर्पन्त्या सपदि भवतः स्रोतसिच्छायया सा स्यादस्थोपगतयमुनासङ्गमे नाभिरामा । इन्द्रिये इन्द्रियद्वारे यथा—स्रोतसो मलिनीभावाद् व्याधिर्देहे प्रवर्तते । करिकरेऽपि मखः । यथा—स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः । नदीमात्रेऽपि यथा—स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् । हंसोऽर्के मत्सरे च्युते । खगाश्वयोगिमन्त्रादिभेदेषु परमात्मनि । निर्लोभनृपतौ प्राणवाते श्रेष्ठेऽग्रतः स्थितः । हन्ति हंसः । "मा वा वदि" (उ० ५६४) इति सः । एकादशस्वर्थेषु । अर्के यथा—हंसोदये हसति पङ्कजराजिरेषा । मत्सरो द्वेषः । तत्र यथा—मुनौ विहंसे सरसीव शुष्के । अच्युते विष्णौ यथा – लक्ष्मीसूनतटोत्तंसं हंसं कंसानिसूदनम् । खगाश्वयोगिमन्त्रादिभेदेष्विति भेदशब्दः प्रत्येकमभिसम्बध्यते । तत्र खगभेदे यथा—स्वनति सलीलं हंसः पुच्छायासेन वायसोऽप्युच्चैः । अश्वभेदे यथा—तं हंसमारुह्य स राजहंसः । योगिभेदे यथा—श्रेष्ठः परमहंसानां सप्तर्षीणामिवाङ्गिराः। मन्त्रभेदे यथा—विन्यस्येद्विधिना शिष्ये हंसं वंशसमुद्भवे । आदिशब्दाद् ध्यानादिग्रहः। परमात्मनि यथा—अहं स इति हंसो यं

**निर्लोभनृपतौ प्राणवाते श्रेष्ठेऽग्रतः स्थितः ।**
**हविः सर्पिषि होतव्ये हिंसा चौर्यादिके वधे ।।५८२।।**
**अहिः सर्पे वृत्रे वप्रे स्यादीहोद्यमवाञ्छयोः ।**
**कुहूर्नष्टेन्दुदर्शे स्यात्कुणिते कोकिलस्य च ।।५८३।।**

भिन्नाभिन्नो विपश्चिताम् ।।५८१।। निर्लोभनृपतौ यथा–सन्मानसवासरसः सततं पद्मैकनिलयतामाप्तः । त्वं शुद्धपक्षपाती सत्यं क्षितिपाल हंसोऽसि । प्राणवाते यथा–हंसश्चरति कायेऽस्मिन् पञ्चधा व्याप्य सर्वतः । अग्रतः स्थित उत्तरपदस्थितः । श्रेष्ठे यथा–कविहंससेव्यमानक्रमाम्बुजा जयति भारतीदेवी । हविः सर्पिषि होतव्ये । हूयते हविः । "रुच्यर्चि" (उ० ९८९) इति इस् । क्लीबे । सर्पिषि यथा–हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः । होतव्यमात्रे यथा–हविरावर्जितं होतस्त्वया विधिवदग्निषु । हिंसा चौर्यादिके वधे । हिंसाहेतुत्वात् हिंसनं वा हिंसा । चौर्यं स्तेयम् आदिशब्दादसत्यादिपरिग्रहः। तत्र यथा–हिंसा शून्यमयत्नलभ्यमशनम् । वधः प्राणव्यपरोपणम् । तत्र यथा–हिंसया जायतेऽल्पायुः ।।५८२।। अथ हान्ताः। अहिः सर्पे वृत्रे वप्रे । अंहते अहिः । "अम्भि कुण्ठि" (उ० ६१४) इति इः नलोपश्च । सर्पे स्त्रीपुंसः । अन्यत्र पुंसि । सर्पे यथा–अहेरिव गणाद् भीतः सन्मानान्नरकादिव । वृत्रे यथा–वृषेव सोऽन्यैरहितापकारी । वप्रे केदारे यथा–गतं नीरमहेर्बहिः । वप्रे प्राकारे इति मंखः । स्यादीहोद्यमवाञ्छयोः । ईहनम् ईहा । उद्यमे यथा–उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि । वाञ्छायां यथा–धमर्थि यस्य वित्तेहा तस्यानीहा गरीयसी । पुंल्लिङ्गोऽपि । कुहूर्नष्टेन्दुदर्शे स्यात्कुणिते कोकिलस्य च । कुहणि विस्मापने । कुहयते कुहूः।

ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे ।
उपरागे पूतनावादित्यादौ विधुन्तुदे ।।५८४।।
ग्राहो ग्रहे जलचरे गुहः स्कन्दे गुहा पुनः ।
गह्वरे सिंहपुच्छ्यां च गृहा दारेषु सद्मनि ।।५८५।।

"नृति शृधि" (उ० ८४४) इति किद्ः। स्त्रियाम्। नष्टेन्दुदर्शा नष्टचन्द्रा अमावास्या। द्वयोर्यथा–यशः प्रालेयांशुर्दिशिदिशि जगद्देव भवतस्तथायं दुर्वारां किरति किरणश्रेणिमधुना। यथासमयं(यथा सर्वं यं)राकामयसमयमालोक्य भुवनं कुहूशब्दो जातः पिकनिकरकण्ठैकशरणः ।।५८३।। ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे। उपरागे पूतनादावादित्यादौ विधुंतुदे। ग्रहणं गृह्यते गृह्णाति वा ग्रहः। ग्रहणे यथा–तदपि न किल वालपल्लवाग्रग्रह-परया विविदे विदग्धसंख्याः(सख्या)। निर्बन्धे आसक्तौ यथा–कोऽयं ग्रहस्तव विवेकवतोऽपि शंपासंपातकातरतरे तरूणीरतादौ। अनुग्रहे प्रसादे ग्रहशब्दः। सत्यभामायां भामाशब्दवत्। तत्र रणोद्यमे च यथा–त्वं देव कुर्याः समरे ग्रहं सदा। उपरागे चन्द्रसूर्योपप्लवे यथा–विषुवद्ग्रहसंक्रान्तिचन्द्रसूर्यसमागमे। विष्ट्यादिषु च योगेषु स्नानदानादि शस्यते। पूतनादौ यथा–सर्वज्वरहरो धूपो ग्रहाणां च विशेषतः। आदित्यादौ यथा–यात्यस्ताचलचुम्बिनीं परिणतिं देवो ग्रहग्रामणीः। विधुंतुदे राहौ यथा–शोकग्रहग्रस्त इवाननेन्दुर्दुनोति नो देवि मनो नितान्तम् ।।५८४।। ग्राहो ग्रहे जलचरे। ग्रहणं ग्राहः। बाहुलकाद् घञ्। गृह्णाति वा। "वा ज्वलादि" ५।१।६२। इति णः। ग्रहे यथा–नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयं ग्राहनिषक्तबाहुम्। जलचरे यथा–उद(ग्र)ग्राहमुदन्वतो जलमतिक्रामति। अव-

**प्रौहो निपुणतर्के स्याद्गजांह्रिपर्वणोरपि ।**
**बर्हः पर्णे परिवारे कलापे बहु भूयसि ।।५८६।।**

हारेऽपि मंखः । अवहारो मिथ्याकालक्षेपरूपः । तत्र यथा–जलबहुले बहुलेहावहितप्राणिप्रकारपरिकरिते । ग्राहसहस्रैर्दीर्घे संसाराब्धौ क इव तीर्णः । गुहः स्कन्दे । गूहति गुहः । "तुदादि विषि" (उ० ५) इति कित् यः । स्कन्दः षण्मुखः । तत्र यथा–गुहोपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यत् । गुहा पुनः । गह्वरे सिंहपुच्छ्यां च । गह्वरे यथा–दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । सिंहपुच्छी ओषधिः । गृहा दारेषु सद्मनि । गृह्णन्ति गृहाः । "गेहे ग्रहः" ५।१।५५। इति कः । उपचाराद्दारा गृहाः । पुंक्लीबः । पुंसि बहुवचनान्त एव । दारेषु यथा–गृहा मुनीनामुटजाङ्गणेषु । सद्मनि यथा – गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यवतां मनीषिणः ।।५८५।। प्रौहो निपुणतर्के स्याद्गजाङ्घ्रि(ह्रि)पर्वणोरपि । प्रौहणं प्रौहः । प्रौह्यतेऽसाविति वा घञ् । "प्रस्यैं षैष्य" १।२।१४। औत्वम् । निपुणतर्के यथा–प्रौहप्रौढिं न कुर्वते । गजांह्रिर्गजचरणः । तत्र यथा–आकुञ्चितप्रौहनिरूपितक्रमम् । करेणुरारोहयते निषादिनम् । पर्व उत्सवः । अङ्गुलिसन्धिर्वा । बर्हः पर्णे परीवारे कलापे । बर्हते बर्हः । परीवारे पुंसि । शेषयोः पुंक्लीबः । पर्णे यथा–अ(आ)पाण्डुरं केतकबर्हमन्यः । परीवारे यथा–दैवं चेत्प्रतिकूलं स्याद्बर्हस्तर्हि निरर्थकः । कलापे यथा–यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः । बहु भूयसि । त्र्यादिकासु च संख्यासु । बहति बहुः । "मि वहि" (उ० ७२६) इति उः । वाच्यलिङ्गः । भूयसि यथा–किं वा बहु ब्रूमहे यत्सत्यं

**त्र्यादिकासु च संख्यासु महावुत्सवतेजसी ।**
**मही भुवि नदीभेदे मोहौ मूर्च्छाविपर्ययौ ॥५८७॥**
**लोहं कालायसे सर्वतैजसे जोङ्गकेऽपि च ।**
**वहो वृषस्कन्धदेशे वायौ वाहोऽश्वमानयोः ॥५८८॥**

पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः ॥५८६॥ त्र्यादिकासु संख्यासु यथा–बहुभिर्वसुधाभुक्ता राजभिः सगरादिभिः। महावुत्सवतेजसी । महति महः । उत्सवे यथा–सीता स्वयंग्रहमहैः सुभगं भविष्णुः। तेजसि यथा–ग्रहपतिमहवीची न्यञ्चिता शातमिश्रः । महीभुवि नदीभेदे । गौरादित्वाद् ङीः । भुवि यथा – आसीन्नाथपितामही तव मही । नदीभेदे यथा–मही न हीयतेऽम्बोधेः । मोहौ मूर्च्छाविपर्ययौ । मोहनं मोहः । मूर्च्छायां यथा–अथ मोहपरायणा सती विवसा कामवधूर्विबोधिता । विपर्ययोऽविद्या तत्र यथा–न मुञ्चामः कामानहह गहनो मोहमहिमा ॥५८७॥ लोहं कालायसे सर्वतैजसे जोङ्गकेऽपि च । लुनाति लूयते वा लोहम् । "लूगोहः" (उ० ५८६) इति हः । पुंक्लीबः कालायसे यथा–हरति श्यामिकां हेम्नो न लोहस्य हुताशनः । सर्वतैजसे यथा–रसोपविद्धा एव लोहधातवः । जोङ्गकम् अगरु । तत्र यथा–स्वर्लोहकार्त्तस्वरपद्मपत्रैरानर्च गौरी सशरं पिनाकम् । वहो वृषस्कन्धदेशे वायौ । वहन्त्यनेनेति वहः । "गोचर संचर" ५।३।१३१। इति घः । वृषस्कन्धदेशे यथा–मिथ्यैव जातः स जनो वहे गड्डुरिवालसः । गन्धवहैकादेशेन सत्यभामायां भामाशब्दवद् वायौ वहशब्दः । 'आचरणवाहवर्णकवोढृष्वपि मंखः । आचरणे यथा–न स्नेहेन न दानेन न मानेन न सेवया । केन वहेन वहन्ते खला इति न निर्णयः । वाहे तुरगे यथा–बहु वहहेषितबृंहितगहने सैन्ये समन्ततः प्रसृते । क्व भवेदरिर्वराको गोमाय प्रायतां जातः । वर्णके

**वृषे वाहा तु वाहौ स्याद् व्यूहो निर्वाणतर्कयोः ।**
**समूहे बलविन्यासे सहः क्षमे बलेऽपि च ।।५८९।।**
**सहोर्व्यां सहदेवायां कुमार्यां नखभेषजे ।**
**मुद्गपर्ण्यां च सिंहस्तु राशिभेदे मृगाधिपे ।।५९०।।**

वर्णिकायां यथा—बहुप्रयोजनं वस्तु विविच्यारभते बुधः । वहं विना हि नादत्ते बहुमूल्यं विवेचकः । वोढरि यथा—विरह-हुतवहेन प्रेयसी दह्यतेऽसौ । नदेऽपि यथा—तं ससिन्धुवहमाप महीं यः । वाहोऽश्वमानयोः । वृषे । वाह्यते वाहः । अश्वे यथा—इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुद्धतं रजः । मानभेदे व्योमाख्ये यथा—मातुं वाहैः शक्यते नान्तरिक्षं वेत्तुं शक्यं नो मनो मानिनीनाम् ।।५८८।। वृषे यथा—खे खेलगामी तमुवाह वाहः । वाहा तु वाहौ स्यात् । यथा—शाम्यन्ति भोगेन न जातु कामा न वाहया वा सुतरः समुद्रः । व्यूहो निर्माण-तर्कयोः । समूहे बलविन्यासे । व्युह्यते रच्यते व्यूहः । निर्माणे यथा—सकुट्टिमव्यूहनिगूहितार्थः । तर्के वितर्के यथा—हिताहितव्यूहपरामनीषिणः । समूहे यथा—सर्वाङ्गीणवलीविलुप्त-नयनव्यूहः कथं वर्त्तते । बलस्य सैन्यस्य चक्रादिरूपेण विन्यासो बलविन्यासः । यदाह—दण्डो मण्डलभोगौ चाप्युत्सन्न-श्चाचलो दृढः । व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च । तत्र यथा – श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद् बलम् । सहः क्षमे बलेऽपि च । सहते सहः । क्षमे वाच्यलिङ्गः । तत्र यथा—असहः स हि शीतस्य । बले पुक्लीबः । तत्र यथा—न सहेन स हीयते ।।५८९।। सहोर्व्यां सहदेवायां कुमार्यां नखभेषजे । मुद्गपर्ण्यां च । उर्व्यां यथा—सहैव सहते सर्वम् । शेष ओषधि-वर्गः । सिंहस्तु राशिभेदे मृगाधिपे । श्रेष्ठे स्यादुत्तरस्थश्च ।

**श्रेष्ठे स्यादुत्तरस्थश्च सिंही स्वर्भाणुमातरि ।**
**वासावृहत्योः क्षुद्रायां स्नेहः प्रेम्णि घृतादिके ॥५९१॥**

**इत्याचार्यश्री हेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे**
**द्विस्वरकाण्डो द्वितीयः ॥**

हिनस्ति सिंहः । "हिंसेः सिम् च" (उ० ५८८) इति हः । अचि वा पृषोदरादित्वात्साधुः । राशिभेदे यथा–सिंहः पाणिपयोधिपावकमितैः । मृगाधिपे यथा–सरागं सारङ्गाः सह सहचरीभिर्विचरत । प्रचारः सिंहानामिह हि विधिना हन्त विहतः ॥५९०॥ उत्तरपदस्थः । श्रेष्ठे यथा–उद्योगिनं पुरुष-सिंहमुपैति लक्ष्मीः। सिंही स्वभर्णुमातरि वासावृहत्योः क्षुद्रायाम् । स्वर्भाणुमाता राहुमाता । तत्र यथा–सिंहिकासुतसंत्रस्तो भृगो मृगाङ्कमाश्रितः । जग्राह साश्रयं तत्र तमन्यः सिंहिकासुतः । वासा आटरूषकः । बृहती वार्त्ताकी । क्षुद्रा कण्टकारिका । स्नेहः प्रेम्णि घृतादिके । स्नेहनं स्निह्यतेऽनेन वा स्नेहः । पुंक्लीबः प्रेम्णि यथा – काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः । घृतादिके यथा–प्रदीपः स्नेहमादत्ते दशया ह्यन्तरस्थया । सौहार्देऽपि मंखः । यथा–तं जगाद गिरमुद्गिरन्निव स्नेहमाहितविकाशया दृशा ॥५९१॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकर कौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसंग्रह-टीकायां द्विस्वरकाण्डो द्वितीयः परिपूर्णः ॥२॥ (ग्रन्थाग्रं ५५००)**

# अनेकार्थसंग्रह–शब्दसूची

( इयं सूची (१) एकस्वर–द्विस्वरादिक्रमेण (२) कान्तादिक्रमेण (३) अकारादिक्रमेण च विलोकनीया ।

## एकस्वरः प्रथमः काण्डः ।


| शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ |
|---|---|---|---|---|---|---|---|---|
| कः | ५ | ४ | श्रीः | १२ | ९ | कोकः | ७ | १५ |
| कं | ५ | ४ | स्रूः | १३ | ९ | छेकः | ७ | १५ |
| खं | ५ | ४ | वः | १४ | १० | टंकः | ८ | १६ |
| खः | ६ | ५ | दिव् | १४ | १० | तर्कः | ९ | १६ |
| गौः | ६ | ५ | स्वः | १४ | १० | त्रिका | ९ | १६ |
| त्वच् | ७ | ५ | स्वं | १४ | १० | त्रिकं | ९ | १६ |
| न्यच् | ७ | ५ | दृश् | १५ | ११ | तोकं | १० | १७ |
| रुच् | ७ | ५ | विश् | १५ | ११ | द्विकः | १० | १७ |
| वाच् | ७ | ५ | तृष् | १५ | ११ | न्यङ्कुः | १० | १७ |
| जूः | ८ | ६ | त्विष् | १६ | ११ | नाकः | १० | १७ |
| ज्ञः | ८ | ६ | भास् | १६ | ११ | नाकुः | १० | १७ |
| सत् | ९ | ७ | मास् | १६ | ११ | निष्कः | ११ | १७ |
| भः | ९ | ७ | द्विस्वर–द्वितीय–काण्डः | | | पंकः | १२ | १८ |
| भं | ९ | ७ | अकारादिकान्ताः शब्दाः | | | पाकः | १२ | १८ |
| भूः | ९ | ७ | अर्कः | १ | १३ | बकः | १२ | १८ |
| मः | १० | ८ | अकं | १ | १३ | भूकः | १३ | १८ |
| मा | १० | ८ | अङ्कः | १ | १३ | भेकः | १३ | १८ |
| किं | १० | ८ | एकः | २ | १३ | मुष्कः | १३ | १८ |
| ज्या | १० | ८ | कल्कः | २ | १३ | मूकः | १४ | १९ |
| द्युः | ११ | ८ | कङ्कः | ३ | १४ | रंकः | १४ | १९ |
| रः | ११ | ८ | कर्कः | ४ | १४ | राका | १४ | १९ |
| राः | ११ | ८ | काकः | ४ | १४ | रेकः | १५ | १९ |
| द्रूः | १२ | ९ | काकं | ५ | १५ | रोकं | १५ | १९ |
| धूः | १२ | ९ | काका | ५ | १५ | रोकः | १६ | २० |
| पूः | १२ | ९ | किष्कुः | ६ | १५ | लंका | १६ | २० |

| शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ |
|---|---|---|---|---|---|---|---|---|
| लोकः | १६ | २० | सुखा | २८ | २६ | मृगी | ४१ | ३२ |
| वल्कं | १६ | २० | अथ गान्ताः | | | युगं | ४२ | ३२ |
| शल्कं | १६ | २० | अंगः | २८ | २६ | योगः | ४२ | ३२ |
| शकः | १७ | २० | अंगं | २९ | २६ | रंगः | ४४ | ३३ |
| शंका | १७ | २० | अंगा | २९ | २६ | रंगं | ४४ | ३३ |
| शंकुः | १७ | २० | इंगः | ३० | २७ | रागः | ४४ | ३३ |
| शाकः | १८ | २१ | खगः | ३० | २७ | लगः | ४५ | ३४ |
| शुकः | १८ | २१ | खड्गः | ३१ | २७ | लिंगं | ४५ | ३४ |
| शुकं | १९ | २१ | टंगः | ३१ | २७ | वंगः | ४६ | ३४ |
| शुल्कं | १९ | २१ | त्यागः | ३१ | २७ | वंगा | ४६ | ३४ |
| शूकः | २० | २२ | गर्गः, तुंगः, तुंगी | | ,, | वंगं | ४७ | ३५ |
| शूका | २० | २२ | दुर्गं | ३२ | २८ | वल्गुः | ४७ | ३५ |
| श्लोकः | २० | २२ | दुर्गा | ३२ | २८ | व्यंगः | ४७ | ३५ |
| शीकं | २१ | २२ | नागः | ३२ | २८ | वेगः | ४७ | ३५ |
| सृका | २१ | २२ | नागं | ३४ | २९ | शार्ङ्गं | ४८ | ३५ |
| स्तोकः | २१ | २२ | पिंगी | ३४ | २९ | शृंगी | ४८ | ३५ |
| अथ खान्ताः | | | पिंगा | ३४ | २९ | शृंगं | ४८ | ३५ |
| नखं | २२ | २३ | पिंगं | ३५ | २९ | शृंगः | ४९ | ३६ |
| नखः | २२ | २३ | पूगः | ३५ | २९ | शृंगी | ४९ | ३६ |
| न्युङ्खः | २३ | २३ | फल्गुः | ३५ | २९ | सर्गः | ५० | ३६ |
| प्रेङ्खा | २३ | २३ | भगः | ३६ | ३० | अथ घान्ताः | | |
| मुखं | २४ | २४ | भंगः | ३७ | ३० | अघः | ५१ | ३७ |
| रेखा | २४ | २४ | भगा | ३७ | ३० | अर्घं | ५१ | ३७ |
| लेखः | २५ | २४ | भंगिः | ३७ | ३० | उद्घः | ५१ | ३७ |
| लेखा | २५ | २४ | भागः | ३८ | ३१ | ओघः | ५२ | ३७ |
| वीखा | २५ | २४ | भृंगं | ३८ | ३१ | मेघः | ५२ | ३७ |
| शंखः | २६ | २५ | भृंगा | ३८ | ३१ | मोघः | ५२ | ३८ |
| शाखा | २६ | २५ | भृगुः | ३९ | ३१ | मोघा | ५३ | ३८ |
| शिखा | २७ | २५ | भोगः | ३९ | ३१ | लघुः | ५३ | ३८ |
| सखा | २८ | २६ | मागः | ४० | ३२ | श्लाघा | ५४ | ३८ |
| सुखं | २८ | २६ | मृगः | ४१ | ३२ | | | |

| शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ |
|---|---|---|---|---|---|---|---|---|
| अथ चान्ताः | | | अजः | ६४ | ४४ | लञ्जः | ७३ | ४९ |
| अर्चा | ५४ | ३८ | अब्जः | ६४ | ४४ | लाजः | ७३ | ४९ |
| कचः | ५४ | ३८ | अब्जं | ६४ | ४४ | लाजाः | ७४ | ४९ |
| कचा | ५५ | ३९ | आजि | ६५ | ४५ | लाजं | ७४ | ४९ |
| काचः | ५५ | ३९ | ऊर्जः | ६५ | ४५ | व्रजः | ७४ | ४९ |
| काञ्ची | ५५ | ३९ | कञ्जः | ६५ | ४५ | वणिक् | ७४ | ४९ |
| कूर्चः | ५५ | ३९ | कञ्ज | ६५ | ४५ | वाजं | ७५ | ५० |
| क्रौञ्चः | ५६ | ३९ | कुञ्जः | ६६ | ४५ | वाजः | ७५ | ५० |
| चर्चा | ५६ | ३९ | कुजः | ६६ | ४५ | व्याजः | ७६ | ५० |
| चञ्चुः | ५७ | ४० | कुब्जः | ६६ | ४५ | सज्जः | ७६ | ५० |
| नीचः | ५७ | ४० | खजा | ६७ | ४६ | सञ्जः | ७६ | ५० |
| मोचा | ५७ | ४० | खर्जूः | ६७ | ४६ | अथ ञान्ताः | | |
| मोचः | ५७ | ४० | गञ्जः | ६७ | ४६ | प्रज्ञः | ७६ | ५० |
| वचः | ५८ | ४० | गञ्जा | ६७ | ४६ | प्रज्ञा | ७६ | ५० |
| वचा | ५८ | ४० | गुञ्जा | ६८ | ४६ | यज्ञः | ७७ | ५१ |
| वाचिः | ५८ | ४० | द्विजः | ६८ | ४६ | संज्ञा | ७७ | ५१ |
| शची | ५९ | ४२ | द्विजा | ६९ | ४७ | अथ टान्ताः | | |
| शुचिः | ५९ | ४२ | ध्वजः | ६९ | ४७ | अट्टः | ७८ | ५१ |
| सूची | ६० | ४२ | निजः | ७० | ४७ | इष्टं | ७८ | ५१ |
| अथ छान्ताः | | | न्युब्जः | ७० | ४७ | इष्टिः | ७९ | ५२ |
| अच्छः | ६० | ४२ | न्युब्जं | ७० | ४७ | कटः | ७९ | ५२ |
| कच्छः | ६१ | ४३ | प्रजा | ७१ | ४८ | कष्टं | ८० | ५२ |
| कच्छाः | ६१ | ४३ | पिञ्जा | ७१ | ४८ | कटुः | ८१ | ५३ |
| कच्छा | ६१ | ४३ | पिञ्जः | ७१ | ४८ | कटू | ८१ | ५३ |
| गुच्छः | ६२ | ४३ | पिञ्जं | ७१ | ४८ | कुटः | ८२ | ५३ |
| पिच्छः | ६२ | ४३ | बीजं | ७१ | ४८ | कुटी | ८२ | ५३ |
| पिच्छं | ६२ | ४३ | भुजः | ७२ | ४८ | कूटं | ८२ | ५३ |
| पिच्छा | ६२ | ४३ | मर्जूः | ७२ | ४८ | कुण्टिः | ८३ | ५४ |
| म्लेच्छः | ६३ | ४४ | राजी | ७३ | ४९ | कोटिः | ८४ | ५४ |
| अथ जान्ताः | | | रुजा | ७३ | ४९ | खटः | ८४ | ५४ |

| शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ | शब्द | श्लोक | पृष्ठ |
|---|---|---|---|---|---|---|---|---|
| खाटिः | ८४ | ५४ | वटः | ९५ | ६१ | श्रेष्ठः | १०७ | ६७ |
| खेटः | ८५ | ५५ | वाटः | ९६ | ६१ | षष्ठी | १०७ | ६७ |
| गृष्टिः | ८५ | ५५ | वाटं | ९६ | ६१ | हठः | १०८ | ६७ |
| घंटा | ८६ | ५५ | वाटी | ९६ | ६१ | अथ डान्ताः | | |
| घटः | ८६ | ५५ | विटः | ९६ | ६१ | अण्डं | १०८ | ६७ |
| घृष्टिः | ८७ | ५६ | व्युष्टं | ९७ | ६२ | इडा | १०८ | ६७ |
| घोण्टा | ८७ | ५६ | व्युष्टिः | ९७ | ६२ | काण्डः | १०९ | ६८ |
| चटुः | ८७ | ५६ | विष्टिः | ९८ | ६२ | क्रीडा | १०९ | ६८ |
| जटा | ८८ | ५६ | सटा | ९८ | ६२ | कुण्डी | ११० | ६८ |
| | | | | | | कुण्डः | ११० | ६८ |
| झाटः | ८८ | ५६ | स्फुटः | ९८ | ६२ | क्ष्वेडः | ११० | ६८ |
| त्वष्टा | ८९ | ५६ | स्फुटिः | ९९ | ६३ | क्ष्वेडा | १११ | ६९ |
| त्रुटिः | ८९ | ५७ | सृष्टिः | ९९ | ६३ | क्ष्वेडं | १११ | ६९ |
| त्रोटिः | ८९ | ५७ | सृष्टं | ९९ | ६३ | क्रोडः | ११२ | ६९ |
| दिष्टं | ९० | ५७ | हृष्टः | १०० | ६३ | क्रोडं | ११२ | ६९ |
| दिष्टः | ९० | ५७ | अथ ठान्ताः | | | खण्डः | ११२ | ६९ |
| दिष्टिः | ९० | ५७ | कठः | १०१ | ६४ | गण्डः | ११२ | ६९ |
| दृष्टिः | ९० | ५७ | कण्ठः | १०१ | ६४ | गडुः | ११३ | ७० |
| पटुः | ९१ | ५८ | काष्ठं | १०२ | ६४ | गडः | ११३ | ७० |
| पट्टी | ९१ | ५८ | काष्ठा | १०२ | ६४ | गुडः | ११४ | ७० |
| पटु | ९२ | ५८ | कुण्ठः | १०३ | ६५ | गुडा | ११४ | ७० |
| पटुः | ९२ | ५८ | कुष्ठं | १०३ | ६५ | गोण्डः | ११४ | ७० |
| पुष्टिः | ९३ | ५८ | कोष्ठः | १०३ | ६५ | चण्डः | ११५ | ७२ |
